१ जंभियवहि उजुवा° को दी हा म । २ °लिया वियत्तु साम° जे । °लियत्तीर वियां° को हा दी म । ३ सालअहे को दी हा म । ४ °णुक्कुडुस्स जे । ५ °भागेणं जे । ६ °सीया जे । ७ °मासा य को । ८ °ज्जा य दु° जे म को । ९ ठासीयमणु° म । १० °ये पडिमं दी हा । ११ इक्किक्कं चरमराई अ म । एक्केक्कचरिमराईयं को । १२ चरम° दी हा । १३ °वासिओ म । १४ भगवं दी हा । १५ °पन्नं को । वण्णं दी हा । १६ °सिज्जाए म । १७ °ए पढम दिवसं दी हा को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

बारस चेव य वासा मासा छ च्चेव अद्धमासो य ।
वीरवरस्स भगवतो एसो छतुमत्थपरियाओ ॥४१९॥१९७१॥
एवं तवोगुणरतो अणुपुव्वेणं मुणी विहरमाणो ।
घोरं परीसहचमुं अधियासित्ता महावीरो ॥४२०॥१९७२॥
उप्पण्णम्मि अणंते णट्ठम्मि य छातुमत्थिए णाणे ।
रातीए संपत्तो महसेणवणम्मि उज्जाणे ॥४२१॥१९७३॥
अमरणररायमहितो पत्तो धम्मवरचक्कवट्टित्तं ।
[4]बितियम्मि समोसरणे पावाए मज्झिमाए तु ॥४२२॥१९७४॥
तत्थ किर सोमिलज्जो त्ति माहणो तस्स दिक्खकालम्मि ।
पउरा जणजाणवता समागता जण्णवाडम्मि ॥४२३॥१९७५॥
एगंते य विवित्ते उत्तरपासम्मि जण्णवाडस्स ।
तो देवदाणविन्दा करेन्ति महिमं जिणिन्दस्स ॥४२४॥१९७६॥
भवणवति वाणमंतर जोतिस[१३०-प्र०]वासी विमाणवासी य ।
सव्विड्ढीय सपरिसा कासी णाणुप्पतामहिमं ॥१९७७॥
मणिकणगरतणचित्तं भूमीभागं समंततो सुरभिं ।
आजोअणंतरेणं करेन्ति देवा विचित्तं तु ॥४२५॥१९७८॥
[11]वेंटट्ठाइं सुरभिं जलथलयं दिव्वकुसुमणीहारिं ।
[12]पइरन्ति समंतेणं दसद्धवण्णं कुसुमवासं ॥४२६॥१९७९॥

---

१ °सेत्ता को । संतो जे । २ वणं तु उज्जाणं जे । ३ वरधम्मच° म को । ४ बीयं पि समोसरणं को हा दी म । ५ किल दी हा । ६ करिंति म । ७ °वई वा° म । ८ ड्ढीए को । °ड्ढीइ म । °ड्डिए दी हा । ९ इतः पूर्वं गाथाद्वयमधिकं महादाकोपु । यथा—

समोसरणे केवइया रूव पुच्छ वागरण सोयपरिणामे ।
दाणं च देवमल्ले मल्लाणयणे उवरि तित्थं ॥
जत्थ अपुव्वोसरणं जत्थ व देवो महिड्ढिओ एइ ।
वाउदयपुप्फवद्दलपागारतियं च अभिओगा ॥

को २०००-२००१ । हा ५४३-४ । दी ५४४-५ । म ५४३-४ । 'समोसरणे' इति प्रथमां गाथामधिकृत्य—"इयं च गाथा केषुचित्पुस्तकेषु अन्यत्रापि दृश्यते । इह पुनर्युज्यते, द्वारनियमतोऽसंमोहेन समवसरणवक्तव्यताप्रतीतिनिमित्तत्वादिति" इत्युक्तं हरिभद्रैः । १० करिंति म । ११ विंट° म । १२ पयरिंति म ।

मणिकणगरतणचित्ते[1] समंततो तोरणे [2]विगुव्वंति ।
सच्छत्तसा[3]लभंजियमगरद्धयचिन्धसंठाणा[4] ॥४२७॥१९८०॥

तिण्णि य पागारवरे रतणविचित्ते तहिं सुरगणिन्दा ।
मणिकंचणक[5]विसीसगविभूसिते ते विगुं[6]व्वंति ४२८॥१९८१॥

त[7]त्तो य समंतेणं कालागरुकुन्दुरुक्कमीसेणं ।
गंधेण[8] मणमवेन्ता धूवयघडियो[9] विगुं[10]व्वंति ॥४२९॥१९८२॥

उक्कुं[11]ट्ठिसीहणातं कलकलसद्देण सव्वतो सव्वं ।
तित्थगरपातमूले करेन्ति देवा णिवतमाणा ॥४३०॥१९८३॥

१ °त्ते चउद्दिसिं तो° को म हा दी । २ विउव्विति म । विउव्वेंति को । विउव्वंति हा दी । ३ °सालि° जे । ४ °ठाणे हा दी को म । ५ कव° जे । ६ विउव्वंति म को । विउव्वेंति हा दी । ७ इतः पूर्वं गाथाद्विकं हादीमप्रतिषु अधिकं वर्तते यथा—

अब्भिंतर मज्झ बहिं विमाणजोइसभवणाहिवकया उ ।
पायारा तिन्नि भवे रयणे कणगे य रयए य ॥

मणिरयणहेमयाऽवि य कविसीसा सव्वरयणिया दारा ।
सव्वरयणामय च्चिय पडागझयतोरणविचित्ता ॥

म ५४९–५० । हा ५४९–५० । दी ५५०-५१ । ८ °ण मणहरेणं धूवघ° म दी हा । ९ धूवघ° को । १० विउव्वेंति दी हा । विउव्वंति म को । ११ उक्किट्ठि° म । इतः पूर्वं निम्नलिखिता गाथा अधिकाः सन्ति हामदीषु—

चेइदुमपेढछंदय, आसणछत्तं च चामराओ य ।
जं चऽण्णं करणिज्जं, करेंति तं वाणमंतरिया ॥

साहारणओसरणे, एवं जत्थिड्ढिमं तु ओसरइ ।
एक्कु चिय तं सव्वं, करेइ भयणा उ इयरेसिं ॥

सूरोदय पच्छिमाए, ओगाहन्तीए पुव्वओ ईइ ।
दोहिं पउमेहिं, पाया मग्गेण य होइ सत्तऽन्ने ॥

आयाहिण पुव्वमुहो, तिदिसिं पडिरूवगा उ देवकया ।
जेट्ठगणी अण्णो वा, दाहिणपुव्वे अदूरंमि ॥

जे ते देवेहिं कया, तिदिसिं पडिरूवगा जिणवरस्स ॥
तेसिं पि तप्पभावा, तयाणुरूवं हवइ रूवं ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तित्थाइसेससंजय, देवी वेमाणियाण समणीओ ।
भवणवइवाणमंतर, जोइसियाणं च देवीओ ॥
केवलिणो तिउण जिणं, तित्थपणामं च मग्गओ तस्स ।
मणमादी वि णमंता, वयंति सट्ठाणसट्ठाणं ॥
भवणवई जोइसिया, बोद्धव्वा वाणमंतरसुरा य ।
वेमाणिया य मणुया, पयाहिणं जं च निस्साए ॥
संजयवेमाणित्थी संजया पुव्वेण पविसिउ वीरं ।
काउं पयाहिणं, पुव्वदक्खिणे ठंति दिसिभागे ॥ (भाष्यम्)
जोइसियभवणवंतरदेवीओ, दक्खिणेण पविसंति ।
चिट्ठंति दक्खिणावरदिसिंमि, तिगुणं जिणं काउं ॥ (भाष्यम्)
अवरेण भवणवासी वंतरजोइससुरा य अइगंतुं ।
अवरुत्तरदिसिभागे ठंति जिणं तो नमंसित्ता ॥ (भाष्यम्)
समहिंदा कप्पसुरा, राया णरणारिओ उदीणेणं ।
पविसित्ता पुव्वुत्तरदिसीए चिट्ठंति पंजलिया ॥ (भाष्यम्)
एक्केक्कीय दिसाए, तिगं तिगं होई सन्निविट्ठं तु ।
आदिचरिमे विमिस्सा, थीपुरिसा सेसपत्तेयं ॥
एतं महिड्ढियं, पणिवयंति ठियमवि वयंति पणमंता ।
णवि जंतणा ण विकहा, ण परोप्परमच्छरो ण भयं ॥
बिइयंमि होंति तिरिया, तइए पागारमन्तरे जाणा ।
पागारजढे तिरियाऽवि होंति पत्तेय मिस्सा वा ॥
सव्वं च देसविरतिं, सम्मं घेच्छति व होति कहणा उ ।
इहरा अमूढलक्खो, न कहेइ भविस्सइ ण तं च ॥
मणुए चउमण्णयरं, तिरिए तिण्णि व दुवे व पडिवज्जे ।
जइ नत्थि नियमसो च्चिय सुरेसु सम्मत्तपडिवत्ती ॥
तित्थपणामं काउं, कहेइ साहारणेण सद्देणं ।
सव्वेसिं सण्णीणं जोयणणीहारिणा भगवं ॥
तप्पुव्विया अरहया, पूइयपूता य विणयकम्मं च ।
कयकिच्चोऽवि जह कहं, कहए णमए तहा तित्थं ॥



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जत्थ अपुव्वोसरणं, न दिट्ठपुव्वं व जेण समणेणं ।
बारसहिं जोयणेहिं सो एइ अणागमे लहुआ ॥
सव्वसुरा जइ रूवं, अंगुट्ठपमाणयं विउव्वेज्जा ।
जिणपायंगुट्ठं पइ ण सोहए तं जहिंगालो ॥
गणहर आहार अणुत्तरा (य) जाव वण चक्कि वासु बला ।
मण्डलिया ता हीणा, छट्ठाणगया भवे सेसा ॥
संघयण रूव संट्ठाण, वण्ण गई सत्त सार उस्सासा ।
एमाइणुत्तराइं, हवंति नामोदए तस्स ॥
पगडीणं अण्णासु वि, पसत्थ उदया अणुत्तरा होंति ।
खयउवसमेऽवि य तहा, खयम्मि अविगप्पमाहंसु ॥
अस्सायमाइयाओ, जा वि य असुहा हवंति पगडीओ ।
णिंबरसलवो व्व पए ण होंति ता असुहया तस्स ॥
धम्मोदएण रूवं, करेंति रूवस्सिणोऽवि जइ धम्मं ।
गिज्झवओ य सुरूवो, पसंसिमो तेण रूवं तु ॥
कालेण असंखेण वि, संखातीताण संसईणं तु ।
मा संसयवोच्छित्ती, न होज्ज कमवागरणदोसा ॥
सव्वत्थ अविसमत्तं, रिद्धिविसेसो अकालहरणं च ।
सव्वण्णुपच्चओऽवि य, अचिंतगुणभूतिओ जुगवं ॥
वासोदयस्स व जहा, वण्णादी होंति भायणविसेसा ।
सव्वेसिं पि सभासा, जिणभासा परिणमे एवं ॥
साहारणासवत्ते, तदुवओगो उ गाहगगिराए ।
न य निव्विज्जइ सोया, किढिवाणियदासिआहरणा ॥
सव्वाउअं पि सोया, खवेज्ज जइ हु सययं जिणो कहए ।
सीउण्हखुप्पिवासापरिस्समभए अविगणेंतो ॥
वित्ती उ सुवण्णस्सा, बारस अद्धं च सयसहस्साइं ।
तावइयं चिय कोडी, पीतीदाणं तु चक्किस्स ॥
एयं चेव पमाणं, णवरं रययं तु केसवा दिंति ।
मंडलिआण सहस्सा, पीईदाणं सयसहस्सा ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तं दिव्वदेवघोसं सोतूणं [1]माणुसा तहिं तुट्ठा ।
अहो जण्णिएण जट्ठं देवा किर आगता [2]ईधइं ॥४३१॥१९८४॥
[3]सीहासणे णिसण्णो रत्तासोगस्स [१३०-द्वि०] हेट्ठतो भगवं ।
सक्को सहेमजालं सयमेव य गेण्हते छत्तं ॥४३२॥१९८५॥
दो होन्ति चामराओ सेताओ मणिमएहिं दण्डेहिं ।
ईसाणचमरसहिता[4] धरेन्ति ते णातवच्छस्स ॥४३३॥१९८६॥
[5]एक्कारस वि गणधरा सव्वे उण्णतविसालकुलवंसा ।
पावा[6]ए मज्झिमाए समोसढा जण्णवाडम्मि ॥४३४॥१९८७॥

---

भत्तिविहवाणुरूवं, अण्णेऽवि य देंति इब्भमाईया ।
सोऊण जिणागमणं, निउत्तमणिओइएसुं वा ।।
देवाणुअत्ति भत्ती, पूया थिरकरण सत्तअणुकंपा ।
साओदय दाणगुणा, पभावणा चेव तित्थस्स ॥
राया व रायमच्चो, तस्सऽसई पउरजणवओ वाऽवि ।
दुब्बलिखंडियबलिछडियतंदुलाणाढगं कलमा ॥
भाइयपुणाणियाणं, अखंडफुडियाण फलगसरियाणं ।
कीरइ बली सुरा वि य, तत्थेव छुहंति गंधाई ॥
बलिपविसणसमकालं, पुव्वद्दारेण गति परिकहणा ।
तिगुणं पुरओ पाडण, तस्सद्धं अवडियं देवा ॥
अद्धद्धं अहिवइणो, अवसेसं हवइ पागयजणस्स ।
सव्वामयप्पसमणी, कुप्पइ णऽण्णो य छम्मासे ॥
खेयविणोओ सीसगुणदीवणा पच्चओ उभयओऽवि ।
सीसायरियकमोऽवि य गणहरकहणे गुणा होंति ॥
राओवणीयसीहासणे, निविट्ठो व पायवीढंमि ।
जिट्ठो अन्नयरो वा, गणहारी कहइ बीआए ॥
संखाईएऽवि भवे, साहइ जं वा परो उ पुच्छिज्जा ।
ण य णं अणाइसेसी, वियाणई एस छउमत्थो ॥

दी ५५४-५९१ । हा ५५३-५९० । म ५५३-५९० ।

१ माहणा म । २ इहयं म । ३ 'सीहासणे' इति गाथाद्विकं नास्ति **दीहाम**प्रतीषु । ४ सहिया देवेहिं पहिट्ठचित्तेहिं **को** । ५ इक्का [5]**को म** । ६ पावाइ म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[1]पढमेत्थ इंदभूती बितिए[2] पुण होति अग्गिभूति त्ति ।
ततीए य वायुभूती ततो वियत्ते सुहम्मे[3] य ॥४३५॥१९८८॥

मंडिय मोरियपुत्ते अकंपिए चेव अयलभाता य ।
मेतज्जे य पभासे [य] गणधरा [4]होन्ति वीरस्स ॥४३६॥१९८९॥

जंकारण णिक्खमणं [5]वोच्छं एतेसि आणुपुव्वीए ।
तित्थं च सुधम्मातो णिरवच्चा गणधरा सेसा ॥४३७॥१९९०॥

जीवे कम्मे तज्जीव भूत तारिसय बंध [6]मोक्खे य ।
देवा णेरइया[7] वा पुण्णे परलोग [8]णेव्वाणे ॥४३८॥१९९१॥

पंचण्हं पंचसत्ता अद्धुट्ठसता य [9]होन्ति दोण्हं[10] गणा ।
[11]दोण्हं तु जुवलयाणं तिसतो तिसतो [12]हवति गच्छो ॥४३९॥१९९२॥

[13]भवणवति वाणवन्तर जोतिसवासी विमाणवासी य
[१३१-प्र०] सव्विड्ढिए[14] सपरिसा कासी णाणुप्पतामहिमं ॥४४०॥
१९९३॥

[15]दट्ठूण कीरमाणिं[16] महिमं देवेहिं जिणवरिन्दस्स ।
अध एति अहम्माणी अमरिसितो इन्दभूति त्ति ॥४४१॥१९९४॥

मोत्तूण ममं लोगो किं [17]धावति एस तस्स [18]पामूले ? ॥
अण्णो वि जाणति मए ट्ठितम्मि कत्तोच्चयं एतं ॥१९९५॥

धावेज्ज व मुक्खजणो देवा [19]किध णेण विम्हयं णीता ।
वन्दन्ति संथुणंति य जेणं सव्वण्णुबुद्धीए ॥१९९६॥

अधवा जारिस[20]ओ च्चिय सो णाणी तारिसा[21] सुरा ते वि ।
अणुसरिसो संजोगो गामणडाणं च मुक्खाणं ॥१९९७॥

कातुं हतप्पतावं पुरतो देवाण दाणवाणं च ।
णासे हं णीसेसं खणेण सव्वण्णुवातं से ॥१९९८॥

---

१ पढमित्थ म दी हा । २ बिइओ हा दी । बीए म । ३ °म्मो को । ४ हुंति म । ५ वुच्छं म । ६ मुक्खे म । ७ °इए वा को । ८ णिव्वा° को म । ९ हुंति म । १० दुण्ह म । दोण्हं हा दी । ११ दुण्हं म । १२ भवे हा दी । १३ गाथैषा नास्ति हा दी म-प्रतिषु । १४ °ड्ढीए को । १५ सोऊण म हा दी । १६ °णीं को दी हा । १७ वच्चति को । १८ पासाइं ! को । १९ कहऽणेण को । २० ओ सो को । २१ तारिसया को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इय वोत्तूणं पत्तो दट्ठुं तेलोक्कपरिवुडं वीरं ।
चोत्तीसायिसयणिधिं ससंकितो चिट्ठितो पुरतो ॥१९९९॥
आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं ।
णामेण य गोत्तेण य सव्वण्णू सव्वदरिसी णं ॥४४२॥२०००॥
हे इंदभूति ! गोतम ! सागतमुत्ते जिणेण चिंतेति ।
णामं पि मे वियाणति अधवा को मण्ण याणाति ॥२००१॥
जति वा हितयगतं मे संसयमुंण्णेज्ज [3]अधव [4]छिंदेज्ज ।
तो होज्ज विम्हयो मे इय चिन्तेंतो[5] पुणो भणितो ॥२००२॥
किं [6]मण्णे अत्थि जीवो उताहु णत्थि त्ति संसओ तुज्झं ।
वेतपयाण य अत्थं ण याणसी तेसिमो अत्थो ॥४४३॥२००३॥
[7]जीवे तुह संदेहो पच्चक्खं जण्ण [8]घेप्पति घडो व्व ।
अच्चन्तापच्चक्खं च णत्थि लोए खपुप्फं व ॥२००४॥

दट्ठूण गाहा । मोत्तूण गाहा । धावेज्ज गाहा । अहवा गाहा । काउं० गाहा । इय गाहा । आभट्ठो गाहा । हे इंद० गाहा । जति वा गाहा । किं मण्णे गाहा । जीवे गाहा । भगवानुवाच—आयुष्मन्निन्द्रभूते ! भवतः सन्देहः–'किमयमात्मास्ति नास्तीति' । कुतः पुनः ? उभयहेतुसद्भावात् । तत्र नास्तित्वहेतवस्तावदमी–नास्त्यात्मा अत्यन्ताप्रत्यक्षत्वात्, खपुप्पवत् । अत्यन्तग्रहणम्–अणवोऽपि ह्यप्रत्यक्षास्ते तु घटादिकार्यापन्नाः प्रत्यक्षतामायान्ति, न पुनरेवमात्मा कदाचिदपि प्रत्यक्षतामेति ॥१९९४–२००४॥

ण य सोऽणुमाणगम्मो जम्हा पच्चक्खपुव्वयं तं पि ।
पुव्वोवलद्धसंबंधसरणतो लिंगलिंगीणं ॥२००५॥

ण य गाहा । न चायमनुमानगम्योऽपि, यतः प्रत्यक्षपूर्वकमनुमानमुक्तम्, इह पूर्वोपलब्धलिङ्गलिङ्गिसम्बन्धानुस्मरणद्वारेणानुमानमुच्यते । यथेह साक्षाद् धूमाग्निमद्देशसम्बन्धमुपलभ्योत्तरत्र तमनुस्मरतो धूममात्रसंदर्शनात् 'अग्निमानयं देशः' इति गम्यते ॥२००५॥

ण य जीवलिंगसंबंधदरिसिणमभू जतो पुणो सरतो ।
तल्लिंगदरिसणातो जीवे संपच्चओ होज्ज ॥२००६॥

---

१ °सीण को । °सिणा म । २ मण्णेज्ज जे । ३ °ज्ज जइ व को । ४ छिन्नेज्जा को ५ चिन्तंतो जे । ६ मन्नि म दी हा । इतः पूर्वं—॥६०॥ नमः श्रीजिनभद्रगणिक्षमाश्रमणेभ्यः॥—इति दृश्यते तप्रतौ । ८ घिप्पइ को हे । ९ °दरिसण त को हे ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

**ण य** गाहा। न चेहात्मलिङ्गसम्बन्धदर्शनमभूत् कस्यचित्, यदनुस्मरतः तल्लिङ्गमात्रदर्शनादात्मनि संप्रत्ययो भवेत्। स्यात्—सामान्यतो दृष्टेनानुमानेनाधिगम्यते, चन्द्रादित्यगतिवत्। न, तत्रापि साक्षाद्देवदत्तादेर्देशाद्देशान्तरप्राप्तिदर्शनात् ॥२००६॥

**णागमगम्मो वि ततो भिज्जति जं णागमोऽणुमाणातो।**
**ण य कोसइ पच्चक्खो जीवो जस्सागमो वयणं ॥२००७॥**

**णागम०** गाहा। न चायमागमगम्योऽपि, यतो नानुमानादागमो भिद्यते। यथेहोर्ध्वे कुण्डलौष्ठायतवृत्ते ग्रीवादिमति घटशब्दप्रयोगदर्शनात् उत्तरत्र घटशब्दमात्रश्रवणात् अन्वयव्यतिरेकद्वारेण तत्रैवानुमानमुत्पद्यते। न चैवमयमात्मशब्दः शरीरादतेऽन्यत्र प्रयुज्यमानः क्वचिदुपलब्धः, यत्र खल्वात्मश्रवणादात्मेति प्रत्ययो भवेत्, अदृष्टार्थस्याप्यागमस्याऽऽप्तवादाऽविसंवादसामान्यादनुमानता। न चासावाप्तः कश्चिदस्ति यस्यायमात्मा प्रत्यक्षः स्यात्, यद्वचनमागमं प्रतिपद्यामहे ॥२००७॥

**जं चागमा विरुद्धा परोप्परमतो वि संसयो जुत्तो।**
**सव्वप्पमाणविसयातीतो जीवो त्ति ते बुद्धी ॥२००८॥**

**जं चा०** गाहा। यतश्चागमाः परस्परविरोधिनः खलु, अतोऽपि संशयो युक्तरूपस्तद्यथा—

"एतावानेव पुरुषो यावानिन्द्रियगोचरः।
भद्रे! वृकपदं ह्येतद्यद्वदन्त्यबहुश्रुताः॥"

यथोक्तं **"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यसंज्ञास्ति"** [बृहदा० २.४.१२] तथा **"न रूपं भिक्षवः पुद्गलः"** इत्यादि।

तथाऽस्तित्वप्रतिपत्तयः—**"न ह वै शरीरस्य प्रियाप्रिययोरुपहतिरस्ति, अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः"** [छान्दो० ८।१२।१] इति। तथा **"अग्निहोत्रं जुहुयात् स्वर्गकामः"** इत्यादि। तथा कापिलादयोऽभिमन्यन्ते **'अस्ति पुरुषः'** इत्यतः परस्परविरोधित्वात् आगमोऽप्यप्रमाणम्, अतः सर्वप्रमाणगोचरातीतोऽयमित्यभिप्रायस्ते ॥२००८॥

**गोतम! पच्चक्खो[4] च्चिय जीवो जं संसयातिविण्णाणं।**
**[१३२-प्र०] पच्चक्खं च ण सज्झं जध सुहदुक्खं सदेहम्मि ॥२००९॥**

**गोतम!** गाहा। गौतम! प्रत्यक्ष एवायमात्मा, यदेतत् संशयादिविज्ञानं भवतः विज्ञानादात्मनोऽनन्यत्वात्। न च स्वप्रत्यक्षं साध्यम्, स्वदेहसुखदुःखादिवत् ॥२००९॥

---

१ कस्सइ को। २ कस्सा॰ जे। ३ तो त। ४ ॰क्खु हे। ५ ॰क्खा त हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कतवं करेमि काहं चाहमहंपच्चयोदिमातो य ।**
**अप्पा [2]सप्पच्चक्खो तिकालकज्जोवदेसातो ॥२०१०॥**

**कतवं** गाहा । इतश्च स्वप्रत्यक्ष एवायमात्माऽत्रैवै त्रैकाल्यकार्यव्यपदेशात् । तद्यथा कृतवान् अहं, करोम्यहं, करिष्याम्यहम्, उक्तवानहं, ब्रवीम्यहं, वक्ष्याम्यहं, ज्ञानवानहं जानेऽहं ज्ञास्येऽहमिति योऽयं त्रिकालकार्यव्यपदेशहेतुरहंप्रत्ययो नायमानुमानिकः । न चागमिकः । किं तर्हि ? प्रत्यक्ष एवायम् । अनेनैवात्मानं प्रतिपद्यस्व, नायमनात्मनि घटादावुपलभ्यते ॥२०१०॥

**[5]किह पडिवण्णमहन्ति य किमत्थि णत्थि त्ति संसओ [6]किध णु ।**
**सइ संसयम्मि वाऽयं [7]कस्साहंपच्चयो जुत्तो ॥२०११॥**

**किह** गाहा । कथमहमिति प्रतिपद्यते, कथं च किमिदमस्ति नास्तीति संशयः, संशयहेत्वभावात् । आह— संशये च सति कस्यायमहंप्रत्ययो युक्तरूपः ? ॥२०११॥

**जति णत्थि संसयि च्चिय किमत्थि णत्थि त्ति संसओ कस्स ।**
**संसइते व सरूवे गोतम ! किमसंसयं होज्जा ॥२०१२॥**

**जति** गाहा । संशयो हि विज्ञानाख्यो गुणविशेषः, न चार्थद्रव्योस्ति गुणः । अतः संशयसद्भावे संशयिनावश्यं भवितव्यम् । न चेत् संशयिनमात्मानं प्रतिपद्यसे किमहमस्मिं नास्मीति—कस्यायं संशयः ? यस्य वा स्वयमेव संशेते किमस्मिं नास्मीति तस्यान्यत् किमसंशयं भवेदिति ? सर्वसंशयतश्चात्मनि को विशेषः ? अहंप्रत्ययविशिष्टं स्वप्रत्यक्षमात्मानं निह्नुवानस्य प्रत्यक्षविरुद्धः पक्षाभासोऽयम्, अश्रावणशब्दप्रतिपत्तिवत् । वक्ष्यमाणात्माऽस्तित्वौनुमानसद्भावादनुमानविरुद्धः, घटनित्यत्वप्रतिपत्तिवत् । अहमस्मि संशयीति प्रागभ्युपगम्योत्तरत्र नास्तीति प्रतिजानानस्य पूर्वाभ्युपगमविरुद्धः, साङ्ख्याऽसत्कार्यप्रतिपत्तिवत् । आगोपालप्रतीतमात्मानमनभ्युपगच्छतो लोकविरुद्धोऽयम् अचन्द्रप्रतिपत्तिवत् । अहं नाहं चेत्येवं पक्षश्च स्ववचनविरुद्धः, सर्वानृतवचनप्रतिपत्तिवत् । तथाहि- स्वप्रत्यक्षत्वादात्मनः 'अत्यन्ताप्रत्यक्षत्वात्' इत्ययमपक्षधर्मत्वादसिद्धो हेत्वाभासः । विपक्षेऽपि हिमवत्पलाग्रपरिमाणादौ दर्शनादनैकान्तिकः, अक्षकरणाधिष्ठायकत्वादनुमानप्रसिद्धेर्विरुद्धः ॥२०१२॥

---

१ °या इमाओ य को । °या इमाउ य हे । २ अप्प° जे । ३ कज्जा° को । ४ °त्रैवाल्पकार्य° इति प्रतौ । ५ कह को हे । ६ कह को हे । कध त । ७ अस्सा° को । ८ चायं द्र°-इति प्रतौ । द्रु० गा० २०१५, २०१७ । ९ °मस्मिन्नास्तीति–इति प्रतौ । १० किमस्मिन्नास्मीति इति प्रतौ । ११ त्वान्दमास°-इति प्रतौ ।

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

**गुणपच्चक्खत्तणतो गुणी वि जीवो घडो व्व पच्चक्खो ।**
**घडओ वि घेप्पति गुणी गुणमेत्तग्गहणतो जम्हा ॥२०१३॥**

**गुण०** गाहा । गौतम ! प्रत्यक्ष एवायमात्मा, गुणप्रत्यक्षत्वात् । इह यस्य गुणाः प्रत्यक्षाः स प्रत्यक्षो दृष्टो यथा घटः । घटोऽपि हि रूपादिगुणप्रत्यक्षत्वादेव प्रत्यक्षः, तद्वद्विज्ञानादिगुणप्रत्यक्षत्वादात्मापीति । आह—अनैकान्तिकोऽयम्, यस्मादाकाशगुणः शब्दः प्रत्यक्षः, न त्वाकाशम् । उच्यते—नैवाकाशगुणः शब्दः, ऐन्द्रियकत्वाद्रूपादिवत् । अत एव च पुद्गलगुणः । आह—तद्गुणप्रत्यक्षताऽस्तु । उच्यते—गुणगुणिनोरेकत्वात् प्रत्यक्ष एवासौ ॥२०१३ ।

**अण्णोऽणण्णो व्वं गुणी होज्ज गुणेहिं जति णाम सोऽणण्णो ।**
**णणु गुणमेत्तग्गहणे[3] घेप्पति जीवो गुणी सक्खं ॥२०१४॥**

**अण्णो** गाहा । भवताऽपि हि गुणेभ्योऽर्थान्तरमनर्थान्तरं वा गुणी प्रतिपद्यते ? यद्यनर्थान्तरमतो विज्ञानादिगुणप्रत्यक्षत्वादात्मप्रत्यक्षता सिद्धा ॥२०१४॥

**अध अण्णो तो एवं गुणिणो ण घडातयो वि पच्चक्खा ।**
**गुणमेत्तग्गहणातो जीवम्मि कतो वियारो यं ॥२०१५॥**

**अध** गाहा । अर्थान्तरमतः, न घटादयोऽपि गुणिनः प्रत्यक्षाः, गुणमात्रग्रहणात् । इह घटादीनां गुणमात्रमेवोपलभ्यते, न गुणिनः । तत्र यदुक्तं 'यतो न घटवदुपलभ्यते साक्षादयमतः संशयः' इत्येतद् घटादिष्वपि समानम्, आत्मनि को विशेषः ? अथ नार्थद्रव्यो गुणीस्तीत्यनुमानतोऽवसीयन्ते घटादयः । किमेवमात्माऽपि न गम्यते ? अर्थान्तराभ्युपगमे च गुणिनः प्रत्यक्षतायां च सर्वथात्मप्रसिद्धिः ॥२०१५॥

**अध मण्णसि अत्थि गुणी ण तुं देहत्थन्तरं तओ किंतु ।**
**देहे णाणातिगुणा सो च्चिय 'ताणं गुणी जुत्तो ॥२०१६॥**

**अध** गाहा । अथ मन्यसे—न गुणिनं प्रत्याचक्ष्महे विज्ञानादिगुणानाम्, किन्तु यत्रैवोपलभ्यन्ते विज्ञानादयः स एवैषां गुणी युक्तरूपः । यथा यत्रैव घटरूपादयः तत्रैव घटो नान्यत्र । देहमात्र एव च विज्ञानादिगुणोपलब्धित स एवैषां गुणी नार्थान्तरमिति ॥२०१६॥

**णाणादयो ण देहस्स 'मुत्तिमत्तातितो [१३१-द्वि०] घडस्सेव ।**
**तम्हा णाणातिगुणा जस्स स देहाधियो जीवो ॥२०१७॥**

---

१ °त्वाद्भयादि-इति प्रतौ । २ व को हे । ३ °हणे जे । ४ °शयप्रत्ये—इति प्रतौ । ५ नार्य द्र°—इति प्रतौ । ६ °गुणास्ती°–इति प्रतौ । ७ ण य त हे । न तदवत्थं को । ८ तेसिं हे त को । ९ स्सऽमु° को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

णाणा० गाहा । उच्यते— न विज्ञानादिगुणो देहस्य, मूर्तिमत्त्वाद्, घटादिवत् । तथा चाक्षुषत्वादित्यादि । न चापद्रव्यता गुणस्येत्यतो यो विज्ञानादिगुणः स देहादर्थान्तरमात्मेति । आह—ननु प्रत्यक्षविरुद्धमिदम्—न विज्ञानादयो देहस्येति, यथैन्द्रियकत्वादश्रावणः शब्दो रूपादिवदिति । उच्यते—न, अनुमानसद्भावात्—इहेन्द्रियातिरिक्तो विज्ञाता तदुपलब्धार्थानुस्मरणात् । यो हि यदुपरमेऽपि यदुपलब्धमर्थमनुस्मरति, स तस्मादर्थान्तरमुपलब्धा दृष्टः, यथा पञ्चवातायनोपलब्धार्थानुस्मर्त्ता देवदत्त इत्यादि वायुभूतिप्रश्नेऽपि च वक्ष्यामः ॥२०१७॥

**इय तुह देसेणायं पच्चक्खो सव्वधा महं जीवो ।**
**अविहतणाणत्तणतो तुह विण्णाणं व पडिवज्जे ॥२०१८॥**

इय गाहा । इत्येवमेकदेशप्रत्यक्षोऽयमात्मा भवतः । सर्वस्य जीवादिवस्तुनोऽनन्तपर्यायत्वाद्भवदादेश्च छद्मस्थस्य विज्ञानदेशप्रकाशवत् । सर्वथाऽयमस्मत्प्रत्यक्षो विहितानन्तज्ञानत्वाद्भवद्विज्ञानोपलब्धिवत् । यथा भवद्विज्ञानमतीन्द्रियमशेषमहमुपलभे तथात्मानमपीति प्रतिपद्यस्व ॥२०१८॥

**एवं चिय परदेहेऽणुमाणतो [3]गेण्ह जीवमत्थि त्ति ।**
**अणुवित्तिणिवित्तीतो विण्णाणमयं स[4]रूवे व्व ॥२०१९॥**

एवं गाहा । एवमेव परशरीरे गृहाणाऽऽत्मानमनुमानतः । कथम्? इह परशरीरमपि हि विद्यमानविज्ञानादिगुणम्, इष्टानिष्टयोः प्रवृत्तिनिवृत्तिक्रियासद्भावात् । यदिष्टानिष्टयोः प्रवृत्तिनिवृत्तिक्रियास्वभावम्, तद्विद्यमानविज्ञानादिगुणमवसीयते, यथात्मशरीरम्, यच्च विज्ञानादिगुणविकलं न तदिष्टानिष्टप्रवृत्तिक्रियास्वभावम्, यथा घटः ॥२०१९॥

**जं च ण लिंगेहि समं मण्णसि लिंगी जतो पुरा गहितो ।**
**संगं ससेण व समं ण लिंगतो तोऽणुमेयो सो ॥२०२०॥**
**सो णेगंतो जम्हा लिंगेहि समं ण दिट्ठपुव्वो वि ।**
**गहलिंगदरिसणातो गहोऽणुमेयो सरीरम्मि ॥२०२१॥**

जं च गाहा । सो णे० गाहा । यच्चाभिधीयते—यतो न लिङ्गिनो लिङ्गसमेतस्योपलब्धिरभूत् कदाचिदपि विषाणस्योपगमसमेतस्य, अतो न लिङ्गतोऽनुमेयोऽसाविति । नायमेकान्तो यतो न च तावद् ग्रहो लिङ्गसमेतः कदाचिदुपलब्धपूर्वः, अथ च

१ चायं द्र°—इति प्रतौ । २ °वज्जा को । ३ गिण्ह हे । ४ सरूवं व जे । सरूवि व्व त ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

लिङ्गदर्शनाद्देवदत्तशरीरेऽनुमीयतेऽस्तीति । यद्येवमात्मापि स्यात् को दोषः ? आह– यद्येवं ततः शशलिङ्गोपलक्षितं शशविषाणमप्यस्तु । उच्यते–यत एव शशे विषाणं नानुमीयते ग्रहश्चानुमीयते, अत एवानेकान्तः । इदं चात्मनोऽनुमानमुच्यते ॥२०२०–२१॥

**देहस्सत्थि [1]विधाता पतिणियताकारतो घडस्सेव ।**
**अक्खाणं च करणतो दण्डातीणं कुलालो व्व ॥२०२२॥**

**देहस्स** गाहा । [2]विद्यमानकर्तृकमिदं शरीरमादिमत्, प्रतिनियताकारत्वात् । इह यदादिमत् प्रतिनियताकारं च, तद्विद्यमानकर्तृकं दृष्टम्, यथा घटः । यच्चाविद्यमानकर्तृकम्, न तदादिमत् प्रतिनियताकारं च, यथाऽभ्रादिविकारः । यश्चास्य कर्त्ता स जीवः । तस्मादस्ति जीवः । विद्यमानाधिष्ठातृकाणीन्द्रियाणि, करणत्वात् । इह यत्करणं तद्विद्यमानाधिष्ठातृकं दृष्टम्, यथा कुलालाधिष्ठाना दण्डादयः । यच्चाऽविद्यमानाधिष्ठातृकं न तत् करणम्, यथाकाशम् । यश्चैषामधिष्ठाता स जीवः । तस्मादस्तीति ॥२०२२॥

**[3]अत्थिन्दियविसयाणं आदाणादेयभावतोवस्सं ।**
**कम्मार इवादाता लोए संडासलोहाणं ॥२०२३॥**

**अत्थिन्दि०** गाहा । इह विद्यमानाऽऽदातृकमिदं विषयकदम्बकम्, आदानादेयभावात् । इह यत्राऽऽदानाऽऽदेयभावस्तत्र विद्यमानाऽऽदातृकत्वं दृष्टम्, यथा संदंशाऽयस्पिण्डयोः अयस्कारादातृकता । यच्चाविद्यमानाऽऽदातृकं न तत्राऽऽदाना–ऽऽदेयभावो यथाऽऽकाशे । यश्च विषयाणामिन्द्रियैरादाता स जीवः । तस्मादस्तीति ॥२०२३॥

**भोत्ता देहादीणं भोज्जत्तणतो णरो व्व भत्तस्स ।**
**संघातातित्तणतो [१३३–प्र०] अत्थि य अत्थी घरस्सेव ॥२०२४॥**

**भोत्ता** गाहा । विद्यमानभोक्तृकमिदं शरीरादि भोग्यत्वात् । इह यद्भोग्यं तद्विद्यमानभोक्तृकं दृष्टम्, यथाहारवस्त्रादि । यच्चाविद्यमानभोक्तृकं न तद्भोग्यं यथा खरविषाणम् । यश्चैषां शरीरादीनां भोक्ता स जीवः । तस्मादस्तीति । विद्यमानस्वामिकं शरीरेन्द्रियादि, संघातत्वात् । इह यत्सङ्घातात्मकं तद्विद्यमानस्वामिकं दृष्टम्, यथा

१ विहाया हे को त । विवातो जे । द्रष्टव्या गा० २१२२ । २ सूत्रकृतांग चूर्णि १. १. १२. । ३ द्रष्टव्या गा० २१२३ । ४ संडास को हे त । ५ °नादाकर्तृत्वं—इति प्रतौ । ६ द्रष्टव्या गा० २१२४ । ७ घड° जे । ८ वस्त्वा°—इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गृहम् । यच्चाविद्यमानस्वामिकं न तत् सङ्घातात्मकम्, यथा खरविषाणम् । यश्च शरीरादिस्वामी स जीवः । तस्मादस्तीति । एवं मूर्त्तिमत्त्वादैन्द्रियकत्वाच्चाक्षुषत्वादनित्यत्वादित्यादयोऽप्यायोजनीयाः ॥२०२४॥

**जो कत्ता ति स जीवो सज्झविरुद्धो त्ति ते मती होज्जा ।**
**मुत्तातिपसंगातो तण्णो संसारिणोऽदोसो ॥२०२५॥**

**जो कत्ता** गाहा । यश्चायं कर्त्ता अधिष्ठाता आदाता भोक्ता अर्थी चोक्तः स जीवः । तथा चैवोदाहृतम् । स्यात्–कुलालादीनां मूर्त्तिमत्त्व-संघाता–ऽनित्यत्वादिदर्शनादात्मनोऽपि तद्धर्मता[प्र]सक्तेर्विरुद्धाभिप्रायः । तच्च न, संसारिणः खल्वदोषात् । संसार्यवस्थायामेवायं साध्यते, न मुक्तावस्थायाम् । अयं चानादिकर्मसन्तानोपनिबन्धत्वात्, द्रव्यपर्यायार्थिकनयाभिप्रायाच्च तद्धर्मापीत्यदोषः ॥२०२५॥

**अत्थि च्चिय ते जीवो संसयतो सोम्मं ! थाणुपुरिसो व्व ।**
**जं संदिद्धं गोतम ! तं तत्थण्णत्थ वऽत्थि धुवं ॥२०२६॥**

**अत्थि** गाहा । सौम्य ! भवतोऽप्ययमात्मास्ति । कुतः ? तत्र भवतः संशयतः । इह यत्र सदसत्त्वसंशयस्तदस्ति यथा स्थाणुपुरुषौ । यथेह स्थाणुपुरुषयोरूर्द्ध्ववर्तताऽऽरोहपरिणाहादिसामान्यप्रत्यक्षे चैलनवयोनिलयनादिविशेषाऽप्रत्यक्षे च सत्युभयविशेषस्मृतौ च सत्यामेकतरविशेषोपलिप्सोः किमिदमिति विमर्श्य संशयः । समानानेकधर्मोपपन्नमित्यादितो वा । तद्वदात्मशरीरयोरपि प्रागुपलब्धसामान्यविशेषस्य तयोः सामान्यप्रत्यक्षतायां विशेषाप्रत्यक्षतायां विशेषानुस्मृतौ च सत्यामेकतरविशेषोपलिप्सोः किमयमात्मा शरीरमात्रमिति विमर्श्य संशयो युक्तरूपः, नात्मशरीरयोरेकतराभावे । आह–नन्वेकतराऽभावेऽपि संशयो दृष्टः । स्थाणावेव कदाचित्–किमयं स्थाणुः पुरुष इति । न च तदा तत्र पुरुषोऽस्ति । उच्यते–न ब्रूमस्तत्रैवोभयमवश्यम् । किन्तु तत्रान्यत्र वा विद्यमानयोरेव स्थाणुपुरुषयोः—इति तयोः संशयो भवतीति ब्रूमः, नाविद्यमानयोः, तद्वदात्मशरीरयोरपीति ॥२०२६॥

**एवं णाम विसाणं खरस्स पत्तं ण तं खरे चेव ।**
**अण्णत्थ तदत्थि च्चिय एवं विवरीतगाहे वि ॥२०२७॥**

**एवं** गाहा । आह–यदि यत्र संशयस्तेनावश्यं भवितव्यम्, अतः खरविषाणमप्यस्तु, तत्संशयसद्भावात् । उच्यते–ननूक्तं–'तत्रान्यत्र वा विद्यमान एव संशयो

---

१ द्रष्टव्या गा० २१२५ । २ तं न को हे । ३ °णो दो° हे । ४ °ताशवते°—इति प्रतौ । ५ सोम न । ६ °ताराह°—इति प्रतौ । ७ °चलनवयोनिल°—इति प्रतौ ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

भवति नाविद्यमाने' इति । खरस्य च विषाणमिति तत् खर एव न स्यादन्यत्र तु गवादावस्त्येवेति न दोषः । विपर्ययेऽपि चायमेव न्यायः । यथा विद्यमान एव हि स्थाणुपुरुषे स्थाणौ पुरुषाभिमानो भवति, नाऽविद्यमाने, तथा भवदभिप्रायाद्यो हि शरीरेऽस्मदादीनामात्माभिमानो नासावात्मानमन्तरेण युक्त इति ॥२०२७॥

**अत्थि अजीवविवक्खो पडिसेधातो घडो[1]ऽघडस्सेव ।**
**णत्थि घडो त्ति य[2] जीवत्थित्तपरो णत्थि सद्दोऽ[3]यं ॥२०२८॥**

**अत्थि** गाहा । प्रतिपक्षवानयमजीवः, व्युत्पत्तिमच्छुद्धपदप्रतिषेधात् । इह यत्र व्युत्पत्तिमतः शुद्धपदस्य प्रतिषेधः श्रूयते, स प्रतिपक्षवान् दृष्टो, यथा अघटो घटप्रतिपक्षवान् । यश्च न प्रतिपक्षवान्न स व्युपत्तिमच्छुद्धपदादिप्रतिषेधवान्, यथा अखरविषाणमडित्थ इत्यादि । तथा अ[4]जीवाभिधानमपि जीवास्तित्वप्रसाधकमेवेति पूर्ववत्[5] घटप्रतिषेधवत् ॥२०२८॥

**असतो णत्थि णिसेधो संजोगातिपडिसेधतो सिद्धं ।**
**संजोगातिचतुक्कं[6] पि सिद्धमत्थंतरे णियतं ॥२०२९॥**

**असतो** गाहा । योऽयमात्मनः प्रतिषेधोऽभिधीयते भवता स विद्यमानस्यैव नाविद्यमानस्य संयोगादिमात्रप्रतिषेधात् । इह यत् प्रतिषिध्यते तस्य विद्यमानस्यैव संयोगादिमात्रप्रतिषेधो दृष्टो नाभावः, तद्यथा—नास्ति घटो गेह इति विद्यमानयोरेव गेहघटयोः संयोगादिमात्रं प्रतिषिध्यते, न तयोरस्तित्वम्, तथा नास्ति खरविषाणमिति विद्यमानस्यैव खरस्य विषाणस्य [च] समवायमात्रं निषिध्यते, न सर्वथास्तित्वम्, तथा नास्त्यन्यश्चन्द्रमा इति विद्यमानस्यैव चन्द्रमसः, द्वितीयं चन्द्रमसमन्तरेण सामान्यमात्रप्रतिषेधो न चन्द्रमसः, तथा न सन्ति घटप्रमाणा मुक्ता इति विद्यमानानामेव मुक्तानां घटप्रमाणविशेषमात्रप्रतिषेधो न मुक्तास्तितायाः । तथा नास्त्यात्मेति विद्यमानस्यैवात्मनो यत्र क्वचन येन केनचित् संयोगमात्रं प्रतिषिध्येत त्वया, न सत्त्वम्, तथा समवायादिनिषेधोऽपि नात्मनिषेधः । आह—यदि यत् प्रतिषिध्यते तदस्ति, न मे त्रिलोकेश्वरत्वमस्तीति तदपि स्यात् । न च पञ्चमः प्रतिषेध इति सोऽपि स्यात् । उच्यते—त्रिलोकेश्वरत्वमात्रप्रतिषेधात् पञ्चमविशेषमात्रप्रतिषेधाच्च । नैव तदपि संयोगादिनिषेधचतुष्टयमतिवर्त्तते । आह—ननूक्तं भवतैव संयोगादिमात्रप्रतिषेधादिति संयोगादीनामसतां प्रतिषेधस्तद्यथा नास्ति घटो गेह इति गेहघटयोः संयोगस्यासतः प्रतिषेधः, तथा समवाया-

१ घडो घ° जे । २ य त को हे । ३ °द्दो य जे । ४ तथा न जी°—इति प्रतौ । ५ वन्न घ°—इति प्रतौ । ६ °क्कं प सि° त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दीनामपि, यद्येवमात्मनोऽपि स्यात् को दोषः ? उच्यते–निषेधविषया एवासन्तः संयोगादयो न त्वर्थान्तरविषया यथा नास्ति घटो गेह इति । गेहघटसंयोगमात्रमेवासत्, न घटस्याकाशादिना संयोगो न वा गेहस्य खट्वादिभिरण्वादीनां च परस्परम्, तथा समवायादयोपीति ॥२०२९॥

जीवो त्ति सत्थयमिणं सुद्धत्तणतो घडाभिधाणं व ।
जेणऽत्थेण सयत्थं सो जीवो अध मती होज्ज ॥२०३०॥

अत्थो देहो च्चिय से तं णो पज्जायवयणभेतातो ।
णाणादिगुणो य जतो भणितो जीवो ण देहो त्ति ॥२०३१॥

जीवो गाहा [२] । जीव इत्येतदभिधानमर्थवत्, व्युत्पत्तिमत्त्वे सति शुद्धपदत्वात् । इह यद् व्युत्पत्तिमत् शुद्धपदं च तदर्थवद् दृष्टं यथा घटाभिधानम् । यदनर्थकं न तद् व्युत्पत्तिमच्छुद्धपदं च यथा डित्थः खरविषाणं च । येनार्थेनार्थवदिदं जीवाभिधानं स जीवः । तस्मादस्तीति ।

अथ मतिः [न] जीवाभिधानस्यार्थवत्त्वं प्रत्याचक्ष्महे, किन्त्वेतद्देहमात्र एवानुप्रयुज्यमानमनुश्रूयते–यथैष जीवो यथैनं न हिनस्तीत्यतो देह एवार्थोऽस्य युक्तः । तच्च न, पर्यायवचनभेदात् । इह यत्र पर्यायवचनभेदस्तत्रान्यत्वं प्रतीयते यथा घटाकाशयोः, तत्र घटकुम्भादयो घटपर्यायाः नभोव्योमाम्बरादयश्चाऽऽकाशपर्यायाः, जीवशरीरयोरपि च पर्यायवचनभेदः प्रतीतः, तद्यथा जीवः प्राणी भूत इत्यादयो जीवस्य, देहः कायः तनुरित्यादयः शरीरस्य । तदेकत्वे वाभिधानसंकरप्रसङ्गस्ततश्चाभिधेयसंकरैकत्वादयः । यत्पुनरिदमुक्तमेष जीवो यथैनं न हिनस्तीति तच्छरीरसहचरणस्थानादितो जीवस्य शरीरे तदुपचारः । इदमपि चानुश्रूयते गतः स जीवो दह्यतामिदं शरीरम् । यतश्च प्रागपदिष्टं–न विज्ञानादिगुणो देहो, मूर्तिमत्त्वात्, घटवत्; शरीरेन्द्रियातिरिक्तश्च विज्ञाता, तदुपरमेऽपि तदुपलब्धार्थानुस्मरणाद्वातायनपुरुषवत् ॥॥२०३०–३१॥

जीवोऽत्थि वयो सच्चं मव्वयणातोऽवसेसवयणं [३]व्व ।
[१३५–द्वि०] सव्वण्णुवयणतो वा अणुमतसव्वण्णुवयणं [४]वं ॥२०३२॥

जीवो गाहा । जीवोऽस्तीत्येतद्वचः सत्यम्, मद्वचनत्वात् । इह यन्मद्वचनं तत्सत्यम्, यथा शेषवचनम्, यथा वा शेषभवदादिविज्ञानोपलब्धिवचनम् । यच्चासत्यं न

१ °मवयणो°—इति पतौ । २ °यमिणं जे । ३ व को हे । ४ वा जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तदस्मद्वचनं यथा कूटसाक्षिवचनम्। अथवा सत्यं जीवास्तित्वाभिधानम्, सर्वज्ञवचनत्वात्, भवदनुमतसर्वज्ञवचनवत् ॥२०३२॥

**भयरागमोहदोसाभावातो सच्चमणतिवातिं च।**
**सव्वं चिय मे वयणं जाणयमज्झत्थवयणं व ॥२०३३॥**

[भय०] गाहा०। अथवा सर्वमेव हि मे सत्यमनतिपाति वचनम्, रागद्वेषमोहभयाभावात्। इह यस्य रागद्वेषमोहभयाभावस्तद्वचनं सत्यमनतिपाति च दृष्टम्, यथा पथज्ञस्याभयस्य द्रष्टर्यरागद्वेषवतः सत्पथोपदेशवचनम् ॥२०३३॥

**किंध सव्वण्णु त्ति मतो जेणाहं सव्वसंसयच्छेत्ता[४]।**
**पुच्छसु व जं ण याणसि जेण वे ते पच्चयो होज्जा ॥२०३४॥**

किध गाहा। स्यान्मतिः—सर्वज्ञवचनत्वादिति मां प्रति सर्वज्ञत्वमसिद्धम्, भवतः रागद्वेषमोहभयाभावश्च। तच्च न, यस्य सर्वसंशयछेदनसामर्थ्यमस्ति स सर्वज्ञः। यथा क इति चेत्। प्रत्यक्षत्वादविप्रतिपत्तेश्च नान्वयोऽन्वेषणीयः। रागद्वेषमोहभयाभावश्च लिङ्गतोऽनुमेय इति ॥२०३४॥

**एवमुवयोगलिंगं गोतम! सव्वप्पमाणसंसिद्धं।**
**संसारीतरथावरतसातिभेतं मुणे जीवं ॥२०३५॥**

एव० गाहा। एवमनेन प्रकारेण प्रत्यक्षानुमानागमप्रमाणसिद्धमुपयोगात्मकं संसारीतरादिभेदमात्मानं प्रतिपद्यस्व ॥२०३५॥

**जति पुण सो एगो च्चिय हवेज्ज वोमं व सव्वपिण्डेसु।**
**गोतम! तमेगलिंगं पिण्डेसु तधा ण जीवोऽयं ॥२०३६॥**

जति गाहा। आह—यदि पुनरसावेक एवाकाशवत् सर्वमूर्तिविशेषेषु स्यात्। तथोक्तम्—

"एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥" [ब्रह्मबिन्दू० १२]

९८. "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेत्ति स वेदवित् ॥" [गीता० १५. १]

---

१ °गदोसमोहाभा° को हे त। २ °वायं च त। ३ कह को हे त। ४ °च्छेई को हे। ५ वि- त। ६ होई त। होज्ज जे। ७ तदेग को हे त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथोक्तं–"पुरुष एवेदं सर्वम्" इत्यादि । उच्यते गौतम ! युक्तमेतत् सर्वमूर्ति-विशेषेष्वेकमाकाशमेकलिङ्गत्वान्न पुनरेवं प्रतिशरीरमेकलिङ्गो जीवः ॥२०३६॥

**णाणा जीवा कुंभातयो व्व भुवि लक्खणादिभेदातो ।**
**सुह-दुक्ख-बंध-मोक्खाभावो य जतो तदेगत्ते ॥२०३७।**

**णाणा** गाहा । नानात्मानः, लक्षणभेदाल्लक्ष्यभेदो दृष्टो यथा घटादिभेदः, यच्चाभिन्नं न तस्य लक्षणभेदो यथाकाशस्य । सुखदुःखाद्यभावश्चैकत्वे सत्यात्मनः । ॥२०३७॥

**जेणोवयोगलिंगो जीवो भिण्णो य सो पतिसरीरं ।**
**उवयोगो उक्करिसाऽवकरिसतो तेण तेऽणंता ॥२०३८॥**

**जेणो०** गाहा । आह–कथं पुनरात्मनां लक्षणभेदोऽभ्युपगम्यते ? उच्यते–यस्मात् ज्ञानदर्शनोपयोगलक्षणो जीवः, स चोपयोगः प्रतिशरीरमुत्कर्षापकर्षभेदादानन्त्यं भजते, तदनन्तत्वादात्मनामप्यानन्त्यम् ॥२०३८॥

**एगत्ते[1] सव्वगतत्तो णं सोक्खादयो णभस्सेव ।**
**कत्ता भोत्ता मंता ण य संसारी जधाऽऽगासं ॥२०३९॥**

**एगत्ते** गाहा । ऐकत्वे हि खल्वात्मनो [न] सुखादयः सम्पद्यन्ते सर्वगतत्वात् । इह यत् सर्वगतं न तत्सुखादिगुणं यथाकाशम् । एवं न बध्यते, सर्वगतत्वात् । इह यत् सर्वगतं न तद् बध्यते यथाकाशम् । यच्च बध्यते न तत् सर्वगतं यथा देवदत्तः । एवं न मुच्यते, न कर्त्ता, न भोक्ता, न मन्ता, न संसारीत्यादि ॥२०३९॥

**एगत्ते णत्थि सुही बहूवघातो त्ति [१३४-प्र०] देसणिरुयो[4] व्व ।**
**बहुतरबद्धत्तणतो ण य मुक्को देसमुक्को व्व ॥२०४०॥**

**एगत्ते** गाहा । नात्मैकत्वे सुखी बहुतरोपघातात् । इह यो बहुतरोपघातो नासौ सुखी, यथा सर्वरोगावृतोऽङ्गुल्यैकदेशारोगः । यश्च सुखी नासौ बहुतरोपघातो यथेह विषयसम्पदुपेतोऽनुपद्रवो देवदत्तः । न चासौ मुक्तो बहुतरोपनिबन्धात् । इह यो बहुतरोपनिबन्धनो नासौ मुक्त इति व्यपदिश्यते, न वा

१ एगंते जे । २ ण मोक्खा हे को त । ३ तुलना सूत्रकृ० चू० १. १. १. १० पत्र २६ । ४ °रुउ व्व हे ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

मुक्तसुखमश्नुते यथा सर्वाङ्गशीलिते विमुक्ताङ्गुल्यैकदेशः पुमान् । यश्च मुक्तो नासौ बहुतरोपनिबन्धनः, न च स्वल्पनिबन्धनो यथाऽशीलितः पुमान् ॥२०४०॥

**जीवो तणुमेत्तत्थो जध कुंभो तग्गुणोवलंभातो ।**
**अधवाऽणुवलंभातो भिण्णम्मि घडे पडस्सेव ॥२०४१॥**

**जीवो** गाहा । त्वक्पर्यन्तमात्रशरीरव्यापी जीवः, तत्रैव तद्गुणोपलब्धेः। इह यस्य यावति गुणोपलम्भः स तन्मात्रो दृष्टो यथा घटः । यश्च यत्रासन्, न तस्य तत्र गुणोपलब्धिर्यथाऽग्नेरम्भसि । अथवा न शरीरादन्यत्रात्मा तद्गुणानुपलम्भात् । इह यस्य यत्र गुणानुपलम्भः [न] स तत्रोपलभ्यते यथा घटात्मनि पटः । यश्च यत्रास्ते न तस्य तत्र गुणानुपलम्भो यथा स्वाकारे घटस्य ॥२०४१॥

**तम्हा कत्ता भोत्ता बन्धो मोक्खो सुहं च दुक्खं च ।**
**संसरणं च बहुत्ताऽसव्वगतत्तेसु जुत्ताइं ॥२०४२॥**

**तम्हा** गाहा । तस्मात् कर्तृत्वादयो बहुत्वाऽसर्वगतत्वयोरात्मनोर्युक्तरूपा नान्यथेति ॥२०४२॥

**गोतम ! वेदपदाणं इमाणमत्थं च तं ण याणासि ।**
**जं विण्णाणघणो च्चिय भूतेहिंतो समुत्थाय ॥२०४३॥**
**[1]मण्णसि मज्जंगेसु व मतभावो भूतसमुदयब्भूतो ।**
**विण्णाणमेत्तमाता भूतेणुविणस्सति स भूयो ॥२०४४॥**
**अत्थि ण य पेच्चसण्णा जं पुव्वभवेऽभिधाणममुंओ त्ति ।**
**जं भणितं ण भवातो भवंतरं जाति जीवो त्ति ॥२०४५॥**

**गोतम** गाहा । [**मण्णसि** गाहा] **अत्थि०** गाहा । गौतम ! न च त्वमेषां वेदपदानां वाक्यार्थं वेत्सि यदपदिश्यते "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यसंज्ञास्तीति" । पृथिव्यादिभूतविज्ञानलवसमुदायो विज्ञानघनः, पृथिव्यादिविज्ञानदेशानां पिण्डीभवनमिति यावत् । विज्ञानघन एवेत्यवधारणमात्मनो भूतातिरिक्तस्य विज्ञानगुणाश्रयस्याभावोपदर्शनार्थम् । एतेभ्यो भूतेभ्यः पृथिव्यादिभ्योऽन्यथा जीवपर्यायवचनोऽपि भूतशब्दस्तेभ्यो मा भूत, न विज्ञानात्मकसत्त्वसङ्घातघनो जैनानामिवानेकसत्त्वविज्ञानसङ्घातो वनस्पत्यादिवत् । समुत्थायेति संभूयाऽभूतविज्ञानप्रादुर्भावमाह । पृथिव्यादिविज्ञानदेशानामपि समुदा-

१ ग्निरम्भसि । २ एतस्याः प्रतीकं स्वोपज्ञवृत्तौ न दृश्यते । अर्थानुरोधात् तु गाथया अत्र भाव्यम् । ३ °मुगो त्ति त हे को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यनिमित्तपरिणामाङ्गीकरणं न व्यस्तानामिति यावत् । तान्येवानु विनश्यति तद्विनाशमनु विनश्यति । न यथात्मवादिनामात्मा न शरीरविनाशमनुविनश्यति । न प्रेत्यसंज्ञास्ति–प्रेत्यभावो नाम नारकादिः । स एवायं प्रेत्य नारको देवो वाऽभवन्मनुष्योधुना संवृत्त इति न भवाद्भवान्तरसंक्रान्तिरस्तीत्युक्तं भवति ॥२०४३–४५॥

**गोतम ! पतत्थमेवं[1] मण्णंतो णत्थि मण्णसे जीवं ।**
**वक्कंतरेसु अ पुणो भणितो जीवो जमत्थि त्ति ॥२०४६॥**
**अग्गिहवणातिकिरियाफलं च तो संसयं कुणसि जीवे ।**
**मा कुरु ण पदत्थोऽयं इमं पदत्थं णिसामेहि ॥२०४७॥**

**गोतम** गाहा । **अग्गि०** गाहा । गौतमैकवाक्यतायामेषां पदानामेनमर्थमनुमन्यमानो नात्मानमर्थान्तरभूतं भूतेभ्योऽभिमन्यसे, यच्च वाक्यान्तरेषूक्तं "न ह वै सशरीरस्य प्रियाऽप्रिययोरपहतिरस्त्यशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः" इति, तथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादि क्रियाफलं च नात्मन्यसति संभवेदिति संशये(यः)[2] किमयमात्मास्ति नास्तीति ते। वयं ब्रूमो मा कृथाः संशयमिह मा चैवं प्रतिपत्थाः, नैषां पदानामेकवाक्यतायामयमर्थः। शृणु पदार्थं वक्ष्यामः ॥२०४६–४७॥

**[१३४–द्वि०] विण्णाणातोऽणण्णो विण्णाणघणो त्ति सव्वसो[3] वा वि ।**
**स भवति भूतेहिंतो घडविण्णाणादिभावेणं ॥२०४८॥**

**विण्णा०** गाहा । ज्ञान-दर्शनोपयोगरूपं विज्ञानम् । ततोऽनन्यत्वादात्मा विज्ञानघनः, अथवा प्रतिप्रदेशमनन्तविज्ञानपर्यायसंघातात्मकत्वाद्विज्ञानघनः । विज्ञानघन एवेति विज्ञानघनानन्यत्वाद्वधारणार्थमात्मनः । अथवा शेषात्मधर्माणामपि चेतोवृत्त्यविरोधादि(द्वि)ज्ञानान्तर्भावोपदर्शनार्थं सर्वात्मलिङ्गोपसङ्ग्रहार्थं वा । एतेभ्यो भूतेभ्यो विद्यमानेभ्यो द्रव्यादिभ्यः, यतो नार्थमनालम्ब्य विज्ञानप्रसूतिरस्ति, अतो घटादिभ्यस्तद्विज्ञानभावेनोत्पद्यते ॥२०४८॥

**ताइं चिय भूताइं सोऽणु विणस्सति विणस्समाणाइं ।**
**अत्थंतरोवयोगे कमसो विण्णेयभावेणं ॥२०४९॥**
**पुव्वावरविण्णाणोवयोगतो विगमसंभवसभावो ।**
**विण्णाणसंततीए विण्णाणघणोऽयमविणासी ॥२०५०॥**

१ °मेतं **जे**। २ संभावय सं० इति प्रतौ। ३ सव्वओ **हे**।



Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

ताइं गाहा। [ पुव्वा०गाहा ]। तेभ्यः समुत्थाय तान्येव हि विनाशव्यवधानाभ्यां विज्ञेयभावेन विनश्यन्त्यनुविनश्यति । अथवा तान्येवानुप्राप्यानुप्रकाश्य वा विनश्यन्त्यनुविनश्यति । स च प्रागेतनविज्ञानात्मनोपरमति पाश्चात्यविज्ञानात्मना चोत्पद्यते । सामान्यविज्ञानात्मना द्रव्यतयाऽवतिष्ठते इत्युत्पाद-व्यय-ध्रौव्यधर्मा विज्ञानघनः ॥२०४९–५०॥

**ण य पेच्चणाणसण्णाऽवतिट्ठते संपतोवयोगातो ।**
**विण्णाणघणाऽभिंक्खो[1] जीवोऽयं वेदपतंविहितो[3] ॥२०५१॥**

ण य गाहा । न प्रेत्य संज्ञास्तीति–न चेह प्रागेतनी घटविज्ञानादिसंज्ञा अवतिष्ठते, साम्प्रतविज्ञानोपयोगविघ्नितत्वात् । स एष विज्ञानघनाख्यो जीवो वेदविहितः प्रतिपद्यस्वैवम् ॥२०५१॥

**एवं वि भूतधम्मो णाणं तब्भावभावतो बुद्धी ।**
**तण्णो तदभावम्मि वि जं णाणं वेतसमयम्मि ॥२०५२॥**

एवं गाहा । स्यान्मतिः–एवमपि हि भूतधर्म एव ज्ञानम्, तद्भावे भावात्, तदभावे चाऽभावात् । तेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति वचनात् भूतनिमित्तप्रादुर्भावात्, यदत्यये चाऽप्रादुर्भावादित्यर्थः । तच्च न, यस्मात्तदत्ययेऽपि श्रुतेर्वि(श्रुतौ वि)ज्ञानमुक्तम् ॥२०५२॥

**अत्थमिते आतिच्चे चन्दे संतासु अग्गिवायासु ।**
**किं जोतिरयं पुरिसो अप्पज्जोति त्ति णिद्दिट्ठो ॥२०५३॥**

अत्थ० गाहा । तद्यथा "अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ, शान्तायां वाचि, किं ज्योतिरेवायं पुरुषः ? आत्मज्योतिः सम्राडिति इहोवाच" [बृहदा०४.३.६] । ज्योतिरिति ज्ञानमाह। आत्मैव ज्योतिरस्य सोऽयमात्मज्योतिः ज्ञानात्मक इत्यर्थः । अतो न ज्ञानं भूतधर्म इति ॥२०५३॥

**तदभावे भावातो भावे चाऽभावओ ण तद्धम्मो ।**
**जध घडभावाभावे विवज्जयातो पडो भिण्णो ॥२०५४॥**

तद० गाहा । इतश्च न ज्ञानं भूतधर्मः, तदभावे भावाद्भावेऽपि चाभावात् । इह यदभावेऽपि यद् भवति, भावेऽपि च न भवति, न तत् तस्य धर्मो यथा घटस्येह पटः । यच्च यस्य धर्मः, न हि तत् तदभावे भवति, भावे च सर्वथा

१ नशतनि द्र- इति प्रतौ । २ °भिक्खा जे । ३ °भिहिओ हे को त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

न भवति, यथा घटस्य रूपादयः। न च विज्ञानं भूताभावे न भवति, भावे चावश्यमेव भवत्यतो न भूतधर्म इति ॥२०५४॥

एसिं वेतपदाणं ण तमत्थं वियसि अधव [१३५-प्र०] सव्वेसिं।
अत्थो किं होज्ज सुती विण्णाणं वत्थुभेतो वा ॥२०५५॥
जाती दव्वं किरिया गुणोऽधवा संसओ[1] स चायुत्तो।
अयमेवेति[2] ण वायं ण वत्थुधम्मो जतो जुत्तो ॥२०५६॥

**एसिं** गाहा। **जाती** गाहा। गौतम! त्वमेषां वेदपदानां न वाक्यार्थमवबुध्यसे। अथवा सर्वेषामेव हि वेदपदानामर्थं नाववुध्यसे। किं श्रुत्यर्थं पदं भवेद्यथा भेरीशब्दः, उत विज्ञानार्थं यथा घट इति, उत वस्त्वन्तरं यथा घटात् पट इति, उत जात्यर्थं यथा गौरिति, द्रव्यार्थे दण्डीति, क्रियार्थं धावतीति, गुणार्थं शुक्ल इत्यादौ संशयः। स चायमयुक्तः यतोऽयमेवेति नैवायमिति वा न वस्तुधर्मो युक्तः, सर्वासर्वात्मकत्वाद्वस्तुनः। वस्तुविशेषश्च शब्दः। तस्मान्न [3]तद्धर्मावधारणं युक्तम् ॥२०५५-५६॥

सव्वं चिय सव्वमयं सपरपज्जायतो जतो णियतं।
सव्वमसव्वमयं [4]पि य [5]विवित्तरूवं विवक्खातो ॥२०५७॥

**सव्वं** गाहा। इह स्व[पर]पर्यायतः सर्वं सर्वमयमुक्तं सामान्यविवक्षातः। तथा[6] स्व[पर]पर्यायतः सर्वमसर्वमयमेकान्तविविक्तमिष्यते, विशेषविवक्षातः ॥२०५७॥

सामण्णविसेसमयो तेण पतत्थो विवक्खया जुत्तो।
वत्थुस्स विस्सरूवो पज्जायावेक्खया सव्वो ॥२०५८॥

**सामण्ण०** गाहा। तस्मात् सामान्यमयो विशेषमयश्च पदार्थो युक्तस्तथा चान्यथा च विश्वरूपः, पर्यायापेक्षया वस्तुतत्स्वाभाव्यादिति ॥२०५८॥

छिण्णम्मि संसयम्मी जिणेण जरमरणविप्पमुक्केण।
सो समणो पव्वइतो पंचहिं सह खण्डियसएहिं ॥४४४॥२०५९॥

एवं कम्मादीसु वि जं सामण्णं तयं समायोज्जं[7]।
जो पुण [8]जत्थ विसेसो समासतो तं पवक्खामि[9] ॥२०६०॥

१ °ओ तवाजुत्तो। को हे त। २ अहमे° त। ३ °स्मात्तद्ध°-इति प्रतौ। ४ चिय जे। ५ विचित्त° जे। ६ तथाहि इति प्रतौ। ७ समाउज्जं को हे। ८ एत्थ को। ९ °मि॥ इति श्री प्रथमगणधरवादः समाप्तः। त

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**छिण्णम्मि** गाहा। **एवं** गाहा। एवं यदिह सामान्यं तत् कर्मादिष्वपि यथासम्भवमायोजनीयं प्रत्यक्षानुवृत्त्या संशये संशये संशयाऽपाकरणे चेति विशेषं वक्ष्यामः। ॥२०५९-६०॥

**तं पव्वइतं[1] सोतुं [2]बितियो आगच्छती अमरिसेणं।**
**वच्चामि णमाणेमिं[3] परायिणित्ता-ण तं समणं ॥४४५॥२०६१॥**

**छलितो छलातिणा सो मण्णे माइंदजालितो[4] वा वि[5]।**
**को जाणति [6]किध वत्तं एत्ताहे वट्टमाणी से ॥२०६२॥**

**सो पक्खंतरमेगं पि जाति [१३५-द्वि०] जति मे ततो मि तस्सेव।**
**सीसत्तं होज्ज गतो वोत्तुं पत्तो जिणसगासं ॥२०६३॥**

**आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं।**
**णामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४४६॥२०६४॥**

**किं मण्णे अत्थि कम्मं उदाहु णत्थि त्ति संसयो तुज्झं।**
**वेतपताण य अत्थं ण [9]याणसे तेसिमो अत्थो ॥४४७॥२०६५॥**

**कम्मे तुह संदेहो मण्णसि तं णाणगोयरातीतं।**
**तुह तमणुमाणसाधणमणुभूतिमयं फलं जस्स ॥२०६६॥**

**तं पव्व०** गाहा। **छलितो** गाहा। **सो पक्खं०** गाहा। **आभट्ठो** गाहा। **किं मण्णे** गाहा। **कम्मे** गाहा। आयुष्मन्नग्निभूते कर्मणि भवतः सन्देहः, यतः किल तत् सर्वप्रमाणविषयातीतमिति। मैवं प्रतिपत्थाः। नैव हि तत् सर्वप्रमाणगोचरातिक्रान्तम्, अस्मत्प्रत्यक्षत्वाद्, भवतश्चानुमानागमगम्यत्वात्। न हि तत् अप्रत्यक्षं सर्वथा यत् अन्यस्य कस्यचित् प्रत्यक्षं सिंहवत्। यथा सिंहः केषाञ्चिदेव प्रत्यक्षोऽथ च तत्प्रामाण्यादागोपालं प्रतीतः, तथेहापि मत्प्रत्यक्षं कर्म सर्वप्रत्यक्षत्वाद्रवद्विज्ञानवदिति प्रतिपद्यस्व। आह—सर्वप्रत्यक्षत्वादित्ययमसिद्धो मां प्रति। न हि भवतोऽस्माभिः सर्वज्ञत्वं सम्भाव्यते, तदभ्युपगमे वा भवद्वचनात् कर्मापि प्रतिपद्येमहि। उच्यते—न, सर्वथा सर्वसंशयच्छेदनसामर्थ्यात्। इह यस्य सर्वथा सर्वसंशयच्छेदनसामर्थ्यमस्ति स सर्वज्ञो यथा क इति चेत्? प्रत्यक्षत्वादविप्रतिपत्तेश्च नान्वयोऽन्वेषणीयः। यदि वा सर्वथा सर्वसंशयच्छेद[न]मपि न सर्वज्ञता, लिङ्गमभिधत्स्व। न[10] चेदभिधीयतेऽभ्युपगम्यता-

---

१ °इउ त। २ बीओ को त हे। ३ °मी प° त हे को। ४ °जालि° को। ५ °वाइ जे। ६ कह को हे। कध त। ७ °रमिसं त। ८ °गामं हेको। ९ भणि भी हा। १० जाणसी हा को दी। याणसी त म। याणसि हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मस्मत्सर्वज्ञता। ततश्चास्मत्प्रत्यक्षं कर्मेति। अथवा भवतोऽपि हि प्रत्यक्षमेव कर्म तदनुभूतिप्रत्यक्षत्वात्। इह यस्यानुभूतिः प्रत्यक्षा, तत्प्रत्यक्षम्, यथा रूपादयः। कर्मापि च सुखदुःखानुभूत्याऽनुभूयते, तन्निमित्तत्वात् सुखदुःखानुभूतेः। तस्मात् प्रत्यक्षं कर्मेति। आह—ननु तदनुभूतेरित्ययमसिद्धः, न प्रतिपद्यामहे सुखदुःखादिना कर्मणोऽनुभूतिरिति ॥२०६१-६६॥

**अत्थि सुहदुक्खहेतू[1] कज्जातो बीयमंकुरस्सेव।**
**सो दिट्ठो चेव मती वभिचारातो ण तं जुत्तं ॥२०६७॥**

अत्थि गाहा। उच्यते—सुखदुःखानुभूतेर्हेतुरस्ति, कार्यत्वादङ्कुरस्येव बीजम्, यश्च हेतुरस्यास्तत्कर्म तस्मादस्ति कर्मेति। स्यान्मतिः—सुखदुःखानुभूतेर्दृष्ट एव हेतुरिष्टानिष्टविषयप्राप्तिमयो भविष्यति। तत् किमिह कर्मपरिकल्पनया? न हि दृष्टं निमित्तमपास्य निमित्तान्तरान्वेषणं युक्तरूपम्। उच्यते—न, व्यभिचारात् ॥२०६७॥

**जो तुल्लसाधणाणं फले विसेसो ण सो विणा हेतुं।**
**कज्जत्तणतो गोतम ! घडो व्व हेतू य सो[2] कम्मं ॥२०६८॥**

जो तुल्ल० गाहा। इह यो हि द्वयोरिष्टशब्दादिविषयसुखसाधनसमेतयोर्बहूनां वा तत्फले विशेषो दुःखानुभूतिमयः, यश्चानिष्टसाधनसमेतयोरेकस्य तत्फलविघातविशेषो नासौ हेतुमन्तरेण सम्भाव्यते। न च तद्धेतुरे[व] वा युक्तः, साधनविपर्ययात्। परिशेषात्—हेतुमानसौ, कार्यत्वाद्, घटवत्। यश्च समानसाधकसाधनसमेतयोस्तत्फलविशेषहेतुस्तत् कर्म। तस्मादस्ति कर्म ॥२०६८॥

**बालसरीरं देहंतरपुव्वं इन्दियातिमत्तातो।**
**जध बालदेहपुव्वो जुवदेहो पुव्वमिह कम्मं ॥२०६९॥**

बाल० गाहा। अन्यदेहपूर्वकमिदं बालशरीरम्, इन्द्रियादिमत्त्वात्। इह यदिन्द्रियादिमत् तदन्यदेहपूर्वकं दृष्टम्, यथा बालदेहपूर्वकं युवशरीरम्। यच्छरीरपूर्वकं चेदं बालशरीरकं तत् कर्म। तस्मादस्ति कर्मेति। इन्द्रियादिमत्त्वादित्यादिग्रहणाच्चेतनत्वात्, सुखित्वात, दुःखित्वात्, प्राणापाननिःशेषोन्मेषजीवनादिमत्त्वादिति ॥२०६९॥

**किरियाफलभावातो दाणादीणं फलं किसीए व्व।**
**[3]तं चिय दाणादिफलं मणप्पसादाति[4] जति बुद्धी ॥२०७०॥**

किरिया० गाहा। फलवन्तो दानादयः, चेतनरूपक्रियारूपत्वात्। इह यच्चेतनक्रियारूपं तत्फलवद्दृष्टम्, यथा कृष्यादिक्रिया। यच्चाफलं न तच्चेतनक्रियारूपम्,

---

[illegible]

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यथाऽश्वादि। यच्चैषां दानादिक्रियाविशेषाणां फलम्, तत् कर्म। तस्मादस्ति कर्म। स्यात्–विपक्षेऽपि दर्शनादनैकान्तिकोऽयम्, यतः कृष्यादिक्रियाणां हि कदाचिद्वैफल्यमपि दृष्टम्। तच्च न, फलवत्त्वे सति तदारम्भदर्शनादज्ञानाच्चाफलत्वदर्शनात्। दानादीनामपि तत्स्वभावत्वाऽभ्युपगमाददोषः। स्यान्मतिः–यथा कृष्यादिक्रिया दृष्टप्रयोजनास्तथा दानादयोऽपि मनःप्रसादादिमात्रफला एव भविष्यन्ति। किमिहादृष्टफलपरिकल्परूपाः( °कल्पनया )? तच्च न ॥२०७०॥

[१३६-प्र०] किरियासामण्णातो जं फलमस्सावि तं मतं कम्मं।
तस्स परिणामरूवं सुहदुक्खफलं जतो भुज्जो ॥२०७१॥

किरिया० गाहा। क्रियासामान्यात् मनःप्रसादादिरूपमपि क्रियाविशेष एव। तेनापि हि फलवतावश्यं भवितव्यम्। अस्यापि हि यत् फलं तत् कर्म। तत्परिणामात्मकं तत्फलमुच्यते भूयः सुख-दुःखादि। स्यात्–प्रागभ्युपगम्य दानादिक्रियाफलं कर्म, इदानीं मनःप्रसादादिक्रियाफलमिति विरुद्धमुच्यते। तच्च न, कारणे कार्योपचारात् पर्जन्य(न्ये) तन्दुलवर्षणवत् ॥२०७१॥

होज्ज मणोवित्तीए दाणातिकिरिये[1] व जति फलं बुद्धी।
तं ण णिमित्तत्तातो पिण्डो व्व घडस्स विण्णेयो ॥२०७२॥

होज्ज गाहा। स्यान्मतिः–मनोवृत्तेरपि प्रत्यावृत्या दानादिक्रियैव फलं भविष्यति। तच्च न, निमित्तत्वात्। न हि निमित्तं फलमिष्टं घटस्य पिण्डवत्। नैमित्तिकं तूपलभ्यते पिण्डस्य घटवत् ॥२०७२॥

एवं पि दिट्ठफलता [2]किया ण कम्मप्फला पसत्ता ते।
सा तम्मित्तफले[3] च्चिय जध मंसफलो पसुविणासो ॥२०७३॥

एवं गाहा। आह–एवमपि दृष्टार्थानां क्रियाणामदृष्टफलाभावप्रसङ्गः, दृष्टेन फलेनाभिमतप्रयोजनत्वात्, पशुविशसनवत्। यथेह पशुविशसनक्रिया मांसाशनायाऽऽरभ्यते नाऽधर्मायेत्यतस्तस्यास्तन्मात्रफलतैवेष्यते, नाधर्मफलता ॥२०७३॥

पायं च जीवलोओ वट्टति दिट्ठप्फलासु किरियासु।
अदिट्ठफलासु[4] पुणो[5] वट्टति णासंखभागो वि ॥२०७४॥

पायं गाहा। प्रायं चायं प्राणिलोको दृष्टास्वेव क्रियास्वनुप्रवर्तते, दानादिष्वदृष्टफलासु कतिपयेऽनुप्रवर्तते। हिंसादीनां चानिष्टक्रियाणामदृष्टफलाभावाद्दानादीष्टक्रियाणामप्यदृष्टफलाभावो भविष्यति ॥२०७४॥

---

१ °नादिनै–इति प्रतौ। २ किरिया को हे। ३ तम्मित्त° त। तम्मेत्त° हे। ४ फले त। ५ पुण को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सोम्म जतो च्चिय जीवा पायं दिट्ठप्फलासु वट्टंति ।**
**अदिट्ठफलाओ वि[1] हु ताओ पडिवज्ज तेणेव ॥२०७५॥**

**सोम्म** गाहा । सौम्य यत एव प्राणिनः प्रायेण दृष्टफलास्वेव क्रियास्वनुप्रवर्त्तन्ते नादृष्टफलासु । अत एव ताः खल्वदृष्टफला अपीति प्रतिपद्यस्व । ॥२०७५॥ कोऽभिप्रायः ?

**इधरा अदिट्ठरहिता सव्वे मुच्चेज्ज ते अयत्तेण[2] ।**
**अदिट्ठारंभो चेव [3]किलेसबहुलो भवेज्जा हि ॥२०७६॥**

**इधरा** गाहा । इतरथाऽदृष्टफलाभावादनिष्टक्रियानुष्ठातारः सर्व एव अयत्नेन मुच्येरन् । दानाद्यदृष्टार्थक्रियारम्भाय वा पापबहुलो भवेत् । कथम् ? इहेष्टक्रियानुष्ठातारस्तत्क्रियाफलविपाकमनुभवन्तस्तत्प्रचोदिताः पुनरिष्टास्वेव क्रियास्वनुप्रवर्त्तन्ते । ततश्च भूयस्तत्फलविपाकानुभूतिः । पुनरिष्टक्रियानुष्ठानमित्येवमनन्तसन्ततिमयः संसारः । आह—तथास्तु । किं नो बाध्येत—यद्यनिष्टक्रियानुष्ठातारो मुच्येरन् इष्टक्रियानुष्ठातॄणां चानन्तः संसारः स्यात् ? उच्यते—नन्विदमेव बाध्यते यदिष्टक्रियानुष्ठातारस्तत्फलविपाकानुभुज एवोपलभ्येरन्, अशुभक्रियानुविधायिनोऽनिष्टफलभुजश्च न स्युः । न च तत्तथा ॥२०७६॥

**जमणिट्ठभोगभाजो बहुतरया जं च णेइ मतिपुव्वं ।**
**अदिट्ठाणिट्ठफलं कोइ वि किरियं समारभते[4] ॥२०७७॥**

**जम०** गाहा । यतश्चेहानिष्टभोगभाजो भूयांसः, न च कश्चिदपि बुद्धिपूर्वमदृष्टानिष्टफलां क्रियामारभते । अदृष्टमनिष्टं च फलमस्याः सेयमदृष्टाऽनिष्टफलेति ॥२०७७॥

**तेण पडिवज्ज किरिया अदिट्ठे[१३६-द्वि०]गंतियप्फला सव्वा ।**
**दिट्ठाणेगंतफला सा वि अदिट्ठाणुभावेणं ॥२०७८॥**

**तेण** गाहा । तेन सौम्य प्रतिपद्यस्व संसारिणः सर्वक्रिययाऽवश्यमदृष्टफलया भवितव्यम् । दृष्टफलतायामनेकान्तस्तत्फलविघातश्चाऽदृष्टानुभावत एव, अन्यथा हि समानमीहमानानामेकस्य विघातो न युक्तरूपः ॥२०७८॥

**[5]अधव फलातो[6] कम्मं कज्जत्तणतो पसाहितं पुव्वं ।**
**परमाणवो घडस्स व किरियाण तयं फलं भिण्णं ॥२०७९॥**

---

१ °ओ च्चिय ता° **त** । °ओ विय ता° **हे** । २ अपयत्तेणं **को हे** । ३ केसव° **जे हे** । ४ °भइ **त को हे** । ५ अहवा **त हे को** । ६ लाउ **हे को** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अधव गाहा । अथवा प्रागेवास्माभिः प्रसाधितं कर्म कार्यत्वाद् घटस्येव परमाणवः । तदेवेह क्रियाफलमनुमेयं तेभ्यो भिन्नमिति ॥२०७९॥

**आह णणु मुत्तमेवं मुत्तं चिय कज्जमुत्तिमत्तातो ।**
**इध जह मुत्तत्तणतो घडस्स परमाणवो मुत्ता ॥२०८०॥**

आह गाहा । आह–यदि कार्यात् कर्म प्रसाध्येत शरीरादिकार्यस्य मूर्तिमत्त्वात् कर्मापि मूर्त्तिमत् प्रसजति । उच्यते–इदमस्माभिः साध्यं तत् साधु भवतैव प्रसाधितम् । सत्यमिह मूर्तिमदेव कर्म, तत्कार्यस्य शरीरादेः मूर्त्तिमत्त्वात् । इह यस्य कार्यं मूर्त्तिमत् तस्य कारणमपि मूर्त्तिमद् दृष्टम्, यथा घटस्य परमाणवः। यच्चामूर्तं न तस्य कारणे[2] मूर्त्तिमत्त्वम्, यथा विज्ञानकारणस्यात्मनः । समवायिकारणं चेहाधिक्रियते, न निमित्तमात्रमालोकरूपादि ।

आह–ननु सुखदुःखादयोऽपि कर्मकार्यम् । अतस्तदमूर्त्तिमत्त्वादमूर्त्तत्वमपि कर्मणः । न च मूर्त्तामूर्त्तमस्ति । उच्यते ननूक्तमिह समवायिकारणमधिक्रियते । सुखदुःखादयश्चात्मधर्मास्तेषामात्मैव समवायिकारणम्, कर्मैषां निमित्तकारणमन्नादिवदित्यदोषः ॥२०८०॥

**तध सुहसंविंत्तीतो संबंधे वेतणुब्भवातो य ।**
**बज्झबलाधाणातो परिणामातो य विण्णेयं ॥२०८१॥**
**आहार इवाणल इव घडो[3] व्व णेहादिकतबलाधाणो[4] ।**
**खीरमिवोदाहरणाइं कम्मरूवित्तगमगाइं ॥२०८२॥**

**तध** गाहा । **आहार** गाहा । इतश्च मूर्त्तिमत् कर्म, तत्सम्बन्धे इह सुखसंवित्तेः । इह यत्संबन्धे सुखसंवित्तिर्ज्ञायते तत् मूर्त्तिमत्, यथाहारः । यच्चामूर्त्तं न तत्सम्बन्धे सुखसंविदस्ति, यथाकाशसम्बन्धे । तथा, तत्सम्बन्धे वेदनोद्भवात् । इह यत्सम्बन्धे वेदनोद्भवो भवति तन्मूर्त्तिमद्यथाग्निः। यच्चामूर्त्तं न तत्सम्बन्धे वेदनोद्भवः, यथाऽऽकाशसम्बन्धे । तथाऽनात्मविज्ञानादित्वे सति मूर्त्तिमद्बलाधानात् । इह यस्याऽनात्मविज्ञानादेः मूर्त्तिमता बलाधानं जन्यते [स] मूर्त्तिमान् यथा स्नेहादिबलाधानो घटः । यच्चामूर्त्तं न तस्याऽनात्मविज्ञानादेर्मूर्त्तिमता बलाधानक्रिया यथाऽऽकाशस्य । तथाऽनात्मादिपरिणामात् । इह यदनात्मादिस्वभावं परिणामि तन्मूर्त्तिमद् यथा पयः । यच्चामूर्त्तं न तदात्मस्वभावं परिणामि यथाकाशम् ॥२०८१-८२॥

---

१ तायौ—इति प्रतौ। २ कारणं—इति प्रतौ। ३ घडु व्व को हे। ४ °लाहाणे त । ५ रूवि° को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अथ मतमसिद्धमेतं परिणामातो[1] त्ति सो वि कज्जातो ।**
**सिद्धो परिणामो से दधिपरिणामाति व पयस्स ॥२०८३॥**

**अथ** गाहा । अथ मतिः–असिद्धमेतत् परिणामादिति । न हि परिणामि कर्मेति प्रतिपद्यामहे । उच्यते–परिणामि कर्म, कार्यस्य परिणामित्वात् । इह यस्य कार्यं[2] परिणामि तस्य कारणमपि परिणामि । यथा दधिकार्यं परिणामि पयः । यच्चापरिणामि न तस्य कार्यपरिणामिता यथाकाशस्य ॥२०८३॥

**अब्भातिविगाराणं जध [3]वइचित्तं विणा वि कम्मेणं ।**
**तध जति संसारीणं हवेज्ज को णाम तो दोसो ॥२०८४॥**

**अब्भाति॰** गाहा । यथाऽभ्रादिविकाराणामन्तरेण कर्म वैचित्र्यं दृष्टम् । यद्येवं संसारिणामपि स्यात् को दोषः ॥२०८४॥

**कम्मम्मि व को भेतो जध वज्झक्खंधचित्तता सिद्धा ।**
**तध कम्मपुग्गलाण[4] वि [१३७-प्र०] विचित्तता जीवसहिताणं ॥२०८५॥**

**कम्म॰** गाहा । सौम्य कर्म अणु वा को भेदः ? ननूक्तं कर्मापि पुद्गलविकार एव, केवलमात्मसंयोगविशिष्टः । ततो यथाऽभ्रादिविकारविश्वरूपता तथास्यापीति । ॥ २०८५ ॥

**वज्झाण चित्तता जति पडिवण्णा कम्मणो विसेसेणं ।**
**जीवाणुगतस्स मता भत्तीण [5]व सिप्पिणत्थाणं ॥२०८६॥**

**बज्झा॰** गाहा । यदि चेह बाह्यानामभ्रादिविकाराणां पुद्गलमयत्वाद्विचित्रता प्रतिपाद्यते, कर्मणो विशेषेण प्रतिपत्तव्या, पुरुषाधिष्ठानात् । यथेह कुशलशिल्पिविन्यस्ता भक्तयश्चित्राश्चित्रादिषूपलभ्यन्ते तथा पुरुषाधिष्ठितस्य कर्मणः प्रतिनियतविश्वरूपताविशेषोऽभ्युपेयः ॥२०८६॥

**तो जति तणुमेत्तं चिय हवेज्ज का कम्मकप्पणा णाम ।**
**कम्मं पि णणु तणु च्चिय सण्हतरब्भंतरा णवरं ॥२०८७॥**

**जाज्जइ( तो जति )** गाहा । आह–यदि पुनरभ्रादिविकारवत्तनुमात्रतैव स्यात् किमिह कर्मपरिकल्पनया ? उच्यते–कर्मापि ननु तनुरेव केवलमणीयसीन्द्रियविषयातीता चाभ्रादिविकारकारणद्रव्यवत् ॥ २०८७ ॥

---

१ °माउ त्ति **को हे** । २ कार्यपम—इति प्रतौ । ३ वेचि° **को हे त** । ४ पोग्ग° **को हे** । ५ °ण विचित्तणत्थाणं **त** ।

४६

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

**को तीयं विणा दोसो थूलातो[2] सव्वधा विमुक्कस्स ।**
**देहग्गहणाभावो ततो य संसारवोच्छित्ती ॥२०८८॥**

**को तीय** गाहा । आह–यदि पुनरणीयसी तनुर्नैव स्यात् को दोषः स्यात् ? उच्यते––स्थवीयसीं सर्वथा विहायोपादानहेत्वभावाच्छरीरादानाभावः स्यात् । ततश्च संसारोच्छेदः ॥२०८८॥

**सव्वविमोक्खावत्ती णिक्कारणतो[3] व्व सव्वसंसारो ।**
**भवमुक्काणं[4] च[5] पुणो संसरणमतो अणासासो ॥२०८९॥**

**सव्व०** गाहा । अथ(अप्य)शरीरत्वे सति सर्वमोक्षप्रसङ्गः । अशरीरस्यापि च संसरणप्रतिपत्तावकारणः संसारः स्यात्, मुक्तानामपि चाकस्मात् पतनप्रसङ्गः । ततश्चानाश्वासदोषः ॥२०८९॥

**मुत्तस्सामुत्तिमता जीवेण कधं हवेज्ज संबन्धो ।**
**सोम्म ! घडस्स व णभसा जध वा दव्वस्स किरियाए ॥२०९०॥**

**मुत्तस्स** गाहा । आह–मूर्तिमतः कर्मणोऽमूर्तेनात्मना कथं सम्बन्धः स्यात् ? उच्यते–यथेह घटस्य नभसा, द्रव्यस्य वा क्रियादिभिः । एतावती च सम्बन्धक्रिया यत् संयोगः समवायो तदुभयं च मूर्त्तामूर्त्तयोरविरुद्धम् ॥२०९०॥

**अधवा पच्चक्खं चिय जीवोवणिबंधणं जध सरीरं ।**
**चेट्ठइ [6]कम्मयमेवं भवंतरे जीवसंजुत्तं ॥२०९१॥**

**अधवा** गाहा । अथवा यथेह प्रत्यक्षमेव जीवोपनिबन्धनमिदं शरीरमाचेष्टते तद्वत् कार्मणमपि प्रतिपद्यस्व । उतैतद्धर्माधर्मनिमित्तम् । तावपि मूर्त्तामूर्त्तौ भवेतां ? यदि मूर्त्तौ तत्सम्बन्धवदात्मकर्मणोरपि सम्बन्धः । अथामूर्तौ तच्छरीरानुविधायित्वेऽपि समानम् ॥२०९१॥

**मुत्तेणामुत्तिमतो उवघाताणुग्गहा कधं होज्जं[7] ।**
**जध विण्णाणादीणं मदिरापाणोसधादीहिं ॥२०९२॥**

**मुत्ते०** गाहा । आह–मूर्त्तिमता कर्मणाऽऽत्मनोऽमूर्त्तस्योपघातानुग्रहौ कथं स्याताम् ? उच्यते–यथेह–विज्ञानस्य मदिरापानहृत्पूरविषपिपीलिकाशनादुपघातोऽनुग्रहश्च सर्पिर्वचादिमेध्यभेषजोपयोगात्, तथा चक्षुरादिविज्ञानानामिष्टानिष्टविषयनिमित्ताव-

१ तीए को हे । तीइ त । २ थूलाए को हे त । ३ °णउ व्व को हे । ४ °मुक्खा° त । ५ व को हे । ६ तम्म° त । ७ होज्जा को हे । ८ विहानसामदि°–इति प्रतौ ।

नुग्रहोपघातौ सुखस्य दुःखस्य तद्विपरीतविषयनिमित्तौ । तथा रागद्वेषभयशोकादीनामपि सम्भवतोऽभिधेयम् ॥२०९२॥

**अधवा णेगंतोऽयं संसारी सव्वहा[1] अमुत्तो त्ति ।**
**जमणातिकम्मसंततिपरि[१३७-द्वि०]णामावण्णरूवो सो ॥२०९३॥**

**अधवा** गाहा । अथवा नायमेकान्तः संसारी सर्वथैवाऽमूर्त्त इति । कुतः ? अनादिकर्मसन्तानोपनिबन्धनत्वादात्मकर्मसामान्यपर्यायाच्च सुखदुःखादीनाम् । पर्यायिणश्च पर्यायाऽनन्यत्वविवक्षात इति ॥२०९३॥

**संताणोऽणातीओ परोप्परं हेतुहेउभावातो ।**
**देहस्स य कम्मस्स य गोतम ! बीयंकुराणं व ॥२०९४॥**

**संताणो** गाहा । आह–कथं पुनः कर्मणोऽनादिः सन्तान इति ? उच्यते– देहकर्मणोरन्योन्यहेतुहेतुमद्भावात् । इह ययोरन्योन्यहेतुहेतुमद्भावस्तयोरनादिः सन्तानो यथा बीजाङ्कुरयोरथवा पितापुत्रयोः ॥२०९४॥

**कम्मे वाऽसति गोतम ! जमग्गिहोत्तादि सग्गकामस्स ।**
**वेतविहितं विहण्णति दाणातिफलं च लोअम्मि ॥२०९५॥**

**कम्मे वा** गाहा । कर्मण्यसति वा यद् "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादि क्रियानुष्ठानं वेदविहितं तद्विघातः । लोके [च] दानादिक्रियाफलविशेषाणाम् । अनिष्टं चैतत्, क्रियाफलदर्शनात् क्रियादिवदित्युक्तम् ॥२०९५॥

**कम्ममणिच्छंतो वा सुद्धं चिय जीवमीसराइं वा ।**
**मण्णसि देहातीणं जं कत्तारं ण सो जुत्तो ॥२०९६॥**

**कम्म०** गाहा । कर्म वाऽनिच्छन् शुद्धमेवाकर्माणमात्मानमीश्वरमव्यक्ति(क्त)-कालनियतियदृच्छादिकं कर्त्तारमभिप्रैषि शरीरादीनां यदि । असावपि न युक्तरूपः । ॥२०९६॥ कथम् ?

**उवकरणाभावातो णिच्चेट्ठाऽमुत्ततादितो वा वि ।**
**ईसरदेहारंभे वि तुल्लता वाऽणवत्था वा ॥२०९७॥**

**उव०** गाहा । नायमकर्मा शरीरमारभते । निरुपकरणत्वात् । इह यो निरुपकरणो नासावारभते, यथा दण्डादिविकलकुलालः । यश्चारभते नासौ निरुपकरणो यथाऽसा-

---

१ सव्वतो **जे** । २ अनन्नु त्ति **त** । ३ °नो यदनि°–इति प्रतौ । ४ °णाईउ **को हे** । द्रष्टव्या गा° २१२० । ५ जीवस्स **जे** । ६ चा° **को हे** । ७ ताइं **को** । ८ मंणास°–इति प्रतौ । ९ °रासिं वा **जे** । °राई **त** । १० नां यमवगा°–इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वेव दण्डादिसमेतः। न चास्य कर्मान्तरेणान्यदुपकरणमस्ति। अथवाऽयं प्रयोगः—ना[य]मकर्माऽऽरभते, एकत्वादेकपरमाणुवत्। एवमशरीरत्वादाकाशवत्, निःक्रियत्वाद्, अमूर्तत्वात्, सर्वगतत्वादित्यादि। अथ मतिः—ईश्वरः शरीरवानारऽऽभते। तच्छरीरारम्भेऽपि तुल्यता। ननूक्तम् 'अकर्मा नारभतेऽनुपकरणत्वात्' इत्यादि। अथान्यस्तच्छरीरारम्भाय व्याप्रियते। सोऽपि हि शरीरवानशरीरो वा? यद्यशरीरः, नारभते निरुपकरणत्वादित्यादितः। अथ शरीरवांस्तच्छरीरारम्भेऽपि तुल्यता। अथ तच्छरीरमन्यः शरीरवानारभते। अतस्तस्याप्यन्यस्तस्याप्यन्यः इत्यनवस्था, अनिष्टं चैतत् सर्वम् ॥२०९७॥

**अधव सभावं भण्णसि विण्णाणघणादिवेतवंकातो।**
**[3]तध बहुदोसं गोतम! ताणं च पताणमयमत्थो ॥२०९८॥**

**अधव** गाहा। अथवा "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय" इत्यादिवेदवचनप्रामाण्यात् स्वभावोऽभिप्रेतस्तथापि हि भूयांसो दोषाः प्रसजति। कथम्? इह स्वभावो हि वस्तुविशेषोऽकारणता वस्तुधर्मो वाभ्युपगम्येत? सर्वथा च दोषः। तत्र भावस्वभावो वस्तुविशेषः सर्वप्रमाणगोचरातीतत्वात् खरविषाणवत्। अथासौ सर्वप्रमाणविषयातीतोऽप्यस्ति; कर्म किमिति नास्ति? स्वभावास्तित्वे वा यो हेतुः स कर्मणोऽपि समानः। अथवा कर्मणोऽभिधानं स्वभाव इति तन्नामास्ति। न संज्ञामात्रविप्रतिपत्तिः। स च मूर्तिमानमूर्त्तो वा? यदि मूर्त्तिमान्, अस्य कर्मणः को विशेषः? कर्मैव संज्ञाविशिष्टं तत्। अथामूर्तः; नारम्भको निरूपकरणत्वात् इत्यादितः। न च मूर्त्तिमतः शरीरादिकार्यस्यामूर्त्तं [4]कारणमनुरूपमाकाशवत्। अथाऽकारणता नाम स्वभावः। अतोऽभिदध्मः—नाऽकस्मि[क]न्निर्गतः(तिः) शरीरादिकार्यस्य। [ नाकस्मिकमभूत्] शरीरम्, आदिमत्प्रतिनियताकारत्वात्। इह यदादिमत् प्रतिनियताकारं च न तदाकस्मिकं यथा घटः। यच्चाकस्मिकं न तदादिमत् प्रतिनियताकारं च। यथाभ्रादिविकारः। प्रतिनियताकारत्वादेव चोपकरणसमेतकर्तृकं शरीरं घटवत्। न च कर्मणोऽन्यदुपकरणं सम्भाव्यते। अथ वस्तुनो धर्मः स्वभावः। तथाप्यसौ यद्यात्मधर्मो विज्ञानादिवन्न शरीरकारणममूर्त्तत्वादाकाशादिवत्। अथ मूर्त्तिमद्धर्मः। न पुद्गलपर्यायमतिवर्त्तते। कर्माऽपि हि पुद्गलपर्यायाऽनन्यरूपमेवेत्यविप्रतिपत्तिः। न चैषां विज्ञानघनादिपदानामयं वाक्यार्थो यो भवदभिप्रेतः। किं तर्हि? विज्ञानघनाद्यः पुरुष एवायं भूतेभ्योऽर्थान्तरम्। अयं च कर्त्ता। कार्यं च शरीरम्। अत एव च तावत् कर्त्तान्तरं करणमवसीयते, [6]कर्तृकार्यसद्भावात्। इह यत्र कर्तृकार्यसद्भाव-

१ एकम°-इति प्रतौ। २ वुत्ताओ को हे त। ३ ता वं° को हे। ४ स्यामूर्तकं श०-इति प्रतौ। ५. दानादि०-इति प्रतौ। ६. न्तरक० इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्तत्रावश्यंभावि करणं, यथाऽयस्कारायस्पिण्डसद्भावे संदंशः। यच्चात्रात्मनः शरीरकार्यनिर्वृत्तौ करणभावमापद्यते तत्कर्मेति प्रतिपद्यस्व ॥२०९८॥

छिण्णम्मि संसयम्मी जिणेण जरमरणविप्पमुक्केणं[1]।
सो समणो पव्वइतो पंचहिँ सह खंडियसतेहिँ[2] ॥४४८॥२०९९॥[3]

ते पव्वइते सोतुं ततियो आगच्छती जिणसयासे[4]।
वच्चामि[5] णं वंदामि वन्दित्ता पज्जुवासामि ॥४४९॥२१००॥

सीसत्तेणोवगता संपदमिन्दग्गिभूतिणो जस्स।
तिभुवणकतप्पणामो स [१३८-प्र०] महाभागोऽभिगमणिज्जो ॥२१०१॥

तदभिगमणवंदणोवासणादिणा[6] होज्ज पूतपावो हं।
वोच्छिण्णसंसयो वा वोत्तुं पत्तो जिणसगासं[7] ॥२१०२॥

आभट्ठो य जिणेणं[8] जाइ-जरा-मरणविप्पमुक्केणं।
नामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४५०॥२१०३॥

तज्जीवतस्सरीरं ति[9] संसओ ण वि य पुच्छसे किंचि।
वेतपताण य अत्थं ण याणसे[10] तेसिमो अत्थो ॥४५१॥२१०४॥

वसुधातिभूतसमुदयसंभूता चेतण त्ति ते संका।
पत्तेयमदिट्ठा वि हु मज्जंगमदो[11] व्व समुदाए ॥२१०५॥

जध मज्जंगेसु मदो वीसुमदिट्ठो वि समुदए होतुं।
कालंतरे विणस्सति तध भूतगणम्मि चेतण्णं ॥२१०६॥

**छिण्णम्मि** गाहा। **ते पव्व०** गाहा। **सीसत्ते०** गाहा। **तदभि०** गाहा। **आभट्ठो** गाहा। **तज्जीव०** गाहा। **वसुधा०** गाहा। **जध** गाहा। सौम्य वायुभूते! भवदभिप्रायो—नैव हि शरीरादयं पृथक् पुरुषः, पृथिव्यादिमहाभूतसमुदायधर्म एवेयं चेतना, प्रत्येकमदर्शनात्, समुदाये च दर्शनात्। आह—यत् समुदायेषु प्रत्येकं नोपलभ्यते तत्समुदाये चोपलभ्यते तत् समुदायमात्रधर्म एव प्रतीयते। यथा मद्याङ्गे मदः पृथगनुपलभ्यमानस्तत्समुदाय एवाविर्भवति तद्विनाशे चोपरमति, तथेयमपि चेतना पृथगभूता भूतेषु, तत्समुदाये भूत्वा, पुनर्न भवति। वाक्यान्तरेषु चानुश्रूयते—"न ह वै

१ °यम्मि वि° जे। २ °हिं अ खं° जे। ३ **द्वितीयो गणधरवादः समाप्त। त**। ४ सगासं **को हे त**। ५ °मि ण **को जे त**। °मि वं° **हे दी**। ६ तदधिगमवंदणणमंसणादिणा **जे**। ७ °गासे **हे को**। ८ जे प्रतौ "आभट्ठो य जिणणं° ॥ गाधा ॥" इति अंशो गृहीतः। ९ ति मण्णसे ण **जे**। १० °णसी **दी को हे**। ११ °मउव्व। १२ °पं-इति प्रतौ

सशरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः" इत्या- दिष्वतः संशयः ॥ २०९९ ॥

पत्तेयमभावतो ण रेणुतेल्लं व समुदये चेता ।
मज्जंगेसु तु मतो वीसुं पि ण सव्वसो णत्थि ॥२१०७॥

भमि-धणि-वितण्हतादी पत्तेयं पि हु जधा मतंगेसु ।
तध जति भूतेसु भवे चेता तो समुदए होज्जा ॥२१०८॥

जति वा सव्वाभावो वीसुं तो किं तदंगणियमोऽयं ।
तस्समुदयणियमो वा अण्णेसु वि तो भवेज्जा हि ॥२१०९॥

पत्तेय गाहा० । भमि० गाहा । जति गाहा । मा कृथाः संशयम्, न भूतसमु- दायमात्रस्येयं चेतना, सर्वथा पृथगनुपलब्धेः । इह यत् सर्वथा पृथग् नोपलभ्यते तत्समुदायेऽप्यसद् यथा सिकतातैलम् । यच्च समुदायेऽस्ति तत् पृथगपि विद्यत एव यथा मद्याङ्गे मदः । इह यथा सिकतासु पृथगसत् सर्वथा तैलम् । न खल्वि(ल्व)यं मद्याङ्गेषु पृथक् सर्वथा मदाभावः । मद्याङ्गेषु हि पृथगवि(पि) भ्रमा(म्या)दिरूपा या च यावती च मदशक्तिरस्ति तथा भूतेषु यदि पृथग् मनागपि चैतन्यं भवेत् तत्समुदा- येऽपि स्यात् । यदि चेह न मद्याङ्गेषु पृथग्मदभावः स्यात्तदङ्गनियमस्तत्समुदायनियमो वा न स्यात् । यत्र क्वचन येषु केषुचिद्वा समुदितेषु तद्वस्मगोमयादिषु मदः स्यात्, न चासावस्ति ॥२१०९॥

भूताणं पत्तेयं [१३८-द्वि०] पि चेतणा समुदये दरिसणातो ।
जध मज्जंगेसु मदो मति त्ति हेतू ण सिद्धोऽयं ॥२११०॥

भूताणं गाहा । स्यान्मतिः—मंखूक्तं साधूक्तं) यत् पृथगपि मद्याङ्गेषु मद- सामर्थ्यम्, एतदेव हि व्यस्तभूतचेतनायामुदाहरणमिह व्यस्तेष्वपि भूतेषु चैत- न्यमस्ति तत्समुदाये दर्शनात् मद्याङ्गमदवत् । यथा मद्याङ्गेषु मदः पृथगणुत्वान्ना- तिस्पष्टस्तत्समुदाये व्यक्तिमेति तथा पृथग्भूते अणीयसी चेतना तत्समुदाये भूयसी भवतीति । उच्यते—यदात्थ त्वं भूतसमुदायगुणाभिप्रायात् 'चेतनायाः समुदाये दर्शनात्' इत्ययमसिद्धः । न हि भूतसमुदायस्येयं भवेद्यदि व्यस्तभूतेषु न स्यात् । अतो व्यस्तभूतचैतन्यमपि प्रतिपद्येमहि ॥२११०॥

१ °रं ताव—इति प्रतौ । २ तो को हे त । द्रष्टव्या सूत्रकृ० चू० पत्र ३४ । ३ सूत्रकृ० १. १. १. ८

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

णणु पच्चक्खविरोधो गोतम ! तं णाणुमाणभावतो ।
तुह पच्चक्खविरोधो पत्तेयं भूतचेन त्ति ॥२१११॥

णणु गाहा । आह—ननु प्रत्यक्षविरुद्धमिदं यत्समुदायोपलभ्या चेतना, न समुदायस्येति यद्वद् घटोपलभ्या रूपादयो न घटस्येति । उच्यते—न हि समुदाये दर्शनादवश्यं तद्गुणेनैवानया भवितव्यमनुमानसद्भावात् । घटरूपादयस्त्वर्थान्तरस्येति नानुमानमस्ति । भवत एव हि प्रत्यक्षविरुद्धमिदं भूतचैतन्यप्रतिज्ञानमनुमानाभावात् । भूतग्रहणं चेह भूतविशिष्टमात्रपुद्गलानामेव न, सात्मकानामविप्रतिपत्तेः ॥२१११॥

भूतिन्दियोवलद्धाणुसरणतो तेहि भिण्णरूवस्स ।
चेता पंचगवक्खोवलद्धपुरिसस्स वा सरतो ॥२११२॥

भूतिंदिय० गाहा । आह—न भूतसमुदायस्य चैतन्यमिति किमनुमानम् ? उच्यते—भूतेन्द्रियातिरिक्तः संचेतयिता, तदुपलब्धार्थाऽनुस्मरणात् । यो हि यैरुपलब्धानर्थानेकोऽनुस्मरति स तेभ्योऽन्यो दृष्टो यथा गवाक्षैरुपलब्धानर्थानेकोऽनुस्मरंस्तेभ्यो देवदत्तः । यश्च यतोऽनन्यो नासावेकोऽनेकोपलब्धानामर्थानामनुस्मर्त्ता यथा मनोविज्ञानम् ॥२११२॥

तदुवरमे वि सरणतो तव्वावारे वि णोवलंभातो ।
इन्दियभिण्णस्स मती पंचगवक्खाणुभविणो व्व ॥२११३॥

तदु० गाहा । इतश्चेन्द्रियातिरिक्तो विज्ञाता तदुपरमेऽपि तदुपलब्धार्थाऽनुस्मरणात् । यो हि यदुपरमेऽपि यदुपलब्धानामर्थानामनुस्मर्त्ता स तेभ्योऽन्यो दृष्टः, यथा गवाक्षोपलब्धानामर्थानां गवाक्षोपरमे देवदत्तः । अनुस्मरति चायमात्मा—अन्धबधिरादिकालेऽपीन्द्रियोपलब्धानर्थान् । अतः स तेभ्योऽर्थान्तरमिति । व्यतिरेकः पूर्ववत् । इतश्चेन्द्रियातिरिक्तो विज्ञाता—तद्व्यापारेऽपि अनुपलम्भात् । यो हि यद्व्यापारेऽपि यदुपलभ्यानर्थान्नोपलभते स तेभ्योऽन्यो दृष्टो यथा गवाक्षानुपरमेऽपि तद्दर्शनानुपयुक्तस्तेभ्यो देवदत्तः ॥२११३॥

उवलम्भणेण विगारगहणतो तदधिओ धुवं अत्थि ।
पुव्वावरवादायणगहणविगारादिपुरिसो व्व ॥२११४॥

उव० गाहा । इतश्चेन्द्रियातिरिक्तो विज्ञाता—अन्येनोपलभ्यान्यैर्विकारदर्शनात् । योऽन्येनोपलब्धाऽन्येन विकारमुपदर्शयति स ताभ्यामन्यो दृष्टो, यथा

१ तह त । २ °तनयि°—इति प्रतौ । ३ °को न स्म°—इति प्रतौ । ४ भ्याण्यधिकारुर्द—इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पूर्वापरवातायनाभ्यां देवदत्तः। यथा देवदत्तः पूर्वेण वातायनेन योषितमुपलभ्याऽपरेणायातास्तस्या एवाक्षा हस्तेन वा विकारमुपदर्शयति तथाऽयमप्यात्मा आम्रमाम्रं रस्यमानमुपलभ्य चक्षुषा, रसनेन ह्लासादिविकारमुपदर्शयंस्ताभ्यामन्योऽवसीयते। इतश्चेन्द्रियातिरिक्तो विज्ञाता–अन्येनोपलभ्यान्येन ग्रहणदर्शनात्। योऽन्येनोपलभ्यान्येन ग्रहणं करोति स ताभ्यामन्यो दृष्टः, यथा पूर्वापरवातायनाभ्यां देवदत्तः। यथा देवदत्तः पूर्वेण वातायनेनादेयमर्थमुपलभ्य घटादिकमपरेणादानं करोति। तथाऽयमप्यात्मा चक्षुषाऽऽदेयमर्थमुपलभ्य हस्ताभ्यामाददानस्तदर्थान्तरमवसीयते ॥२११४॥

[३]सव्विन्दियोवलद्धाणुसरणतो तदधिओऽणुमंतव्वो।
जध पंचभिण्णविण्णाणपुरिसविण्णाणसंपण्णो ॥२११५॥

सव्विंदिय० गाहा। इतश्चेन्द्रियातिरिक्तस्येयं चेतना, सर्वेन्द्रियोपलब्धार्थानुस्मरणात्। यो हि यैरुपलब्धानामर्थानामेकोऽनुस्मर्त्ता स तेभ्योऽन्यो दृष्टः, यथेच्छानुविधायि— शब्दादिभिन्नजातीयविज्ञानपुरुषपञ्चकात्तदशेषविज्ञानाभिज्ञः पुमान्। स्यात्–शब्दादिभिन्नविज्ञानपुरुषपञ्चकवत् पृथगिन्द्रियोपलब्धिमत्त्वानिष्टापादनात् विरुद्धोऽयम्। तच्च न, इच्छानुविधायिविशेषणादुपलब्धिकारणत्वाच्चोपलब्धिमदुपचारात् ॥२११५॥

विण्णाणंतरपुव्वं बालण्णाणमिह णाणभावातो।
जध बालणाणपुव्वं जुवणाणं तं च देहऽधियं ॥२११६॥

विण्णा० गाहा। अन्यविज्ञानपूर्वकमिदं बालविज्ञानम्, विज्ञानत्वात्। इह यद्विज्ञानं तदन्यविज्ञानपूर्वकं दृष्टम्, यथा बालविज्ञानपूर्वकं युवविज्ञानम्। [४]यज्ज्ञानपूर्वकं चेदं बालविज्ञानं तच्छरीरादन्यत्, शरीरात्ययेऽपीहत्यविज्ञानकारणत्वात्। तस्य च गुणत्वात् तद्गुणिनमात्मानं व्यवस्यामः। तस्मादन्यः शरीरादात्मा, न शरीरमात्रम्। स्याद्–बालविज्ञानपक्षे विज्ञानत्वादित्ययं प्रतिज्ञार्थैकदेशित्वादसिद्धः। तच्च न, विशेषसामान्याभिधानात्। यथाऽनित्यः सामान्यशब्दः शब्दत्वाद् भेरीशब्दवत्। सामान्य एव पक्षे प्रतिज्ञार्थैकदेशः स्यात्, यथाऽनित्यः शब्दः शब्दत्वात्, तथेहापि यदि सामान्यमेव पक्षः स्यात् अन्यविज्ञानपूर्वकमिदं विज्ञानत्वात्ततः स्यात् प्रतिज्ञार्थैकदेशः ॥२११६॥

---

१. यथा–इति प्रतौ। २. °त्माम्रमस्य मा–इति प्रतौ। ३ सव्वेंदि० को हे। ४ यदज्ञा०–इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पढमो[1]त्थणाभिलासो अण्णाहाराभिलासपुव्वोऽयं ।
[2]जध संपताभिलासोऽणु[१३९ प्र०]भूतितो सो य देहधियो ॥२११७॥

पढमो गाहा । योऽयमाद्यस्तनाभिलाषो बालस्य, अयमन्याभिलाषपूर्वकः, अनुभूतेरनुभवादित्यर्थः । इह योऽनुभवात्मकः सोऽन्याभिलाषपूर्वको दृष्टो यथा सांप्रताभिलाषः । यदभिलाषपूर्वकश्चायमाद्यस्तनाभिलाषः स शरीरादन्यः शरीरात्यये ऽपीहत्याभिलाषकारणत्वात् । न चापद्रव्यो गुणोऽस्तीत्यतो यस्तदाश्रयः स पुरुषः शरीरादर्थान्तरम् । स्यात्—अनेकान्तोऽयमिह—नाभिलाषोऽन्याभिलाषपूर्वक एव । न हि मोक्षाभिलाषोऽन्यमोक्षाभिलाषपूर्वकः । तच्च न, अविशेषाभिधानात् । मोक्षाभिलाषोऽपि हि न सामान्याभिलाषपूर्वकत्वमतिवर्त्तते । अथवा आद्यस्तनाभिलाषोऽन्याभिलाषपूर्वकोऽभिलाषत्वादिति प्रयोगः ॥२११७॥

बालसरीरं देहंतरपुव्वं इन्दियातिमत्तातो ।
जुवदेहो बालातिव स जस्स देहो स देहि त्ति ॥२११८॥

बाल० गाहा । बालशरीरमन्यदेहपूर्वकम्, इन्द्रियवत्त्वात् । यदिन्द्रियवत् तदन्य-देहपूर्वकं दृष्टं यथा युवशरीरं बालशरीरपूर्वकम् । यत्पूर्वकं चेदं बालशरीरं तदस्माच्छरीरादर्थान्तरमिहत्य(त्य)शरीरात्ययेऽपीहत्यशरीरं कारणम् । अतश्च भवान्तरसद्भावः सिद्धः । न चासौ शरीरादर्थान्तरमात्मानमन्तरेण युक्तस्तस्मादन्यः शरीरादात्मेति । एवं चेतनत्वात् सुखदुःखादिमत्त्वादित्यादि ॥ २११८ ॥

अण्णसुहदुक्खपुव्वं सुहाति बालस्स संपतंसुहं व ।
अणुभूतिमयत्तणतो अणभूतिमयो य जीवो त्ति ॥२११९॥

अण्ण० गाहा । अन्यसुखपूर्वकमिदमाद्यं बालसुखम्, अनुभवात्मकत्वात्, साम्प्रतसुखवत् । यत्सुखपूर्वकं चेदमाद्यं सुखं तच्छरीरादन्यत, तदत्ययेऽपीहत्यसुखकारणत्वात् । न चापद्रव्यं तद्, गुणत्वात् । अतो यस्तदाश्रयः स शरीरादन्यो जीव इति । एवं दुःखरागद्वेषभयशोकादयोऽप्यायोजनीयाः ॥ २११९ ॥

[3]संताणोऽणाईओ परोप्परं हेतुहेतुभावातो ।
देहस्स य कम्मस्स य गोतम ! बीयंकुराणंव ॥२१२०॥
तो कम्मसरीराणं कत्तारं करणकज्जभावातो ।
पडिवज्जे तदब्भधियं दण्डघडाणं कुलालं व ॥२१२१॥

---

१ °मो थणा को हे त । २ जह बालहिलासपुव्वो जुवाहिलासो स देहहिओ को ३ सांप्रभाभि इति प्रतौ । ४ °द्धौ इति प्रतौ । ५ संपइ को हे । ६ द्रष्टव्या गा० २०९४ । ७ णाहीओ जे । ० णाईउ को हे । ८ ० हेयभा० जे । ९ ठिति अंकुराणं व–जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

संताणो गाहा । तो कम्म० । देहकर्मणोः सन्तानोऽनादिः, अन्योन्यहेतुहेतुमद्भावात् । इह ययोरन्योन्यं हेतुहेतुमद्भावस्तयोरनादिः सन्तानः । यथा बीजाङ्कुरयोः । अथवा पितापुत्रयोः । अत एवानयोर्देहकर्मणोः कर्तावसीयते, तयोः कार्यकारणभावात्, इह ययोः कार्यकारणभावस्तयोस्तदर्थान्तरभूतः कर्त्ता दृष्टो यथा दण्डघटयोः कुलालः । यश्चानयोः कर्त्ता स जीवः शरीरादर्थान्तरमिति । स्यात्-क्व कर्म प्रतिपादितम् ? उच्यते-ननूक्तमन्यदेहपूर्वकमिदं बालकशरीरमिन्द्रियादिमत्त्वात् । यत्पूर्वकं चेदं तत् कर्मेति पूर्वशब्दस्य कारणवचनत्वादित्यादि ॥२१२१॥

[1]देहस्सऽत्थि विधाता पतिणियताकारतो घडस्सेव ।
अक्खाणं च करणतो दण्डातीणं कुलालो व्व ॥२१२२॥

देहस्स गाहा । [2]विद्यमानकर्तृकमिदं शरीरम्, आदिमत्प्रतिनियताकारत्वात् । इह यदादिमत् प्रतिनियताकारं च तद्विद्यमानकर्तृकं दृष्टम्, यथा घटः । यच्चाऽविद्यमानकर्तृकं न हि तदादिमत् प्रतिनियताकारं च । यथाभ्रादिविकारः । यत्कर्तृकं चेदं शरीरं स जीवः । तस्मादन्य इति । आदिमत्त्वविशेषणं जम्बूद्वीपादिलोकस्थितिनिषेधार्थम् । विद्यमानाधिष्ठातृकाणीन्द्रियाणि, करणत्वात् । इह यत् करणं तद् विद्यमानाधिष्ठातृकं दृष्टम्, यथा दण्डादयः कुलालाधिष्ठानाः । यच्चाविद्यमानाधिष्ठातृकं न तत् करणं यथाकाशम् । यश्चैषामधिष्ठाता स जीवः तेभ्योऽर्थान्तरमिति । ॥२१२२॥

[3]अत्थिन्दियविसयाणं आदाणादेयभावतोऽवस्सं ।
कम्मार इवादाता लोए संडासलोहाणं ॥२१२३॥

अत्थि० गाहा । विद्यमानाऽऽदातृकमिन्द्रियविषयकदम्बकम्, आदानाऽऽदेयभावात् । इह यत्रादानादेयभावस्तत्र विद्यमानाऽऽदातृकत्वं दृष्टम्, यथा संदंशायस्पिण्डयोरयस्कारोऽऽदातृकत्वम् । यच्चाविद्यमानाऽऽदातृकं न तत्राऽऽदानाऽऽदेयभावो यथाकाशे । यश्च विषयाणामिन्द्रियैरादाता स तेभ्योऽर्थान्तरमात्मेति ॥२१२३॥

[5]भोत्ता देहातीणं भोज्जत्तणतो णरो व्व भत्तस्स ।
संघातातित्तणतो अत्थि य अत्थी घरस्सेव ॥२१२४॥

भोत्ता गाहा । विद्यमानभोक्तृकमिदं शरीरादि भोग्यत्वात् । इह यद्भोग्यं तद्विद्यमानभोक्तृकं दृष्टम्, यथाऽऽहारवस्त्रादि । यच्चाविद्यमानभोक्तृकं न तद्भोग्यं यथा

१ द्रष्टव्या गा० २०२२ । अत्थि सरीरविधात जे । २ द्रष्टव्या सूत्रकृ० चू० १.१.१.१२ । ३ द्रष्टव्या गा० २०३३ । ४ संडास को हे त । ५ द्रष्टव्या गा० २०२४ । ६ घड जे को । ७ नाभो० इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

खरविषाणम्। यश्चैषां शरीरादीनां भोक्ता स तेभ्योऽर्थान्तरमात्मेति। विद्यमानस्वामिकमिदं शरीरेन्द्रियादि, संघातत्वात्। इह यत् संघातात्मकं तद्विद्यमानस्वामिकं दृष्टम्, यथा गृहम्। यच्चाविद्यमानस्वामिकम्, न तत् संघातात्मकम्, यथा खरविषाणम्। यश्च शरीरादिस्वामी स तेभ्योऽर्थान्तरमात्मेति। एवं मूर्तिमत्त्वादैन्द्रियकत्वाच्चाक्षुषत्वादित्यादयोऽप्यायोजनीयाः ॥२१२४॥

[1]जो कत्ताति स जीवो [१३९-द्वि०] सज्झविरुद्धो त्ति ते मती होज्ज।
मुत्तातिपसंगातो तं णो संसारिणोऽदोसो[2] ॥२१२५॥

**जो कत्ता** गाहा। यश्चायं कर्ताऽधिष्ठाताऽऽदाता भोक्ता अर्थी चोक्तः स शरीरादन्यो जीवः। तथा चैवोदाहृतम्। स्यात्–कुलालादीनां मूर्तिमत्त्वसंघाताऽनित्यत्वादिदर्शनादात्मनोऽपि तद्धर्मतासक्तेर्विरुद्धाभिप्रायः। तच्च न, संसारिणः खल्वदोषाः। संसार्यवस्थायामेवायं साध्यते, न मुक्तावस्थायाम्। अयं चानादिकर्मसन्तानोपनिबन्धनत्वात् द्रव्यपर्यायार्थिकनयाभिप्रायाच्च तद्धर्मेत्यभिप्रायः ॥ २१२५ ॥

जातिस्सरो ण विगतो सरणातो बालजातिसरणो व्व।
जध वा सदेसवत्तं[3] णरो सरंतो विदेसम्मि ॥२१२६॥

**जाति०** गाहा। योऽयं जातिस्मरोऽयमविनष्ट इहायातः, तदनुभूतानुस्मरणात्। योऽन्यदेशकालानुभूतमर्थमनुस्मरति सोऽविनष्टो दृष्टः यथा बाल्यकालानु-[4]भूतानामन्यदेशानुभूतानां चार्थानामनुस्मर्ता देवदत्तः। यश्च विनष्टो नासावनुस्मरति यथा जन्मानन्तरोपरतः। न चान्यानुभूतानामर्थानामन्यस्याकृतसङ्केतस्यानुस्मरणमस्ति यथा देवदत्तानुभूतानां यज्ञदत्तस्य ॥२१२६॥

अध मण्णसि खणिओ वि हु सुमरति विण्णाणसंततिगुणातो।
तह वि सरीरादण्णो सिद्धो विण्णाणसंताणो ॥२१२७॥

**अध** गाहा। अथ मन्यसे–जन्मा[न]न्तरविनष्टोऽप्यनुस्मरति, विज्ञानसन्तानावस्थानात्। एवमपि भवान्तरसद्भावः, सर्वशरीरेभ्यश्च विज्ञानसन्तानार्थान्तरता सिद्धा, अविच्छिन्नविज्ञानसन्तानात्मकश्चात्मेति शरीरादर्थान्तरमिति सिद्धः ॥२१२७॥

ण य सव्वधेव खणियं णाणं पुव्वोवलद्धसरणातो।
खणिओ ण सरति भूत जध जम्माणंतरविणट्ठो ॥२१२८॥

**ण य** गाहा। न च सर्वथैव क्षणिकं विज्ञानमिह, पूर्वोपलब्धार्थानुस्मरणादेव। यः क्षणिको नासावनुस्मरति यथा जन्मानन्तरोपरतः ॥२१२८॥

---

१ द्रष्टव्या गा० २०२५। २ °जो दो है। ३ सदेह जे। ४ बालानु–इति प्रतौ। बाल्यकालानु° इति सूत्रकृ० चू०। बालकाला–को०।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जस्सेगमेगबंधणमेगन्तेण खणियं च विण्णाणं ।
[1]सव्वखणियविण्णाणं तस्सायुत्तं कदाचिदवि ॥२१२९॥
जं सविसयणियतं चिय जम्माणंतरहंतं च तं किध णु ।
णाहिति सुबहुअविण्णाणविसयखणभंगतादीणि ॥२१३०॥

जस्सेग० गाहा । [जं सवि० गाहा] । इह यस्यैकमेकाश्रयालम्बनमुत्पत्त्यनन्तरध्वंसि च विज्ञानमिष्टं तस्य 'सर्वं क्षणिकम्' इति चैतद्विज्ञानं न कदाचिदपि सम्भाव्यते । कथं ? सर्वमित्येतदशेषविज्ञेयाश्रयम् । न चेह सर्वविज्ञेयालम्बनं विज्ञानमभिप्रेतम् । परस्य स्वविषयनियतमात्रमेकमेव हि [4]तदिति कुतोऽस्य सर्वपरिच्छेदसामर्थ्यम् ? एकार्थत्वेऽपि हि सर्वपरिच्छेदसामर्थ्यं भवेद्यदि युगपदनेकविज्ञानप्रसूतिः, आत्मा च तन्निबन्धनमवस्थितः प्रतिपद्यते(द्येत) । न च तदनेकमिष्यते ॥ अथवा यदि तदेकमेकनिबन्धनं च सदुत्पत्त्यनन्तरध्वंसि न स्यात्, ततस्तदासीनमन्यं चान्यं चार्थमुत्पत्त्यनन्तरमुपरमन्तमुपलभ्य 'सर्वमस्मद्वर्जमस्मत्समानजातीयवर्जं च क्षणिकम्' इत्यवबुध्येत, यदि च प्रत्ययनियमो न स्यात् । स्वप्रत्ययमात्रनियतमेव हि सर्वं विज्ञानमिति । न चेहाऽक्षणिकत्वमभिप्रेतं परस्य प्रत्ययार्थान्तरवृत्तिश्च, यतः सर्वपरिच्छेदशक्तिरस्य स्यात् । तदक्षणिकत्वादिप्रतिपत्तौ च पक्षहानिः । अतश्च जातिस्मरविज्ञानमविनष्टमिहायातमनपद्रव्यं च तद्, गुणत्वात्, तदाश्रयश्चात्मेति सिद्धम् ॥२१३०॥

[5]गेण्हेज्ज सव्वभंगं जति य मती सविसयाणुमाणातो ।
तं पि ण जतोऽणुमाणं जुत्तं सत्ताइसिद्धीयं [6] ॥२१३१॥

गेण्हेज्ज गाहा । अथ मतिः—स्वविषयानुमानतोऽवभोत्स्यते सर्वभङ्गमयमस्मद्विषयः क्षणिकोऽहं च । अत एव च विज्ञानविषयसामान्यादन्यविज्ञानविषयाणामपि क्षणिकत्वमिति । तच्च न, यतस्तत्सत्त्वादिप्रसिद्धावनुमानं युक्तम् । न च तस्य प्रतीतम्—अन्यविज्ञानानि सन्ति तद्विषयास्तत्स्वभावप्रत्ययनियमादयश्च । तदप्रतीतौ च क्षणिकत्वानुमानमयुक्तम् । स्यात्—स्वानुमानादेवैतत्—यथाहमस्मि मद्विषयश्च, उभयं च क्षणिकम्, एवमन्यविज्ञानविषया अपीति । तच्च न, यतस्तदप्रत्ययात्तदात्मानमेव नावबुध्यते—अहमस्मि विज्ञानं क्षणिकं चेति । न चास्य स्वविषयमात्रभङ्गप्रतीतिरपि तत्समानकालोपरतत्वात् ॥२१३१॥

जाणेज्ज वासणातो सा वि हु वासेन्तवासणिज्जाणं [7] ।
[१४०-प्र०]जुत्ता [8] समेच्च दोण्हं ण तु जम्माणंतरहतस्स ॥२१३२॥

---

१ सव्वं खणवि० जे । २ हितं त । ३ खय° हे । ४ हि कुतोऽस्य सर्वपरिच्छेदसामर्थत्वेपि हि सर्वपरि°--इति प्रतौ । ५ गिण्हि° हे । ६ °सिद्धीओ को हे । ७ वासित्तवा° को हे त । ८ जुत्तो जे ।

**जाणेज्ज** गाहा । स्यात्–पूर्वविज्ञानवासनायोगादन्यविज्ञानविषयस्वभावभङ्गादिप्रतीतिः । तच्च न, यतो विद्यमानयोरेव वासकवासनीयता युक्ता, नोत्पत्त्यनन्तरोपरतस्य वासकत्वम्, अनुत्पन्नस्य वा वासनीयत्वम् । उभयावस्थाने चाक्षणिकत्वम् । वासनायाश्च क्षणिकाक्षणिकत्वादुभयव्याघात इति ॥२१३२॥

**बहुविण्णाणप्पभवो जुगवमणेगत्थताऽधवेगस्स ।**
**विण्णाणावत्था वा [1]पडुच्च वित्तीविघातो वा ॥२१३३॥**
**विण्णाणखणविणासे दोसा इच्चादयो पसज्जंति ।**
**ण तु ठितसं[2]भूतच्चुतविण्णाणमयम्मि जीवम्मि ॥२१३४॥**

**बहु०** गाहा । **विण्णाण०** गाहा । एवं क्षणभङ्गाभिधायिनः सर्वसंव्यवहारोच्छेदप्रसङ्गः स्यात् । स च नेष्यते । युगपदनेकविज्ञानप्रसूतिरभ्युपगम्यतामात्मनि च तन्निबन्धनमनपायः । अन्यथा कृतसङ्केतविज्ञानकदम्बकमकिञ्चित्करं परसन्तानविज्ञानवत् । क्षणिकैकविज्ञानाभ्युपगमेऽपि च सत्यात्मनि संव्यवहारः सा(स्या)द्यस्मादसावतीतानेकविज्ञानाहितसंस्कारस्तदुपलब्धानामर्थानामनुस्मर्त्ताऽनुप्रयोजकश्चावस्थितः । विज्ञानेऽनेकार्थताऽभ्युपगमे वा सत्यात्मनि संव्यवहाराविरोधः स्यात्, एकार्थत्वेऽपि वा, विज्ञानावस्थानात् । ततश्च स एवात्मा विज्ञानविशिष्टः । प्रतीत्य वृत्तिमात्रपरित्यागाभ्युपगमेऽपि वा नित्यत्वात् पूर्ववत् । क्षणिकत्वेऽपि वा सत्यात्मनि [न] संव्यवहारः । सर्वथा न विज्ञातारमन्तरेण संव्यवहारक्रियास्ति, विज्ञानमात्रतायामुत्पत्त्यनन्तरविनश्वरत्वे चानेकविज्ञानप्रसूतिप्रभृतयोऽवश्यं प्रसजन्ति । तत्र यस्येह विज्ञानात्मा द्रव्यतयावस्थितः, प्राग्विज्ञानात्मनोपरमति, पाश्चात्यविज्ञानात्मना चोत्पद्यतेऽतीतानेकविज्ञानाहितसंस्कारतया च, तद् अर्थानामनुस्मर्त्ता नियतः ॥२१३३–३४॥

**तस्स विचित्तावरणक्खयोवसमजाइं चित्तरूवाइं ।**
**खणियाणि य कालंतरवित्तीणि य मइविधाणाइं ॥२१३५॥**
**णिच्चो संताणो[3] सिं सव्वावरणपरिसंखये जं च ।**
**केवलमुदितं केवलभावे णाणं तमविकप्पं ॥२१३६॥**
**सो जति देहादण्णो तो पविसंतो [4]विणिस्सरंतो वा ।**
**कीस ण दीसति गोतम ! दुविधाणुवलद्धिदो[5] सा त[6] ॥२१३७॥**
**असतो खरसिंगस्स व सतो [7]वि दूरादिभावतोऽभिहिता ।**
**सुहुमाऽमुत्तत्तणतो कम्माणुगतस्स जीवस्स ॥२१३८॥**

१ वा बहुत्त **त** । २ संब्भूत° **जे** । ३ संताणे **त** । ४ °तो व नि° **त हे** । °तो व णीस° **को** । ५ द्धिउ सा य **हे** । ६ °त्सेण° **त को हे** । ७ य **त** ।

**तस्स** गाहा । **णिच्चो** गाहा । **सो जति** गाहा । **असतो** गाहा । आह—स यदि शरीरादर्थान्तरमतस्तदनुविशन्निश्चरन् वा किं नोपलभ्यते ? उच्यते—अनुपलब्धिद्वैविध्यात् । तत्र द्विविधानुपलब्धिः—सतोऽसतश्च । तत्रासतो[नुपलब्धिः खरविषाणस्य । सत]स्तद्यथा—अतिविप्रकर्षादतिसन्निकर्षादतिसौक्ष्म्यात्मनोऽनवस्थानादिन्द्रियार्थदौर्बल्यात् मतिदुर्बलत्वादशक्यत्वादावरणादभिभवात् सामान्यादनुपयोगादनुपायाद्विस्मृतेर्दुरागमात् मोहाद्विदर्शनाद् विकारादक्रियातोऽनधिगमाच्च ।

तत्रातिविप्रकर्षा(र्षा)त् स्वर्गादीनाम्, अतिसन्निकर्षादक्षिपक्ष्मादीनाम्, अतिसौक्ष्म्यात् परमाणोः, मनोऽनवस्थानाद् विक्षिप्तचेतसाम्, इन्द्रियार्थदौर्बल्यादिन्द्रियार्थानामतिदुर्बलत्वाच्छास्त्रार्थविशेषाणाम्, अशक्यत्व त् स्वमस्तकादीनाम्, आवरणान्निर्मीलितलोचनानाम्, अथवा कुड्यादिव्यवहितानाम्, अभिभवनादह्नि ताराणाम्, सामान्यात् सूपलक्षितस्यापि माषादेः समानराशिप्रक्षिप्तस्याप्रत्यभिज्ञानात्, अनुपयोगादनुपयुक्तस्य शेषविषयाणाम्, अनुपायाद् गवादीनां शृङ्गादिभ्यः पयसः, विस्मृतेः पूर्वोपलब्धस्य, दुरागमात्तत्प्रतिरूपकविप्रलम्भितमतेर्हेम्नः, मोहात्तत्त्वस्य जीवादेः, विदर्शनादन्धस्य शुक्लादेः, विकाराद् बालकालोपलब्धस्य वृद्धतायामप्रत्यभिज्ञानम्, अक्रियातो वृक्षमूलादीनाम्, अनधिगमादनध्ययनाच्छास्त्रस्येति । यस्मादियमेकान्नविंशतिविधानुपलब्धिः सतां भावानाम्, अतो गृहाण—आत्मनोऽमूर्त्तत्वात् कार्मणस्य चातिसौक्ष्म्यादनुपलब्धिर्नाभावात् । स्यात्—अनुपलब्धिद्वैविध्यात् कुत एतत् सत एवात्मनोऽनुपलब्धिर्नास्त इति ? उच्यते—ननूक्तमनुमानसद्भावादित्यादि ॥२१३५–३८॥

**देहाणण्णे व्वे जिये जमग्गिहोत्तादि सग्गकामस्स ।**
**वेतविहितं विहण्णति दाणादिफलं च लोगम्मि ॥२१३९॥**
**विण्णाणघणादीणं वेदपताणं पं[१४०–द्वि०]दत्थमविदंतो ।**
**देहाऽणण्णं मण्णसि ताणं च पताणमयमत्थो ॥२१४०॥**

**देह०** गाहा । [विण्णा० गाहा] । देहानन्यत्वे चात्मनो यद् 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादि क्रियानुष्ठानं वेदविहितं तद्विघातः, लोके च दानादिक्रियाफलविशेषाणाम्, अनिष्टं चैतत्, क्रियाफलदर्शनात्, कृष्यादिवदित्याद्युक्तम् ।

विज्ञानघनादिवेदपदानां वाक्यार्थमविदन् भवानेवमभिमन्यते—'न देहादूर्ध्वं पुरुषः' इति । तन्मैवं मंस्थाः । नैषां पदानामेष वाक्यार्थः । किं तर्हि ? विज्ञानघनाख्यपुरुष एवायं भूतेभ्योऽर्थान्तरम् । अत एव चोक्तम् एष भूतसङ्घातो विद्यमानकर्तृकः खल्वादिमत, प्रतिनियताकारत्वाद् घटवद् । अस्य यः कर्त्ता स पुरुष इति ॥२१३९–४०॥

१ व.**को हे त** । २ तुमत्थमविं° त । तमत्थम° **को हे** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

छिण्णम्मि संसयम्मी जिणेण जरमरणविप्पमुक्केणं ।
सो समणो पव्वइतो पंचहिं सह खण्डियसएहिं ॥४५२॥२१४१॥[1]

ते पव्वइते सोतुं वियत्तो[2] आगच्छति[3] जिणसगासं ।
वच्चामि णं वंदामि[4] वंदित्ता पज्जुवासामि[5] ॥४५३॥२१४२॥

आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं ।
णामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४५४॥२१४३॥

किं म[6]ण्णे [7]पंच भूता अत्थि [8]व णत्थि त्ति संसयो तुज्झ[9] ।
वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४५५॥२१४४॥

भूतेसु तुज्झ संका [10]सिविणयमाओवमाइं होज्ज त्ति ।
ण वियारिज्जंताइं [11]भयंति जं सव्वधा जुत्ति ॥२१४५॥

भूतातिसंसयातो जीवातिसु का कध त्ति ते बुद्धी ।
तं सव्वसुण्णसंकी मण्णसि मायोवमं लोअं ॥२१४६॥

छिण्णम्मि गाहा । ते पव्व० गाहा । आभट्ठो० गाहा । किं मण्णे गाहा । भूतेसु गाहा । [भूता० गाहा] हे व्यक्त ! भूतेषु भवतः सन्देहः—स्वप्नमायोपमानीमानि स्युर्यतो न जिज्ञास्यमानानि युक्तीः संसहन्ते । तत्संशयाच्च जीवकर्मादिषु का कथा ? भूतविकाराधिष्ठानाल्लोकमेव हि मायोपमानमभिमन्यसे ॥२१४१–४६॥

जध किर ण सतो परतो णोभयतो णावि अ[12]ण्णतो सिद्धी ।
भावाणमवेक्खातो वियत्त ! जध दीहहुस्साणं[13] ॥२१४७॥

जध गाहा । भवतोऽभिप्रायो यथा किल न स्वतः, न परतः, नोभयतः, न चान्यतः सिद्धिः सम्भाव्यते भावानाम्, ह्रस्वदीर्घादिव्यपदेशवत् । इह न ह्रस्वं स्वतः सिध्यति दीर्घापेक्षत्वात् । न परतः, परप्रसिद्ध्यभावात् । नोभयतः, तदुभयाभावात् । न चान्यतोऽनपेक्षत्वात् । आह च—

"न दीर्घेऽस्तीह दीर्घत्वं न ह्रस्वे नापि च द्वये ।
तस्मादसिद्धिः शून्यत्वात् सदित्याख्यायते क हि ?"

---

१ इति तृतीयगणधरवादः समाप्तः ॥ त । २ °त्तु त को । °त्त हे । ३ °तीत °च्छइ दी हम । ४ °मी का त हे दी ह । °मि म । ५ °मि हे को दी हम । ६ मणि दी हा । ७ मण्णे अत्थि भूया उदाहु णत्थि हे का त । ८ °त्थि नत्थि म दी हा । ९ तुज्झं म दी हा । १० सुवि° त को हे । ११ चयं° त । भयं° को । १२ णावि वण्ण° जे । १३ दीहह° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

"हूस्वं प्रतीत्य सर्वं दीर्घं दीर्घं प्रतीत्य हूस्वमपि ।
न च किञ्चिदस्ति सिद्धं व्यवहारवशाद् वदन्त्येवम् ॥" ॥२१४७॥

**अत्थित्तघडे[१४१-प्र०]काणेकता य सव्वेकदादिदोसातो ।**
**सव्वेऽणभिलप्पा वा सुण्णा वा सव्वधा भावा ॥२१४८॥**

**अत्थित्त०** गाहा । अथास्ति-घटयोरेकत्वमन्यत्वं वाभ्युपगम्येत ? सर्वथा चाऽयुक्तिः । यद्येकत्वमतो यो योऽस्ति स स घट इति सर्वघटत्वप्रसङ्गः—घटस्य सर्वात्मकत्वम्, अनिष्टं चैतत् । तथा, यो घटः स एवास्तीति घटमात्रावरोधादस्तित्वस्याऽघटाभावः, ततश्च प्रतिपक्षाभावाद् घटस्याप्यभावः । अन्यत्वे अस्ति-घटयोरस्त्यर्थान्तरत्वाद् घटस्यासत्त्वम्, खरविषाणवत् । घटाद्यनाधारत्वाच्चास्तित्वमसदित्यतो भावानामनभिलापो वानुरूपः सर्वथाभाव इति ॥ २१४८ ॥

**जाताऽजातोभयतो ण जायमाणं च जायते जम्हा ।**
**अणवत्थाऽभावोभयदोसातो सुण्णता तम्हा ॥२१४९॥**

**जाताऽजातो०** गाहा । इह यन्नोत्पद्यते तदसदेवेति, खरविषाणवत् । तत्र निवृत्ता नाम कथा । यदप्युत्पादितस्यापि जातादिविकल्पाभ्युपगमात् सर्वथानुत्पादः । तथा हि न तावज्जातं जायते, विद्यमानत्वात् घटवत् । अथ जातमपि जायतेऽनवस्थाप्रसङ्गः । तथा नाजातम्, अविद्यमानत्वात् खरविषाणवत् । अथाऽजातमपि जायते, खरविषाणाद्यभावः(व)जातिक्रियाप्रसङ्गः । न जाताजातम् उभयदोषात् । अथवा जाताजातं विद्येत वा न वा ? यदि विद्यते जातं नाम तत्, न जाताजातमस्ति । तथा जायमानमपि न जातम्, अजातं चातिवर्तेत इत्यसत् । एवं सर्वथाऽनुत्पादाच्छून्यतावसीयते । उक्तं च

" गतं न गम्यते तावदगतं नैव गम्यते ।
गतागतविनिर्मुक्तं गम्यमानं तु गम्यते ॥" [मूलमाध्य० २. १] ॥२१४९॥

**हेतूपच्चयसामग्गि वीसुभावेसु णो य जं कज्जं ।**
**दीसति सामग्गिमयं सव्वाभावे ण सामग्गी ॥२१५०॥**

**हेतू०** गाहा । इह खलु हेतवः प्रत्ययाश्चारम्यमर्थमेकैकस्ये(स्यै)नं वाऽऽरभेरन् सम्भूय वा । तत्र तावदेकैकस्य नारभन्तेऽनुपलब्धेः । तस्मादेकैकस्य कार्यत्वेनाऽभावादेकैकत्र चाऽभावात्तत्सामग्र्यामपि नारप्स्यते सिकतातैलवत् । उक्तं च—

"हेतुप्रत्ययसामग्री पृथग्भावेष्वसम्भवात् ।
तेन ते नाभिलाप्या हि भावाः सर्वे स्वभावतः ॥"

---

१ सव्वेगयाइ दो° त । २. °नामभिलाषो वानु° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

"लोके च यावती संज्ञा सामग्र्यामेव दृश्यते यस्मात् ।
तस्मान्न सन्ति भावाः भावेऽसति नास्ति सामग्री ॥२॥"२१५०॥

**परभागादरिसणतो सव्वाराभागसुहुमतातो य ।**
**उभयाणुवलंभातो सव्वाणुवलद्धितो सुण्णं ॥२१५१॥**

**पर०** गाहा । इह यदप्रत्यक्षं तदसदेव, अनुपलम्भात् खरविषाणवत् । दृश्यस्यापि च पर-मध्यभागयोरसत्त्वदर्शनात्, आराद् भागस्यापि च सावयवत्वात् पुनरन्यः खल्वाराद् भागस्तस्याप्यन्य इति सर्वारातीयस्यातिसूक्ष्मत्वादनुपलब्धिः । अतश्चोभयभागाग्रहणात् सर्वानुपलब्धिरतश्च शून्यतानुमीयते । अभिमतं च—

"यावद् दृश्यं परस्तावद्भागः स च न दृश्यते ।
तेन ते नाभिलाप्या हि भावाः सर्वे स्वभावतः ॥"

श्रूयन्ते च श्रुतौ भूतानीत्यतः संशयः ॥२१५१॥

**मा कुणे वियत्त ! संसयमसति ण संसयसमुब्भवो जुत्तो ।**
**खकुसुमखरसिंगेसु व जुत्तो सो थाणुपुरिसेसुं[२] ॥२१५२॥**

**मा कुण** गाहा । व्यक्त मा कृथाः संशयम् । असति न संशयसम्भूतिरस्ति यथा खपुष्प-खरविषाणयोः । सत्येव हि संशयोऽनुरूपो यथा स्थाणु-पुरुषयोः ॥२१५२॥

**को वा विसेसहेतू सव्वाभावे वि थाणुपुरिसेसु ।**
**संका ण खपुप्फादिसु विवज्जयो वा कधेण्ण भवे ॥२१५३॥**

**को वा** गाहा । को वात्र विशेषहेतुर्यदसत्त्वसामान्ये स्थाणुपुरुषयोः संशयो न खरविषाण-खपुष्पयोः ? कथं समता न स्याद् विपर्ययो वेति ? ॥२१५३॥

**पच्चक्खतोऽणुमाणादागमतो वा पसिद्धिरत्थाणं ।**
**सव्वप्पमाणविसयाभावे किध संसयो जुत्तो ॥२१५४॥**

**पच्चक्ख०** गाहा । प्रत्यक्षादिप्रमाणाश्रया हि सिद्धिरिष्यतेऽर्थानां सर्वप्रमाणविषयाभावश्चाभिप्रेतः परस्येति कुतः संशयः ? ॥२१५४॥

**जं संसयादयो णाणपज्जया तं च णेयसंबद्धं ।**
**सव्वणेयाभावे [१४१ द्वि०] ण संसयो तेण ते जुत्तो ॥२१५५॥**

**जं सं०** गाहा । इह संशयविपर्ययानध्यवसायनिर्णया विज्ञानपर्यायाः, यतस्तच्च ज्ञेयनिबन्धनमतः सर्वविषयाभावे न संशयादयो युक्तरूपाः ॥२१५५॥

---

१ कुरु को हे । २ °सेसु को हे । ३ कथं न को कहं न हे ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

संति च्चिय ते भावा संसयतो सोम्म ! थाणुपुरिसो व्व ।
अथ दिट्ठंतमसिद्धं मण्णसि णणु संसयाभावो ॥२१५६॥

संति गाहा । सौम्य सन्ति हि भवतोऽपि भावाः, संशयात् । इह यत् संशय्यते तदस्ति, यथा स्थाणु-पुरुषौ । यच्चासत् न तत् संशय्यते, यथा खपुष्प-खरविषाणौ । अथ भवदभिप्रायात् स्थाणुपुरुषयोः सत्त्वमसिद्धम्, अतो ननूक्तम्–'असति संशयो न युक्तः' इति । २१५६॥

सव्वाभावे वि मती संदेहो [१]सिमिणए[२] व्व णो तं च ।
जं सरणातिणिमित्तो सिमिणो ण तु सव्वथाऽभावो ॥२१५७॥

सव्वा० गाहा । स्यान्मतिः–असत्यपि संशयो दृष्टः स्वप्नादौ । तच्च न, स्मरणादिनिमित्तत्वात् स्वप्नस्य ॥२१५७॥

अणुभूतदिट्ठचिन्तितसुतपयतिविकारदेवताणूगा ।
सिमिणस्स णिमित्ताइं पुण्णं पावं च णाऽभावो ॥२१५८॥

अणु० गाहा । इहानुभूतादिस्मरणनिमित्तः स्वप्नो नाभावः ॥२१५८॥

विण्णाणमयत्तणतो घडविण्णाणं व [३]सिमिणओ भावो ।
अथवा विहितणिमित्तो घडो व्व णेमित्तियत्तातो ॥२१५९॥

विण्णाण० गाहा । भावः स्वप्नो विज्ञानमयत्वाद् घटविज्ञानवत् । अथवा नैमित्तिकत्वाद् घटवद् । विहितं चास्य निमित्तमनुभूतादिकमनेकविधम् ॥२१५९॥

सव्वाभावे व कतो [४]सिमिणोऽसिमिणो त्ति [५]सच्चमलियं ति ।
गंधव्वपुरं पाडलिपुत्तं [६]तच्चोवयारो[७] त्ति ॥२१६०॥

कज्जं ति कारणं ति य मज्झमिणं साधणं ति कत्त त्ति ।
वत्ता वयणं [८]वच्चं परपक्खोऽयं सपक्खोऽयं ॥२१६१॥

किं चेह थिरदवोसिणचलतारूवित्तणाइं णियताइं ।
सद्दादयो य [९]गेज्झा सोत्तादीआइं गहणाइं ॥२१६२॥

[१४१-प्र०]समता वि[१०]वज्जैओ वा सव्वागहणं च किण्ण सुण्णम्मि ।
किं सुण्णता व सम्मं सग्गाहो किं व मिच्छत्तं ॥२१६३॥

---

१ सुमि° को । २ °णइव्व त । ३ सुमि° त हे । ४ सुमि त । ५ सव्व° जे । सव्वमिलि° त । ६ तत्थो° त को हे । ७ °यारं त । ८ वत्थं त । ९ गेज्झा को । १० °ज्जयाओ त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सव्वा०** गाहा । **कज्जं** गाहा । **किं चेह** गाहा । **समता** गाहा । सर्वाभावेऽपि वा स्वप्नोऽयमिति किंकृतो विशेषः ? तथा, सत्यमिदमनृतं वेदम्, इदं गान्धर्वपुरमिदं च पाडलिपुत्रम्, अयं मुख्यसिंहः चतुःपाद्, अयं चोपचारतः सिंहो माणवकः, कार्यमिदं घटादिः, इदं च कारणं पिण्डादि, साध्यमिदमनित्यत्वादि, साधनं कृतकत्वादि, कर्त्तायं कुलालादिः, अयं च वादी, वचनं चेदं त्र्यवयवं पञ्चावयवं वा, वाच्यमिदमर्थरूपम्, अयं स्वपक्षः प्रत्यापनीयः, अयं च परपक्षोऽवसेयः । किं चेह पृथिव्यप्तेजोवायुव्योम्नां कठिन-द्रवोष्ण-चलताऽरूपत्वनियमः, शब्दादयश्च ग्राह्या एव, इन्द्रियाणि च श्रोत्रादीनि ग्राहकाणीत्यादीनामभावत्वे सति समतैव किं न स्यात् ? स्वप्नास्वप्नयोर्विपर्ययो वा ? स्वप्नवदेवास्वप्नः,अस्वप्नवच्च स्वप्नस्तथोभयोरग्रहणमेवेत्येवं सत्यानृतादिष्वप्यायोजनीयम् । तथा शून्यतैव सम्यक्, सद्ग्रहश्च मिथ्यादर्शनमिति कस्ते विशेषहेतुः ? ॥२१६०–६३॥

**किध सपरोभयबुद्धी कधं च तेसिं परोप्परमसिद्धी ।**
**अध परमेतीय भण्णति सपरमतिविसेसणं कत्तो[2] ॥२१६४॥**

**किध** गाहा । कथमिह ह्रस्वदीर्घयोः स्वपरोभयबुद्धिराश्रीयते भवता ? कथं च तयोरेव परस्परमसिद्धिरिति विरुद्धमुच्यते ? स्यान्मतिः–स्वपरोभयव्यपदेशः परबुद्ध्या विधीयते । ननु सर्वाऽभावे स्वः परोऽयमियं चानयोबुद्धिरिति विशेषणमनर्थकम्, तदभ्युपगमे वा पक्षहानिः ॥२१६४॥

**जुगवं कमेण वा ते विण्णाणं होज्ज दीहहुँस्सेसु ।**
**[5]जति जुगवं काऽवेक्खा कमेण पुव्वम्मि काऽवेक्खा ॥२२६५॥** २१६
**आतिमविण्णाणं वा जं बालस्सेह तस्स काऽवेक्खा ।**
**तुल्लेसु वै काऽवेक्खा परोप्परं लोयणदुवे[8] व्व ॥२१६६॥**

**जुगवं** गाहा । **आतिम०** गाहा । इह युगपत् क्रमेण वा ह्रस्वदीर्घयोर्विज्ञानमुत्पद्येत भवतः ? यदि युगपत् किमत्र किमपेक्ष्यते ? स्यात्–क्रमेण, ननु यदादावुत्पद्यते तदनपेक्षितमिति । प्रागुन्मिषितबालविज्ञानं वा यत् तत् किमपेक्ष्य प्रादुरस्ति ? यद्वा न दीर्घह्रस्वव्यपदेशं तुल्यमेव लोचनद्वयवत्तन्न(त्र) किमपेक्षं विज्ञानमस्तु ॥२१६५–६६॥

**किं हुस्सातो दीहे दीहातो चेव किण्ण दीहम्मि ।**
**कीस व ण खपुप्फातो[10] किण्ण खपुप्फे खपुप्फातो ॥२१६७॥**

---

१ °मईए त हे । २ कत्ता जे । ३ सर्वभा इति प्रतौ । ४ दीहह को हे । ५ जह हे । ६ वि जे । ७ लोवण जे । ८ दुगि व्व त । दुगे व्व को हे । ९ हस्सा° त को हे । १० पुप्फाउ हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

किं गाहा । तुल्ये वाऽसत्त्वे किमिह ह्रस्वादेव दीर्घप्रत्ययो न दीर्घादेव, अथवा खपुष्पात, न वा खपुष्प एव खपुष्पादिति विशेषहेतुरभिधेयः ॥२१६७॥

**किं वाऽवेक्खाए[1] च्चिय[2] होज्ज मती वा सभाव एवायं ।**
**सो भावो त्ति सभावो वंज्झापुत्ते ण सो जुत्तो ॥२१६८॥**

किं वा गाहा । अथवा किमिहापेक्षयैव सत्त्वे सति केयमपेक्षा नाम ? स्यान्मतिः—स्वभाव एवायमिति । अतः स्वो भावः स्वभाव इति स्वपरभावाभ्युपगमात् स्वमतविघातः । न च वन्ध्यापुत्रादीनां स्वभावपरिकल्पनमनुरूपम् ॥२१६८॥

**होज्जाऽवेक्खातो वा विण्णाणं वाऽभिधाणमेत्तं वा ।**
**दीहं ति व हुँस्सं[3] ति व ण तु सत्ता सेसधम्मा वा ॥२१६९॥**

होज्जा० गाहा । अथवाऽपेक्षातो विज्ञानमभिधानमात्रं वा भवेत् ह्रस्वदीर्घमिति वा, न तु सत्ता, शेषधर्मा वा रूपादयः ॥२१६९॥

**इधरा हुँस्साभावे[4] सव्वविणासो हवेज्ज दीहस्स ।**
**ण य सो तम्हा सत्तादयोऽणवेक्खा[5] घडादीणं ॥२१७०॥**

इध० गाहा । इतरथा हि—ह्रस्वदीर्घयोर्यदि सत्तादयोऽप्यपेक्षया स्युः, अतो ह्रस्वविनाशे दीर्घस्य दीर्घव्यपदेशवत् सर्वथा नाशः स्यात् । न चेष्यते । तस्मादनपेक्षाः सत्तादयो घटादीनामिति ॥२१७०॥

**जा वि अवेक्खाऽवेक्खणमवेक्ख[१४२-द्वि०]यावेक्खणिज्जमणवेक्खा[6] ।**
**सा ण मता सव्वेसु वि[7] संतेसु ण सुण्णता णाम ॥२१७१॥**

जा वि गाहा । याऽपीयमपेक्षा नामेयमपि न अपेक्षणमपेक्षकमपेक्षणीयं चानपेक्ष्य सिध्यति । न च सर्वेषु सत्सु शून्यता नामेति ॥२१७१॥

**किंचि सतो तध परतो तदुभयतो किंचि णिच्चसिद्धं पि ।**
**जलदो घडओ पुरिसो णभं च ववहारतो णेयं ॥२१७२॥**
**णिच्छयतो पुण बाहिरि[8]णिमित्तमेत्तोवयोगतो सव्वं ।**
**होति सतो जमभावो ण सिज्झति णिमित्तभावे वि ॥२१७३॥**

किंचि गाहा । णिच्छय० गाहा । इह किञ्चित् स्वत एव सिद्ध्यति यथा कर्तृनिरपेक्षस्तत्कारणद्रव्यसंघाताऽनन्यो मेघः । किञ्चित् परतो यथा कुलालकर्तृको

१ वावि° हे । २ चिय हे । ३ हस्सं को हे । ४ हस्सा° को हे । ५ °विक्खा हे ६ क्खणोऽवे को । °क्खणोऽवि° हे । °क्खयमवेक्ख° इति तु सम्यक स्यात् । ७ तु जे । ८ °रि° को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

घटः । किञ्चिदुभयतो यथा मातापितृभ्यां स्वकर्मक्रियानुष्ठाता च पुरुषः । किञ्चिन्नित्यसिद्धमेव यथाकाशं-इत्येतद्व्यवहारनयापेक्षया । निश्चयतस्तु बाह्यनिमित्तमात्राश्रयात् सर्वं स्वत एव सिद्ध्यति, यतो न बाह्यकारणभावेऽपि खरविषाणाद्यभावसंसिद्धिरस्ति । उभयनयापेक्षा चात्र सम्यक्त्वमिति ॥२१७३॥

**अत्थित्तघडेक्काणेगता य पज्जायमेत्तचिंतेयं ।**
**अत्थि घडे पडिवण्णे इधरा सा किं ण खरसिंगे ॥२१७४॥**

अत्थि० गाहा । यदप्युक्तम्—अस्ति-घटयोरेकत्वे चान्यत्वे चायुक्तिरित्यस्ति-घटप्रतिपत्तावेकत्वान्यत्वादिपर्यायमात्रचिन्तेयमारूढा । अन्यथा हि किं न खरविषाण-वन्ध्यापुत्रयोरेकत्वान्यत्वायुक्तिचिन्तेयं भवतः ? ॥२१७४॥

**घडसुण्णअण्णताए वि सुण्णता का घडाधिया सोम्म ।**
**एगत्ते घडओ च्चिय ण सुण्णता णाम घडधम्मो ॥२१७५॥**

घड० गाहा । यथा चास्ति-घटयोरेकत्वान्यत्वायुक्ता(युक्तिः)रनुचिन्त्यते तथा घटशून्यतयोरप्येकत्वान्यत्वं वाभ्युपगम्य—यद्यन्यत्वमतो घटमात्रमेव हि तत् न शून्यता नामेति काचित्, एकत्वाभ्युपगमेऽपि हि घटमात्रमेव । तन्न शून्यता नाम घटधर्मः कश्चिदस्ति, सर्वप्रमाणानुपलब्धेः खरविषाणवत् ॥२१७५॥

**विण्णाणवयणवादीणमेगता तो तदत्थिता सिद्धा ।**
**अण्णत्ते अण्णाणी णिव्वयणो वा कधं वादी ॥२१७६॥**

विण्णाण० गाहा । इह यदेतच्छून्यताविज्ञानमभिधानं च वक्ता च भवान्—एतेषामप्येकत्वमन्यत्वं वाभ्युपगम्येत? यद्येकत्वमतस्तदस्तित्वाभ्युपगमस्ततश्च का शून्यता? अन्यथा हि न वन्ध्यापुत्र-खरविषाणयोरेकत्वमस्ति । स्याद्—अन्यत्वम्, अतोऽपि भवाननविज्ञानो निर्वचनश्चेति केन शून्यतोपलब्धाभिहिता वेति शून्यताऽनुपपत्तिः ॥२१७६॥

**घडसत्ता घडधम्मो तत्तोऽणण्णो पडादितो भिण्णो ।**
**अत्थि त्ति तेण भणिते को घड एवेति णियमोऽयं ॥२१७७॥**

घड० गाहा । यदप्युक्तम्-अस्ति-घटयोरेकत्वे सति योऽस्ति घट इति । अत्र ब्रूमो घटसत्ता हि घटधर्म एव घटादभिन्नः पटादिभ्यश्च भिन्नः । ततोऽस्तीत्युक्ते घट एवेति कोयं नियमः ? ॥२१७७॥

१ 'त्ति' जे । २ 'मत्यान्य' इति प्रतौ । ३ 'ण्णयत्तयाइ वि त । ४ एगंते जे । ५ ततो जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जं वा जदत्थि तं तं घडो त्ति सव्वघडतापसंगो को ।
भणिते घडोऽत्थि व कधं सव्वत्थित्तावरोधो त्ति ॥२१७८॥

जं वा गाहा । यद्वा यदस्ति तत्तद् घट इति यदपदिश्यते सर्वस्य घटत्वमिति कः प्रसङ्गः ? तथा, यो घटः स एवास्तीति कथमिह घटमात्र एव सर्वास्तित्वावरोधः ? ॥२१७८॥

अत्थि त्ति तेण भणिते घडोऽघ[१४३-प्र०]डो वा घडो तु अत्थेव ।
चूतोऽचूतो व्व दुमो चूतो तु जधा दुमो णियमा ॥२१७९॥

अत्थि गाहा । तस्मादस्तीत्युक्तेऽनेकाश्रयत्वादस्तित्वस्य घटोऽघटो वा गम्येत, घट इत्युक्ते तु नियमत एवास्तीति, यथेह वृक्ष इत्युक्ते चूतोऽचूतो वा स्याच्चूत इत्युक्ते तु वृक्ष एवेति ॥२४७९॥

[3]किन्तं जातं ति मती जाताऽजातो-भयं पि जमजातं ।
अध जातं पि ण जातं किं ण खपुप्फे विचारोऽयं ॥२१८०॥

किन्तं गाहा । यच्चापदिश्यते यदेतत् [4]जातं जातमेव तत्, न जायते; अजातं न जायते, जाताजातं न जायते इति । एतदसि प्रष्टव्यः—किं तज्जातं नाम देवानांप्रियस्य यत् सर्वथा न जायते ? ननु जातं सर्वथा वाऽजातमिति विरुद्धम् । अथ जातमप्यजातमतः खरविषाणे किमयं विचारो न स्यात् ? को वा विशेषहेतुः ते यदसत्त्वसामान्ये घटादिष्वेवायं विचारो न खरविषाणादिषु ? कथं समता, विपर्ययो वा न स्यात् ? स्यात्—[6]जातमिति परबुद्ध्याऽभिधीयते । ननु स्वपरमतिविशेषणमनर्थकम्, तदभ्युपगमे वा पक्षहानिरित्युक्तम् ॥२१८०॥

जति सव्वधा ण जातं किं जम्माणंतरं तदुवलंभो ।
पुव्वं वाऽणुवलंभो पुणो य कालंतररहतस्स ॥२१८१॥

जति गाहा । यदि सर्वथा न जायते कार्यं घटादि, किमिह पिण्डावस्थायामनुपलभ्यमानो घटस्तज्जन्मानन्तरमुपलभ्यते ? पुनश्च कालान्तरोपरतः पिण्डावस्थायामिवानुपलभ्यः ? कुतोऽयं विशेषः ? ॥२१८१॥

जध सव्वधा ण जातं जातं सुण्णवयणं तधा भावा ।
अध जातं पि ण जातं पभासिता सुण्णता केणं ॥२१८२॥

१ घडो त्ति जे को । २ किं तं को हे । ३ जदजातं त को हे । ४ त् ज्ञातं मेत ज्ञातं न--इति प्रतौ । ५ यदसंत्व समोनो घ°-इति प्रतौ । ६ स्याज्ञात°-इति प्रतौ । ७ वि त को हे । ८ °रहित°त । ९ पयासि° त हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जथ गाहा । शून्यतावचनविज्ञानयोरपि चायं समानो विचारः-किमिह जातं जातमजातमिति यथा तथास्तु । यथा शून्यतावचनं तद्विज्ञानं च सर्वथा न जातं सर्वथा च [ना]जातमित्येवं भावजन्मापि भविष्यति ॥

अथ शून्यतावचनविज्ञानद्वयमजातमतः केन शून्यतोपलब्धा अभिहिता वेति शून्यतानुपपत्तिः ॥२१८२॥

जायति जातमजातं जाताजातमथ जायमाणं च ।
कज्जमिह विवक्खाए ण जायते सव्वधा किंचि ॥२१८३॥

जायति गाहा । इह किञ्चिज्जातं जायते, किञ्चिदजातम्, किञ्चिज्जाताजातम्, किञ्चिज्जायमानम्, किञ्चित् सर्वथा न जायते, विवक्षातः ॥२१८३॥

रूवि त्ति जाति जातो कुंभो संठाणतो पुणरजातो ।
जाताजातो दोहि वि तस्समयं जायमाणो त्ति ॥२१८४॥

रूवि त्ति गाहा । यथेह घटो मृद्रूपादिभिर्जात एव जायते, तन्मयत्वात् । स एवाऽऽकारविशेषेणाजातो जायते, प्रागभावात् । रूपादिभिराकारविशेषेण च [जाता]जातो जायते, तेभ्योऽनर्थान्तरत्वात् । अतीताऽनागतकालयोर्विनष्टानुत्पन्नत्वात् क्रियानुपपत्तिर्वर्त्तमानमात्रसमय एव क्रियासद्भावाज्जायमानो जायते ॥२१८४॥

पुव्वकतो तु घडतया परपज्जाएहि तदुभएहिं च ।
जायंतो य पडतया ण जायते सव्वधा कुंभो ॥२१८५॥

पुव्व० गाहा । स एव हि पूर्वजातः सन्न जातो जायते, नाजातो जायते, न जयमानो जायते, जातत्वात् । तथा परपर्यायैः पटादिभिरजातत्वात् सर्वथा न जायते खरविषाणवत् । तथोभयपर्यायैः पर(ट)पर्यायैश्च जाताजातत्वात् यावता जातस्तावता जातत्वाद्यावता चाऽजातस्तावताऽजातत्वात् सर्वथा न जायते जाताजातघटखरविषाणवत् । तथा जायमानोऽपि सर्वथा न जायते घटादिपर्यायैरसत्त्वात् खरविषाणवत् ॥२१८५॥

वोमातिणिच्चजातं न जायते तेण सव्वधा सोम्म ।
इय दव्वतया सव्वं भयणिज्जं पज्जवगतीये ॥२१८६॥

वोमाति० गाहा। व्योमादि च नित्यं जातत्वात् सर्वथा न जायते। तथा हि सर्वं द्रव्यतया । पर्यायतया तु जातादिविकल्पैर्भजनीयम् । तथैवोदाहृतमिति ॥२१८६॥

१ मि जे । २ °गईए को हे ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

**दीसति सामग्गिमयं सव्वमिहत्थि ण य सा णणु विरु[१४३-द्वि०]द्धं ।**
**घेप्पति व ण पच्चक्खं किं कच्छभरोमसामग्गी ।२१८७॥**

**दीसति** गाहा । यच्चापदिश्यते सर्वं सामग्रीमयमुपलभ्यते, न चासावस्तीति । नन्वेतद्विरुद्धम्, सर्वानृतवचनप्रतिपत्तिवत् । अभावसामान्ये वा सति किमिह न कूर्मरोमसामग्रीमयमुपलभ्यते । किञ्चेह न समता न विपर्ययो वेति ॥२१८७॥

**सामग्गिमयो वत्ता वयणं चऽत्थि जति तो कतो सुण्णं ।**
**अध णत्थि केण भणितं वयणाऽभावे सुतं केणं ॥२१८८॥**

**सामग्गि०** गाहा । स इह वक्ता भवाँच्छून्यतावचनं चैतत् सामग्रीमयत्वे सति सद्वा न वा ? यदि सन्न शून्यम् । अथाऽसत्केनाभिहितमनुश्रुतं वा भवतो वचनम् ॥

**जेणं चेयं ण वत्ता वयणं वा तो ण सन्ति वयणिज्जा ।**
**भावा तो सुण्णमिदं वयणमिणं सच्चमलियं वा ॥२१८९॥**

**जेणं** गाहा । आह यत एव न वक्ता वचनं वा अत एव हि वचनीयानामप्यभावो भावानामतः शून्यमिति । उच्यते—यदेतद्वक्तृवचनीयाभाववचनमिदं सत्यमनृतं वाभ्युपगम्येत भवता ? ॥२१८९॥ किञ्चातः—

**जति सच्चं णाऽभावो अधालियं ण प्पमाणमेतं ति ।**
**अब्भुवगतं ति व मती णाभावे जुत्तमेयं ति ॥२१९०॥**

**जति** गाहा । यदि सत्यम्, नाभावः । अनृतं चेदप्रमाणम् । स्यान्मतिः—अस्मद्वचनसत्यताभ्युपगमादभावप्रतित्तिरिति । तच्च न, यदस्माभिरुपदिष्टं सत्यमनृतं वा भवताभ्युपगम्येत नास्माभिः । न च सर्वाभावेऽभ्युपगमोऽभ्युपगन्ताऽभ्युपेयं च युक्तम्, अत एव भवत एवाभ्युपगमोऽभ्युपगमादिप्रतिपत्तेरिति ॥२१९०॥

**सिकतासु किण्ण तेल्लं सामग्गीतो तिलेसु वै किमत्थि ।**
**किं च ण सव्वं सिज्झति सामग्गीतो खपुप्फाणं ॥२१९१॥**

**सिकता०** गाहा । किञ्चेहाऽभावसामग्रीमयत्वे सति न सिकतासु तैलोपलब्धिः ? तिलेषु च सति किं ? किञ्च न खपुष्पसामग्र्यामेव सर्वोपलब्धिः ? समताविपर्ययो वेति ॥२१९१॥

---

१ नचायविस॰ इति प्रतौ । २ शून्य मद्वासत्के–इति प्रतौ । ३ वचनत्वात्–इति प्रतौ । ४ चेव को हे । ५ ॰मिदं को हे । ६ जुत्तमेत्तं पि जे । जुज्जए तं पि को । ७ वि त को हे । ८ कि व हे को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सव्वं सामग्गिमयं णेगंतोऽयं जतोऽणुरपदेसो ।**
**अध सो वि सप्पदेसो जत्थावत्था स परमाणू ॥२१९२॥**

**सव्वं** गाहा। न चेह सर्वमेव सामग्रीमयमित्येकान्तो यतोऽणुरप्रदेशः कार्यानुमेयोऽस्ति। स्यान्मतिः—असावपि प्रदेशवान्, एवं तत्प्रदेशोऽणुर्भविष्यति। तत्प्रदेशवत्त्वप्रतिपत्तावपि च तत्प्रदेशं इत्येवं यत्रावस्था भविष्यति स परमाणुः ॥२१९२॥

**दीसति सामग्गिमयं ण याणवो सन्ति णणु विरुद्धमिदं ।**
**किं वाणूणमभावे णिप्फण्णमिणं खपुप्फेहिं ॥२१९३॥**

**दीसति** गाहा। उत सर्वं च सामग्रीमयमुपलभ्यते न चाणवो विद्यन्त इति। नन्वेतद्विरुद्धमुच्यते सर्वाऽनृतवचनप्रतिपत्तिवत्। परमाण्वभावे वा किमिह खपुष्पसामग्रीमयमिदमाभाव्यते? तस्माद्यत्सामग्रीमयमिदं ते परमाणव इति ॥२१९३॥

**देसस्साराभागो घेप्पति ण ये सोत्थि[1] णणु[2] विरुद्धमिणं[3] ।**
**सव्वाभावे वं[4] ण सो घेप्पति किं खरविसाणस्स ॥२१९४॥**

**देसस्सा०** गाहा। यच्चापदिश्यते दृश्यस्याराद्भागो गृह्यते न चासावस्तीति। नन्वेतद्विरुद्धम्, असत्त्वे वा किं न खरविषाणस्यासावुपलभ्यते? दृश्यस्योपलभ्यत इति कस्ते विशेषहेतुः? समताविपर्ययापत्तिद्वयं च कस्ते निपेत्स्यति? ॥२१९४॥

**परभागादरिसणतो णाराभागो [१४४-प्र०]वि किमणुमाणं ते[5] ।**
**आराभागग्गहणे किं व ण परभागसंसिद्धा ॥२१९५॥**

**पर०** गाहा। परभागमात्रादर्शनाचाराद्भागोऽपि नास्तीत्यत्र—किमनुमानं भवतः? युक्तं तावदाराद्भागग्रहणात् परभागास्तित्वानुमानम्, न परभागादर्शनादाराद्भागनिवृत्तिः। कथम्? इह दृश्यस्य परभागोऽस्ति भागत्वादाराद्भागवत्। न पुनः परभागाऽदर्शनादाराद्भागाऽभावानुमानमस्ति, प्रत्यक्षत्वात्। स्यात्—परभागोऽस्ति भागत्वादित्ययमसिद्धः। तच्च न, स्ववचनविरोधात्। ननु भवतैवोक्तं "यावद् दृश्यं परस्तावद्भागः स च न दृश्यते" इति, यच्चापदिष्टम्—"आराद्भागस्याप्यन्यः खल्वाराद्भाग इति सर्वारातीयाराद्भागपरिकल्पनम्, तच्च परभागासत्त्वेऽनर्थकम् ॥२१९५॥

**सव्वाभावे वँ[6] कतो आरापरमज्झभागणाणत्तं ।**
**अध परमतीयं[7] भणति सपरमतिविसेसणं कत्तो ॥२१९६॥**

---

१ णणु सों त। २ सो त्ति त हे को। ३ न य त। ४ °मितं जे। ५ वि त को हे। ६ ति हे त। ७ वि हे त। ८ °तीए को त हे।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सव्वा० गाहा। सर्वाभावे वा कुतः खल्वारात्परभागनानात्वपरिकल्पनम् ? अथ परबुद्धयाभिधीयत इति। ननूक्तं [अ]सति परमतिविशेषणमनर्थकम्। तदभ्युपगमे वा पक्षहानिरिति ॥२१९६॥

**आरपरमज्झभागा पडिवण्णो जति ण सुण्णता णाम।**
**अप्पडिवण्णेसु वं का विकप्पणा खरविसाणस्स ॥२१९७॥**

आर० गाहा। आरात्परमध्यभागप्रतिपत्तौ न शून्यता नाम, अप्रतिपत्तौ वा किमिह खरविषाणादीनामियं प्रकल्पना न क्रियते, घटादीनां च क्रियत इति को विशेषः ?

**सव्वाभावे वाऽऽराभागो किं दीसते ण [3]परभागो।**
**सव्वागहणं व ण किं किं वा ण विवज्जओ होति ॥२१९८॥**
**परभागदरिसणं वा फलिहादीणं ति ते धुवं सन्ति।**
**जति वा ते वि ण सन्ता परभागादरिसणमहेतू ॥२१९९॥**

सव्वा० गाहा। [परभाग० गाहा]। सर्वाभावे वा किमाराद्भाग एवोपलभ्यते न परभागः ? किं वा न सर्वानुपलब्धिर्विपर्ययो वेति ?

परभागादर्शनादिति च ब्रुवाणस्य येषां स्फटिकादीनां परभागदर्शनमिह तदस्तित्वप्रतिपत्तिः। यदि वा तेऽप्यसन्तः परभागादर्शनादित्ययमहेतुः स्यात्। नन्वर्थापत्तिसमेयं जातिरभिधीयते। यथेह प्रयत्नानन्तरीयकत्वादनित्य इत्यपदिष्टे नावश्यमप्रयत्नानन्तरीयकत्वान्नित्य इति। तच्च न, यतस्तत्र प्रयत्नानन्तरीयकत्वस्य सपक्षे व्यतिरेकदर्शनादप्रयत्नानन्तरीयकत्वस्य चादर्शनाद्युक्तो विशेषः। इह भवतः सर्वासद्वादिनः को विशेषः यद्भयाद्विशेष्यापदिश्यते—परभागादर्शनादसत्। किमिह मा भूत् परभागदर्शनात् सच्चासच्च, यथेहाऽप्रयत्नानन्तरीयकत्वान्नित्यमनित्यं वेत्येवं यदि हि भवतः कुतश्चिदपि हेतोः सत्त्वप्रतिपत्तिः स्यात् परभागादर्शनादसदिति विशेषणमनुरूपं स्यात् ॥२१९८–९९॥

**सव्वादरिसणतो[4] च्चिय ण भण्णते[5] कीस भणति तं णाम।**
**पुव्वब्भुवगतहाणिं[6] पच्चक्खविरोधतो[7] चेव ॥२२००॥**

सव्वा० गाहा। सर्वाभावे सति सर्वदैवाऽदर्शनादेवेति किं नोच्यते ? किमिह परभागाऽदर्शनविशेषणेन ? आह—तन्नामास्तु। उच्यते—नन्वेवं पूर्वाभ्युपगतहानिराप्यते, प्रत्यक्षविरुद्धं च—पूर्वमुक्त्वा परभागादर्शनात्, इदानीं सर्वाऽदर्शनादिति ॥

१ वण्णो जे। २ वि त को हे। ३ परि॰ जे। ४ ॰णउ को हे। ५ भण्णइ को हे। ६ हाणी को हे। ७ विरोहओ त को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**णत्थि परमज्झभागा अप्पच्चक्खत्ततो मती होज्जे[1] ।**
**णणु अक्खत्थावत्ती[2] अप्पच्चक्खत्तहाणी[3] वा ॥२२०१॥**

**णत्थि** गाहा । स्यान्मतिः-न स्तः[4] परमध्यभागौ, अप्रत्यक्षत्वात्, खरविषाणवत् । नन्वक्षमक्षं प्रति वर्त्तत इति प्रत्यक्षोऽर्थः । ततश्चार्थाऽभ्युपगमादभ्युपेतहानिः, अप्रत्यक्षत्वादित्यस्य वा ॥२२०१॥

**अत्थि अपच्चक्खम्पि हु जध भवतो संसयातिविण्णाणं ।**
**अध णत्थि सुण्णता का कास व केणोवलद्धा वा ॥२२०२॥**

**अत्थि** गाह । अनैकान्तिकश्चायमप्रत्यक्षत्वादिति, विपक्षेऽपि दर्शनाद्भवत्संशयादिविज्ञानवत् । अथैतदप्रत्यक्षत्वाद् भवदीयं विज्ञानमसत् । केयं शून्यता कस्य केन चोपलब्धेति शून्यतानुपपत्तिरिति ॥२२०२॥

**पच्चक्खेसु ण जुत्तो तुह भूमिजलाण[१४४-द्वि०]लेसु संदेहो ।**
**अणिलागासेसु भवे सो वि ण [5]कज्जोऽणुमाणातो ॥२२०३॥**

**पच्चक्खे०** गाहा । सौम्य न पृथिव्यप्तेजःसु भवतः संशयो युक्तरूपः, प्रत्यक्षत्वात, स्वरूपवत् । वायुरपि प्रत्यक्ष एव, तद्गुणप्रत्यक्षत्वाद, घटवत् । अस्तु वा वाय्वाकाशयोरप्रत्यक्षत्वमतश्च संशयः । असावपि च नैव कार्योऽनुमानसद्भावात् । ॥२२०३॥ तच्चानुमानमिदम्-

**अत्थि [1]अदेस्सापादितफरिसातीणं गुणी गुणत्तणतो ।**
**रूवस्स घडो व्व गुणी जो तेसिं सोऽणिलो णामं ॥२२०४॥**

**अत्थि** गाहा । य एते खल्वदृश्यापादिताः स्पर्शादयः, आदिग्रहणाच्छब्दधृतिकम्पा गृह्यन्ते, एते हि विद्यमानगुणिनः, गुणत्वात् । इह ये गुणास्ते विद्यमानगुणिनो दृष्टाः, यथा घटरूपादयः । यश्चैषां गुणानां गुणी स वायुः । तस्मादस्ति वायुः ॥२२०४॥

**अत्थि वसुधातिभाणं तोयस्स घडो व्व मुत्तिमत्तातो ।**
**जं भूताणं भाणं तं वोमं वत्त ! सुव्वत्तं ॥२२०५॥**

**अत्थि** गाहा । विद्यमानभाजनाः पृथिव्यादयः, मूर्त्तिमत्त्वात्तोयवत् । यश्चैषां पृथिव्यप्तेजोवायूनां भाजनं तदाकाशम् । तस्मादस्त्याकाशं साध्यैकदेशदृष्टान्तपरि

१ होज्जा **को हे** । २ अक्खत्ता° **त** । ३ °क्खत्थ° **जे** । ४ °तिः ततः इति प्रतौ । ५ ण जुत्तोऽणु° **त को हे** १ अद्दिस्सा° **को** । अदिस्सा° **हे** । यदिस्सा **त** ।

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

जीहीर्षया वा पृथक् प्रयोगस्तद्यथा विद्यमानभाजना पृथिवी, मूर्त्तिमत्त्वात्तोयवत्, तथा पयस्तेजोवत्, तेजो वायुवत्, वायुः पृथिवीवत् ॥२२०५॥

**एवं पच्चक्खादिप्पमाणसिद्धाइं सोम्मं ! पडिवज्ज ।**
**जीवसरीराधारोवयोगधम्माइं भूताइं ॥२२०६॥**

**एवं** गाहा । एवं प्रत्यक्षादिप्रमाणेभ्यो भूतानि सन्तीति प्रतिपद्यस्व । जीवशरीराधारोपयोगवृत्तीनि चामूनि ॥२२०६॥

**किध सज्जीवाइं मती तल्लिंगातोऽणिलावसाणाइं ।**
**वोमं विमुत्तिभावादाधारो चेव ण सजीवं ॥२२०७॥**

**किध** गाहा । स्यात् मतिः—कथं पुनर्जीवशरीराणीमानि ? वाय्वन्तानि, जीवलिङ्गोपलब्धेः, आकाशं त्वाधारदानस्वभावमेव, न जीवशरीरममूर्त्तत्वात् ॥२२०७॥

**जम्मजराजीवणमरणरोहणाहारदोहलामयतो ।**
**रोगतिगिच्छातीहि य णारि व्व सचेतणा तरवो ॥२२०८॥**

**जम्म०** गाहा । सात्मका वनस्पतयः, जन्मजराजीवनमरणसद्भावात्, स्त्रीवत् । आह—नन्वयमनैकान्तिको विपक्षेऽपि दर्शनात्, तद्यथा—जातं दधि, जीर्णं वासः, सञ्जीवितं विषम्, मृतं कुसुम्भकमित्यादि । उच्यते, न, वनस्पतौ समस्तलिङ्गोपलब्धेः, दध्यादावसमस्तदर्शनादुपचारः । इतश्च—सात्मका वनस्पतयः, क्षतसंरोहणात्, आहारोपादानात्, दौहृदसद्भावात्, आमयसद्भावात्, तथा रोगचिकित्सासद्भावात् । दौहृदादौ संभविनः कूष्माण्डादीन् विशिष्य पक्षः कर्त्तव्यः ॥२२०८॥

**छिक्कप्परोइयाछिक्कमेत्तसंकोयतो कुलिंगो व्व ।**
**आसयसंचारातो वियत्त ! वल्लीविताणाइं ॥२२०९॥**

**छिक्क०** गाहा । सात्मकाः स्पृष्टप्ररोहिकादयः, स्पृष्टाऽऽकुञ्चनात् कीटादिवत् । तथा, आश्रयाभिसंसर्पणात् वल्ल्यादयः ॥२२०९॥

**सम्मादयो य सावप्पबोधसंकोयणादितोऽभिमेया ।**
**बउलातओ य सद्दातिविसयकालोवलंभातो ॥२२१०॥**

**सम्मा०** गाहा । सात्मकाः शम्यादयः, स्वापप्रबोधसङ्कोचादिसद्भावात् । शब्दादिविषयोपलम्भात् बकुलाशोकादयः, देवदत्तवत् ॥२२१०॥

---

१ क्खाइपमा° हे । २ सोम को । ३ सजी° हे । साजीवाइ त । ४ वामं त । ५ वायन्तानि—इति प्रतौ । ६ संभावतः—इति प्रतौ । ७ °क्कपरो° हे । ८ °मित्त° त । °मेत्त° को हे । ९ °प्ररोदि° को हे । १० बल्या° इति प्रतौ । ११ °मतो जे । १२ °काला° जे ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

[१४५-प्र०] मंसंकुरो व्व सामाणजातिरूवंकुरोवलंभातो ।
तरुगणविद्दुमलवणोवलादयो सासयावत्था ॥२२११॥

**मंसं०** गाहा । वनस्पतयो विद्रुमलवणोपलादयश्च स्वाश्रयावस्थाः [सात्मकाः] समानजातीयङ्कुरसद्भावात् [2]अर्शोविकाराङ्कुरवत् ॥२२११॥

भूमिक्खतसाभाविय्संभवतो दद्दुरो व्व जलमुत्तं ।
अहवा मच्छो व्व सभाववोमसंभूतपातातो ॥२२१२॥

**भूमि०** गाहा । सात्मकमम्भो भौमं, क्षतसमानजातीयस्वभावसम्भवाद्दर्दुरवत् । अथवान्तरीक्षम्[4], अभ्रादिविकारस्वभावसम्भूतपातात्, मत्स्यवत् ॥२२१२॥

[5]अपरप्पेरिततिरियाऽणियमितदिग्गमणतोऽणिलो गो व्व ।
अणलो आहारातो विद्धिविकारोवलंभातो ॥२२१३॥

**अपर०** गाहा । सात्मको वायुः, अप्रतिहततिर्यगनियतगतित्वाद् गोवत्, तेजः सात्मकम्, आहारोपादानात् तद्वृद्धिविशेषोपलब्धेः, तद्विकारदर्शनाच्च, पुरुषवत् ॥२२१३॥

तणवोऽणब्भाितिविकारमुत्तजातित्ततोऽणिलंताइं ।
सत्थासत्थहताओ णिज्जीवसजीवरूवाओ ॥२२१४॥

**तणवो** गाहा । पृथिव्यप्तेजोवायवः तनवः, अनभ्रादिविकारमूर्तिमदुपलब्धेः, गवादिशरीरवत् । ताश्च शस्त्रानुपहतोपहताः सात्मका[ऽनात्मकाः] लक्षणतोऽवसेया इति ॥२२१४॥

सिज्झंति सोम्म ! बहुसो जीवा णवसत्तसंभवो ण वि य ।
परिमितदेसो लोगो ण संति चेगिन्दिया जेसिं ॥२२१५॥
तेसिं भवविच्छित्ती पावति णेट्ठा य सा जतो तेणं ।
सिद्धमणंता जीवा भूताधारा य तेऽवस्सं ॥२२१६॥

**सिज्झंति** गाहा । **तेसिं०** गाहा । किञ्च येषामजस्रं सत्त्वाः सिध्यन्ति, न च नवसत्त्वोत्पादः, परीत्तावकाशश्च लोकः, न च वनस्पत्यादयः सात्मकाः प्रतिपद्यन्ते; येषामप्यनन्ता लोकधातवः प्रतिस्वं च निर्वाणमुक्तम्, तेषां संसारोच्छेदेन भवितव्यम् । न चासाविष्टो यतः सर्वतन्त्रान्तरीयाणाम्, अतः सत्त्वानामानन्त्यमभ्युपेयम् । शरीरिणश्च ते, संसारित्वात्, मनुष्यवत् । न च वनस्पत्यादीनन्तरेणान्यच्छरीरं

[1] तीयो इति प्रतौ । [2] °वान् दर्शो इति प्रतौ । [3] अहव त । [4] °रीक्षेमभ्रा° इति प्रतौ ।
[5] नास्त्येषा गाथा तप्रतौ । [6] °रूवाइं त । [7] °त्तावनाश° इति प्रतौ । [8] °दीनांतरे° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भाव्यते। अपदिश्यतां यच्छरीरास्ते, न चेदपदिश्यते, अभ्युपगम्यतां वनस्पत्यादीनां सात्मकत्वमिति ॥२२१५-१६॥

**एवमहिंसाऽभावो जीवघणन्ति [1]ण य तं जतोऽभिहितं ।**
**सत्थोवहतमजीवं ण य जीवघणन्ति तो हिंसा ॥२२१७॥**

**एव०** गाहा। आह—एवमहिंसा न सम्पद्यते, जीवघनत्वात् लोकस्य। उच्यते—ननूक्तमस्माभिः शस्त्रानुपहतोपहताः सात्मकानात्मकाः वनस्पत्यादयः। न सर्व एव सात्मकाः, न वेह सत्त्वाकुलो लोक इति हिंसा सम्भाव्यते, न चाल्पजीवत्वादहिंसा ॥२२१७॥

**ण य घातइ[2] त्ति हिंसो णाघातेन्तो[3] त्ति णिच्छितमहिंसो[4] ।**
**ण विरलजीवमहिंसो [१४५-द्वि०] ण य जीवघणो[5] त्ति तो हिंसा[6] ॥२२१८॥**

**ण य** गाहा। यस्मान्न निघ्नन्नेव हिंस्रः, न वा [अनिघ्नन् अ]हिंस्रः, तथा, सत्त्वाकुलानाकुलत्वादिति ॥२२१८॥ किं तर्हि ?

**अहणंतो वि हु हिंसो दुट्ठत्तणओ मतो अहिमरो व्व।**
**बाधेन्तो[7] वि ण हिंसो सुद्धत्तणओ जधा [8]वेज्जो ॥२२१९॥**

**अह०** गाहा। इहानिघ्नन्नपि हिंस्रो दुष्टोऽन्तर्दुष्टत्वादभिमारवत्। निघ्नन्नपि वाऽहिंस्रः, शुद्धात्मकत्वाद्, वैद्यवत् ॥२२१९॥

**पंचसमितो तिगुत्तो णाणी अविहिंसओ ण विवरीतो ।**
**होतु व संपत्ती से मा वा जीवोवरोधेणं ॥२२२०॥**

**पंच०**[9] गाहा। एवमिहापि गुप्तिसमितिशुद्धात्मा[10] सत्त्वोपरोधपरिहारादिक्रियाभिज्ञः स खल्वहिंसकः, सत्त्वोपरोधे सत्यसति वा ॥२२२०॥

**असुभो जो परिणामो सा हिंसा तु बाहिरणिमित्तं ।**
**कोयि[11] अवेक्खेज्ज ण वा जम्हाऽणेगंतियं बज्झं ॥२२२१॥**

**असुभो** गाहा। यस्मादिहाशुभः परिणामो हिंसेत्याख्यायते। स तु कदाचिद् बाह्यसत्त्वातिपातक्रियानिमित्तमपेक्षते कदाचिच्च तन्निरपेक्षः। कदाचिद्वा बाह्यानवद्यक्रियासमेतस्यापि स्यात्, यतोऽन्तःकरणप्रवणत्वाद् बाह्यं करणमनैकान्तिकमुक्तम् ॥२२२१॥

---

१ °घणं तिय तं **को हे**। २ घायउ **को हे**। घायओ **त**। ३ °घायतो **त हे**। ४ °हिन्सो **जे**। ५ घणं **को हे त**। ६ हिंसो **त हे को**। ७ बाहितो **को हे**। ८ विज्जो **को हे**। ९ एवं इति प्रतौ। १० सुद्धात्मा इति प्रतौ। ११ कोवि **त हे**। कोइ **को**।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

असुभपरिणामहेऊ[1] जीवाबाधो त्ति तो मतं हिंसा ।
जस्स तु ण सो णिमित्तं संतो वि ण तस्स सा हिंसा ॥२२२२॥

**असुभ०** गाहा । योऽप्ययं बाह्यसत्त्वाबाधक्रियाविशेषः सोऽप्यन्तःकरणहेतुरिति कारणे कार्योप[चारवृत्त्या अन्ने प्राणोप]चारवत्[हिंसेत्युपचर्यतेऽन्यथाऽन्तःकरणपरिणाम एवाशुभो हिंसैकान्तिकीत्युक्तम् । स इदानीं बाह्यसत्त्वाबाधक्रियाविशेषो विद्यमानोऽपि न यस्य शुद्धात्मनोऽन्तःकरणविक्रिया हेतुर्न तस्यासौ हिंसाभिधीयते ॥२२२२॥ कथम् ?

सद्दातयो रतिफला ण वीतमोहस्स भावसुद्धीतो ।
जध तध जीवाबाधो ण सुद्धमणसो वि हिंसाए ॥२२२३॥

**सद्दा०** गाहा । यथेह वीतरागद्वेषमोहस्य भगवतो यतेरिष्टाः शब्दादयो न रतिहेतवः सम्पद्यन्ते, यथा चेह शुद्धात्मनो रूपवत्यामपि न मातरि विषयाभिलाषः सञ्जायते, तथेह शुद्धात्मनो विदुषो न सत्त्वातिपातो हिंसायै सम्भाव्यत इति प्रतिपद्यस्व ॥२२२३॥

छिण्णम्मि संसयम्मि[4] जिणेण जरमरणविप्पमुक्केणं[5] ।
सो समणो पव्वइतो पंचहिं सह खंडियसतेहिं[7] ॥४५६॥२२२४॥
ते पव्वइते सोतुं सुधम्मो[8] आगच्छती जिणसगासं ।
वच्चामि णं वंदामि[9] वन्दित्ता पज्जुवासामि ॥४५७॥२२२५॥
[१४६-प्र०] आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं ।
णामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४५८॥२२२६॥
किं मण्णे[10] जारिसो इध भवम्मि सो तारिसो परभवे[11] वि ।
वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४५९॥२२२७॥
कारणसरिसं कज्जं बीयस्सेवंकुरो[12] त्ति मण्णंतो ।
इध भवसरिसं सव्वं जमवेसि परे वि तदजुत्तं[13] ॥२२२८॥
जाति सरो[14] सिंगातो भूतणओ सरिसवाणुलित्तातो[15] ।
संजायति गोलोमाऽविलोमसंजोगतो दुव्वा ॥२२२९॥

---

१ हेतुं जे । २ °वा होंति तो त । ३ सो त । ४ °यम्मो हे त दी हा म । °म्मि को । ५ °म्मि जाइजराम° म । ६ जरा° को हे । ७ ॥°हिं चतुत्थ॥ जे । इति चतुर्थो गणधरवादः समाप्तः ॥छ॥ त । ८ सुहुम हे । सुहम्म को म । सुहमो दी हा । ९ °मी हे त म दी हा । १० मन्नि त दी हा । ११ °भवम्मि त । १२ °रो व्व म° जे । °रत्ति म° त । १३ तमजु° त को हे । १४ संगा° जे । १५ सासुवा° त । सासवा° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[1]इति रुक्खायुव्वेते जोणिविधाणे[2] य विसरिसेहिंतो ।
दीसति जम्हा जम्मं सुधम्म ! [3]तो णायमेगंतो ॥२२३०॥

**छिण्णम्मि** गाहा । **ते पव्व०** गाहा । **आभट्ठो** गाहा । [**किं भण्णे** गाहा । [**कारण०** गाहा] । **जाति** गाहा । **इति** गाहा । भगवानुवाच सुधर्माणम्—आयुष्मन् भवतो भवत्यभिप्रायः—यतः किल कार्यं कारणानुरूपमुपलभ्यते, यथा बीजानुरूपोऽङ्कुरः, इहभवप्रत्ययं चान्यजन्म, अतस्तेनापीहभवानुरूपेणैव भवितव्यमिति । तच्च न, यतः कारणविलक्षणमपि कार्यमुपलभ्यते । तद्यथा शृङ्गात् सरो जायते । तस्मादेव सर्षपानुदिग्धाद् भूस्तृणप्रसूतिः । तथा गोलोमाऽविलोमेभ्यो दूर्वा जायत इत्यादयो वृक्षायुर्वेदे विलक्षणानेकद्रव्यसंयोगजन्मानो वनस्पतयः, योनिप्राभृते चाऽसमानजातीयाऽनेकद्रव्यसंपर्कयोनयः प्राणिनो मणयो हेमादीनि चोपलभ्यन्ते । तस्मादयमनेकान्तो यत् कारणानुरूपमेव कार्यमिति ॥२२२४-३०॥

[5]अधवा जतो[6] च्चिय बीयाणुरूवजम्मं मतं ततो चेय ।[7]
जीयं[8] गेण्ह भवातो भवंतरे चित्तपरिणामं ॥२२३१॥

**अधवा** गाहा । अथवा सौम्य ! यत एव कारणानुरूपं कार्यमत एवात्मानं त्व[म]न्यजन्मनि विचित्रजात्यादिपरिणाममपि प्रतिपद्यस्व ॥२२३१॥ कोऽभिप्रायः ?

जेण भवंकुरबीयं कम्मं चित्तं च तं जतोऽभिहितं ।
हेतुविचित्तत्तणतो भवंकुरविचित्तता तेणं ॥२२३२॥
जति पडिवण्णं कम्मं हेतुविचित्ततो विचित्तं च ।
तो तप्फलं [11]विचित्तं [१४६-द्वि०] पवज्ज[12] संसारिणो सोम्म ! ॥२२३३॥

**जेण** गाहा । **जति** गाहा । येनेहभवाङ्कुरबीजं कर्मावसीयते । तच्च विचित्रमीक्ष(क्ष्य)ते, तदुपादानहेतुविचित्रत्वात्, अतो भवाङ्कुर(र)विचित्रतापीक्ष(क्ष्य)ते । तदेवं सौम्य यदि भवता कर्म प्रतिपद्यते, तद्धेतूनां वैचित्र्याद्विचित्रम्, अतः संसारिणस्तत्फलविचित्रतामपि प्रतिपद्यस्व ॥२२३२-३३॥

चित्तं संसारित्तं विचित्तकम्मफलभावतो हेतू ।
इध चित्तं चित्ताणं कम्माण फलं च लोअम्मि ॥२२३४॥

**चित्तं** गाहा । चित्रा संसारितेति प्रतिजानीमहे, तद्धेतोः कर्मणो वैचित्र्यात् । इह यद्विचित्रहेतुकं तद् विचित्रमुपलभ्यते, यथा दृष्टस्य कर्मणः फलमनेकरूपं कृष्यादेः ॥२२३४॥

---

१ जति **जे** । २ °णेहिं वि° **त** । ३ तं **जे को** । ४ प्राया—इति प्रतौ । ५ अहव **को** । अधव **जे** । ६ जउ **को हे** । ७ चेव **को त हे** । ८ जीवं **त को हे** । ९ भवंतर **त** । १० °वियत्त° **जे** । ११ °लं पि चि° **को** । १२ पवज्ज **को हे** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**चित्ता कम्मपरिणती पोग्गलपरिणामतो जधा [1]वज्झं(अब्भं) ।**
**कम्माण चित्तता पुण तद्धेतुविचित्तभावातो ॥२२३५॥**

**चित्ता** गाहा । इतश्च विचित्रा कर्मणां परिणतिः, पुद्गलपरिणामत्वात्[2] । इह यत् पुद्गलपरिणामात्मकं तद् विचित्रपरिणतिरूपं उपलक्ष्यते, यथाभ्रादिविकारः, पृथिव्यादिविकारो वा । यच्च न विचित्रपरिणतिरूपम्, न तत् पुद्गलपरिणामम्, यथाकाशम् । पुद्गलपरिणामसामान्येऽपि च कर्मणामावरणादिविशेषविचित्रता, तद्धेतुविचित्रत्वात्, दृष्टार्थक्रियाफलवत् । चित्राश्च तद्धेतवो मिथ्यादर्शनादयः, प्रदोषनिह्नवादयश्च ॥२२३५॥

**अधवा इधभवसरिसो परलोगो वि जति सम्मतो तेणं ।**
**कम्मफलं वि इधभवसरिसं पडिवज्ज परलोगे ॥२२३६॥**

**अधवा** गाहा । अथवा यत एवेहलोकानुरूपं परलोकमपि प्रतिपद्यते भवान्, अत एव कर्मफलमपीहत्यकर्मफलवद्विचित्रं प्रतिपद्यतां परत्रेति ॥२२३६॥

**किं भणितमिधं[3] मणुया णाणागतिकम्मकारिणो संति ।**
**जति ते तप्फलभाजो परे वि तो सरिसता जुत्ता ॥२२३७॥**

**किं भणित०** गाहा । किमुक्तं भवति ? इह मनुजा नानागतिहेतुक्रियानुष्ठायिनो हि लक्ष्यन्ते । यदि हि तेऽमुत्रापि तत्क्रियाफलभाजो भवन्ति यथेहत्यक्रियाणाम्, अतः परलोकोऽपीहलोकानुरूपो युक्तः ॥२२३७॥

**अध इध सफलं कम्मं ण परे तो सव्वधा ण सरिसत्तं ।**
**अकतागम-कतणासो[4] कम्माभावोऽधवा पत्तो ॥२२३८॥**

**अध** गाहा । अथेहलोकक्रियाणां साफल्यं प्रतिपद्यते, न पारलौकिकीनाम् । न नामेहलोकानुरूपः परलोकः सर्वथा, अकृताभ्यागम-कृतप्रणाशप्रसङ्गः, कर्माभावो वेति ॥२२३८॥

**कम्माभावे [5]वि कतो भवंतरं सरिसता व तदभावे ।**
**णिक्कारणतो [6]य भवो जति तो णासो वि तध चेव ॥२२३९॥**

**कम्माभा०** गाहा । कर्माभावे वा भवान्तरमेव न सम्भाव्यते, कुतः सादृश्यम् ? अथाकारण एव भवः । नन्वकारणमसादृश्यमपि तद्विनाशश्च ॥२२३९॥

---

१ वज्झा को हे । २ °ममाह इह-इति प्रतौ । ३ °मिह हे । ४ °णासो जे । ५ य को त हे । ६ व जे त ।



Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

**कम्माभावे वि मती को दोसो होज्ज जति सभावोऽयं ।**
**जध कारणाणुरूवं घडातिकज्जं सभावेणं ॥२२४०॥**

**कम्मा०** गाहा । आह—यदि कर्माभावेऽपि भवसद्भावः स्वभावत एव स्यात्, को दोषः ?, यथेह कर्मान्तरेण कारणानुरूपं घटादिकार्यं स्वभावतोऽभिलक्ष्यते । उच्यते—ननु घटोऽपि न स्वभावतः । कुतः ? कर्तृकरणसद्भावात् । इहापि कर्तुरात्मनः कार्यस्य च शरीरादेरवश्यं करणमपि सम्भावनीयम् । अपि च प्रतिज्ञेयम्—आत्म-शरीराभ्यां अर्थान्तरं करणमनुमीयते, कर्तृकार्यसद्भावात्, कुलालघटसद्भावे दण्डादि-वत् । यच्चात्मनः शरीरादिकार्यनिर्वृत्तौ का(क)रणभावमनुभवति तत् कर्मेति [1]प्रति-पद्यस्व । स्यात्—स्वभावतः शरीरादिप्रसूतिः, अभ्रादिविकारवत् । न, आदिमत्प्रति-नियताकारत्वाद्, घटवत् । सादृश्यप्रतिज्ञानं च हीयते, अभ्रादिविकाराणां अणुस्कन्ध-कारणद्रव्येभ्योऽतिविलक्षणत्वात् ॥२२४०॥

**होज्ज सभावो वत्थुं णिक्कारणता व वत्थु[१४७-प्र०]धम्मो वा ।**
**जति वत्थुं णत्थि तओऽणुवलद्धीतो खपुष्फं व ॥२२४१॥**

**होज्ज** गाहा । किञ्च, योऽयं स्वभावो नामाभिप्रेतः, स वस्तुविशेषः, कारणता, वस्तुधर्मो वाऽभ्युपगम्येत । सर्वथा च दोषः । यदि वस्तुविशेषः, स नास्ति, सर्वप्रमाणगोचरातीतत्वात्, खपुष्पवत् ॥२२४१॥

**अच्चंतमणुवलद्धो वि अध तओ अत्थि णत्थि किं कम्मं ।**
**हेतू व तदत्थित्ते जो णणु कम्मस्स वि स एव ॥२२४२॥**

**अच्चंत०** गाहा । अथासावत्यन्तमनुपलभ्यमानोऽप्यस्ति । कर्म किमिति नास्ति ? स्वभावोऽस्तित्वे वा यो हेतुः, स कर्मण्यपि समानः ॥२२४२॥

**कम्मस्स वाऽभिधाणं[3] होज्ज सभावो त्ति होतु को दोसो ।**
**णिच्चं व सो सभावो सरिसो एत्थं[4] च को हेतू ॥२२४३॥**

**कम्म०** गाहा । अथवा कर्मणोऽभिधानं स्वभाव इति तन्नामास्तु, न संज्ञामात्रे विप्रतिपत्तिः । सर्वदा चासावेकलक्षण इत्यत्र को हेतुः ? स्वभाव एवेति चेद् । विलक्षणतायामप्येतत् समानम् ॥२२४३॥

**सो मुत्तोऽमुत्तो[5] वा जति मुत्तो तो ण सव्वहा सरिसो ।**
**परिणामतो पयं पिव ण देहहेतू जति अमुत्तो ॥२२४४॥**

---

१ °तिपद्यस्व—इति प्रतौ । २ °भावोऽस्ति°-इति प्रतौ । ३ °णं हेतु स° जे । °ण हुज्ज त । ४ इत्थं त । ५ मुत्तामु° जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**उवकरणाभावातो ण य भवति सुधम्म ! सो अमुत्तो 'वि ।**
**कज्जस्स मुत्तिमत्ता सुहसंवित्तातितो चेव ॥२२४५॥**

**सो मुत्तो** गाहा, [**उवकरणा०** गाहा] । स च मूर्तिमानमूर्त्तो वा ? यदि मूर्तिमान् । अस्य कर्मणश्च को विशेषः ? कर्मैव संज्ञामात्रविशिष्टं तत् । न चासौ सर्वदैवाविलक्षणः, मूर्तिमत्त्वादभ्रादिविकारवत् । अथ अमूर्तः, नारम्भको देहादीनाम्, अनुपकरणत्वाद्दण्डादिविकलकुलालवत् । स्यान्मतिः-नन्वसावेवोपकरणं कर्तुरात्मनः । नोपकरणस्यापि उपकरणं चिन्त्यते । तथापि नासावुपकरणमात्मनः समवायीष्टं शरीर-[३]निर्वृत्तौ, [शरीरस्य] मूर्त्तत्वात् । न हि मूर्तिमतोऽमूर्ति[मत्] समवायिकारणमिष्टम् । स्यात्—ननु शरीरस्य पुद्गला एव समवायिकारणम्, आत्मा च स्वभावोपकरणसाचिव्यात् कर्त्तेति । तच्च न, यस्मादात्मस्वभावयोर्न शरीरपुद्गलादानमस्ति, अमूर्त्तत्वात् । अतो मूर्तिमतोपकरणेन भवितव्यम्, तत्समवायिना च । न च तदाऽनादि पुद्गलसन्तानादिमयं कर्मान्तरेण सम्भाव्यते । ननु [४]तद्ग्रहणेऽप्येतत् समम्, आत्मनोऽमूर्त्तत्वात । अथवाऽयमात्मा सत्य[प्य]मूर्त्तत्वे कर्मणः समादाता, तद्वदमूर्त्तस्वभावोपकरणसमेतः शरीरस्येति को दोषः ? उच्यते—नैवायं मूर्तिविकलः समादत्ते । ननूक्तम्—अनादिकर्मसन्तानोपनिबन्धन एवायम् । न च कार्मणमाध्यात्मिकं शरीरमननुविश्य बाह्यशरीरनिर्वृत्तिरनुरूपेति समवायिकारणभावोऽस्यैवावसीयते । न चासावमूर्त्तस्वभावः, कार्यस्य मूर्तिमत्त्वाच्छरीरस्य । तथा सुखसंवित्तेरित्यादितः ॥२२४४-४५॥

**अधवाऽकारणतो[५] च्चिय सभावतो तो 'वि सरिसता कत्तो ।**
**किमकारणतो ण भवे विसरिसता किं 'व विच्छित्ती ॥२२४६॥**

**अधवा** गाहा । अथवाऽकारणत एव स्वभावत इति भवदभिप्रायः । तत्र वयं ब्रूमः—नाकस्मिकं शरीरम्, आदिमत्प्रतिनियताकारत्वात्, घटवत् । वैधर्म्येणाभ्रादिविकारवत् । प्रतिनियताकारत्वादेव चोपकरणसमेतकर्तृकम्, घटवत् । न च कर्मणोऽन्यदुपकरणं सम्भाव्यते । अथवा नाकस्मादुत्पत्तिरिष्यते, खरविषाणाद्यभावप्रसूतिप्रसङ्गात् । अकारणप्रसूतस्य वा कुतः सादृश्यम्? अकस्मादेवासादृश्यं [कुतो] न भवेदुच्छेदो वेति ? ॥२२४६॥

**अध [१०]वि सभावो धम्मो वत्थुस्स ण सो वि सरिसओ णिच्चं ।**
**उप्पातट्ठितिभंगा चित्ता जं वत्थुपज्जाया ॥२२४७॥**

---

१ त्ति जे । २ भावो-इति प्रतौ । नामा इति प्रतौ । ३ निर्वृ° इति प्रतौ । ४ तद्=कर्म । ५ °णः मा° इति प्रतौ । ६ भावास्य-इति प्रतौ । ७ °णउ को हे । ८ व जे । ९ किंचि वि° त । १० अहव को हे त । ११ उप्पाया° को ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

अथ गाहा । अथ वस्तुनो धर्मः स्वभावः, तथाप्यसौ यद्यात्मधर्मो विज्ञानादिवत्, न स शरीरकारणम्, अमूर्तत्वादाकाशवत् । अथ मूर्तिमद्धर्मः, न पुद्गलपर्यायमतिवर्त्तते । कर्मापि हि पुद्गलपर्यायानन्यरूपमेवेत्यविप्रतिपत्तिः । न च वस्तुनो धर्मः सदैव समानरूपोऽस्ति, स्थित्युत्पत्तिप्रलयपरिणामात्मकत्वाद्वस्तुनः ॥२२४७॥

**कम्मस्स वि परिणामो सुधम्म ! धम्मो स पोग्गलमयस्स ।**
**हेतू चित्तो जगतो होति सभावो त्ति[१४७–द्वि०]को दोसो ॥२२४८॥**

कम्म० गाहा । अथवा कर्मापि पुद्गलपरिणामधर्म एव जगतः शरीरादिहेतुः स्वभाव इति को दोषः ? स च विचित्रात्मा, पुद्गलपरिणामत्वादेवाभ्रादिविकारवत् । कुतोऽस्य नित्यं समानरूपता ? ॥२२४८॥

**अधवा सव्वं वत्थुं पतिक्खणं चिय सुधम्म ! धम्मेहिं ।**
**संभवति वेति केहि य[१] केहि य तदवत्थमच्चंतं ॥२२४९॥**

अधवा गाहा । अथवा सौम्य सर्वमेव हि वस्तु प्रतिक्षणमुत्पद्यते पूर्वपर्यायसमानपर्यायैः कैश्चिच्चापरपर्यायसमानाऽसमानैरुपरमति, कैश्चित्तदवस्थमेवास्ते ॥२२४९॥

**तं अप्पणो वि सरिसं ण पुव्वधम्मेहिं पच्छिमिल्लाणं ।**
**सकलस्स तिभुवणस्स य[२] सरिसं सामण्णधम्मेहिं ॥२२५०॥**

तं गाहा । तदात्मनोऽपि न पूर्वापरपर्यायैः सर्वथा समानमसमानं वा, समानासमानत्वात् । तथा भुवनत्रयस्यापि सामान्यविशेषपर्यायैः समानमसमानं वा ॥२२५०॥ अतः

**को सव्वधेव सरिसोऽसरिसो[३] वा[४] इधभवे परभवे वा ।**
**सरिसासरिसं सव्वं णिच्चाणिच्चातिरूवं च ॥२२५१॥**

को गाहा । को हि केन सर्वथैव समानोऽसमानो[५] वेह परत्र वा । यदीहैव कश्चित् स्वेनान्येन वा सर्वथा समानः स्यात्, परलोकेऽप्यनुमीयेत । न चासावस्ति, यतः सर्वमेवेदं समानासमानं नित्यानित्यादिरूपं च ॥२२५१॥

**जइ णियएहिं त्ति सरिसो ण जुवा भुवि बालवुड्ढधम्मेहिं ।**
**जगतो य[६] समो सत्तादिएहि तध परभवे जीवो ॥२२५२॥**

---

१ केहिं वि केहिं वि त को हे । २ व त । ३ °सो अस° हे । ४ °सो इध° त । ५ °मानादिह–इति प्रतौ । ६ वि त को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जइ गाहा । यथेह न निजैरपि युवा अतीतानागतैर्बालवृद्धपर्यायैरात्मनः सर्वथा समानः, सत्तादिसामान्यपर्यायैश्च[1] न केनचिदसमानः, तथाऽयमप्यात्माऽन्यजन्मनि समानासमानः ॥२२५२॥

**मणुओ देवीभूतो सरिसो सत्तादिएहि जगतो वि ।**
**देवादीहि विसरिसो णिच्चाणिच्चो वि एमेव ॥२२५३॥**

**मणुओ** गाहा । अथ किम् ? इह मनुजो देवत्वमापन्नः पूर्वपर्यायैरात्मनाऽपि न समानः, सत्त्वादिसामान्यपर्यायैर्न केनचिदसमान इति समानासमानः, तथा नित्यानित्यादिरूपोऽपीति ।

स्यान्मतिः–अस्माभिरपि न सर्वथा समानताऽभ्युपगम्यते । किं तर्हि ? समानजात्यन्वयोऽनुमतो नासमानजातीयता । [न] मनुजा[नां] देवादिपर्यायै(य)प्राप्तिः,-असमानकारणत्वात् । तच्च न, यतोऽभिहितमसमानजातीयजन्मापि ॥२२५३॥

**उक्करिसावक्करिसता[2] ण समाणाए वि होंति[3] जातीए ।**
**सरिसग्गाहे जम्हा[4] दाणातिफलं विधा तम्हा ॥२२५४॥**

**उक्क०** गाहा । किञ्च, न यतः समानग्राहे सति समानजातावप्युत्कर्षापकर्षावीश्वरदरिद्रकुलीनतादयः सम्भवन्ति, तस्माद्दानादिफलविघातप्रसङ्गः । अथोत्कर्षापकर्षौ पुण्यापुण्यकृतावभ्युपगम्येते किमसमानजातीयतां न प्रतिपद्यते, तत्साधनप्रकर्षापकर्षभेदात् ? ॥२२५४॥

**जं च सियालो वइ[5] एस जायते वेतविहितमिच्चादि ।**
**सग्गीयं जेणफलं[6] तदसंबद्धं[7] सरिसताए ॥२२५५॥**

**जं च** गाहा । यत्तु "शृगालो वै एष जायते यः सपुरीषो दह्यते" तथा "अग्निहोत्रं जुहुयात् स्वर्गकामः," तथा "अग्निष्टोमेन यमराज्यमभिजयते" इत्यादि वेदविहितं तद्विघातः । न च देवतादिविशेषाणां दानदयाध्ययनब्रह्मचर्यादिक्रियानुष्ठानमस्ति यतः पुनर्देवेषूपपद्येरन्निति ॥२२५५॥

**छिण्णम्मि संसयम्मि[8] जिणेण जरमरणविप्पमुक्केणं[9] ।**
**सो समणो पव्व[१४८-९-प्र०]इतो पंचहिं सह खण्डियसएहिं**
**॥४६०॥२२५६॥[10]**

---

१ पर्यायश्च इति प्रतौ । २ °सावकरिसा न को हे त । ३ वि जेण जा° त को हे । ४ जम्हा जे । तस्मात् वृथा–इत्यर्थः । ५ इव जे । ६ जं च फ° को हे त । ७ तम° त हे । ८ °म्मी त दी हा म को । ९ जरा हे । °म्मी जाइजरा° म । १० इति पञ्चमो गणधरवादः समाप्तः त । पञ्चमो गणहरो सम्मत्तो–को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ते पव्वइते सोतुं मंडिओ आगच्छती जिणसगासं ।
वच्चामि णं वन्दामि वन्दित्ता पज्जुवासामि ॥४६१॥२२५७॥
आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४६२॥२२५८॥
किं मण्णे बन्धमोक्खो[3] अत्थि व णत्थि त्ति संसयो तुज्झं ।
वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४६३॥२२५९॥
तम्मण्णसि जति बन्धो जोगो जीवस्स कम्मणा समयं ।
पुव्वं पच्छा जीवो कम्मं व समं व तो होज्ज ॥२२६०॥

छिण्णम्मि गाहा । ते पव्वइते गाहा । आभट्ठो गाहा । किं मण्णे गाहा । तम्मण्ण० गाहा । आयुष्मन् मण्डिक भवतोऽभिप्रायोऽयम्—'यो बन्धः स यदि जीवकर्मणोः संयोगोऽभिप्रेतस्ततः स स्वादिमानादिरहितो वा ? यद्यादिमान् [6]कल्प्यते तर्हि पूर्वमात्मा [पश्चात्] कर्म अथवा पूर्वं कर्म पश्चादात्मा, युगपद्वा संप्रसूयेयाताम् ? सर्वथा च दोषः ॥२२५६–६०॥

ण हि पुव्वमहेतूतो खरसिंगं वाऽऽतसंभवो जुत्तो ।
णिक्कारणजातस्स य णिक्कारणतो[7] च्चिय विणासो ॥२२६१॥

ण हि गाहा । तत्र न तावत् पूर्वमात्मसम्भूतिः सम्भाव्यते, निर्हेतुकत्वात् खरविषाणवत् । अकारणप्रसूतस्य वाऽकारणत एवोपरमः स्यात् ॥२२६१॥

अधवाऽणाति च्चिय सो णिक्कारणतो ण कम्मजोगो से ।
अह णिक्कारणतो सो मुक्कस्स वि होहिति स भुज्जो ॥२२६२॥

अधवा गाहा । अथवाऽनादिः एवासौ, अतोऽप्यकारणत्वान्न कर्मणा योगो नभोवत् । अथवाऽकर्मणोऽपि कर्मणो योगः, स मुक्तस्यापि स्यात् ॥२२६२॥

होज्ज व स णिच्चमुक्को बंधाभावम्मि को व से मोक्खो ।
ण हि मुक्कव्ववदेसो बंधाभावे मतो णभसो ॥२२६३॥

होज्ज व गाहा । अथवा स नित्यमुक्त एव । किमिह मोक्षजिज्ञासया ? बन्धाभावेऽपि वा मुक्तव्यपदेशाऽभाव एव आकाशवत् ॥२२६३॥

१ °मी त हे को । °मि दी हा । २ मन्नि त दी हा । ३ °क्खा संति न संति त्ति को हे । °क्खो संति न संति त्ति त । °क्खो अत्थि नत्थि त्ति म । °क्खा अत्थि ण अत्थि त्ति दी हा । ४ कम्मुणा को हे त । ५ तं त को हे । ६ मान् कल्प्ये पि हि पूर्वं°–इति प्रतौ । ७ °णउ च्चिय को हे । ८ अवि जे ९ होज्जस हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ण य कम्मस्स वि पुव्वं कत्तुरभावे समुब्भवो जुत्तो ।**
**णिक्कारणतो सो वि य तध जुगवुप्पत्तिभावो[1] य ॥२२६४॥**

**ण य** गाहा । न च कर्मणोऽपि प्राक् प्रसूतिरनुरूपा कर्तुरभावात् । न चाक्रियमाणस्य कर्मव्यपदेशोऽभिमतः । अकारणप्रसूतेश्चाकारण एवोपरमः । युगपदुत्पत्तिरप्यकारणत्वादेवासती, तत्संयोगश्च पूर्ववत् ॥२२६४॥

**ण हि कत्ता कज्जं ति य जुगवुप्प[१४८–४९–द्वि०]त्तीयं कम्मजीवाणं[2] ।**
**जुत्तो ववदेसोयं जध लोए गोविसाणाणं ॥२२६५॥**

**ण हि** गाहा । न च युगपदुत्पत्तौ सत्यामयं कर्ता, कर्मदमिति व्यपदेशो युक्तरूपो गोविषाणवत् ॥२२६५॥

**होज्जाऽणातीयो वा संबन्धो तध वि ण घडते मोक्खो।**
**जोऽणाती सोऽणंतो जीव णभाणं व संबन्धो ॥२२६६॥**

**होज्जा** गाहा। स्यान्मतिः–अनादिरेवात्मकर्मसंयोगः । तथाप्यनादित्वान्नात्मकर्मवियोगः स्यात्, आत्माकाशसंयोगवत् । अथवा देहकर्मसन्तानानादित्वादनन्तः संसारो यतः खलु अतोऽपि न मोक्षः ॥२२६६॥

**इय जुत्तीयं[3] ण घडते[4] सुव्वति य सुतीसुं[5] बन्धमोक्खो[6] त्ति ।**
**तेण तुह संसयोऽयं ण य कज्जोऽयं जधा सुणसु ॥२२६७॥**

**इय** गाहा । इत्येवं युक्त्या जिज्ञास्यमानो न घटते । अनुश्रूयते च श्रुतिषु बन्धो मोक्षश्चेत्यतः संशयोऽयं भवतः । न चायं कार्यो यथानुश्रूयताम्[7] ॥२२६७॥

**संताणोऽणातीओ परोप्परं हेतुफलभावातो[8] ।**
**देहस्स य कम्मस्स य मण्डिय ! बीयंकुराणं व ॥२२६८॥**

**संताणो** गाहा । तत्र तावत् किमात्मकर्मणोः प्राक् पश्चादित्येवादिष्वयमाश्रीयतेऽनादिरात्मकर्मसंयोगसन्तानः । कथम् ? इह देहकर्मणोरन्योन्यहेतुफलभावादनादिसन्तानो बीजाङ्कुरसन्तानवत् ॥२२६८॥

**अत्थि स देहो जो कम्मकारणं जो य कज्जमण्णस्स ।**
**कम्मं च देहकारणमत्थि य जं कज्जमण्णस्स ॥२२६९॥**

---

१ °भावे त को हे । २ त्तीइ जीवकम्माणं त । त्तीए जीवकम्माणं हे को । ३ जुत्तीए त को हे। ४ घडइ को हे त । ५ सुईए को । ६ °क्खा हे । ७ नुरूपताम्–इति प्रतौ । ८ हेतुहेउभा° को हे त । हेतुहेयभा° ९ पश्चादित्यमा°–इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अत्थि** गाहा। कथम्? इह अस्ति स देहो योऽन्यस्य कर्मणः कारणमन्यस्य च कार्यम्—अतीतस्य कार्यमेष्यतश्च कारणम, एवं[1] कर्मण्यतीतदेहकार्यमेष्यतश्च कारणमित्येवमनादिः सन्तानः ॥२२६९॥

**कत्ता जीवो कम्मस्स करणतो जध घडस्स घडकारो ।**
**एवं चिय देहस्स वि कम्मकरणसंभवातो[2] त्ति ॥२२७०॥**

**कत्ता** गाहा । कर्त्ता चात्मा कर्मणः, करणसद्भावाद्, घटस्य दण्डादिसमेतकुलालवत् । करणं चास्य कर्मनिर्वृत्तौ[3] देहोऽधिक्रियते । तथा देहस्यापि कर्त्ताऽयमात्मा करणसद्भावात्, पूर्ववत् । करणं चात्र कर्माधिक्रियते ॥२२७०॥

**कम्मं करणमसिद्धं च[4] ते मती कज्जतो य[5] तं सिद्धं ।**
**किरियाफलदो य पुणो पडिवज्ज तमग्गिभूति व्व ॥२२७१॥**

**कम्मं** गाहा । स्यान्मतिः—कर्म करणमसिद्धमस्मान् प्रति । न, कार्यतस्तत्सिद्धेः[6] । इह विद्यमानकारणं शरीरादि, कार्यत्वाद् घटवत् । यच्चास्य कारणं तत् कर्म । तस्मादस्ति कर्म । अथवा विद्यमानकारणमात्मशरीरद्वयं कर्तृकार्यसद्भावात्, कुलालघटपिण्डादिवत् । यच्च कर्तुरात्मनः शरीरनिर्वृत्तौ कारणतामापद्यते तत् कर्म । तस्मादस्ति कर्म । तथा, फलवन्तो दानादयः, चेतनाक्रियारूपत्वात् कृष्यादिवत्[7] । यच्चैषां फलं तत् कर्मेति प्रतिपद्यस्व अग्निभूतिवत् ॥२२७१॥

**जं संताणोणाती तेणाणंतो वि णायमेगंतो ।**
**दीसति संतो वि जतो कत्थति बीयंकुरादीणं ॥२२७२॥**

**अण्णतरमणिव्वत्तितकज्जं बीयंकुराण जं विहितं ।**
**[१५०-प्र०] तत्थ हतो संताणो [8]कुक्कडिअण्डातियाणं च ॥२२७३॥**

**जं** [गाहा, **अण्ण०**] गाहा । यच्चापदिश्यते—यस्मादात्मकर्मयोगोऽनादिरतोऽनन्तोऽप्यात्माकाशसंयोगवत्, देहकर्मसन्तानो वाऽनादित्वादनन्तो यतस्तस्मादमोक्ष इति । तन्नायमेकान्तो यत् सन्तानः संयोगो वानादिरतोऽनन्तोऽपि[9], यतः क्वचिदन्तवानपि सन्तानो[10] दृष्टो यथा बीजाङ्कुरयोः[11] यत्र तयोरन्यतरं स्वकार्यमनिर्वृत्त्योपरतं तत्र तत्सन्तानोच्छेदः ।

---

१ एव इति प्रतौ । २ °भवाउ त्ति **को हे** । ३ निवृत्तौ इति प्रतौ । ४ च **को** । °द्ध ते **त** । ५ °ओ तयं सि° **को हे** । ६ कार्य तत्स्वसिद्धेः इति प्रतौ । ७ °वद्यत्वैषां—इति प्रतौ । ८ कुक्क° **को हे त** । ९ रतोऽपि इति प्रतौ । १० °पि दृष्टो इति प्रतौ । ११ °रयोः स्व इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथा, कुकुटचण्डकयोः, पितापुत्रयोर्वा । तथा देहकर्मणोरपि यदि स्यात् को दोषः ? संयोगोऽपि हि तयोरेव बीजाङ्कुरवद् अनादिसन्तानमयस्तदुच्छेदादुच्छिद्यते ॥२२७२-७३

**जध वेह कंचणोवलसंजोगोऽणातिसंततिगतो वि ।**
**[1]वोच्छिज्जति सोवायं तध जोगो जीवकम्माणं ॥२२७४॥**

**जध वेह** गाहा । यथा चेह काञ्चनोपलयोः संयोगोऽनादिसन्ततिगतोऽप्य-ग्निमारुतद्रव्यसंयोगोपायाद्विघटते, तथा यद्यात्मकर्मणोः ज्ञानक्रियोपायोऽन्तः, अदोषः ।

**तो किं जीव[2]-णभाण व जोगो अध कंचणोवलाणं व[3] ।**
**जीवस्स य कम्मस्स य भण्णति दुविधो वि ण विरुद्धो ॥२२७५॥**

**तो किं** गाहा । आह—अथ[4] यथा आकाशसंयोगो न विनिवर्त्तते तथाऽऽत्म-कर्मणोः, अथ यथा काञ्चनोपलयोरपायीति किमत्र प्रतिपा(प)द्यामहे ? उच्यते—द्विविधो-ऽप्यविरुद्धः ॥२१७५॥ कथम् ?

**पढमो[5]ऽभव्वाणं चिय भव्वाणं कंचणोवलाणं व ।**
**जीवत्ते सामण्णे भव्वोऽभव्वो त्ति को भेतो ॥२२७६॥**

**पढमो** गाहा । इहात्माकाशसंयोगवदभव्यानामात्मकर्मसंयोगोऽनपायी, भव्यानां केषाञ्चित् । आह–जीवत्वे सामान्येऽभव्य इति कुतोऽयं विकल्पः ? ॥२२७६॥

**होतु व जति कम्मकतो ण विरोधो णारगातिभेदो [6]व्व ।**
**भणध य भव्वाऽभव्वा सभावतो तेण संदेहो ॥२२७७॥**

**होतु** गाहा । अस्तु वा यदि कर्मकृतो नारकादिभेदवत् । न चायं कर्मजो भवद-भिप्रायात् । किं तर्हि ? स्वभाव एवायमिहेत्यतः सन्देहः ॥२२७७॥

**दव्वातित्ते तुल्ले जीव-णभाणं सभावतो भेतो ।**
**जीवाजीवातिगतो जध तध भव्वेतरविसेसो ॥२२७८॥**

**दव्वा०** गाहा । उच्यते-यथेह द्रव्यादिसामान्ये सत्यात्माकाशयोः स्वभा-वतो भेदोऽभिमतो जीवाजीवादिकृतस्तद्वज्जीवसामान्ये सति भव्याऽभव्यभेदो यदि योग्यायोग्यत्व[7]विशेषात् को दोषः ? ॥२२७८॥

**एवं पि भव्वभावो जीवत्तं पिव सभावजातीतो ।**
**पावति णिच्चो तम्मि य तदवत्थे णत्थि [8]णेव्वाणं ॥२२७९॥**

---

१ वें° **जे** । वु° **त** । २ जीवनि° **त** । ३ व अह जोगो कं° **को हे त** । ४ ततः इति प्रतौ । ५ °मो वाभव्वा° **जे** । ६ °मेव्व **को हे** । ७ °ग्यतवि° इति प्रतौ । ८ णिव्वा° **को हे** ।

एवं गाहा। आह–एवमपि भव्यता अनपायिनी प्रसजति, स्वभावजातीयत्वात्, जीवत्ववत्, तदवस्थानाच्चामोक्ष इति ॥२२७९॥

जध घडपुव्वाऽभावोऽणातिसभावो वि सणिधणो एवं।
जंति भव्वत्ताऽभावो भवेज्ज किरियाय[1] को दोसो ॥२२८०॥

जध गाहा। उच्यते–यथेह घटस्य प्रागुत्पत्त्यभावोऽनादिस्वभावजातीयोऽपि संस्तदुत्पत्तावुपरमन् प्रतीतः, तद्वद्भव्यत्वस्यापि ज्ञानक्रियोपायादुपरतिरिति को दोषः? ॥२२८०॥

अणुदाहरण[१५०–द्वि]मभावो खरसिंगं[3] पिव मती ण तं जम्हा।
भावो च्चिय स विसिट्ठो कुम्भाणुप्पत्तिमेत्तेणं ॥२२८१॥

अणु० गाहा। स्यान्मतिः–तदनुदाहरणमिदम्, अभावत्वात् खरविषाणवत्। तच्च न, यतो भाव एवासौ घटानुत्पत्तिमात्रविशिष्टः, पुद्गलविशेषात् ॥२२८१॥

एवं भव्वुच्छेतो कोट्ठागारस्स वाऽवचयतो[4] त्ति।
तण्णाऽणंतत्तणतोऽणागतकालंबराणं व ॥२२८२॥

एवं गाहा। आह–एवमपि सर्वभव्योच्छेदप्रसङ्गोऽपचयात् कोष्ठागारवत्। उच्यते–न, भव्यानामनन्तत्वादनागतकालवत्। यथाऽनागतः कालोऽनुसमयमपचीयते, न चोच्छिद्यते। यथा वाऽऽकाशमपचीयमानमपि [5]बुद्ध्या नोच्छिद्यते, अनन्तत्वात्, तद्वद्भव्यानामनुच्छेदः ॥२२८२॥

जं चातीताणागतकाला तुल्ला जतो य संसिद्धो।
एक्को अणंतभागो भव्वाणमतीतकालेणं ॥२२८३॥
[6]एस्सेण तत्तियो[7] च्चिय जुत्तो जं तो वि सव्वभव्वाणं।
जुत्तो ण समुच्छेदो होज्ज मती [8]किधमिणं सिद्धं ॥२२८४॥
भव्वाणमणंतत्तणमणंतभागो व किध व[9] मुक्को[10] सिं।
कालादयो व्व मंडिय! मह वयणातो यँ पडिवज्ज ॥२२८५॥
सब्भूतमिणं गेण्हसु[11] मह वयणातोऽवसेसवयणं व।
सव्वण्णुतातितो[12] वा जाण य[13] मज्झत्थवयणं व ॥२२८६॥

---

१ तह त। २ °याइ को त। ० याए को को हे। ३ °सिंगं त। ४ अवचयंति त्ति को। अवचउ त्ति हे। ५ युद्धयाइ–ति प्रतौ। ६ एसेण को। ७ तत्तिउ को। तत्तिउ जुत्तो हे। ८ कहमिणं त हे को। किध मतं जे। ९ व त को हे। १० व त को हे। ११ गिण्ह° को हे। १२ त्ता° के। १३ जाणसु म° को।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**मण्णसि [1]किध सव्वण्णू सव्वेसिं सव्वसंसयच्छे[2]त्ता ।**
**दिट्ठंताभावम्मि वि पुच्छतु जो संसयो जस्स ॥२२८७॥**

**जं चा०** गाहा । **एस्सेण** गाहा । **भव्वाण०** गाहा । **सव्भूत०** गाहा । **मण्णसि** गाहा । यतश्च यावानतीतस्तावानेष्यन्नपि [3]कालः । अतीतेन चानन्तभागमात्रं भव्यानां सिद्धम्, अतस्तावतैवानागतेनाप्यनन्तभागमात्रमे[4]वं सम्भाव्यते भव्यानामपव[5]र्गः । तेन न सर्वोच्छेदः । स्यान्मतिः—कथमिदमवसीयते भव्यानामानन्त्यम्, अनन्तभागमात्रापवर्गश्च । उच्यते—यथेह कालाऽऽकाशादयोऽनन्तास्तद्वदात्मनामानन्त्यादं । अस्मद्वचनाच्च प्रतिपद्यस्व ॥२२८३–८७॥

**भव्वा वि ण सिज्झिस्संति केइ कालेण जति वि सव्वेणं ।**
**णणु ते वि अभव्व च्चिय किं वा भव्वत्तणं तेसिं ॥२२८८॥**

**भव्वा** गाहा । आह—यदि भव्यत्वेऽपि सति न सर्वसिद्धिरतो ये न सेत्स्यन्ति तेषामप्यभव्यतैवास्तु । को वा विशेषस्तेषामभव्येभ्यः ? ॥२२८८॥

**भणति भव्वो जोग्गो[१५१-प्र०]ण य [6]जोग्गत्तेण सिज्झते[7] सव्वो ।**
**जध जोग्गम्मि वि दलिए सव्व[8]त्थं ण कीरते पडिमा ॥२२८९॥**

**भणति** गाहा । उच्यते—मोक्षसाधनविनेयतायोग्यो यः स भव्योऽभिधीयते । न च योग्य एवेति स सिध्यति । यथेह न प्रतिमायोग्याद्दारुणोऽवश्यमेव प्रतिमाप्रसूतिः । किं तर्हि ? यस्यैव कारणसामग्री तत्रैवासौ सम्भाव्यते । न च तदसंपत्तावप्यभव्यता सम्पद्यते, किन्तु यदा च यत्र च प्रतिमायोग्यादेव प्रसूतिर्नायोग्याद् । एवमेव हि न भव्य एवेत्यवश्यंभाविनी सिद्धिः । किं तर्हि ? यस्यैव तत्साधनसामग्री तस्यैवासौ सम्भाव्यते । न च तदसम्पत्तावप्यभव्यता सम्पद्यते । किन्तु यदा च यत्र च भव्यस्यैवापवर्गो नाऽभव्यस्य ॥२२८९॥

**जध वा स एव पासाणकणगजोगो वियोगजोग्गो वि ।**
**ण विजुज्जति सव्वो च्चिय स वि[9]उंज्जति जे[10][11]स्स संपत्ती ॥२२९०॥**

**जध वा** गाहा । यथा वा स एव हेमाश्मसंयोगो वियोगयोग्योऽपि सन्न सर्व एव हि वियुज्यते ॥२२९०॥

**किं पुण जो संपत्ती सा जोग्ग[12]स्सेव ण तु अजोग्ग[12]स्स ।**
**तध जो मोक्खो णियमा सो भव्वाणं ण इतरेसिं ॥२२९१॥**

---

१ कध त । २ °च्छेया त को हे । ३ कालोतीततेन—इति प्रतौ । ४ मेवं इति प्रतौ । ५ वर्गो येन सर्वो° इति प्रतौ । ६ जोग्गा तेण जे । ७ °ज्झई को । ८ सव्वम्मि त हे । ९ विजु° त को हे । १० सव्वसं° त । ११ जो हे । १२ जोग° जे ।

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

**किं पुण** गाहा। किं पुनर्यदा च यत्र च या सम्पत्तिरसौ योग्यस्यैव, नायोग्यस्य। तद्वत् यदा च यत्र च या सिद्धिरसौ भव्यराशेरिति ॥२२९१॥

**कतकादिमत्तणातो मोक्खो णिच्चो ण होति कुंभो व्व।**
**णो पद्धंसाभावो भुवि तद्धम्मा वि जं णिच्चो ॥२२९२॥**

**कत०** गाहा। आह—अनित्यो मोक्षः, कृतकत्वात्, प्रयत्नानन्तरीयकत्वाच्च, घटवत्। उच्यते—कृतकाद्यनित्यमिति नायमेकान्तः, विपक्षेऽपि दर्शनात्—इह यस्माद् घटादिप्रध्वंसाभावः कृतकादिस्वभावोऽपि सन्नित्यः प्रतीयते ॥२२९२॥

**अणुदाहरणमभावो एसो वि मती ण तं जतो णियतं[1]।**
**कुम्भविणासविसिट्ठो भावो चिय पोग्गलमयो ये ॥२२९३॥**

**अणु०** गाहा। स्यान्मतिः—अनुदाहरणमिदमभावत्वात्, खरविषाणवत्। तच्च न, यतो भाव एवासौ घटपर्यायोपरतिमात्रविशिष्टः, पुद्गलमयत्वात् ॥२२९३॥

**किं वेगंतेण कतं पोग्गलमेत्तविलयम्मि जीवस्स।**
**किं णिव्वत्तितमधियं णभसो घडमेत्तविलयम्मि ॥२२९४॥**

**किं वेगं०** गाहा। इहात्म-कर्मपुद्गलवियोगो मोक्षोऽभिप्रेतः। तत्र किमेकान्तेनात्मनो निर्वर्त्यते यत् कृतकत्वादनित्यत्वाभिप्रायः स्यात्? नन्वयमेवात्मकर्मविभागो निर्वर्त्यते, दृष्टश्चायम्। अतः कर्मणोऽनित्यत्वादनित्य इति। [4]तच्च न, यतो न हि घटमात्रविलये सति आकाशविनाशः, घटाकाशविनाश(घटविनाशे आकाश)विभागाऽभावात्। आकाशविभागाऽभावेऽपि सुतरां कपालाकाशसंयोगोऽविनिवृत्त एव तद्वदात्म-कर्मविभागाभावेऽपि कर्मपुद्गलसंयोगाविनिवृत्तिः, तल्लोकव्याप्तेः, तच्च न। ॥२२९४॥ यतः

**सोऽणवराधो व्व पुणो ण बज्झते बंधकारणाभावा।**
**जोगो[5] य बंधहेतू ण य सो[6] तस्सासरीरो त्ति ॥२२९५॥**

**सो** गाहा। तत् पुद्गलसंयोगेऽपि नासौ बध्यते, बन्धकारणाऽभावादनपराधपुरुषवत्। योगत्रयं च बन्धहेतुरभिधीयते। न च तत्तस्य, अशरीरत्वात्, अतो न बध्यते। विशिष्टश्चेह बन्धनामकर्मप्रत्ययो बन्धोऽधिक्रियते, न कर्मयोग्यपुद्गलसंयोगमात्रम् ॥२२९५॥

**ण पुणो तस्स पसूति बीजाभावादिहंकुरस्सेव।**
**बीयं च तस्स कम्मं ण य तस्स तयं [१५१-द्वि०] ततो णिच्चो ॥२२९६॥**

---

१ नियओ को हे त। २ योयं जे को। ३ °माच्च वि° इति प्रतौ। ४ तच्च यतो इति प्रतौ। ५ जोगा को। ६ यते त° को हे। ७ °गोपि—इति प्रतौ। ८ °कारिणो—इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ण पुणो गाहा । न तस्य भूयो भवप्रसूतिरस्ति, बीजाभावादङ्कुरप्रसूतिवद् । भवाङ्कुरप्रसूतिबीजं चास्य कर्मापदिश्यते । न च तत् तस्य, अतो नित्य इति ॥२२९६॥

**दव्वामुत्तत्तणतो णभं व्व णिच्चो मतो स दव्वतया ।**
**सव्वगतत्तावत्ती मति त्ति तं णाणुमाणातो ॥२२९७॥**

**दव्वा०** गाहा । इतश्च नित्यो मुक्तः, द्रव्यामूर्तत्वादाकाशवत् । स्यान्मतिः–इष्टबाधनाद् विरुद्धोऽयं यस्माद्[1] । अत एव सर्वगतत्वादिप्रसङ्गोऽपि । तद्यथा–सर्वगतो मुक्तः द्रव्याऽमूर्त्तत्वादाकाशवत् । तच्च न, अनुमानसद्भावात्–नाऽयमात्मा सर्वगतः, कर्तृत्वात् कुलालवत् । एवं भोक्तृत्वादिति ॥२२९७॥

**को वा णिच्चग्गाहो सव्वं चिय विभवभंगथितिमतियं[2] ।**
**पज्जायंतरमेत्तप्पणादिणिच्चातिववदेसो[3] ॥२२९८॥**

**को वा** गाहा । को वेह नित्यग्राहो यतः सर्वमेवोत्पाद-व्यय-ध्रौव्यस्वभावम् । किं तर्हि ? पर्यायान्तरमात्रार्पणादनित्यादिव्यपदेशो वस्तुनः । यथा पिण्डपर्यायेणोपरमन् घटपर्यायेणोत्पद्यते, मृद्रूपादिभिरवतिष्ठते घटः । तद्वदयमपि संसारितयोपरमन् सिद्धतयोत्पद्यते जीवद्रव्योपयोगादिभिरवतिष्ठत इति किमस्य सर्वथोत्पन्नं विनष्टमास्ते वा ? तथैकसमयसिद्धादिपर्यायैरपि व्ययोत्पादस्थितयः समायोजनीयाः ॥२२९८॥

**मुत्तस्स कोवकासो सोम्म ! तिलोगसिहरं गती किध से ।**
**कम्मलहुता तधागतिपरिणामादीहिं भणितमिदं[5] ॥२२९९॥**

**मुत्तस्स** गाहा । आह- मुक्तस्य कोऽवकाशः ? सौम्य ! लोकाग्रम् । अथ कथमकर्मणो गतिरनुप्रवर्त्तते ? उच्यते–कर्मापगमात् , लघुत्वात् , पूर्वप्रयोगात् , असङ्गत्वाद् , बन्धनच्छेदात्, तथागतिपरिणामाच्च । यथैवासावशेषकर्मपरिक्षयादपूर्वपरिणामं सिद्धतामापद्यते तथोर्ध्वगतिपरिणाममपीति ॥२२९९॥

**किं सक्किरियमरूवं मण्डिय ! भुवि चेतणं च किमरूवं ।**
**जध से[6] विसेसधम्मो चेतण्णं तध मता किरिया ॥२३००॥**

**किं** गाहा । आह–किमिह सक्रियमरूपमुपलभ्यते यथाऽयमपि स्यात् ? उच्यते–चेतनं वा किमरूपमस्त्यात्मानमेकं विहाय ? अतो यथाऽस्याऽरूपत्वे सति वैशेषिको धर्मश्चैतन्यमेवं यदि क्रियावत्त्वमपि स्यात्, को दोषः ? ॥२३००॥

१ °दात—इति प्रतौ । २ ठिति **त** । ठ्ठि **को** । ठ्ठिइ **हे** । ३ °णादिणि° **त** । °णा हि णि° **जे** । ४ पट° इति प्रतौ । ५ °तम्मि **जे** । ६ सो **जे** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कत्तादित्तणतो वा सक्किरियोऽयं मतो कुलालो व्व ।
देहप्फण्डणतो वा पच्चक्खं जन्तपुरिसो व्व ॥२३०१॥

कत्ता० गाहा । अथवा क्रियावानात्मा, कर्तृत्वात्कुलालवत् । तथा भोक्तृत्वादित्यादि । अथवेह साक्षात् शरीरस्पन्दनात, यन्त्रपुरुषवत् ॥२३०१॥

देहप्फंण्डणहेतू होज्ज पयत्तो त्ति सो वि णाकिरिए ।
होज्जाऽदिट्ठो व्व मती तदरूविते णणु समाणं ॥२३०२॥

देह० गाहा । स्यान्मतिः–शरीरपरिस्पन्दहेतुरस्य प्रयत्न इति । सोपि न, अक्रियत्वादेव, आकाशवत् । प्रयत्नस्य चामूर्त्तस्य क्रियाहेतुत्वे हेतुरभिधेयः । न चेत्; आत्मन्यपि समानमेतत् । स्यान्मतिः–अदृष्टः क्रियाहेतुरस्य । तदमूर्त्तत्वे समानमात्मनः, विशेषहेतुर्वाभिधेयः ॥२३०२॥

रूवित्तम्मि स देहो वच्चो तप्फन्दणे पुणो हेतू ।
पतिणियतपरिप्फन्दणमचेतणाणं ण वि य जुत्तं ॥२३०३॥

रुवित्त० गाहा । अथ मूर्त्तिमानेवादृष्टः । स देह एव कर्मविशिष्टः । तत्परिस्पन्दहेतुत्वेऽपि च समाधिरभिधेयः, यदि न स्वभाव एवाङ्गीक्रियते । न च प्रतिनियतस्पन्दनमचेतनानामनुरूपम् ॥२३०३॥

होतु किरिया भवत्थस्स [१५२-प्र०] कम्मरहितस्स किंणिमित्ता सा ।
णणु तग्गतिपरिणामा जध सिद्धत्तं तधा सा वि ॥२३०४॥

हेतु० गाहा । आह–अस्तु संसारिणो गतिः, अकर्मणः किंनिमित्तासौ । उच्यते–ननूक्तं तथागतिपरिणामात् सिद्धत्वपरिणामवदिति ॥२३०४॥

किं सिद्धालयपरतो ण गती धम्मत्थिकायविरहातो ।
सो गतिउवग्गहकरो लोगम्मि जमत्थि णालोए ॥२३०५॥

किं गाहा । आह—किमिति सिद्धालयात् परतो न गतिरस्येति ? परतो गत्युपग्रहकारिणो धर्मास्तिकायस्याभावात् । स यस्माल्लोक एव, न परतः ॥२३०५॥

लोगस्सत्थि विवक्खो सुद्धत्तणतो घडस्स अघडो व्व ।
स घडाति च्चेय मती ण णिसेधातो तदणुरूवो ॥२३०६॥

---

१ °प्फंदण त को हे । २ °याना° इति प्रतौ । ३ °प्फंदण को हे त । ४ व हे । ५ °रूव त हे को । ६ रूव° त । ७ णामो जे । ८ सो जे । ९ °स्येत्यतो ग°–इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**लोगस्स** गाहा। स्यात्—कथं पुनरिदमनुमीयते—अस्त्यलोक इति ? उच्यते—विपक्षमा(वा)न् लोको व्युत्पत्तिमच्छुद्धपदाभिधेयत्वात्। इह यद्व्युत्पत्तिमता शुद्धपदेनाभिधीयते तद्विपक्षो दृष्टो यथा घटस्याघटः। यश्च लोकस्य विपक्षः सोऽलोकः। तस्मादस्त्यलोक इति। स्यान्मतिः—न लोकोऽलोक इति। स घटादीनामेवान्यतमो भविष्यति। किमिह तद्वस्त्वन्तरपरिकल्पनया ? तच्च न, यतो निषेधसद्भावान्निषेध्यस्यैवानेनानुरूपेण भवितव्यम्। निषेध्यश्च लोकः। स चाकाशविशेषो जीवादिद्रव्यभाजनम्। अतः खल्वलोकेनाप्याकाशविशेषेणैव भवितव्यम्। यथेहापण्डित इत्युक्ते विशिष्टज्ञानविकलश्चेतन एव गम्यते, न घटादिरचेतनः। तद्वदलोकेनापि लोकानुरूपेणेति। यस्मादाह—

"नञ्युक्तमिवयुक्तं वा यद्वि कार्यं विधीयते।
तुल्याधिकरणेऽन्यस्मिन् लोकेऽप्यर्थगतिस्तथा॥" ॥२३०६॥

**तम्हा धम्माऽधम्मा लोगपरिच्छेतकारिणो जुत्ता।**
**इधराऽऽगासे तुल्ले लोगोऽलोगो त्ति को भेतो ? ॥२३०७॥**

**तम्हा** गाहा। तस्मादलोकास्तित्वादवश्यं धर्माऽधर्माभ्यां तत्परिच्छेदकारिभ्यां भवितव्यम्। अन्यथाऽऽकाशसामान्ये सति लोकोऽलोक इति विशेषो न स्यात ॥२३०७॥

**लोगविभागाभावे पडिघाताभावतोऽणवत्थातो।**
**संववहाराभावो संबंधाऽभावतो होज्जा ॥२३०८॥**

**लोग०** गाहा। यदि हि धर्माधर्माभ्यां लोकविभागो न स्यात्, अतः खल्वविशिष्ट एवाकाशे गतिमतामात्मनां पुद्गलानां च प्रतिघाताऽभावादनवस्थानम्। अतः सम्बन्धाभावात् सुखदुःखसम्बन्धमोक्षसंसारप्रक्रियासंव्यवहारो न स्यात् ॥२३०८॥

**णिरणुग्गहत्तणातो ण गती परतो जलादिव झसस्स।**
**जो गमणाणुग्गहिता सो धम्मो लोगपरिमाणो ॥२३०९॥**

**णिर०** गाहा। अतो न लोकविभागपरस्ताद्गतिरात्मनः, निरनुग्रहत्वात्, मत्स्यस्येव जलात् परतः। यश्च गमनानुगृ(ग्र)हीता स धर्मास्तिकायो लोकतुल्यमानोऽभिहितः ॥२३०९॥

**अत्थि परिमाणकारी लोगस्स पमेयभावतोवस्सं।**
**णाणं पिव णेयस्साऽलोगत्थित्ते य सोऽवस्सं ॥२३१०॥**

---

१ लोगालो °त। २ °मन्तः इति प्रतौ। ३ °हितो जे। ४ अत्थ त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अत्थि** गाहा । अस्ति हि लोकपरिमाणकारी, प्रमेयत्वात्, ज्ञेयज्ञानवत् । अथवात्मानः पुद्गलाश्च लोकोऽभिधीयते । तस्य परिमाणकार्यस्ति, प्रमेयत्वात्, स्थालिप्रस्थवत् । यश्चास्य परिमाता स धर्मास्तिकायः । स चावश्यमलोकास्तित्वे युक्त इति ॥२३-

**पडणं पसत्तमेवं थाणातो तं च णो जतो छट्ठी ।**
**इध कत्तिलक्ख[१५२-द्वि०]णेयं कत्तुरणत्थंतरं थाणं ॥२३११॥**

**पडणं** गाहा । आह—पतनधर्मा मुक्तः, स्थानात्, फलवत् । उच्यते-न, षष्ठ्याः कर्तृलक्षणत्वादिह मुक्तस्थानमिति मुक्तोऽवतिष्ठत इत्युक्तं भवति । न तदर्थान्तरस्थानपरिकल्पनमिष्टम् ॥२३११॥

**णभणिच्चत्तणओ वा थाणविणासपतणं ण जुत्तं से ।**
**तध कम्माभावातो पुणक्किरियाऽभावतो वा वि ॥२३१२॥**

**णभ०** गाहा । तदर्थान्तरस्थानतायामपि चाऽऽकाशनित्यत्वान्न पतनमनुरूपम् । कर्म चात्मनः क्रियाकारणम् । अकर्मा चासाविति न तद्धर्मा । न चास्य पूर्वप्रयोगादिक्रियाहेतुभिरवसितप्रयोजनत्वाद् भूयः प्रयत्ननोदनाऽऽकर्षणगुरुत्वादिक्रियाकारणमस्ति यतः पतेत् ॥२३१२॥

**णिच्चत्थाणातो वा वोमातीणं पडणं पसज्जेज्जा ।**
**अध ण मतमणेगंतो थाणातोऽवस्सपतणं ति ॥२३१३॥**

**णिच्च०** गाहा । किञ्च स्थानात् पतनमिति विरुद्धमुच्यते । युक्तं तावदवस्थानात् पतनम्—एवं च नित्यस्थानादाकाशादीनां नित्यं पतनप्रसङ्गः । न चेत्, अनेकान्तः स्थानात् पतनमिति ॥२३१३॥

**भवतो सिद्धो त्ति मती तेणातिमसिद्धसंभवो जुत्तो ।**
**कालाणातित्तणतो पढमसरीरं व तदजुत्तं २३१४॥**

**भवतो** गाहा । स्यान्मतिः—यतो भवात् सिद्धिप्रसूतिरतोऽवश्यमादिमत्वात् सर्वसिद्धानामादिमंत्त्वसम्भूतिरन्वेषितव्या । तच्च न, अनादित्वात् कालस्यादिशरीरवत् । यथेह सर्वशरीराणामादिमत्त्वम्, अथवाऽनादित्वात्कालस्याऽनादिशरीरमस्ति, तद्वदादिसिद्ध इति ॥२३१४॥

**परिमितदेसेऽणंता किध माता मुत्तिविरहितत्तातो ।**
**''णेयम्मि व णाणाइं दिट्ठीओ वेगरूवम्मि ॥२३१५॥**

---

१ °त्वाच्छालि° इति प्रतौ । २ पयणं को हे । ३ तं न उ ज° त । ४ युक्तो–इति प्रतौ । ५ ज्ज जे । ६ गता हे को । ७ पडणं त को हे । ८° नामादिसर्वस° इति प्रतौ । ९ तद्वत्त-तच्च–इति प्रतौ । १० मादिसत्त्वमथ° इति प्रतौ । ११ णिय° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

परि० गाहा। आह–परिमिताकाशं निर्वाणमनुश्रूयते, अनादिकाले च सिद्ध-सम्भूतिः। अतोऽनन्तत्वात् कथमवतिष्ठेरंस्त इति। उच्यते–नायं दोषोऽमूर्त्तत्वात्। तेषामेव प्रतिद्रव्यमनन्तकेवलज्ञानदर्शनसम्पातवन्नर्त्तकीनयनविज्ञानसम्पातवद्वेति ॥२३१५॥

**ण ह'वइ ससरीरस्स प्पियऽप्पियावहतिरेवमादीणं।**
**वेतपदाणं च तुमं ण सदत्थं मुणसि तो संका ॥२३१६॥**
**तुह बंधे मोक्खम्मि य सा य णं कज्जा जतो फुडो चेयं।**
**ससरीरेतरभावो णणु जो सो बन्धमोक्खो त्ति ॥२३१७॥**

ण ह वइ गाहा। सौम्य, "न ह वै [स]शरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः" इत्येषां च वेदपदानां न वाक्यार्थमवबुध्ते भवान्। अतः संशेते–किमिह बन्धमोक्षौ स्यातां न वेति। न चेह संशयोऽनुरूपस्ते, यतो विस्पष्टमेवेदमुच्यते–सशरीरस्येति बाह्याध्यात्मिकानादिशरीरसन्तानमयो बन्धस्तथा, अशरीरं वा वसन्तमित्यशेषशरीरापगमस्वभावो मोक्ष इति ॥२३१६-१७॥

**छिण्णम्मि संसयम्मि जिणेण जरमरणविप्पमुक्केणं।**
**सो समणो पव्वइतो अद्धुट्ठे[१५३-प्र०]हि सह खण्डियसतेहिं**
**॥४६४॥२३१८॥**

**छिण्णम्मि** गाहा। ॥२३१८॥

[ षष्ठगणधरविवरणं समाप्तम्। ]

[ आचार्यश्रीजिनभद्रकृतं विवरणमितः परं नास्ति। ]

१ वै जे। २ मत। ३ चेव त को हे। ४ भवानन्तः–इति प्रतौ। ५ °ट्ठहिं को। °ट्ठिहिं हे। ६ इति षष्ठो गणधरवादः समाप्तः॥ त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

॥ ॐ नमो वीतरागाय ॥

श्रीकोट्यार्यवादिगणिकृतसंपूर्तिरूपेण विवरणेन सहितं

श्रीजिनभद्रगणिक्षमाश्रमणविरचितं

# विशेषावश्यकभाष्यम्।

निर्माप्य षष्ठगणधरवक्तव्यं किल दिवंगताः पूज्याः ।
अनुयोगमार्गदेशिकजिनभद्रगणिक्षमाश्रमणाः ॥१॥
तानेव प्रणिपत्यातः परमवि(व)शिष्टविवरणं क्रियते ।
कोट्यार्यवादिगणिना मन्दधिया शक्तिमनपेक्ष्य ॥१॥
सङ्घटनमात्रमेतत् स्थूलकमतिसूक्ष्मविवरणपटस्य ।
शिवभक्त्युपहृतलुब्धकनेत्रवदिदमननुरूपमपि ॥२॥
सुमतिस्वमतिस्मरणाऽऽदर्शपरानुवचनोपयोगवेलायाम् ।
मद्वदुपयुज्यते चेत् गृह्णन्त्वलसास्ततोऽन्येऽपि ॥३॥

अथ सप्तमस्य भगवतो गणधरस्य वक्तव्यतानिरूपणसम्बन्धनाय गाथाप्रपञ्चः—

ते पव्वइते सोतुं मोरिओ आगच्छती जिणसगासं ।
वच्चामि णं वन्दामि वन्दित्ता पज्जुवासामि ॥४६५॥२३१९॥
आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वणूसव्वदरिसीणं ॥४६६॥२३२०॥
किम्मण्णे[1] अत्थि देवो[2] उदाहु णत्थि त्ति संसयो तुज्झं[3] ।
वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४६७॥२३२१॥
तं मण्णसि णेरइया परतंता दुक्खसंपतत्ता[4] य ।
ण तरंति[5] इहागंतुं सद्धेया सुव्वमाणा वि ॥२३२२॥
सच्छेन्द[6]चारिणो पुण देवा दिव्वप्पभावजुत्ता य ।
जं ण कताइ त्ति दरिसणमुवेन्ति[7] तो संसयो तेसु[8] ॥२३२३॥

---

१ किं मं॰ को हे म । किं मन्नसि संति देवा उयाहु न सन्तीति संसओ तुज्झं । हा दी । २ देवा हे त म । ३ तुज्झ को हे । ४ ॰संपउत्ता को हे । ५ ॰रंतीहा को हे । ६ ॰च्छंद॰ को हे । ७ ॰वेंति को हे । ८ तेसुं को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ते पव्वइते सोतुं । आभट्ठो य। किम्मण्णे अत्थि देवो । तं मण्णसि णेरइया । सच्छन्दचारिणो पुण ।** गाहा । हे मौर्यपुत्र ! आयुष्मन् ! काश्यप ! त्वं मन्यसे नारकाः संक्लिष्टासुरपरमाधार्मिकायत्ततया कर्मवशतया [च] परतन्त्रत्वात्, स्वयं च दुःखसंतप्तत्वात् इहागन्तुमशक्ताः, अस्माकमप्यनेन शरीरेण तत्र गंतुं कर्मवशतयैवाशक्तत्वात् प्रत्यक्षीकरणोपायाऽसम्भवादागमगम्या एव श्रुतिस्मृतिग्रन्थेषु श्रूयमाणाः श्रद्धेयाः भवन्तु, ये पुनरमी देवाः, ते स्वच्छन्दचारिणः कामरूपाः दिव्यप्रभावाश्च किमिति दर्शनविषयं नोपयान्ति–किमिह नागच्छन्तीत्यभिप्रायः । **अवश्यं न** सन्ति, येनास्मादृशानां प्रत्यक्षा न भवन्ति । अतो न सन्ति देवाः, अस्मदाद्यप्रत्यक्षत्वात् खरविषाणवत् । श्रूयन्ते च श्रुत्यादिषु । तत आगमप्रामाण्यादनुमानगम्यत्वाद्वा परमाण्वादिवत् किं सन्तीति एवं भवतो देवेषु संशयः । ॥२३१९–२३२३॥

मा कुरु संशयम् । अथादृष्टाश्रुतनामगोत्राभिभाषण-हृदयस्वार्थप्रकटीकरणविस्मापनानन्तरं देवाभावप्रतिपाद[क]हेतोरसिद्धतोद्भावना[र्थं] प्रत्यक्षप्रमाणसिद्धतां प्रकाशयन् भगवानाह—

**मा कुरु संसयमेते [१]सुदूरमणुयादिभिण्णजातीए ।**
**पेच्छसु पच्चक्खं चिय चतुव्विधे देवसंघाते ॥२३२४॥**

**मा** गाहा । मा कार्षीः संशयं देवसद्भावं प्रति संशयबीजहेतोरपक्षधर्मत्वात्, हेतुहेत्वाभासानां प्रायः प्रत्यक्षधर्मत्वात् । अस्मदाद्यप्रत्यक्षत्वं च देवानां धर्मो न भवति, यतः सम्प्रत्येव ममाग्रतश्चक्षुष्प्रत्यक्षसिद्धान् 'एतान् सुदूरमनुजादिभिन्नजातीयान्'–मनुजा(ज,तिर्यग्नारकाः, मनुजादयः, मनुजादिभ्यो भिन्नजातीया मनुजादिभिन्नजातीयाः सुदूरेण मनुजादिभिन्नजातीयानेतान् सुदूरमनुजादिभिन्नजातीयान् पश्य आयुष्मन् ! मौर्यपुत्र ! काश्यप ! प्रत्यक्षमेव मुदितांश्चतुर्विधानापि 'देवसंघातान्' भवनपतिव्यन्तरज्योतिष्कवैमानिकान् । तत्राप्येते प्रत्यक्षा इति असिद्धहेतुत्वम् । ततश्चानैकान्तिकाभावः ॥२३२४॥

अथ मन्यसे सम्प्रत्येव मम चक्षुर्विषयमापन्नाः, पूर्वकाले तु नैवमिति तदनीं संशयो युक्तरूप आसीदिति तन्निराकरणायापि भगवानाह–

**पुव्वं पि ण संदेहो जुत्तो जं जोतिसा सपच्चक्खं ।**
**दीसंति तक्कता वि य उवघाताणुग्गहा जगतो ॥२३२५॥**

१ °मगात्र°–इति प्रतौ । २ °ते दूरं म° जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पुव्वं पि ण संदेहो जुत्तो** गाहा। पूर्वमपि तदवस्थ(स्थि)तैवासिद्धतेति प्रदर्शयति—यतः ज्योतिष्काः प्रत्यक्षं दृष्टाः दृश्य[न्]ते च। ते च [1]सन्ति, अनुग्रहोपघातकारित्वाद्राजादिवत्। तस्मात् पूर्वमप्ययुक्तः संशयः कर्तुम्, सर्वप्रत्यक्षत्वाद्देवजात्येकदेशस्येति अस्मदाद्यप्रत्यक्षत्वमपक्षधर्मः। ततश्चानैकान्तिकाभावादयुक्तः संशय इति ॥२३२५॥

अथ चैवं भवतो बुद्धिः स्यात्—नैव ते ज्योतिष्का देवाः प्रत्यक्षमुपलभ्यन्ते, किन्तु विमानान्येतानि, आलयमात्रप्रत्यक्षत्वात्, न तन्निवासिनो देवाः प्रत्यक्षा भवन्तीत्यभिप्रायः। तत इयं गाहा—

**आलयमेत्तं च मती पुरं व तव्वासिणो तध वि सिद्धा।**
**जे ते देव त्ति मता ण य णिलया णिच्चपरिसुण्णा ॥२३२६॥**

**आलयमेत्तं च मती** इत्यादि। आलयमात्रप्रत्यक्षसिद्धेरपि तन्निवासिप्रत्यक्षत्वं सिद्धमेव। तद्यथा—य एते प्रत्यक्षा आलयाः—यान्येतानि विमानानीत्यर्थः, ते कदाचित् कस्यचित् प्रत्यक्षाधिष्ठातृकाः, विद्यमानाधिष्ठातृकाः, सस्वामिका वा इत्यादयः साध्यधर्माः, आलयत्वात, पाडलिपुत्रादिपुरवत्। आलय इति सम्बन्धिशब्दत्वाद्वा, शकुन्ताद्यालयवत्। एवमालयमात्रत्वात् साकाङ्क्षायां तदालयवासिनः 'तद्वासिनः' तथापि सिद्धाः। आलयमात्रप्रतिपत्त्यैव 'ये' च ते तद्वासिनस्तदधिष्ठायिनः सामान्यमात्रसिद्धत्वात् 'ते' एव 'देवाः' इति 'मताः' अभ्युपगताः। शून्यपुरेणानैकान्तिकत्वमाशङ्कमानः स्वयमेवाचार्यो विशेषणमुपादत्तेऽर्थतः, यस्मादेवमाह—"ण च णिलया णिच्चपरिसुण्णा" नित्यशून्या न भवन्ति निलया इत्यर्थः। कदाचिद् कस्यचिद् प्रत्यक्षाधिष्ठातृका इति [वि]शेषणान्नानैकान्तिकः ॥२३२६॥

अथ सन्दिग्धासिद्धत्वं हेतोश्चोद्येत—

**को जाणति [2]वं [3]किमेतं ति [4]भोज्जं णिस्सं[१५३-द्वि]सयं विमाणाइं।**
**रतणमय-णभोगमणादिह जध विज्जाधरादीणं ॥२३२७॥**

**को जाणति[5] व** इत्यादि। अथैवं ब्रूयात्—को जानाति किमेतदिति भवेत्। आलय इति पुँल्लिङ्गे प्रक्रान्ते सन्दिग्धासिद्धचोदनाख्यापनार्थमव्यक्ते गुणसन्देहे नपुंसकलिङ्गं प्रयुज्यते। तस्मात् किमेतदित्युक्तम्। किमेते आलयाः चन्द्रसूर्यबिम्बादयः, आहोस्वित् सूर्योऽग्निमयो गोलकः, चन्द्रोऽम्बुमयः, स्वभावतः स्वच्छ इति गोलकावेतौ[6], आहो-

---

१ च सत्त्वानु°-इति प्रतौ। २ व जे। ३ य त। ४ होज्ज को हे। ५ जाणदि-इति प्रतौ। ६ गोलकश्चन्द्रो-इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्विन् मायैव। सन्दिग्धासिद्धश्च न दूषणमेव, पुनः साधनापेक्षत्वादिति साधनमभिधीयते–निःसंशयं विमानान्येतानि गोलकादिपरिकल्पितानि रत्नमयानि, [रत्नमयत्वे सति] नभोगमनात्। रत्नमयत्वे सति नभोगमनादिति वाय्वभ्रादिनाऽनैकान्तिकत्वव्यावृत्त्यर्थं सविशेषणो हेतुः। यथा प्रसिद्धविद्याधराद्याश्रयाः–विद्याधरतपःसिद्धादयः आदिग्रहणात्। यथा तेषामाश्रयाः विमानानि पुष्पकेत्रिपुरादीनि तथैतान्यपीति ॥२३२७॥

अथान्यतरासिद्धत्वमाशङ्क्येत परेण—

**होज्ज मती माएयं तथा वि तक्कारिणो सुरा जे ते ।**
**ण य मायादिविकारा पुरं व णिच्चोवलंभातो ॥२३२८॥**

**होज्ज मती माएयमि**त्यादि । नैवैते आलया इत्यसिद्धः। किं तर्हि? मायेयं मायाविदा केनापि प्रयुक्तेति। 'तथापि' अभ्युपगम्य ब्रूमः मायात्वेऽपि सिद्धेऽपि। माया सकर्तृका, भावत्वात्, दृश्यत्वात्, कुम्भवत्। ये च ते मायाकारिणः साधितास्त एव सुरा इति प्रतिपत्तव्याः। एवंविधवैक्रियकरणसामर्थ्यात् प्रसिद्धमेव तत्कारित्वमिति सामर्थ्यवादाभ्युपगमः।

अथ परमार्थचिन्तयोच्यते–नैते मायाविकारा आलयाः, सर्वेण सर्वदा सदृश्य(श)मुपलभ्यमानत्वात्–नित्योपलम्भादित्यस्यार्थः, प्रसिद्धपुरवत्। गन्धर्वनगरादिव्युदासार्थं नित्यशब्दोपादानम् ॥२३२८॥

अथ तदभ्युपगतनारकदृष्टान्ते[न] देवास्तित्वप्रतिपादनार्थमुच्यते गाथा—

**जति णारगा पवण्णा पंकिट्ठपावेफलभोगिणो तेणं ।**
**सुबहुगपुण्णफलभुजो पवज्जितव्वा सुरगणा वि ॥२३२९॥**

**जति णारगा पवण्णा** इत्यादि। यदि स्वयंकृतप्रकृष्टफलपापभोगिनः स्वयं पक्वो(क्वौ)दनवर्द्धितकभोगिपुरुषवत् नारकाः त्वया प्रतिपन्नाः। नन्वेवमनयैवोपपत्त्या तद्विपर्ययः सुबहुपुण्यफलभुजः सुरगणा अपि प्रतिपत्तव्याः, स्वकृतकर्मफलभोगित्वात्, नारकवत् ॥२३२९॥

एवं विद्यमानाः किमिह नागच्छन्तीत्यनागमनकारणमुच्यन्ते(ते)—

**संकंतदिव्वपेम्मा विसयपसत्ताऽसमत्तकत्तव्वा ।**
**अणधीणमणुअकज्जा णरभवमसुहं ण एन्ति सुरा ॥२३३०॥**

---

१ कतृपु–इति प्रतौ। २ °विगारा को हे। ३ °लम्भाओ हे। ४ °व्युपदा°-इति प्रतौ। ५ पगिट्ठ° को हे। पडिकिट्ठ° त। ६ °पावकफ° को। ७ जदि–इति प्रतौ। ८ कारिकाः–इति प्रतौ। ९ °व्वपिम्मा हे। १० °पसत्थाऽ° त। ११ °सुभं ण हे को।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**संकंतदिव्वपेम्मा** इत्यादि। इह नागच्छन्ति सुरगणाः, संक्रान्तदिव्यप्रेमत्वात्, विषयप्रसक्तत्वात्, प्रकृष्टरूपगुणा(ण)विज्ञानस्त्रीप्रसक्तविशिष्टदेशान्तरगतमनुष्यवत्। असमाप्तकर्त्तव्यत्वात्, बहुकर्त्तव्यताप्रसाधनप्रयुक्तविनीतपुरुषवत्। अनधीनमनुजकार्यत्वान्नारकवत्। अभ्युपगता मोक्षस्य सिद्धवत्। द्वीपान्तरस्थतिर्यगादिवत्। मनुजैः कार्यं मनुजकार्यं अनधीनं मनुजकार्यं येषां ते अनधीनमनुजकार्या इति समानाधिकरणपदो बहुव्रीहिः—मनुजानधीनकार्यत्वादित्यर्थः। एवमशुभत्वान्नरभवस्य, तद्गन्धाऽसहिष्णुतया 'सुरा' सुरगणा नागच्छन्ति, कडेवरमिव हंसाः ॥२२३०॥

अथ कादाचित्काऽऽगमनकारणनिरूपणाय गाथा—

**णवरि जिणजम्म-दिक्खा-केवल-णेव्वाणमहणियोगेणं।**
**भत्तीय सोम्म! संसयवोच्छेतत्थं व एज्ज ण्हुं ॥२२३१॥**

'**णवरि जिण**० इत्यादि। नवरमिति निपातसंघातो रूढिशब्दः सम्भावनायामर्थे। बहून्यनागमनकारणानि, नवरं सम्भाव्येताऽऽगमनं भगवदर्हद्भक्त्या सुरेन्द्राणां तदनुवृत्त्यधीनतया जिनानां जन्ममहनियोगेन लोकस्थित्यनुभावप्रवर्तितेन। तथा जिनानामेव दीक्षामहनियोगेन। एवं केवलमह-निर्वाणमहनियोगेनेति। जिनशब्दो महशब्दश्च प्रत्येकं सम्बन्धनीयाः(यः)। सौम्येत्यामन्त्रणं मौर्यपुत्रस्य। मतिश्रुतावधिज्ञानत्रयसम्बन्धिनां तेषु जीवादिपदार्थविचारेषु ज्ञानावरणोदय-दर्शनमोहनीयोदयवशात् संशय उत्पन्ने संशयव्यवच्छेदार्थं वा केवलमनःपर्यायावधिप्रकृष्टातिशयश्रुतज्ञानसम्पन्नानगारसमीपमागच्छेयुरिति आशंसायां सम्भावनायां लिङ् ॥२२३१॥

अथवा कश्चित् पुरुषविशेषं तिर्यञ्चं नारकं वा प्रतीत्य—

**पुव्वाणुरागतो वा समयणिबन्धा तवोगुणातो वा।**
**णरगेणपीडाणुग्गहकंदप्पादीहि वा केयि ॥२२३२॥**

**पुव्वाणुरागतो वा** इत्यादि। पूर्वस्मिन् भवे रागः प्रीतिः पूर्वानुरागः, तस्माद्वा कारणात् पूर्वानुरागवशतः। 'समयः' संकेतः, तेन निबन्धनं निबन्धः व्यवस्था समयनिबन्ध उच्यते। सोऽपि पूर्वभव एवेति पूर्वशब्दोऽनुकृष्यते। पूर्वसमयनिबन्धनात् कारणात्। तपसो गुणः प्रभावः तपःप्रभावाद्वा समाकृष्टा आगच्छेयुः। पीडा

१ मा ग° इति प्रतौ। २ तिर्युगा इति प्रतौ। ३ °ल-निव्वा° को हे। ४ भत्तीएं को, भत्तीए हे। ५ °यविच्छे° को हे त। ६ °त्थं च एजण्हु त। ७ एज्जण्हा को, एज्जहण्हा हे। ८ णवर जिणस्स इति प्रतौ। ९ °बद्धा जे। १० °रगुण° त। ११ °प्पाईहिं को हे। १२ केई को।

चानुग्रहश्च कन्दर्पश्चेति द्वन्द्वः—नरगणानां पीडानुग्रहकन्दर्पाः। आदिग्रहणात् कौतुकलौल्यादीनि। तेभ्यो वा कारणेभ्यः केचिदागच्छेयुरिति सम्बन्धनीयम् ॥२३३२॥

अथ देवास्तित्वानुमानप्रतिपादनोपपत्तिसमूहप्रदर्शनाय गाथायुगलम्—

**जातिस्सरकधणातो कासइ पच्चक्खदरिसणातो य।**
**विज्जामंतोवायणसिद्धीतो गहविकारातो ॥२३३३॥**
**उक्किकट्ठपुण्णसंचयफलभावातोभिधाणसिद्धीतो।**
**[१६४-प्र०]सव्वागमसिद्धीतो य संति देव त्ति सद्धेयं ॥२३३४॥**

**जातिस्सरकधणातो** इत्यादि। **उक्किकट्ठपुण्णसंचय०** इत्यादि। सन्ति देवा इति श्रद्धेयमेतद्वाक्यमिति अन्तदीपकं प्रतिज्ञावचनम्, जातिस्मरकथनादयोऽर्थ(त्र) हेतवः। क्रमेण यथायोगं अत्र प्रतिज्ञा-हेतू विरचय्य दृष्टान्ता अनूह्य प्रयोगा वक्तव्याः। अत उच्यते—सन्ति देवा इति श्रद्धेयमेतत्, जातिस्मरादिप्रत्ययितपुरुषकथितत्वात्, नानादेशविचारिप्रत्ययितदृष्टकथितालक्षितमत्स्यमनुजनगरदेवदेवकुलादिसद्भाववाक्यवत्। तथा कस्यचित्तपःप्रभावादिमतः प्रत्यक्षेण दृष्टत्वात् सिद्धादेशफलवत्। तथा विद्यामन्त्रोपयाचनसिद्धेः फलेनानुमितत्वात्, राजादिप्रसादीकृतफलदर्शनानुमितराजादिसम्भववत्। तथा ग्रहविकारादिति प्रयोगः—अस्त्ययं ग्रहाधिष्ठितपुरुषः तज्जीवव्यतिरिक्तादृश्याधिष्ठातृकः, पुरुषाऽसम्भाव्यक्रियाविकारित्वात्, यन्त्रव्यतिरिक्ततत्क्रियाकारिपुरुषवत्।

द्वितीयगाथायाः प्रयोगवाक्यम्—दानदमदयादिक्रियासंचितोत्कृष्टपुण्यसञ्चयफलं विशिष्टमाहात्म्यभोक्तृकं, फलत्वात् राज्यादिफलवत्। विशिष्टमाहात्म्याश्च भोक्तारः पुण्यसञ्चयफलस्य सन्ति देवा इति प्रमाणफलम्। तथा देवा इत्यभिधानसिद्धेरनुमानमनन्तरगाथायां व्यक्तीकरिष्यते। ततश्च न सन्ति देवा इत्यनुमानविरोधः। सर्वागमसिद्धितश्च देवसद्भावात् न सन्ति देवा इत्यागमविरोधः। ते चागमा वेदवादिनः श्रुतिस्मृतिसंवादिनः सांख्यवैशेषिकादयः प्रमाणम् ॥२३३३-३४॥

तथाभिधानसिद्धेरित्यस्य गाथावयवस्य प्रसङ्गः—

**देव त्ति सत्थयमिणं सुद्धत्तणतो घडाभिधाणं व।**
**अधव मती मणुओ च्चिय देवो गुणरिद्धिसंपण्णो ॥२३३५॥**

१ °तोपाय° त। २ विगार° को हे। ३ °सिद्धीउ हे। ४ संति को हे। ५ करणा इति प्रतौ। ६ प्रयोगहे-°इति प्रतौ। ७ प्रयोगोस्त्यायं-इति प्रतौ। ८ मिदं को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**देव त्ति सत्थयमितं** इत्यादि । देवा इतीदं पदं धर्मि । सार्थकमिति साध्यधर्मः । शुद्धत्वादिति हेतुः । समासतद्धितवृत्तिविरहाच्छुद्धपदत्वं हेतुः पक्षधर्मः । घटाभिधानवदिति साधर्म्यदृष्टान्तः । ततश्च देवशब्दः स्वर्गनिवासिविशिष्टपुण्यफलभोजिजीवार्थेन सार्थक इति । एतावता न सिध्यतीत्याशङ्कां परकीयामुत्प्रेक्ष्याचार्य एवाभीष्टार्थसिद्धसाधनाभिप्रायेण परवचनमुपन्यस्यति—अथवा भवतो बुद्धिः—दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिगतिषु, दीव्यतीति देवः प्रतिविशिष्टैश्वर्यक्रीडादिगुणर्द्धिसम्पन्नः कश्चिन् मनुज एव राजादिर्देवशब्दाभिधेयोऽस्तीति तेन सार्थकत्वात् देवशब्दस्य सिद्धसाधनमिति प्रमाणफलाभावात् असाधनमिदमिति ॥२३३५॥

तत्प्रतिविधानाय सविशेषणसाध्यधर्मोपन्याससूचनी गाथा—

**तं ण यतो तच्चत्थे सिद्धे उवयारतो मता सिद्धी ।**
**तच्चत्थसिंहसिद्धे माणवे सिंघोवयारो व्व ॥२३३६॥**

**तं ण यतो तच्चत्थे** इत्यादि । सत्यम्, राजादयः क्रीडादिगुणदर्शनाद्देवा उच्यन्ते । अन्यांस्तथ्यार्थपरमार्थैश्वर्यद्युतिक्रीडागुणातिशययुक्ताम(न)भिसमीक्ष्य किञ्चित् साधर्म्या[त्] देवा इव राजादय उपचारात् । यथा परमार्थसिंहे सिद्धे शौर्यक्रौर्यगुणमभिसमीक्ष्य तत्साधर्म्यात् मनुजेऽपि कस्मिंश्चित् सिंहशब्दो लोकेन प्रयुज्यते, तथेहापि तथ्यार्थे सिद्धे परमार्थदेवे औपचारिकं राजादिषु देवत्वमिति । अनुपचरितविज्ञानमात्रं व्यतिरिच्य बाह्यार्थेनाऽर्थवान् देवशब्द इति सविशेषणसाध्यधर्मत्वान्न सिद्धसाधनम् । अथवाऽन्यदेव प्रमाणं—मुख्येनार्थेनार्थवान् देवशब्दः, न तुल्ये कचित्, उपचर्यमाणत्वात् शौर्यादिगुणयोगात् माणवके सिंहशब्दवत् ॥२३३६॥

न सन्ति देवा इति प्रतिज्ञायाः परस्याभ्युपगमविरोधं दर्शयन्नाह—

**देवाभावे वं फलं जमग्गिहोत्तादियाण किरियाण ।**
**सग्गीयं जण्णाण य दाणातिफलं च तदयुत्तं ॥२३३७॥**
**जम-सोम-सूर-सुरगुरुसारज्जादीणि जयति जण्णेहिं ।**
**मंतावाहणमेव य इन्देदीणं विधा सव्वं ॥२३३८॥**

**देवाभावे वं फलमित्यादि । जम-सोम** इत्यादि च गाथायुगलं देवाभावे वा देवनास्तित्वप्रतिज्ञायाम् । वाशब्दः पूर्वविकल्पान्तरप्रदर्शनार्थः । "अग्निहोत्रं जुहुयात्

१ मिदं-इति प्रतौ । २ न जओ त° को । न जउ त° हे । ३ °सीह को हे त । ४ °वसीहोव° को हे त । ५ विफल हे त । वि फल को । ६ °याणं हे को । ७ °ग्गीयज° को । ८ °दजुत्त को हे । ९ जण्णेहिं को हे । १० इंदा° को हे । ११ चाफ° इति प्रतौ ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वर्गकामः" इत्येतच्छ्रुतिवाक्यं देवास्तित्वे सफलं भवति । न च वेदवादिनः श्रुतिरप्रमाणम्, स्वर्गीयफलानामग्निहोत्रादिक्रियाणां नियमेनानुष्ठीयमानत्वात् । तत्फलं देवास्तित्वं सूचयति । तथा यज्ञानां च दानादिफलं देवाभावप्रतिज्ञायामयुक्तम् । परस्य वेदवादिनः यत्तदिदं वाक्यं श्रूयते "स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गलोकं गच्छति" इति, तथा "काश्यैश्च क्रतुभिः यमराज्यमग्निष्टोमेन यजति", तथा "उक्थं षोडशप्रभृतिक्रतुभिर्यथाश्रुतिसोमसूर्यसुरगुरुस्वाराज्यानि जयति" । "सयूपो यज्ञः क्रतुः, विना यूपेन दानादिक्रियाभिर्यज्ञ एव" । एवमादीनि श्रुतिवाक्यानि देवास्तित्वसूचकानि । तथा मन्त्रैराह्वानमिन्द्रादीनां देवास्तित्वे भवति—"इन्द्र आगच्छ नखि आगच्छ मेधातिथे मेषवृषण"इत्यादि । अन्यथा देवनास्तित्वाभ्युपगमे वृथा—अकृतार्थं सर्ववेदवाक्यं भवतीत्यभ्युपगमविरोधः । तस्मात् सन्ति देवा इत्येतदभ्युपगम एव श्रेयान् ॥२३३७-३८॥

एवं चोपपत्तिभिरागमेन च—

**छिण्णम्मि संसयम्मि जिणेण जरमरणविप्पमुक्केणं ।**
**सो समणो पव्वइतो अद्धुट्ठेहिं सह खंडियसएहिं ॥४६८॥२३३९॥**

एवं सप्तमस्य गणधरस्य मौर्यपुत्रस्य वक्तव्यता निर्णीता ॥२३३९॥

अथाष्टमगणधरवक्तव्यतानिर्णयार्थं सम्बन्धकथनगाथा—

**ते पव्वइते सोतुं अकंपिओ आगच्छती जिणसगासं ।**
**वच्चामि णं वन्दामि वन्दित्ता पज्जुवासामि[13] ॥४६९॥२३४०॥**

**आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं ।**
**णामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४७०॥२३४१॥**

**किं मण्णे णेरइया अत्थि [व] णत्थि त्ति संसयो तुज्झं ।**
**वेतपताण य अत्थं ण याणसी तेसिमो[१५४–द्वि०]अत्थो ॥४७१॥२३४२॥**

**तं मण्णसि पच्चक्खा देवा चन्दातयो तधण्णे वि ।**
**विज्जामंतोवायणफलाइं सिद्धीएँ गम्मंति ॥२३४३॥**

१ सूत्रनानि–इति प्रतौ । २ रेवीतपो–इति प्रतौ । ३ °न्नंमि हा म दी । ४ °यम्मी को दी हे त । °यंमी हा म ५ जाइजरामरण° म । ६ अद्धट्ठहि को । °द्धुट्ठहिं हा म । °ध्धुट्ठहि दी । ७ °ट्ठेहि ख° म । ८ पवइए को । ९ °च्छइ को म । १० वचामि को । ११ वंदामी को हे त हा म दी । १२ वंदि° को हे हा म दी । १३ °सामि को हे त हा म दी । १४ आभट्ठो य जिणेणं–इत्येवांशो जेप्रतौ । १५ अत्थी म । १६ न अत्थि हा दी । १७ °फलायं जे । १८ °द्धीएँ को । °द्धीइ त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ते पव्वइते** गाहा । **आभट्ठो य०** । **किं मण्णे णेरइया** । **तं मण्णसि पच्चक्खा** । हे अकंपित आयुष्मन् गौतम ! त्वं मन्यसे प्रत्यक्षप्रमाणसिद्धाश्चन्द्राद-योऽन्ये वाऽदृष्टा अपि विद्यामन्त्रोपयाचनफलदर्शनानुमानसिद्धा देवाः सन्तीति गम्यते ॥२३४०–४३॥

**जे पुण सुतिमेत्तफला णेरइय त्ति किध ते गहेतव्वा ।**
**सक्खमणुमाणतो वाऽणुवलंभा भिण्णजातीया ॥२३४४॥**

**जे पुण सुतिमेत्तफला** गाहा । ये पुनर्नारका इत्यभिधानमात्रश्रुतिरेव फलं येषां न शब्दव्यतिरिक्तार्थस्ते कथं सन्तीति ग्राह्याः ? अतस्तदभावप्रतिपादनाय प्रमा-णम्–न सन्ति नारकाः, साक्षादनुमानतो वाऽनुपलभ्यमानहेतुत्वादित्यर्थः । सामा-न्यपुरुपेन्द्रियकप्रत्यक्षानुपलभ्यमानत्वादित्यभिप्रायः ॥२३४४॥

अथैतद्दूषणं विरुद्धाव्यभिचार्यनैकान्तिकत्वेनासिद्धत्वोद्भावनेन चेति गाहा—

**मह पच्चक्खत्तणतो जीवादीऍ य णारए गेण्ह ।**
**किं जं सप्पच्चक्खं तं पच्चक्खं णवरि एक्कं ॥२३४५॥**

**मह** गाहा । भगवानाह–विद्यमानानुपचरितबाह्यार्थो नारकशब्दः, मया प्रत्यक्षदृष्टत्वात् जीवाजीवादिशब्दवत् । एवं नारकास्तित्वसाधनं प्रति प्रमाणेनानेन विरुद्धाव्यभिचारिता । पूर्वप्रमाणस्यासिद्धादिदोषदुष्टवादसाध्यसाधनत्वादनेनैवानुमान-विरोधः । अथवा साक्षादनुपलभ्यमानत्वात् खपुष्पवत् भिन्नजातीया देवेभ्य इति । देवेति [वै]धर्म(र्म्य)दृष्टान्तः । साक्षादनुपलभ्यमानत्वादित्यन्यतरासिद्धहेतुता ममैते केव-लज्ञानप्रत्यक्षत्वान्नारकाः प्रत्यक्षाः, भवतस्त्वप्रत्यक्षाः नारकाः । अयं च ते दुरभिप्रायोऽ-कंपित ! सौम्येति काका प्रश्नेनैव परपक्षनिराकरणम् । किं यत् स्वप्रत्यक्षं तदेव नवरमेकं प्रत्यक्षम्, अन्यस्य प्रत्यक्षं न भवतीति दुष्टमुच्यते ॥२३४५॥ यतः—

**जं कासइ पच्चक्खं पच्चक्खं तं पि घेप्पते लोए ।**
**जध सीहातिदरिसणं सिद्धं ण य सव्वपच्चक्खं ॥२३४६॥**

**जं कास०** गाहा । यत् कस्यचित् प्रत्यक्षं तदपि लोके प्रत्यक्षमेव, केनचिद् दृष्टत्वात्, दूरदेशवर्तिसिंहादिवत् । तस्माद् भवदादीनामप्रत्यक्षा अपि नारकाः मम प्रत्यक्षा इति सिंहादिनिदर्शनेन भवतामपि प्रत्यक्षा इत्युभयाऽसिद्धः प्रत्यक्षतोऽनुपल-भ्यमानत्वहेतुः ॥२३४६॥

१ वाइय व्व णा° को हे त । २ गिण्ह हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथवा इन्द्रियातीतकेवलप्रत्यक्षस्यासिद्धत्वोद्भावनदुरभिप्रायज्ञापनाय काक्वा प्रश्नगाहा—

**अधवा जमिंन्दियाणं पच्चक्खं किं तदेव पच्चक्खं ।**
**उवयारमेत्ततो तं पच्चक्खमणिंन्दियं तच्चं[3] ॥२३४७॥**

अथ [4]यदिन्द्रियाणां प्रत्यक्षं किं तदेवैकं प्रत्यक्षम्, अन्यदतीन्द्रियं प्रत्यक्षमेव न भवतीति दुरभिप्रायोऽयम् । नानेनासिद्धतोद्भावयितुं शक्या । उपचारप्रत्यक्षं हीन्द्रियप्रत्यक्षमित्यस्यार्थस्य साधयिष्यमाणत्वात् । परमार्थप्रत्यक्षं त्वनिन्द्रियं तत्त्वं केवलज्ञानमेव, यत इन्द्रियाण्यनुपलम्भकानि मूर्त्तादित्वात्, आदिग्रहणादचेतनत्वात्, कुम्भवत् । उपलम्भद्वाराणि तु जीवस्योपलब्धुर्गवाक्षवत्, गेहस्थपुरुषस्येति ॥२३४७॥

तत्प्रतिपादिनी गाथा—

**मुत्तातिभावतो णोवलद्धिमंन्तिन्दियाइ कुंभो व्व ।**
**उवलंभदाराणि तु ताइं जीवो तदुवलद्धा ॥२३४८॥**

**मुत्ताति** गाथा गतार्था ॥२३४८॥

अथवा अन्यत्प्रमाणम्—इन्द्रियेभ्यो भिन्नो ज्ञाता जीवः, तदुपरमेऽपि तद्द्वारोपलब्धार्थस्मर्तृत्वात्, तद्व्यापारेऽपि चान्यमनस्कस्यानुपलम्भात् पञ्चगवाक्षद्वारोपलब्धि(ब्धा) पुरुष इव गवाक्षेभ्यः । एतत्प्रतिपादनीयं गाथा—

**तदुवरमे वि सरणतो तव्वावारे विणोवलंभातो ।**
**इंन्दियभिण्णो णाता पंचगवक्खोवलद्धा वा ॥२३४९॥**

**तदुवरमे** गाथा भावितार्था ॥२३४९॥

अथानिन्द्रियज्ञानप्रकाशनाय गाथा—

**जो पुण [11]अणिन्दियो च्चिय जीवो सव्वोंपिधाणविगमातो ।**
**सो सुबहुअं विजाणति अवणीतघरो जधा दट्टा ॥२३५०॥**

**जो पुण** गाहा । यः [13]पुनरनिन्द्रिय एव क्षायोपशमिकभावेन्द्रियापगमात् क्षायिकभाववर्त्ती जीवः शुद्धः सर्वावरणप्रक्षयात् स सेन्द्रियजीवात् सुबहु विजानाति यावत् ज्ञेयमित्यर्थः, विगतसर्वापिधानत्वात् । अपिधानमावरणमित्यर्थः । पञ्चगवाक्षगृहस्थ-

१ °मिंदि° को हे। २ °णिंदि° को हे । ३ तत्थं हे । ४ याजमि°-इति प्रतौ । ५ °मंतिदियाइं को हे । ६ कुम्भो को । ७ उ को । नोपलम्यन्ते हेप्रतौ । ८ अथ वाह्यत्प्र° इति प्रतौ । ९ लब्धत्वात्-इति प्रतौ । १० इंदि° को हे । ११ °अणिंदि° को । °अणिंदिउ हे । १२ सव्वपि° को हे । सव्वप्पिं°त । १३ पुनरिन्द्र° इति प्रतौ । १४ गमा च इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुरुषादपनीतगृहाकाशस्थद्रष्टृपुरुषवत् । निरावरणत्वादसौ सर्वदिग्विदिक्संस्थितार्थान् सुखेनैव पश्यति, सुबहूंश्च पूर्वस्मात् सावरणात् पुरुषादिति । इन्द्रियाण्यन्तरेणापि ज्ञान-सम्भव इति लोकेऽपि दृष्टम्, स्वप्ने निरुद्धाक्षमनःक्रियाणां ज्ञानं स्फुटं स्वानुभवेन सिद्धम् ॥२३५०॥

आत्मा न चेत्तत्परिणामहेतुः स्वांन्नेन्द्रियार्थे न च तत्कुतोऽस्तु (?) । अथवा न प्रत्यक्षमिन्द्रियजं ज्ञानं धर्मान्तरेणानेकरूपज्ञेयस्य विशिष्टमात्रग्राहित्वात् कृत-कत्वसामान्यधर्मानुमितकुम्भानित्यत्वमात्रसामान्यधर्मज्ञानवत् । एतदर्थमियं गाथा—

**[१५५-प्र०]ण हि पच्चक्खं धम्मंतरेण तद्धम्ममेत्तगहणातो ।**
**कतकैत्ततो वँ सिद्धी कुम्भाणिच्चत्तमेत्तस्स ॥२३५१॥**

**ण हि पच्चक्खं** । इन्द्रियाणि हि परप्रवादिनां केषाञ्चित् प्रकृतिविकारा-हंकारनिष्पन्नानि, केषाञ्चिद्रूपस्कन्धस्य कश्चित् प्रतिविशिष्टः प्रसादः, सर्वेषां मूर्त्तानि, आत्मनः पृथग्भूतानि, अचेतनानि । तानि च करणानि स्वविषयपरिच्छेदात्मकानि । विषयाश्चक्षुरादीनां रूपादयः । तज्जं च प्रत्यक्षलक्षणमनेकधा—"इन्द्रियार्थसन्निकर्षो-त्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" [न्या० १. १. ४] । तथा "श्रोत्रादिवृत्तिः प्रत्यक्षम्" [वार्षगण्यः] । "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्" [मी० १. १. ४] । तथा "यद् ज्ञानमर्थे रूपादौ विशेषेणाभिधायकाभेदोपचारद्वारेणाविकल्पकं तदसाधारणकारणत्वादक्षमक्षं प्रति वर्त्तत इति प्रत्यक्षम्" । अक्षाणि चेन्द्रियाणि केनचिदंशेन शक्तिरूपेण धर्मेण स्वविषयं परिच्छिन्दन्ति, न सर्वधर्मैः सत्त्वद्रव्यत्वभौतिकत्वादिभिर्विद्यमानैरपि । रूपादेरनेकधर्मणः किञ्चिदेकं धर्ममव्यपदेश्यमसाधारणं केषाञ्चित् कल्पनापोढत्वादविकल्पकम्, स्वरूप-विकल्पेन स्वसंवेद्येन विकल्पकम्, परिच्छिन्दन्ति, न सर्वैर्धर्मैः सर्वद्रव्यत्वादिभिर्यत उक्तं—

"अनेकधर्मणोऽर्थस्य नेन्द्रियात् सर्वथा मतिः ।
स्वसंवेद्य[म]निर्देश्यं रूपमिन्द्रियगोचरः ॥१॥" [प्रमाणसमुच्चय—१. ५]

तस्माद्धर्मान्तरेण शक्त्या(शौक्ल्या)दिना रूपादेरसाधारणधर्ममात्रस्य ग्राहीणी-न्द्रियाणि तज्ज्ञानं चेति पक्षधर्मः, धर्मान्तरेण **तद्धम्ममेत्तगहणाओ** । पश्चार्द्धेन दृष्टान्तः कृतकत्वादिवत् कुम्भानित्यत्वमात्रस्य या सिद्धिः उपलब्धिः, सा यथा न प्रत्यक्षम्, एवमिन्द्रियजज्ञानमित्युपसंहारः ॥२३५१॥ अथवा—

१ णामं-इति प्रतौ । २ अत्र 'हेतुः स्यादिन्द्रियार्थज्ञानं कुतोऽस्तु' इति वाच्यं स्यात् ३ कतगत्तं **को हे** । ४ व्व **को** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुव्वोवलद्धसंबंधसरणतो वाऽणलो व्व धूमातो ।
अधव णिमित्तंतरतो णिमित्तमक्खस्स करणाइं ॥२३५२॥

'पूर्वोपलब्ध' इत्यादि । न प्रत्यक्षमिन्द्रियजं पूर्वोपलब्धसम्बन्धस्मरणादुपजायमानत्वात्, धूमादनलज्ञानवत् अन्यनिर्दिष्टहेतुजमिति । अनुमानं द्विविधं यच्चानुमेये तदवधारणं ज्ञानं प्रत्यक्षजमानुमानिकं वा । यच्च तस्यैव साध्येनाविनाभावित्वस्मरणम् । तदेवं साक्षात् पारम्पर्येण वानुमितिकारणत्वादुभयमप्यनुमानम् । एवं च साध्यसाधनधर्मानुगमः प्रदर्शितो भवति ।

ननु धर्मिणीन्द्रियजज्ञाने पूर्वोपलब्धसम्बन्धस्मरणादुपजायमानत्वमसिद्धत्वादपक्षधर्मः । उच्यते-न, वस्तुस्वरूपानवधारणात् । यथावस्थितवस्तुस्वरूपं ह्येकान्तवादिभिर्नावगम्यते, यतश्चक्षुरादिद्वारेणापि भवति घटो नामैवंविध इति पूर्वविदितेनैव समयेन अपि च घटमध्यवस्यति । न ह्यनभिज्ञो घटमवैति । एवं रूपग्रहणेऽपि पूर्वविदितेनैव समयेन तत्सम्बन्धस्मरणोत्तरकालं रूपमिदमिति परिच्छेदः, स्वरूपकल्पनायाः अप्रतिषिद्धत्वात् । बालदारको हि जातमात्रः चक्षुःप्रणिधानेऽपि रूपमिदमिति वा न परिच्छिनत्ति, अविदितसमयत्वात्, पूर्वोपलब्धस्मरणाभावात् । अतः चक्षुरादिज्ञानेऽपि पूर्वोपलब्धस्मरणमेव कारणमिति सिद्धः पक्षधर्मः । शेषं दृष्टान्तस्वरूपं भावितमेव । अथ चान्यत् प्रमाणं गाथापश्चार्द्धेन प्रकाश्यते-न प्रत्यक्षमिन्द्रियजज्ञानं आत्मनो निमित्तान्तरादुपजायमानत्वात्, धूमान्निमित्तादग्निज्ञानवत् । आत्मनश्चाक्षशब्दवाच्यस्य निमित्तान्तरमिन्द्रियाणि करणानि । तेभ्यो ज्ञानस्योपजायमानत्वादिति पक्षधर्मः । अग्निज्ञानादपि धूमो निमित्तान्तरमेवेति साध्यसाधनानुगमनम्, एवमिन्द्रियप्रत्यक्षस्याप्रत्यक्षत्वात् ॥२३५२॥

केवलमणोधिरहितस्स सव्वमणुमाणमेत्तयं जम्हा ।
णारगसब्भावम्मि य तदत्थि जं तेण ते संति ॥२३५३॥

केवलमणोधिरहितस्सेत्यादि । केवलमिति सर्वप्रकारं निरावरणज्ञानम् । मनोग्रहणेन मनःपर्यायज्ञानम् । अवधिग्रहणेनावधिज्ञानम् । एतत्त्रितयविरहितस्याभिनिबोधिकश्रुतज्ञानिनः परोक्षज्ञानस्य सर्वज्ञानमनुमानमात्रकमेव यस्मात्, तस्मादनुमानेनैव प्रायो लोकव्यवहार इति । नारकसद्भावे च तदस्त्यनुमानम्, तस्मादनुमानपरिच्छेद्यत्वात् प्राक्प्रतिज्ञायामनुमानानुपलभ्यमानत्वमसिद्धो हेतुः, अनुमानसद्भावाच्चानुमानविरोधिनी प्रतिज्ञा, नास्तित्वप्रतिज्ञालोपाच्च ते सन्ति नारकाः ॥२३५३॥ तच्चेदमनुमानम्-

१ °संवद्धमर° जे । २ पूर्वविदितितेन स°-इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पावफलस्स पेकिट्ठस्स भोइणो कम्मतोऽवसेस व्व।**
**संति धुवं तेऽभिमता णेरइया अध मती होज्जं ॥२३५४॥**
**अच्चत्थदुक्खिता जे तिरियणरा णारगं त्ति तेऽभिमंता।**
**तं ण जतो सुरसोक्खप्पगरिससरिसं ण तं दुक्खं ॥२३५५॥**

**पावफलस्स** गाहा। अत्यन्तप्रकृष्टपापफलं विद्यमानभोक्तृकम्, कर्मतः—कर्मफलत्वादित्यर्थः, अवशेषवदिति दृष्टान्तः। नारकेभ्योऽन्ये स्वकर्मफलभोगिनः सन्ति तद्वन्नारका इत्यर्थप्रदर्शना दृष्टान्तफलम्। प्रयोगदृष्टान्तस्तु साध्यसाधनानुगतः प्रकृष्टपुण्यफलवत्। विद्यमानभोक्तृकं प्रकृष्टपुण्यफलमिति दृष्टान्तसिद्ध्या प्रकृष्टपापफलं विद्यमानभोक्तृकं चैतत्। ततोऽस्मात् सामान्यतोदृष्टादनुमानान्नारकसिद्धिरिति।

एतद्विघातयन् कश्चिदाशङ्केत—एवमपि न नारकसिद्धिः, साक्षान्नारकास्तित्वधर्मानन्वयात्, केचित् प्रकृष्टपापफलभुज इति सामान्यसिद्धेः सिद्धसाधनमिदम्। प्रकृष्टपापस्य फलभुजस्तिर्यञ्चो मनुष्याश्च सन्तीति सिद्धं प्रसाध्यते। ततः साधनवैफल्यादननुमानमिति एवं परमतमाशङ्क्याचार्य आह—**अधव मती होज्ज—अच्चत्थदुक्खिता जे तिरियणरा णारग त्ति तेऽभिमता।** अत्यर्थदुःखिता प्रकृष्टपापफलभुजः तिर्यङ्मनुष्याः एव यदि नारका अभिमता मनुजसंज्ञामात्रे विप्रतिपत्तिः। तेषामेव नारकसंज्ञायां सिद्धसाधनमित्युच्यते। गाथापश्चार्द्धम्— **तं ण जतो सुरसोक्खपगरिससरिसं ण तं दुक्खं।** ग(न) ते तत्सिद्धसाधनम्, यस्मात्तिर्यङ्मनुष्याणां प्रकृष्टपापाभावः, यस्मादुक्तम्—

"जं अतिदुक्खं लोए जं च सुहं उत्तमं तिभुवणम्मि।
तं जाण कसायाणं वुड्ढिक्खयहेतुयं सव्वं ॥"

तच्चातिदुःखं नारकेष्वेव अतिसौख्यं चानुत्तरविमानवासिदेवेषु। यत एवमागमः—

"सततानुबन्धयुक्तं दुःखं नरकेषु तीव्रपरिणामम्।
तिर्यक्षु भयक्षुत्तृडादिदुःखं सुखं चाल्पम्॥
सुखदुःखे मनुजानां मनःशरीराश्र(श्र)ये बहुविकल्पे।
सुखमेव तु देवानां दुःखं स्वल्पं तु मनसि भवं॥"

तस्मादेवं सुरसौख्यप्रकर्षात्, दृष्टान्तसाधर्म्यान्नारकदुःखप्रकर्षाधिगतिरिवशब्दादेव भवति। यत एवमुच्यते।

१ °पगिट्ठ° को हे। °ट्ठस्सा त। २ होज्जा को हे। ३ °रगु त्ति त। ४ °मतं त। ५ इत्यर्थः—इति प्रतौ। ६ °पकरि°—इति प्रतौ। ७ वुद्धि°—इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

"नञ्युक्तमिवयुक्तं वा यद्धि कार्यं विधीयते ।
तुल्याधिकरणेऽन्यस्मिँल्लोकेऽप्यर्थगतिस्तथा ॥१॥"

एवं शब्दार्थानुगमात् दृष्टान्तसाधर्म्याच्च तिर्यङ्मनुष्याणां साधारणसुखदुःखानुभावित्वात् प्रकर्षाऽभाव एवेति । तस्मात् प्रकृष्टपापफलभुजस्तिर्यङ्मनुष्या न भवन्ति । अनुमानाच्च प्रकृष्टपापफलभोगिन आपद्यन्ते । तत एव सुरनरतिर्यगतिरिक्ताः नारकाः भविष्यन्तीति न सिद्धसाधनं किन्तु स्फुटमेवानुमानमिति ॥२३५४–५५॥

अथवान्यथानुमानप्रदर्शनी गाथा—

**सच्चं चेतमकंपिय ! मह वयणातोऽवसेसवयणं व ।**
**सव्वण्णुत्तणतो वा अणुमतसव्वण्णुवयणं व ॥२३५६॥**

**सच्चं चेतमकंपिय मह वयणातो** इत्यादि । हे अकम्पित ! नारकाः सन्तीत्येतद्वचनं सत्यम्, मद्वचनत्वात् अहिंसालक्षणधर्मवचनवत् । अथवा नारकाः सन्तीत्येतद्वचनं सत्यम्, सर्वज्ञवचनत्वात्, उभयानुमतसर्वज्ञवचनवत् ॥२३५६॥ अथवा—

**भयरागदोसमोहाभावातो सच्चमणतिवातं च ।**
**सव्वं चिय मे वयणं जाणयमज्झत्थ[१५५-द्वि०]वयणं व ॥२३५७॥**

भयरागद्वेषमोहाभावादित्यादि । अनन्तरगाथायां मद्वचनत्वादिति हेतुरुपात्तः । अहिंसालक्षणधर्मवचनं सत्यत्वे साध्ये दृष्टान्तः साध्यविकल इत्याशङ्किते दृष्टान्तप्रसाधनप्रमाणमिदम्–सर्वमेव मद्वचनं सत्यं, भयरागद्वेषमोहासम्बन्ध(द्ध)त्वात्, उभयसिद्धज्ञमध्यस्थवचनवत् । द्वितीयप्रमाणे सर्वज्ञवचनत्वादित्युपन्यस्तो हेतुः ॥२३५७॥

तस्याऽसिद्धत्वाकाङ्क्षायां सर्वज्ञसाधनप्रमाणमिदं तस्मिन्नेव काले—

**किध सव्वण्णु त्ति मती पच्चक्खं सव्वसंसयच्छेत्ता ।**
**भयरागदोसरहितो तल्लिंगाभावतो सोम्म ! ॥२३५८॥**

**किध सव्वण्णु त्ति मती** इत्यादि । सर्वज्ञोऽहं प्रत्यक्षं भवतः सर्वसंशयोच्छेदात् । तथा भयरागद्वेषमोहविरहितश्चायं(हं) तल्लिङ्गाभावादित्यर्थः(र्थ)प्रदर्शनमात्रमेतत् । प्रयोगावेवम्–सर्वज्ञोऽहम्, अशेषज्ञेयस्य मदीयज्ञानविषयत्वात् । भयरागद्वेषमोहरहितोऽहं अभूततल्लिङ्गत्वात्, उभयसिद्धमध्यस्थपुरुषवत् । तेषां भयरागादीनां लिङ्गं आकुलत्ववेपथुस्मितप्रहर्षाक्षिभ्रूविकारवैमुख्याऽकार्यकरणादिकं तल्लिङ्ग[म्] । अभूतं तल्लिङ्गं यस्य

---

१ °वाइं को हे । २ सिद्धत्वासाकां–इति प्रतौ । ३ °च्छेया त । ४ °रोग° हे । ४ प्रयोगवाभ्यन्तु अशेषज्ञेयं–इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सोऽहमभूतलिङ्गः तद्भावस्तस्मादभूतलिङ्गत्वात् भयरागादिरहितोऽहमिति [प्रति]-पद्यस्व सौम्येत्यामन्त्रणमकम्पितस्य ॥२३५८॥ एवं च—

छिण्णम्मि[1] संसयम्मि[2] जिणेण [3]जरमरणविप्पमुक्केणं ।
सो समणो पव्वइतो तीहिं[4] समं खण्डियसतेहिं ॥४७२॥२३५९॥[5]

एवमष्टमगणधरवक्तव्यताऽभिहिता ॥२३५९॥

नवमगणधरवक्तव्यतासम्बन्धार्थं गाथासमूहः—

ते पव्वइते सोतुं अयलो[6] आगच्छती[7] जिणसगासं ।
वच्चामि णं वन्दामि[8] वन्दित्ता पज्जुवासामि[9] ॥४७३॥२३६०॥

आभद्दो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४७४॥२३६१॥

किं मण्णे[10] पुण्णपावं अत्थि[11] वे णत्थि[12] त्ति संसयो तुज्झं[13] ।
वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४७५॥२३६२॥

मण्णसि पुण्णं पावं साधारणमधव दो वि भिण्णाइं ।
होज्ज ण वा कम्मं चिय सभावतो भवपवंचोऽयं ॥२३६३॥

ते पव्वइते। आभद्दो । किं मण्णे पुण्णपावं । मण्णसि [15]पुण्णमित्यादि । हे अचलभ्रातः ! हारीतसगोत्र ! किं मन्यसे पुण्यं पापं वा यद्वोभयमस्ति नास्त्ययं सन्देहः । बीजमपि—वेदवाक्यानामन्योन्यविरुद्धानामाम्नायात्, वेदवाक्यानुसारिणां च प्रवादिनां मतभेदात्, कालनियतिस्वभावप्रधानपुरुषेश्वरयदृच्छादिकारणैकत्वश्रुतेः सन्देहः ।

ततः केषाञ्चिद्दर्शनेन मन्यसे पुण्यमेव केवलं पदार्थः, न पापपदार्थोऽस्ति, यस्मात् पराभिमतपापफलं पुण्यापकर्षमात्रं तदेवाशुभफलमुच्यते । परमपुण्यप्रकर्षापन्नशुभफलः स्वर्गसुखाद्यनुभवः । ततः किञ्चिदपकर्षात् मनुष्यतिर्यङ्नारकादिभेदाख्याः । सर्वथैव पुण्याभावा(वे) मोक्षः । अतः पुण्यमेवेदं विभागशोऽवस्थितमिति, न पापं नाम ।

१ °ण्णंमि **दी हा** । °न्नंमि **म** । २ °यम्मी **को हे त** । °यंमी **दी हा म** । ३ जाइ-जरामर° **म** । ४ तिहिं च सह खंडि° **को** । तिहि ओ सह खंडि° **हे** । तिहि उ सह ख° **त** । तिहि उ सह खंडि° **दी हा** । तिहिं तु सह खंडि° **म** । ५ **इति अष्टमो गणधरवादः समाप्तः–त** । ६ अयलभाता आ० **जे त** । अयलभाया आ० **को हे दी हा** । ७ °च्छइ **दी को हा** । ८ वंदामी वंदित्ता **को हे दी हा म** । वन्दामी **त** । ९ °सामि **को हे दी हा म** । १० मन्नि **दी हा** । ११ अत्थी नत्थि **म** । १२ न **दी हा** । नास्ति **को हे तप्रतिपु** । १३ अत्थि **दी हा** । १४ तुज्झ **हे** । १५ पावमि–इति प्रतौ ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अन्येषां पुनर्मतेन मन्यसे--पापमेवैकं पदार्थः, तस्य परमप्रकर्षान्नारकः। तस्यैव किञ्चित् किञ्चिदपकर्षात् तिर्यग्मनुष्यदेवाः। सर्वापचये मोक्ष इति। एवं पुण्यमेव पापम्, पापमेव पुण्यमिति सिद्धान्तद्वयम्।

अथवान्यः सिद्धान्तः--साधारणमेतदुभयम्, उभयानुविद्धस्वभावत्वात्, सुखदुःखानुभाविजीवलोकदर्शनात् कार्यानुरूपकारणसिद्धेः पुण्यमपुण्यानुविद्धस्वरूपमिति। यतोऽत्यन्तसुखी न कश्चित् संसारी, न चात्यन्तदुःखितः। एवं प्रकर्षापकर्षभेदात् सुखदुःखान्विता एव संसारिण उपलक्ष्यन्त इति साधारणपुण्यपापवादः केषाञ्चित् सिद्धान्तः।

अथवा पुण्यमिति शुभस्य कारणम्, अन्यदेव पापमिति च पदार्थान्तरमेवाशुभफलस्य कारणमिति प्रविविक्तकार्यानुमेयमुभयं विविक्तस्वरूपमेवेत्युभयास्तित्ववादः।

अथ चोभयमपि पुण्यं पापं वा शुभाशुभफलं कर्म कल्प्येत, तस्याचेतनेष्वपि घटादिष्वेककुम्भकारैकमृत्तिकाचक्राद्युपकरणैकपाकनिष्पन्नत्वसामान्ये कश्चिद् घटः क्षीरघृतमध्वादिभाजनं प्रशस्तवारिपूर्णविकचपद्मापिधानराज्याभिषेककलशश्च भवति, कश्चित् पुनरशुचिमद्यादिभाजनं शोकाश्रुवारिधारापूर्णखण्डमल्लकापिधानश्मशानकलशश्च भवतीति विनापि पुण्यपापकर्मसम्बन्धाच्छुभाशुभफलप्राप्तेश्चेतनेष्वपि शुभाशुभफलप्राप्तिरकर्मकैव भविष्यतीति किं पुण्यपापपरिकल्पनया युक्तिवियुक्तया, सर्वथा स्वभावकृत एवायं विचित्रशुभाशुभफलपरिणामो भवप्रपञ्च इति केषाञ्चित् सिद्धान्तः। तथा चाहुः--

"केनाञ्जितानि नयनानि मृगाङ्गनानां
कोऽलङ्करोति रुचिराङ्गरुहान्मयूरान्।
कश्चोत्पलेषु दलसंनिचयं करोति
को वा दधाति विनयं कुलजेषु पुंसु" ॥

एवमचलस्य गणधरस्य नामगोत्रामन्त्रणपूर्वकं हृदयस्थार्थसूचकं मण्णसिगाहाकृतं सूत्रमात्रेण ॥२३६०-६३॥

अथेदानीं भाष्यगाथाभिर्विवरणं क्रमश उद्घट्टितसिद्धान्तानां क्रियते।

**पुण्णुक्करिसे सुभता तरतमजोगावकरिसतो हाणी।**
**तस्सेव खए मोक्खो पत्थाहारोवमाणातो ॥२३६४॥**

**पुण्णुक्करिसे सुभता** इत्यादि। यत्तदादावुल्लिङ्गितं पुण्यमेव पदार्थः, न तत् प्रतिपक्षः पापं नामास्ति; ननु च पुण्यस्य शुभमिति, अशुभफलोपलब्धेः पापास्तित्वमित्याशना(ङ्का)यामिदमुच्यते--यत् परं प्रकृष्टं शुभमेतत् पुण्योत्कर्षस्य कार्यं, यत् पुनस्तस्मात्

१ °पद्माभिधाभिधानरा इति °प्रतौ। २ °रिस्से हे। ३ °वगरि° को हे। ४ °स्सेय जे। ५ पत्था° को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

फलमवकृष्टतरमवकृष्टतमं च तत्पुण्यस्यैव तरतमयोगोऽपकर्षभिन्नस्य यावत् परमप्रकर्षहानिः परमापकर्षहीनस्य परमापकृष्टतमं शुभफलम्, या काचिच्छुभमात्रेत्यर्थः । तस्यैव च परमावकृष्टपुण्यस्य सर्वात्मना क्षये पुण्यात्मकफलाभावात् मोक्ष इति सिद्धान्तः । यथाऽत्यन्तपथ्याहारसेवनात् परमारोग्यसुखं, तस्यैव च किञ्चित् पथ्याहारपरिवर्जनादपथ्याहारपरिवृद्धेः आरोग्यसुखहानिः सर्वथैवाहारपरिवर्जनात् मोक्ष इति पथ्याहारोपमानं पुण्यमिति॥२३६४॥

एतद्विपर्ययात् द्वितीयपक्षः–पापमेवैकं विद्यते पदार्थः, न पुण्यं नामास्ति यत्तत् पुण्यफलं सुखमुच्यते तत् पापस्यैव तरतमयोगादवकृष्टस्य फलम् । यतः–

**पावुक्करिसेऽहमता तरतमजोगावकरिसतो सुभता ।**
**तस्सेवं खए मोक्खो अपच्छभत्तोवमाणातो ॥२३६५॥**

**साधारणवण्णादिव अध साधारणमधेगमत्ताए ।**
**उक्करिसावकरिसतो तस्सेव य पुण्णपावक्खा ॥२३६६॥**

**पावुक्करिसेऽहमता** इत्यादि । पापस्य परमोत्कर्षेऽत्यन्ताधमफलता । तस्यैव तरतमयोगापकर्षभिन्नस्य मात्रा परिवृद्धिहान्या, यावत् पापस्य प्रकृष्टोऽपकर्षः, या काचित् पापमात्राऽवतिष्ठते तस्यामत्यन्तशुभफलता, पापापकर्षात् । तस्यैव च पापस्य सर्वात्मना क्षयो मोक्षः । यथात्यन्ताऽपथ्याहारसेवनादनारोग्यं, तस्यैवापथ्यस्य किञ्चित् किञ्चिदपकर्षाद्यावत् स्तोकापथ्याहारत्वं आरोग्यस्य करं शुभफलमित्यर्थः । सर्वाहारपरित्यागाच्च मोक्ष इति । अथवा तृतीयः पक्षः–पुण्यपापमुभयस्वरूपानुविद्धत्वात् साधारणं साधारणवर्णकवत् । अथ तदपि चैकया मात्रया हीयते वर्द्धते च यावती मात्रा पुण्यस्य हीयते तावत्येव मात्रा पापस्य वर्द्धते । एवमुत्कर्षापकर्षतः साधारणरूपस्य तस्य पदार्थस्य पुण्यपापाख्या नरसिंहस्वरूपवदित्येकेषां मतमिति ॥२३६५–६६॥

अथवाऽन्येषां

**[१५६-प्र०] एवं चिय दो भिण्णाइं होज्ज होज्ज व सभावतो चेअ ।**
**भवसंभूती भण्णति ण संभावातो जतोऽभिमतं ॥२३६७॥**

**एवं चिय दो भिण्णाइं होज्ज** सुखदुःखयोर्यौगपद्येनानुभवाभावात् क्रमेण सुखदुःखसंवेदनफलानुमानात्, कार्यानुरूपकारणसिद्धेः पुण्यं पृथक् सुखकारणम्, पापं च पृथक् दुःखकारणमिति भिन्नमेवैतद् द्वितयमपि क्रमभाविपर्यायफलमिति द्वैतवादिसिद्धान्तः।

१ °त्मकः पक्वाभा° इति प्रतौ । २ °से व मता **जे** । ३ °वगरि° **को हे** । ४ °तम्सेय **जे** । ५ °पत्थ° **को हे** । ६ °च्छवन्नोव° **त** । ७ °वगरि° **को हे** । ८ °पावि° **त** । ९ °ज्ज दा हो° **को** । १० चेव **को हे त** । ११ संभवा° **त** । १२ °मओ **को हे त** ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

अथवा 'होज्ज व सभावतो चेअ भवसम्भूती' भवेद् वा स्वभावत एव भवस्य संसारस्य सम्भूतिरुत्पत्तिरिति स्वभाववादिसिद्धान्तः ।

अथ तस्मिन् सर्वपाश्चात्ये सिद्धान्तोद्घट्टके भण्यते प्रत्युत्तरं कर्मवादिना—न स्वभावात् संसारसम्भूतिः, उपपत्त्यसहिष्णुत्वात्, उन्मत्तवाक्यवत्, यतोऽभिमतस्तव ॥२३६७॥

**होज्ज सभावो वत्थुं णिक्कारणता व वत्थुधम्मो वा ।**
**जति वत्थुं णत्थि तओऽणुवलद्धीतो खपुप्फं व ॥२३६८॥**

**होज्ज सभावो वत्थुमि**त्यादि । स स्वभावः परिकल्प्यमानो वस्तु वा स्यात्, अवस्तु वा ? कर्मेश्वरपुरुषादीनि कारणानि संसारस्य । निष्कारणता स्वभाव उच्यते । अथवा कश्चिद् वस्तुधर्मः स्वभाव उच्यते । तद्यदि वस्तु स्वभावः, ततो वस्तूनि कर्मपुरुषप्रधानेश्वरादीनि परिगणितान्येव । तेषां मध्ये स्वभावो न भणितः । अतो नास्त्येवासौ स्वभावः, अनुपलभ्यमानत्वात्, खपुष्पवत् ॥२३६८॥

अथ मन्येथाः— अनुपलभ्यमाना अपि परमाण्वादयः सन्तीत्यनैकान्तिकः । कर्मनास्तित्वसाधनमप्येवमेवानैकान्तिकमिति कर्मनास्तित्वाभावादप्रतिषिद्धत्वाद्वा कर्मसद्भावः किमिति नाभ्युपगम्यते ? यो वानुपलब्धौ सत्यां स्वभावास्तित्वे हेतुः, स एव कर्मास्तित्वेऽपि भविष्यतीत्येवमर्थमियं गाथा—

**अच्चंतमणुवलद्धो वि अध तओ अत्थि णत्थि किं कम्मं ।**
**हेतू व तदत्थित्ते जो णणु कम्मस्स वि स एव ॥२३६९॥**

**अच्चंत०** गाहा । गतार्था ॥२३६९॥

अथवा यत्तत् कर्मेति शुभाशुभफलमस्माभिरिष्यते तस्यैव कर्मणः स्वभाव इति त्वया नाम कल्प्यते, भवतु । न कश्चिद्दोषः । किन्तु सर्वं चेतनाचेतनरूपं जगत् स्वभावकर्तृकमिति विरुध्यते, एकरूपत्वात् स्वभावस्य । जगद्धि पृथिवीसमुद्रगिरिसरिद्विमानप्रस्तारादिकं स्वभावजनितं न भवति, प्रतिनियताकारत्वात्, कुम्भकारकर्तृ[क]घटवत् । कर्म तु विचित्रं विचित्रस्यैव जगतः कारणमिति प्रयुज्यते । तत इयं गाथा—

**कम्मस्स वाभिधाणं होज्ज सभावो त्ति होतु को दोसो ।**
**पतिणियताकारातो ण य सो कत्ता घडस्सेव ॥२३७०॥**

१ °णतो व जे । २ जड व° हे । ३ मणु त । ४ °तागारा° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कम्मस्स** । भावितार्था ॥२३७०॥

अथवा तस्य स्वभावस्य स्वरूपं चिन्त्यते–

**मुत्तोऽमुत्तो वे[2] तओ जति मुत्तो[3] तोऽभिधाणतो भिण्णो ।**
**कम्मं[4] ति सभावो त्ति य जति वाऽमुत्तो ण कत्ता तो ॥२३७१॥**
**देहाणं वोमं पिव जुत्ता कज्जातितो य मुत्तिमता ।**
**अध सो णिक्कारणं[5]या तो खरसंगा[6]दयो होंतु ॥२३७२॥**

**मुत्तोऽमुत्तो व तओ** इत्यादि गाथाद्वयम् । यदि मूर्त्तिमतां स्वभावः, कर्माऽपि मूर्त्तिमदेव, जगतश्च कारणमिति नाममात्रं भिद्यते, न कश्चित् पदार्थभेदः । अथ पुनरमूर्त्तः स्वभावः ततोऽसा[7]वकर्त्ता देहादीनाम्, अमूर्त्तत्वात्, [8]व्योमवत् । कर्मणश्च मूर्त्तिमत्ता युक्ता क्रियाकार्यत्वात्, घटवत् । कार्यादित्वादिति–आदिशब्दोपादानात्–देहानां कारणत्वात, शुक्रशोणितवदित्यादि योजनीयम् । अथासौ स्वभावः कारण-भावमात्रं निष्कारणता भण्यते । एवमपि खरशृङ्गादयः सन्त्विति वक्राभिधानात्–नास्ति स्वभावः, निष्कारणत्वात् खरशृङ्गादिवदिति–प्रमाणोपन्यासः ॥२३७१–७२॥

अथवा वस्तुधर्म[:] स्वभावो नाम कश्चित् परिणामविशेष उच्यते—

**अध वत्थुणो स धम्मो परिणामो तो स जीवकं[9]म्माणं ।**
**पुण्णेतराभिधाणे[10] कारणकज्जाणुमेयो सो ॥२३७३॥**
**किरियाणं कारणतो देहातीणं च कज्जभावा[१५६–द्वि०]तो ।**
**कम्मं मदभिहितं ति य पडिवज्ज तमग्गिभूति व्व ॥२३७४॥**

**अध वत्थुणो स धम्मो** इत्यादि । किं **'किरियाणं कारणतो'** इत्यादि । वस्तुधर्मत्वे स्वभावस्य जीववस्तुनो वा स परिणामो भवेत् "संरम्भसमारम्भयोगकृतकारि-तानुमतिकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः" [तत्त्वार्थ ६. ८.] इत्यष्टोत्तरपरिणामशतम् । तच्च कर्मैव । अथवा कर्मण एव वस्तुरूपस्य धर्मः कश्चित् परिणामः शुभाशुभा-ख्योऽध्यवसायः पुण्येतराभिधानः "शुभः पुण्यस्य,[11] विपरीतः पापस्य" [तत्त्वार्थ ६. ३]" इति वचनात् । स चैवं प्रकारो वस्तुधर्मः स्वभावः कर्मैव कारणानुमेयः कार्यानुमेयश्चे[12] । स तत्र कारणानुमेयः–दानादिक्रियाः सर्वाः फलवत्यः, क्रियात्वात्, घटाद्यर्थक्रियावत् अतः क्रियाभिः कारणभूताभिरनुमीयते—

---

१ °त्तो अमु° हे त । २ य जे । व्व त । ३ मुत्ता जे । ४ °म्म त्ति को हे । ५. °णतो जे । ६ °रसिंगा° को हे त । ७ ततो भावक°–इति प्रतौ । ८ व्यासवत् इति प्रतौ । ९. स कम्मजीवाणं को हे । १० °धाणो को हे त । ११ 'अशुभः पापस्य' इति तत्त्वार्थ-मुद्रिते । १२ यस्य सः–इति प्रतौ ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

"समास्वतुल्यं विषमासु तुल्यं सतीष्वसच्चाप्यसतीषु सच्च ।
फलं क्रियास्वित्यथ यन्निमित्तं तद्देहिनां सोऽस्ति तु कोऽपि धर्मः ॥१॥"

अतः क्रियाणां कारणत्वात् कर्मणः कार्यस्यानुमानम्, अथ कार्यानुमेयता-देहादीनां च कार्यभावात् कर्मणः कारणस्यानुमानम् । देहादेः कार्यस्य शुक्रशोणितादिदृष्टकारणसमवायेऽप्यसम्भवो दृष्टः इत्यदृष्टमचक्षुर्ग्राह्यं किमपि कारणमस्तीति प्रतिजानीमहे कारणत्वात् मृद्दण्डचक्रसूत्रादिसमेतसमर्थकुम्भकारान्यघटस्येव प्रयत्नः। उक्तं च—

"इह दृष्टहेत्वसम्भविकार्यविशेषात् कुलालयत्न इव ।
हेत्वन्तरमनुमेयं तत् कर्म शुभाशुभं कर्तुः ॥१॥"

अतः कार्यानुमेयत्वादपि प्रतिपद्यस्व कर्म । अपि च त्वमपि प्रतिपद्यस्व कर्म अग्निभूतिवत् ॥२३७३-७४॥

**तं चिय देहादीणं किरियाणं पि य सुभासुभत्तातो ।**
**पडिवज्ज पुण्णपावं सभावतो भिण्णजातीयं ॥२३७५॥**

**तं चिय** गाहा । देहादीनां कार्याणां शुभाशुभत्वात्, क्रियाणामपि च कारणानां शुभाशुभत्वात्, कार्यानुरूपकारणतया कारणानुरूपकार्यतया च स्वभावभिन्नजातीयं द्विविधं पुण्यपापाख्यं कर्म प्रतिपद्यस्व ॥२३७५॥

तथा चैतदर्थमुपपत्तिगाथा—

**सुहदुक्खाणं कारणमणुरूवं कज्जभावतोऽवस्सं ।**
**परमाणवो घडस्स व कारणमिह पुण्णपावाइं ॥२३७६॥**

**सुहदुक्खाणं कारण**मित्यादि । सुखदुःखयोः भिन्नजातीयकार्ययोः स्वानुरूपं कारणमवश्यं भावि, कार्यत्वात्, पार्थिवघटस्य पार्थिवपरमाणुवत् । ते च द्वे कार्यानुरूपे कारणे पुण्यपापे इति सिद्धम् ॥२३७६॥

**सुहदुक्खकारणं जति कम्मं कज्जस्स तदणुरूवं च ।**
**पत्तमरूवेत्तं पि हु अध रूवि णाणुरूवं तो ॥२३७७॥**

[3]**सुहदुक्खकारणं जति कम्मं** इत्यादि । आत्मपरिणामत्वात् सुखदुःखयोरमूर्त्तत्वम्, कार्यानुरूपं कारणमिति सुखदुःखयोः कारणस्य कर्मणः प्राप्तम्, अमूर्त्तयोः कारणत्वादात्मवत् । अथ रूपिमूर्त्तकर्माण्यतः सुखदुःखयोः कारणं न भवति, अननुरूपत्वात्, अमूर्त्तत्वाद्वा, घटवत् ॥२३७७॥

---

१ °रूवं तं पि को हे त। २ रूवं त। ३ सुहदुक्खाणं जइ कम्मं-इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अस्याऽप्यसिद्धतोद्भावनार्थमाह—

**ण हि सव्वथाणुरूवं भिण्णं वा कारणं अध मतं ते ।**
**किं कज्जकारणत्तणमधवा वत्थुत्तणं तस्स ॥२३७८॥**

न हि सर्वथाऽनुरूपं कारणं कार्यस्य, कार्यं वा कारणस्येति । सर्वथानुरूपत्वे [अ]द्वयमेव कार्यं वा कारणं [वा] स्यात् । अनयोरभिधानभेदस्तावत् स्फुट एव दृष्टः कार्यं कारक[ण]मिति च । सर्वथानुरूपत्वे एकस्यास्तित्वात् द्वितीयस्य नास्तित्वेन भवितव्यम् । अत एकमेव, न तद् द्वितीयं वस्तु विद्यते इति कार्यकारणत्वाभावो वस्तुत्वाभावश्च ॥२३७८॥ एवं तर्हि—

**सव्वं तुल्लातुल्लं जति तो[1] कज्जाणुरूवता केयं ।**
**जं सोमे[2] ! सपज्जायो कज्जं[3] परपज्जयो[4] सेसो ॥२३७९॥**

**सव्वं[5] तुल्लातुल्लं जति** इत्यादि । सर्वमेव केनचित् तुल्यातुल्यमिति व्यवस्थायां केयं कार्यानुरूपता नाम, अननुरूपत्वस्यापि सम्भवात् ? उच्यते–हे सौम्य ! हारीताचलभ्रातः ! स्वपरपर्यायविवक्षावशादनुरूपा[न]नुरूपाच्च वस्तुन इति । कारणस्य कार्यं स्वपर्याय इत्यनुरूपत्वम्, अन्यः परपर्याय इत्यननुरूपत्वमित्युभयमविरुद्धम् । कर्मणो मूर्त्तस्य कारणस्यात्मनोऽन्यस्य सतः कार्यं सुखदुःखे । आत्मपरिणामत्वात् परपर्यायत्वादमूर्त्तत्वं सुखदुःखयोः । कार्यत्वव्यपदेशमात्रं स्वपर्यायः । ततश्च शुभाशुभाख्या कर्मणः । सद्वेद्यासद्वेद्यत्वे अनुरूपत्वं मूर्त्तामूर्त्तत्वे अननुरूपत्वम् ॥२३७९॥ अतः पृच्छति—

**किं जध मुत्तममुत्तस्स कारणं तध सुहातिणं[6] कम्मं ।**
**दिट्ठं सुहातिकारणमण्णाति जधेह तध कम्मं ॥२३८०॥**

**किं जध** गाहा । अमूर्त्तस्य कार्यस्य मूर्त्तं कारणमयुक्त(मुक्त)मित्यत्र प्रमाणं मूर्त्तं कर्म सुखदुःखकारणत्वादन्नादिवत् ॥२३८०॥ एवं तर्हि—

**होतु तयं चिय किं कम्मणा[7] ण जं तुल्लसाधणाणं पि ।**
**फलभेतो[8] सोऽवस्सं सकारणो कारणं कम्मं ॥२३८१॥**

**होतु** गाहा । सुखदुःखकारणत्वं कर्मण इत्यसिद्धो हेतुः । अन्नाद्येव सुखदुःखयोः कारणम् । तच्च मूर्त्तं किं कर्मणा कल्पितेन ? तन्न, यतोऽन्नादितुल्यसाधनानामपि पुरुषाणां विसदृशफलत्वं कारणान्तरसापेक्षं दृष्टम् । यच्च तत्कारणं तत् कर्मेति ॥२३८१॥

---

१ ते त । २ सोम्म को हे त । ३ पज्जं॰ जे । कम्मं त । ४ ॰रमज्ज॰ त ।
५ सव्वं तुल्लं जइ—इति प्रतौ । ६ ॰हाइणं हे । ७ कम्मुणा त । ८ ॰भोतो जे । ॰भेदभो हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एत्तो च्चिय तं मुत्तं मुत्तबलाधाणतो [१५७-प्र०] जधा कुंभो ।**
**देहातिकज्जमुत्तातितो ये भणिते पुणो भणति ॥२३८२॥**

**एत्तो च्चिय** इत्यादि । अत एव च तत् कर्म मूर्त्तम्, मूर्त्तस्याऽन्नादेर्बलाधानकारित्वात् । अथवा मूर्त्तं कर्म, मूर्त्तस्य देहादेः कारणत्वात् । यन्मूर्त्तं तद् मूर्त्तस्य कारणं दृष्टं यथा कुम्भस्य मृत् । एवमुक्ते पुनरपि ब्रवीति ॥२३८२॥

**तो किं देहादीणं मुत्तत्तणतो तयं हवतु मुत्तं ।**
**अध सुहदुक्खातीणं कारणभावादरूवं ति ॥२३८३॥**

**तो किं देहादीणं** इत्यादि । इहोभयमुपप्लवते देहादिमूर्त्तकारणत्वात् मूर्त्तत्वं कर्मणः, सुखदुःखाद्यमूर्त्तकारणत्वाच्चामूर्त्तत्वमिति किमत्र युज्यते ? सुतरां न चोभयमेकस्यैकदा एकपर्यायेण परस्परविरुद्धं प्रतिपत्तुं शक्यम् ॥२३८३॥ तस्मादेवं प्रविभज्यते—

**ण सुहातीणं हेतू कम्मं चिय किंतु ताण जीवो वि ।**
**होति समवायिकारणमितरं कम्मं ति को दोसो ? ॥२३८४॥**

**ण सुहा०** गाहा । इह कार्यस्य त्रिविधं कारणम्—निर्वर्त्तकं निमित्तं पारिणामिकं चेति । तत्र सुखादीनां परिणामकारणममूर्त्तमेव जीवः, समवायिकारणमिति यत्परैरुच्यते । इतरदिति निर्वर्त्तककारणं कर्म । तच्च मूर्त्तम् । अन्नादि निमित्तकारणमेव, मूर्त्तं च । ततः को दोषः—अमूर्त्तस्य अमूर्त्तं, मूर्त्तं च कारणमिति ? ॥२३८४॥

**इय रूवित्ते सुहदुक्खकारणत्ते य कम्मणो सिद्धे ।**
**पुण्णावकरिसमेत्तेण दुक्खबहुलत्तणमजुत्तं ॥२३८५॥**

**इय रूवित्ते सुहदुक्खकारणत्ते य** इत्यादि । एवं रूपित्वे सुखदुःखकारणत्वे च कर्मणः सिद्धे तदिदानीं कर्मसामान्यं—पुण्यमेव, पापमेव, परस्परानुवेधसाधारणरूपं वा, भिन्नं वा द्वयमपि पुण्यं पापं च जात्यन्तरवत्—विचारणीयमिति । पुण्यमात्रवादिनो दोषः—यस्य पुण्यमेवात्यन्ताशुभफलं प्रतिपक्षो नास्तीति पुण्यापकर्षमात्रेणैव दुःखबहुलत्वमयुक्तम्, तत्कारणस्य पापपदार्थस्याभावात् ॥२३८५॥ उच्यते कार्यात् कारणानुमानम्—

**कम्मप्पकरिसजणितं तदवस्सं पगरिसाणुभूतीतो ।**
**सोक्खप्पगरिसभूती जध पुण्णप्पगरिसप्पभवा ॥२३८६॥**

१ °व्व को हे त । २ हवइ को हे त । ३ किन्तु हे । ४ °वायका° त । ५ कम्मुणो को हे । कम्मुणा त । ६ °वगरि° को हे । ७ °पगरिसं° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कम्मप्पकरिस०** गाहा । यत्र दुःखबहुलत्वं प्रकर्षदुःखानुभूतिरूपं तत् [1]स्वानुरूपकर्मप्रकर्षजनितमिति पक्षः प्रकर्षानुभूतिवत् । यथा हि सौख्यप्रकर्षानुभूतिः स्वानुरूपपुण्यकर्मप्रकर्षजनितेति त्वयाभ्युपगम्यते तथेयमपि प्रकर्षानुभूतिरिति स्वानुरूपपापकर्मप्रकर्षजनिता भविष्यतीति प्रमाणफलम् ॥२३८६॥

**तध बज्झसाधणप्पगरिसंगभावादिहण्णधा ण तयं[2] ।**
**विवरीतबज्झसाधणबलप्पकरिसं[3] अवेक्खेज्जं[4] ॥२३८७॥**

**तध बज्झसाध०** इत्यादि । तथा उपपत्त्यन्तरमपि–तत् दुःखम् अन्तरङ्गकेवलपुण्यमात्रजनितं न भवति, आहारादिबाह्यसाधनकारणान्तरसापेक्षत्वात् । यत् कारणान्तरसापेक्षं तदेकनिर्वर्तकं न भवति, यथा निरुपकरणकुम्भकारः कुम्भनिर्वृत्तौ । दृष्टं च दुःखितहस्त्यादिदेहे विपरीताहारादिबाह्यसाधनसापेक्षत्वम् । तस्माद्दुःखितहस्त्यादिदेहे पुण्यापकर्षे पापकर्मप्रकर्षजनितत्वमप्यनुमीयते । अन्यथा नैव बाह्यसाधनप्रकर्षमपेक्षेत ॥२३॥ अपि च—

**देहो णावचयकतो पुण्णुक्करिसे[5] व मुत्तिमत्तातो ।**
**होज्ज व स हीणतरओ कधमसुभतरो महल्लो य ॥२३८८॥**

**देहो णावचयकतो** इत्यादि । इतश्च दुःखितहस्त्यादिदेहः केवलपुण्यापचयमात्रकृतो न भवति, मूर्त्तिमत्त्वात्, अत्यन्तपुण्योत्कर्षजनितानुत्तरौपपातिकदेवदेहवत्, मनुष्यलोके वा चक्रवर्त्तिदेहवत् । यच्च पुण्यापचयमात्रकृतम् इति कल्प्येत तत्र मूर्तिमत्त्वमपि नास्ति यथा न कुत्रचित् वैधर्म्यदृष्टान्ते धर्म्यसिद्धिः प्रत्युतेष्टतरा । अथ कल्पनया वा भवेदपि पुण्यापचयमात्रकृतत्वं दुःखितादिहस्त्यादिदेहे । तत्रेदमसि प्रष्टव्यः—कथमसौ पुण्योपचयजनित एवं[6] न स्यात् ? अशुभतरत्वं तु युज्यते । महत्त्वं चाऽशुभत्वं चेति कथमेककारणजनितमुभयं स्यात् ? इति तन्महत्त्वं कारणान्तरजनितमिति स्वानुरूपपापप्रकर्षं सूचयति नारकदेहवत् । [7]तस्मादेवमुपपत्तिभिः केवलपुण्यपक्षस्य निराकरणं कृतमिति ॥२३८८॥ संक्षेपरुचिसत्त्वानुग्रहायाचार्यः केवलपापपक्षनिराकरणमि(म)तिदिशन्नाह—

**[8]एतं चिय विवरीतं जोएज्जा[9] सव्वपावपक्खे[10] वि ।**
**ण य साधारणरूवं कम्मं तक्कारणाभावा ॥२३८९॥**

---

१ स्वानु॰ इति प्रतौ । २ यतं त । ३ ॰प्पगरिसं को हे । ४ ॰क्खेज्जा को हे । ५ ॰रिस व्व त । ॰रिसे व्व को । ६ एव म स्यात् इति प्रतौ । ७ तस्यादेवमु॰–इति प्रतौ । ८ एवं को हे त । ९ ॰इज्जा त । १० ॰क्खेसु इति टीकायाम् ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एतं चिय विवरीतं जोएज्जा सव्वपावपक्खे वि** । अथ साधारणोभयरूपैकत्वपक्षनिराकरणाय गाथापश्चार्द्ध–**ण य साधारणरूवं कम्म**, तत्कारणाभावात् । नास्त्युभयरूपं कर्म अभूतैवंविधकारणत्वात्, वन्ध्यापुत्रवत् ॥२३८९॥ कदाचित् कश्चिदस्य हेतोरसिद्धत्वमाशङ्केत तत्प्रसाधनार्थं गाथा—

**[१५७-द्वि०] कम्मं जोगणिमित्तं सुभोऽसुभो वा स एगसमयम्मि ।**
**होज्ज ण तूभयरूवो कम्मं पि तओ तदणुरूवं ॥२३९०॥**

**कम्मं जो०** गाहा । "मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः" [तत्त्वार्थ० ८.१] इति पर्यन्ते योगाभिधानात् सर्वेषु मिथ्यादर्शनादिष्वपि योगाऽविनाभावाद(द्) बन्धहेतुमि(रि)ति कर्म योगनिमित्तमुच्यते । स च योगो मनोवाक्कायात्मकः एकस्मिन् समये शुभोऽशुभो वा भवेदेकरूपतरस्मात् कारणानुरूपकार्यत्वात् कर्मापि शुभमशुभं वा, नोभयरूपमिति । तस्मादभूतैवंविधकारणत्वादिति सिद्धः पक्षधर्मः २३९०॥

एवमप्यभिहिते योगानां कर्मकारणभावानां कार्येण द्रव्येण शुभाशुभरूपेण दृष्टेन कारणानां योगानां शुभाशुभत्वमुभयसिद्धमिति स्मारयन्नाह—

**णणु मणवइकाययोगा सुभासुभा वि समयम्मि दीसंति ।**
**दव्वम्मि मीसभावो भवेज्ज ण तु भावकरणम्मि ॥२३९१॥**

**णणु मणवइकाययोगा** इत्यादि । एकस्मिन् समये मनोवाक्काययोगानां प्रकर्षापकर्षवैचित्र्यात् सर्वनिकृष्टसर्वोत्कृष्टयोरन्तराले शुभाशुभत्वमुपलभ्येत इति शुभाशुभोभयरूपं कर्मणः कारणमस्तीति पुनरप्यभूतैवंविधकारणत्वमसिद्धो हेतुः । एतदप्यन्यविषयं शुभाशुभत्वमिति सिद्धत्वमेव हेतोरिति दर्शयति–**द्रव्यात्मके योगे** शुभाशुभत्वमिश्रत्वं भवेत्, न तु भावकारणे भावात्मके योगे कर्मकारणे कदाचिदपि शुभाशुभत्वं मिश्रं भवेत्, अवश्यमेकरूपेण शुभेन वाऽशुभेन वा भवितव्यमिति ॥२३९१॥

तस्यैव ज्ञापकमुपचयकारणमाह–

**झाणं सुभमसुभं[1] वा ण तु मीसं जं च झाणविरमे वि ।**
**लेस्सा[2] सुभासुभा वा सुभमसुभं वा ततो कम्मं ॥२३९२॥**

**झाणं सुभमसुभं वा** इत्यादि । एवं कर्मणो बन्धपरिणामकाले योगानां ध्यानकाले ध्यानोपरमे वा शुभत्वमशुभत्वं वैकरूपमेव, न मिश्रता सिद्धेति कर्मणोऽपि तद्वदेव कार्यस्य भविष्यति ॥२३९२॥ अथवा—

**पुव्वगहितं व[3] कम्मं परिणामवसेण मीसतं णेज्ज[4] ।**
**इतरेतरभावं वा सम्मामिच्छादि[5] ण तु गहणे ॥२३९३॥**

१ न उ उभ° हे । २ लेसा को हे । ३ च को हे । ४ नेज्जा को हे । ५ °च्छाइं को हे ।

पुव्विगहितं व कम्ममित्यादि । यत् पूर्वबद्धं कर्मैकरूपं यथा मिथ्यादर्शनं तत् परिणामवशाज्जीवः सम्यग्मिथ्यारूपं मिश्रतां नयेत्, मिथ्यादर्शनं वा अशुभं सम्यग् दर्शनं शुभत्वं प्रापयेत्। न तु ग्रहणे कर्मबन्धनकाले इत्यर्थः ॥२३९३॥ तथा चागमं दर्शयति—

**मोत्तूण आउअं खलु दंसणमोहं चरित्तमोहं च ।**
**सेसाणं पगडीणं उत्तरविधिसंकमो भज्जो ॥२३९४॥**
**सोभणवण्णातिगुणं सुभाणुभावं च जं तयं पुण्णं ।**
**विवरीतमतो पावं ण बातरं णातिसुहुमं च ॥२३९५॥**

**मोत्तूण आउअं खलु** इत्यादि । **सोभणवण्णातिगुणमि**त्यादि । मूलप्रकृत्यभिन्नासु वेद्यमानासु सङ्क्रमो भवतीत्युत्सर्गस्यापवादोऽयम्—आयुष्कस्योत्तरप्रकृतीनां चतसृणां परस्परसङ्क्रमो निवार्यते, मोहनीयमूलप्रकृत्यभेदेऽपि दर्शनमोहचारित्रमोहयोः सङ्क्रमो निषिध्यते, शेषाणां प्रकृतीनामुत्तरभेदसङ्क्रमो भवतीति शोभनवर्णगन्धरसस्पर्शशुभानुभावं च यत्कर्म पुण्यमित्युच्यते एतद् विपरीतं पापं भिन्नजातीयमेव । एतच्च नातिबादरं शिलादिवत्, नातिसूक्ष्मं परमाणुवत् ॥२३९४–९५॥

**गेण्हति तज्जोगं[1] चिय रेणुं पुरिसो जधा कतब्भंगो ।**
**एगक्खेत्तोगाढं जीवो सव्वप्पदेसेहिं ॥२३९६॥**

**गेण्हति तज्जोगं चिय** इत्यादि । एकक्षेत्रावगाढं स्थितिपरिणतं जीवः सर्वप्रदेशैस्तद्योग्यमेव कर्म गृह्णाति, कृताभ्यङ्ग इव पुरुषो रेणुं स्वेदेनेवाऽऽबध्यते(ध्नाति), के(ते) त्वणवः शर्कराश्च, तथा एतत् स्वाभाव्यात् ॥२३९६॥

**अविसिट्ठपोग्गलघणे लोए थूलतणु[4] [१५८-प्र०] कम्मपविभागो[5] ।**
**जुज्जेज्ज गहणकाले सुभासुभविवेचणं कत्तो ॥२३९७॥**
**अविसिट्ठं चिय तं सो परिणामासयसभावतो खिप्पं ।**
**कुरुते सुभमसुभं वा गहणे जीवो जधाहारं ॥२३९८॥**

**अविसिट्ठपोग्गलघणे** इत्यादि। ग्रहणकाले हि स्थूलसूक्ष्मकर्मविभाग एव युज्येत । तद्ग्रहणकाले शुभाशुभविवेचनं कुतस्तस्य ? अविशिष्टग्रहणोत्तरकालं च कर्म परिणामाशयवशात् स्वभावत एव जीवशुभाशुभत्वेन विभज्यते प्रयोगपरिणामवत् आहार इव ॥२३९८॥

---

१ °गइणं को हे । २ गिण्ह° हे । ३ °ज्जोग्गं त । ४ थूण° हे । ५ °म्मयवि° जे

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**परिणामासयवसतो धेणूये जध पयो विसमहिस्स ।**
**तुल्लो वि तदाहारो तध पुण्णापुण्णपरिणामो ॥२३९९॥**

**परिणामासयवसतो** इत्यादि । इहाविशिष्टमपि कर्म नानापरिणामं प्राप्स्यते, आशयविशेषापेक्ष्यत्वात्, गोधेनु-सर्पाभ्यवहृताहारवत् ॥२३९९॥

**जध वेगसरीरम्मि वि सारासारपरिणामतामेति ।**
**अविसिट्ठो आहारो तध कम्मसुभासुभविभागो ॥२४००॥**

**जध वेगसरीरम्मि** इति । अथ ध (क)र्म सारासारपरिणामद्वयं प्राप्स्यति, प्रयोगपरिणामितत्वात् । यथा विशिष्टोऽप्याहारः पुरीष-मूत्रादि-रस-रुधिरादिपरिणाममिति । तत्र सारपरिणामः पुण्यं, असारपरिणामः पापम् ॥२४००॥ तदेव गाथया विविच्यते—

**सातं सम्मं हासं पुरिसरतिसुभायुणामगोत्ताइं ।**
**पुण्णं सेसं पावं णेयं सविवागमविवागं ॥२४०१॥**

**सातं सम्मं** इत्यादि । सात-सम्यक्त्व-हास्य-रति-पुरुषवेद शुभायुर्नाम गोत्राणि पुण्यम् शेषं पापमिति । सह विपाकेन सविपाकम् । विपाकः—अनुभावः, अविद्यमानविपाकमविपाकम् । यथाबद्धविपाकाविपरीतपाकं मन्दानुभावीकृतं वा प्रदेशकर्मेति ॥२४०१॥

**असति व हि पुण्णपावे जमग्गिहोत्तादि सग्गकामस्स ।**
**तदसंबद्धं सव्वं दाणातिफलं च लोगम्मि ॥२४०२॥**

असति हि पुण्य-पापे वेदवाक्याऽऽगमप्रामाण्याच्च पुण्य-पापास्तित्वं प्रतिपत्तव्यम्, अन्यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येतदपार्थकं स्यात् । अथ यस्य नास्ति पुण्यं पापं वा वेदवादिनस्तस्यागमविरोधिनी प्रतिज्ञा, तथा पुण्यपापसद्भावे दानादिक्रियाप्रवृत्तिर्लोकस्येति, लोकविरोधे प्रतिज्ञादोषः ॥२४०२॥ एवं बहुशः उपपत्तिबलात्—

**छिण्णम्मि संसयम्मिं जिणेण जरमरणविप्पमुक्केणं ।**
**सो समणो पव्वइतो तोहि तु सह खंण्डियसतेहिं ॥४७६॥२४०३॥**

एवं नवमगणधरवक्तव्यताऽऽख्याता ॥२४०३॥

दशमगणधरवक्तव्यताव्याख्यानसम्बन्धार्थं गाथा—

१ जधा जे त । जहा हे । २ °हिंसस्स त । ३ वाहा° को हे त । ४ °विभागो हे त । ५ तत्त्वार्थ ८. २६ । ६ °त्ताइं को हे । ७ °णाइं फ° को । ८ °ण्णंमि हा म । °ण्णंमी दी । ९ °यम्मी को हे त । °यंमी दी हा म । १० जाइजरामर° म । ११ तिहि त । तिहि उ हा दी । तिहिं को । तिहि ओ सह हे । तीहिं उ म । १२ खंडि° को हे दी हा म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ते पव्वइते सोतुं मेतज्जो आगच्छती जिणस[१५८-द्वि०]गासं।**
**वच्चामि णं वंदामि वंदित्ता पज्जुवासामि ॥४७७॥२४०४॥**
**आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं।**
**नामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४७८॥२४०५॥**
**किं मण्णे परलोगो अत्थि णं अत्थि त्ति संसयो तुज्झं।**
**वेतपताण य अत्थं ण याणसी तेसिमो अत्थो ॥४७९॥२४०६॥**

**ते पव्वइते। किं मण्णे** इत्यादि। हे आयुष्मन् कौण्डिन्य मेतार्य! परलोकास्तित्वे भवतः सन्देहः, सन्देहकारणं च लोकवेदयोरुभयथा प्रतिपत्तेः। केचिल्लौकिकाः "इन्द्रियप्रत्यक्षमेवैकं प्रमाणम्" इति वदन्तः परलोकं जीवं वा प्रत्यक्षाविषयत्वात् नेच्छन्ति, "एतावानेष पुरुषो यावानिन्द्रियगोचरः" इति। अन्ये लौकिकाः "आध्यात्मिकाः सङ्घाताः सर्वे परार्थाः, सङ्घातत्वात् बाह्यशयनादिसङ्घातवत्" [ ] इत्याद्यनुमानैः

"किमत्राहं किमनहं, किमनेकः किमेकधा।
विदुषां चोद्यतं चक्षुरत्रैव च विनिश्चयः ॥१॥"

इत्यादिभिश्च जीवास्तित्वमभीप्सन्ति। वेदोऽपि "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति" इति परलोकनास्तित्वमनुवदति। तथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" "स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गलोकं गच्छति" [ ] इति परलोकास्तित्वमाह ॥२४०६॥

एवमुभयथा श्रुतेः सन्देह इत्येतदर्थरूपप्रकाशनाय गाथाप्रपञ्चः—

**मण्णसि जति चेतण्णं मज्जंगमतो व्व भूतधम्मो त्ति।**
**तो णत्थि परो लोगो तण्णासे जेण तण्णासो ॥२४०७॥**

**मण्णसि।** भूतधर्मश्चैतन्यम्, तत्समुदायभावित्वात्, मद्याङ्गमदवत्, भूतविनाशे भूतविभागे वा चैतन्यविनाशेन भवितव्यम्, तध(द्ध)र्मत्वात्, मद्याङ्गमदवत्, तस्मान्नास्ति परलोकः, एकस्य संसर्तुरभावात्, गन्धर्वनगरवत् ॥२४०७॥

**अह वि तयत्थंतरता ण य णिच्चत्तणमओ वि तदवत्थं।**
**अणलस्स वे अरणीओ भिण्णस्स विणासधम्मस्स ॥२४०८॥**

**अह वि तयत्थंतरता** इत्यादि। अथापि तच्चैतन्यं भूतेभ्योऽर्थान्तरमेव, विसदृशधर्मत्वात्, तथापि तदनित्यं चैतन्यम्, विज्ञानमात्रत्वात्, तस्य चानित्यत्वात् परलोकसं-

१ °दामी को हे त दी हा म। २ नत्थि त्ति को हे त दी हा अत्थी। नत्थि म। ३ तुज्झ को हे त। ४ जह को। ५ मज्जगमउ को। °गमउ हे। ६ नत्थी त। ७ पर हे त। ८ तद° को हे। ९ वाऽर° को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सरणं नास्तीति तदवस्थमेव परलोकनास्तित्वमिति । यथाऽरणितः समुत्पन्नस्यानलस्यारणितश्च भिन्नस्य विनाशधर्मणः स्वरूपाभावे न कचिद् गमनमेवं चैतन्यस्यापीति ॥२४०८॥

अथैतद्दोषपरिहारेण बहूनि विज्ञानात्मकानि चैतन्यान्यपास्यैक एव तदाश्रयः कश्चिद्धर्मी सर्वगतो निष्क्रियोऽभ्युपगम्येत—

**अह एगो सव्वगओ णिक्किरिओ तह वि णत्थि परलोगो ।**
**संसरणाभावाओ वोमस्स व सव्वपिंडेसु[1] ॥२४०९॥**

अह गाहा । एवमपि नास्ति परलोकः, संसर्तुरभावात् । न संसरत्यात्मा नित्यत्वात्, निष्क्रियत्वात् सर्वगतत्वाच, व्योमवत् ॥२४०९॥

**इधलोगातो[2] व परो[3] सुरादिलोगो ण सो वि पच्चक्खो ।**
**एव पि ण परलोगो[4] सुव्वति य सुतीसु तो संका ॥२४१०॥**

इधलो० गाहा । इहलोकात् परलोकः सुर-नारकादिलोकः । सोऽपि नास्ति अप्रत्यक्षत्वात्, खरविषाणवत् । श्रुति-स्मृति-लोकप्रवादेषु च श्रूयते परलोकः, तस्मादाशङ्का परलोकं प्रति भवत इति एवं भगवता हृदयस्थस्तस्य संशयः प्रकटीकृतः ॥२४१०॥

तदपनोदार्थमाह—

**[5]भूतिन्दियातिरित्तस्स चेतणा सो य दव्वतो णिच्चो ।**
**जातिस्सरणातीहिं पडिवज्जसु वायुभूति व्व ॥२४११॥**

**भूतिन्दियातिरित्तस्स चेतणा ।** भूतेन्द्रियातिरिक्तस्य कस्यापि चेतना धर्मः, भूतेन्द्रियेषु कदाचिद् भावात्, सुखदुःखवत् । यस्यासौ चेतनाधर्मः स द्रव्यार्थतो नित्यः पर्यायार्थतश्चानित्यः[6] सक्रियश्च । ततः संसरति । जातिस्मरणादिभ्यश्च विहितोपपत्तिभ्यः प्रतिपद्यस्व वायुभूतिवत् तृतीयगणधरवक्तव्यतानिर्देशमाह लाघवार्थम्, ता एवोपपत्तय इहापि योज्या इति ॥२४११॥

**ण य एगो सव्वगतो णिक्किरियो लक्खणातिभेतातो ।**
**कुंभा[१५९-प्र०]तीओ[7] व्व बहवो पडिवज्ज तमिन्दभूति[8] व्व ॥२४१२॥**

**ण य एगो** इत्यादि । न चैक आत्मा सर्वगतो निष्क्रियश्च । किं । तर्हि ? बहवः आत्मानः, भिन्नलक्षणादित्वात्, कुम्भादिवत् । इन्द्रभूतिवदिति प्रथमगणधरवक्तव्यतातिदेशोऽत्र द्रष्टव्य इति ॥२४१२॥

---

१ °पिंड° को हे । २ °धपरलो° त । ३ पुरो त । ४ परो लो° को । ५ भूइंदि° को हे । ६ र्थता चा॰ इति प्रतौ । ७ दउ को हे । ८ °मिंद° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**इधलोगातो य परो सोम्म ! सुरा णारगा य परलोगो ।**
**पडिवज्ज मोरियाकंपिये व्व विहितप्पमाणातो ॥२४१३॥**

**इधलोगातो य** इत्यादि । इहलोकात् परलोकः सुरनारकाः । ते च प्रमाणैः प्रतिपादिता मौर्याकम्पितवक्तव्यताद्वये । तदिहापि सर्वं योज्यमित्यादि ॥२४१३॥

अपि च—

**जीवो विण्णाणमयो तं चाणिच्चं ति तो ण परलोगो ।**
**अध विण्णाणादण्णो तो अणभिण्णो जधागासं ॥२४१४॥**

**जीवो विण्णाणमयो** । जीवो विज्ञानमयः । तच्च विज्ञानमनित्यम् । अनित्यत्वात् गमनं नास्ति । ततः परलोकाभावः । अथासौ विज्ञानादनित्यादन्यः स्वयं नित्यः । अभिन्नादन्योऽनभिन्नः । द्विप्रतिषेधः प्रकृतिं गमयति- अनभिन्नो भिन्न एव । नित्यत्वाच्चाकाशवत् न कचिद् गच्छति । ततोऽपि परलोकाभावः ॥२४१४॥

**एत्तो[३] च्चिय ण स कत्ता भोत्ता य अतो वि णत्थि परलोगो ।**
**जं च ण संसारी सो अण्णाणामुत्तितो खं व्व[४] ॥२४१५॥**

**एत्तो** गाहा । नित्यत्वादेव च न कर्ता न भोक्ता, आकाशवत् । न चासौ संसारी, अज्ञत्वादमूर्तत्वाच्च, आकाशवत् ॥२४१५॥

एवमभिहिते पूर्वपक्षे उत्तरमाह—

**मण्णसि विणासि चेतो उप्पत्तिमदादितो जधा कुंभो[५] ।**
**णणु एतं[६] चिय साधणमविणासित्ते वि से सोम्म ! ॥२४१६॥**

**मण्णसि** गाहा । विनाशित्वे चेतनाया[ः] कोपपत्तिः ? इति भवतोऽभिप्रायः । चेतो विनाशि, उत्पत्ति-विगमवत्त्वात् कुम्भवत् । नन्वयमेव हेतुर्नित्यत्वे हे सौम्य कौण्डिन्य मेतार्य ! धर्मस्वरूपनिराकरणोऽयं विरुद्धः, साध्यधर्मविकलश्च दृष्टान्तः, कुम्भस्यापि नित्यत्वात् ॥२४१६॥

**अधवा वत्थुत्तणतो विणासि चेतो ण होति कुंभो[७] व्व ।**
**उप्पत्तिमंतातित्ते[८] कधमविणासी घडो बुद्धी ॥२४१७॥**

**अधवा** गाहा । अथवा प्रतिप्रमाणं विरुद्धाव्यभिचारी हेतुः । अविनाशि चेतः वस्तुत्वात् कुम्भवत् । ननु चोत्पत्तिमत्त्वमनित्यत्वानुगतं कथमविनाशित्वं चेतसो घटस्य वाऽऽपादयति ? इति इयं बुद्धिः, भवतोऽयमभिप्रायः, इयमाशङ्केति यावत् ॥२४१७॥

---

१ °पिउ को हे । °पिओ त । २ °च्चमिति को । ३ इत्तो को हे । ४ व को हे त । ५ कुम्भो को । ६ एवं त । ७ कुंभो हे । ८ °मदादित्ते हे ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

तत्प्रतिपादनार्थमुच्यते—

**रूवरसगंधफासा संखासंठाणदव्वसत्तीओ ।**
**कुम्भो त्ति जतो ताओ पसूतिविच्छित्तिधुवधम्मा ॥२४१८॥**

रूप-रस-गन्ध-स्पर्श-सङ्ख्या-संस्थान-द्रव्यशक्तयः कुम्भ इत्युच्यते, द्रव्यपर्यायोभयरूपत्वाद् वस्तुनः । ताश्च रूप-रस-गन्ध-स्पर्श-संस्थानद्रव्यशक्तयः प्रसूतिविच्छित्तिध्रुवधर्माणः, उत्पत्ति-व्यय-ध्रौव्यरूपत्वा(रूपा)त्मिका इत्यर्थः । तस्मादविनाभावात् उत्पत्तिमत्त्वादविनाशित्वा(त्व)मव्यभिचारीति ॥२४१७॥

एतदेव विस्तरतो भाव्यते ।

**इध पिण्डो [1]पिण्डागारसत्तिपज्जायविलयसमकालं ।**
**उप्पज्जति कुम्भागारसत्तिपज्जायरूवेणं ॥२४१९॥**

**इध पिण्डो पिण्डागार** इत्यादि । घटस्योत्पत्तिमत्त्वादिति यदुच्यते सा का घटोत्पत्तिः ? ननु पिण्डो विनश्यति घटश्चोत्पद्यत इति । तत्रापि पिण्डस्य न सर्वात्मना विलयः, न च घटस्य सर्वात्मनोत्पादः । किं तर्हि ? पिण्डः पिण्डाकारशक्तिपर्यायविलयसमकालं कुम्भाकारशक्तिपर्यायरूपेणोत्पद्यते इति घटोत्पत्तिरुच्यते ॥२४१९।

यस्मात्—

**रूवातिदव्वताए [१५९-द्वि०]ण जाति ण य वेति तेण सो णिच्चो ।**
**एवं उप्पातव्वयधुवस्सभावं मतं सव्वं ॥२४२०॥**

**रूवातिदव्वताए ।** यस्माद्रूपरसगन्धस्पर्शमृद्द्रव्यस्वरूपेण नोत्पद्यते, पूर्वोत्पन्नत्वात्, नापि व्येति, तेनात्मना तस्य सर्वदोपलब्धेरनपायित्वात्, तस्मात्तेन रूपेण नित्यम् । यथा च कुम्भः एवमुत्पादव्ययध्रुवस्वभावं सर्वमेव वस्तु । यथा वाऽचेतने वस्तुनि भावनैषा एवं चेतनेऽपि नित्यत्वाभिमते आत्मनीति ॥२४२०॥

**घडचेतणया णासो पडचेतणया समुब्भवो समयं ।**
**संताणेणावत्था तधेहपरलोगजीवाणं ॥२४२१॥**

**घडचेतणया णासो** इत्यादि । घटचेतना घटविज्ञानम्, पटचेतना च पटविज्ञानम् । यदा घटविज्ञानानन्तरं पटविज्ञानोत्पत्तिस्तदेवं भावना-घटचेतनया जीवस्य नाशः, पटचेतनया समुद्भवः, समकमेव जीवसन्तानेनावस्थानं ध्रुवत्वम् । तथैव परलोकजीवानाम् ॥२४२१॥

१ पिंडो को । २ पिंडा॰ को । ३ कुंभा॰ हे । ३ त्ति कुंभाइरू॰ त । ४ रूवाइं हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**मणुएहलोगणासो सुरातिपरलोगसंभवो समयं ।**
**जीवतयावत्थाणं णेहभवो णेयं परलोगो ॥२४२२॥**

**मणुएहलोग०** इत्यादि । मनुज इतीहलोकः तेन [1]मनुजेहलोकतया जीवस्य नाशः, सुरपरलोकतया उत्पादः, समकमेव जीवतया चावस्थानम्, ध्रुवत्वमित्यर्थः । तस्यामवस्थायां नेहलोको न परलोकः । पर्यायाणां द्रव्यमात्रे अविवक्षेति ॥२४२२॥

इयं चोपपत्तिर्यस्मात्—

**असतो णत्थि पसूती होज्ज व जति होतु खरविसाणस्स ।**
**ण य सव्वधा विणासो सव्वुच्छेदप्पसंगातो ॥२४२३॥**
**तोऽवत्थितस्स केणयि[3] विलयो धम्मेण भवणमण्णेणं ।**
**[4]वत्थुच्छेतो ण मतो संववहारोवरोधातो ॥२४२४॥**

**असतो णत्थि पसूतीत्यादि । तोऽवत्थि०** गाहा । अत्यन्तासतो नास्ति प्रसूतिः, असत्त्वात्, खरविषाणस्येव । घटश्चोत्पद्यते, तस्मादत्यन्ताभूतो नोत्पद्यत इति । विनश्यदपि न सर्वथा विनश्यति, सर्वोच्छेदप्रसङ्गात्, खरविषाणतुल्यतैव मा भूदिति । तस्मादवस्थितस्य केनचित् पर्यायेण विलयः, न सर्वपर्यायैः, यस्मात् सर्वोच्छेदो नाभिमतः । न च सर्वोत्पत्तिः, लोकसंव्यवहारोपरोधात् ॥२४२३-२४॥

इतश्चागमविरोधित्वमपि परलोकनास्तित्ववादिनः लोकविरोधित्वं चेति—

**असति व परम्मि लोए जमग्गिहोत्तातिं सग्गकामस्स ।**
**तदसंबद्धं सव्वं दाणातिफलं [8]च लोअम्मि ॥२४२५॥**

**असति व परम्मि लोए** गतार्था ॥२४२५॥

एवं वर्णितोपपत्तिभिः—

**छिण्णम्मि संसयम्मि जिणेण जरमरणविप्पमुक्केणं ।**
**सो समणो पव्वइतो तिहिं तु सह खण्डियसतेहिं ॥४८०॥२४२६॥[9]**

दशमो गणधरः ॥२४२६॥

एकादशगणधरवक्तव्यताव्याख्यानसम्बन्धनाय गाथासमूहः—

**तं पव्वइते सोतुं प[10]भासो आगच्छई जिणसगासं ।**
**वच्चामि [१६०-प्र०]णं वंदामिं वन्दित्ता पज्जुवासामि ॥४८१॥२४२७॥**

१ नेव को । नेह त । २ समुजः इह-इति प्रतौ । ३ णवि को हे त । ४ सव्वुच्छे° हे त । ५ °हाराव° जे । ६ °त्ताइं को हे । ७ च को हे त । ८ परलोए जे । ९ इति दशमो गणधरवादः समाप्तः-त । १० पभास म ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आभट्ठो य जिणेणं जातिजरामरणविप्पमुक्केणं ।
णामेण य गोत्तेण य सव्वण्णूसव्वदरिसीणं ॥४८२॥२४२८॥
किं मण्णे णेव्वाणं अत्थि [व] णत्थि त्ति संसयो तुज्झं ।
वेतपताण य अत्थं ण याणंसी तेसिमो अत्थो ॥४८३॥२४२९॥
मण्णसि किं दीवस्स व णासो णेव्वाणमस्स जीवस्स ।
दुक्खक्खयादिरूवा किं होज्ज व से सतोऽवत्था ॥२४३०॥

ते पव्वइते सोतुं। आभट्ठो गाहा। किं गाहा। मण्णसि गाहा। हे आयुष्मन् कौण्डिन्य प्रभास! निर्वाणास्तित्वगतो भवतः संशयः। स च वेदवाक्यानामुभयथा दर्शनाज्जातः, यत इदं वेदवाक्यम् "जरामर्यं वा एतत् सत्रं यदग्निहोत्रम्।"-[शत० १२. ४. १.१]क्रिया भूतवधभूतोपकाररूपत्वाच्छवलाकारा, जरामर्यवचनाद् यावज्जीवं नित्यक्रिया, सा चाभ्युदयफला, न चान्यः कश्चित् कालोस्ति, यस्मिन्नपवर्गप्रापणक्रियारभ्येत। तस्मान्नास्ति मोक्षः, साधनाभावात्, कारणविरहितघटवत्। तथाऽन्यद्वेदवाक्यं मोक्षास्तित्वे "सैषा गुहा दुरवगाहा" तथा "द्वे ब्रा(ब्र)ह्मणी वेदितव्ये, परमपरं ब्रह्म।" मोक्ष इति तस्या[भि]धानम्। तस्मादुभयथा विप्रतिपत्ति(त्तेः) संशयः।

तत्र निर्वाणाभावपक्षं निराकरिष्णुः पूर्वपक्षं ग्राहयति—कर्मवियोगानन्तरं जीवस्य स्वरूपाभावात्, तेन रूपेण विनष्टत्वात्, विध्यातप्रदीपवत्। एवं चेन्मन्यसे मोक्षाभाव इति। अथवा अत्यन्तदुःखक्षयात् स्वाभाविकाऽव्याबाधसुखस्वरूपा जीवस्य स्वेन रूपेण स्वत एवावस्था मोक्ष इति ॥२४२७-३०॥

अहवाऽणातित्तणतो खस्स व किं कम्मजीवजोगस्स ।
अविजोगातो ण भवे संसाराभाव एवं न्ति ॥२४३१॥

अहवाऽणातित्तणतो इत्यादि। अथवाऽनादिकारणश्च जीवकर्मसंयोगः, अनादित्वात्, जीवाकाशसंयोगवत्। अतश्च संसार एव सर्वदा, न मोक्ष इति ॥२४३१॥

विप्रतिपत्ताविदमुच्यते—

पडिवज्ज मंण्डिओ इव वियोगमिह जीवकम्मजोगस्स ।
तमणातिणो वि कंचणधातूण व णाणकिरियाहिं ॥२४३२॥

पडि० गाहा। मण्डिकवक्तव्यताऽतिदेशाद् ग्रन्थलाघवमाचार्यस्य। यत् तत्रोक्तं तदिहापि योजनीयम्। अपि च यदुक्तमपर्यवसानो जीवकर्मसंयोगोऽनादित्वादिति, अय-

१ निव्वाणं को हे दी हा म। २ अत्थी नत्थि म। ३ तुज्झ को हे त म। ४ याणसि दी हा। ५ निव्वा° को हे। ६ वि त। ७ क्रिया स्य चा°-इति प्रतौ। ८ °विओगा° को हे। ९ °वत्ति को हे। १० मंडि° को। ११ °मिह कम्मजीवजो° को हे त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मनैकान्तिको हेतुः। धातु-काञ्चनयोरनादिः संयोगः। स च सपर्यवसानो दृष्टः, क्रिया-विशेषात्। एवमयमपि जीवकर्मसंयोगः सम्यग्ज्ञानदर्शनचारित्रैः सपर्यवसानो भविष्यति। जीवकर्मवियोगश्च मोक्ष इत्युच्यते ॥२४३२॥ अथ मन्येथाः—

**जं णारगातिभावो संसारो णारगातिभिण्णो य।**
**को जीवो तो मण्णसि तण्णासे जीवणासो त्ति ॥२४३३॥**

**जं णारगातिभावो** इत्यादि। अपि च संसारः क उच्यते? ननु नारका(क)-तिर्यग्यौन-मनुष्य-देवत्वानि, नान्यः संसारः। तेभ्यश्च नारकादित्वेभ्यो भिन्नः को नाम जीवः? नारकादय एव पर्याया जीवः, तदनर्थान्तरत्वात्। संसाराभावे जीवा-भाव एवेति असत्पदार्थो मोक्षः ॥२४३३॥ अत्रापि प्रतिविधीयते—

**ण हि णारगातिपज्जायमेत्तणासम्मि सव्वधा णासो।**
**जीवद्दव्वस्स मतो मुद्दाणासे व हेमस्स ॥२४३४॥**

**ण हि** गाहा। यदुक्तम्—नारकादिसंसाराभावे सर्वथा जीवाभाव एव, अन-र्थान्तरत्वात्, नारकादिपर्यायस्वरूपवदिति। अयमप्यनैकान्तिको हेतुः—हेम्नो मुद्रिका-याश्च अनर्थान्तरत्वं सिद्धम्, न च मुद्रिकाऽऽकारनाशे सर्वथा हेमविनाश इति। यद्वा नारकादिपर्यायमात्रनाशे [न] सर्वथा जीवनाशो भविष्यति। ॥२४३४॥ एतदेव भावयति—

**कम्मकतो संसारो तण्णासे तस्स जुज्जते णासो।**
**जीव[१६०-द्वि०]त्तमकम्मकतं तण्णासे तस्स को णासो ॥२४३५॥**

**कम्मकतो संसारो** इत्यादि। संसरणं संसारो नारकादिपर्यायानुभवनम्। तस्य कर्मणो नारकादिपर्यायकारणस्याभावे युक्त एव नारकपर्यायविनाशः, कार-णाभावात् कार्याभाव इति। यत् पुनर्जीवत्वमेतत् कर्मकृतं न भवति, अनादिपारि-णामिकभावत्वाज्जीवत्वस्य। ततस्तत् कर्मविनाशेऽपि न नङ्क्ष्यति। नारकपर्याय-मात्रेण तु विनङ्क्ष्यति, न सर्वात्मना जीवः। तस्मात् संसाराभावेऽपि मुक्तात्मना जीवोऽवतिष्ठत इति मुक्तसद्भावः ॥२४३५॥

१ णागराति° त। २ नारया° को, णागराति° त। ३ जीवो तं को हे त। जीवा तो—जे। ४ °गायप° त। ५ तत्तो से त ६ अस्स को।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इतश्च नित्यो जीवः, अत्रानुपलभ्यमानविकारत्वात्, आकाशवत्, यश्च नित्यो न भवति तस्यावश्यं विकार उपलभ्यते, यथा घटस्य कपालानि शर्करिका [1]पांश्वादि वा, पटस्य तन्तवः तद्भेदप्रभेदा वा । [2]एतदर्थप्रदर्शिनी गाथा--

**ण विकाराणुवलंभादागासं पिव विणासधम्मो सो ।**
**इह णासिणो विकारो दीसति कुंभस्स वावयवा ॥२४३६॥**

**ण विकाराणुवलंभा०** इत्यादि । गतार्था ॥२४३६॥

अथवाऽभिप्रायो भवतः—

**कालंतरणासी वा घडो व्व कतकादितो मती होज्जा ।**
**णो पद्धंसाभावो भुवि तद्धम्मा वि जं णिच्चो ॥२४३७॥**

**कालंतरणासी वा** इत्यादि । यद्यपि न क्षणप्रध्वंसी घटस्तथापि कालान्तरविनाशी दृष्टः एवं कालान्तरविनाशी जीवो भविष्यति, सुर-नारकादिपर्यायैः कृतकत्वाद्, घटवत् । एवं मोक्षोऽप्यनित्यो भविष्यति, कृतकत्वाद्, घटवदेव । अयमनैकान्तिको हेतुः—प्रध्वंसाभावो न विनश्यतीति नित्यः, अथ च तत्रापि कृतकत्वं दृष्टमिति । कपालानां मुद्गराद्यभिघातात् कृतकत्वमिति । ननु चायुक्तमिदमुच्यते, प्रध्वंसाभावः कृतक इति । अ(य)स्मादुक्तम्—

"हेतुर्यस्य विनाशोऽपि तस्य दृष्टोऽङ्कुरादिवत् ।
विनाशस्तु विनाशस्य नास्ति तस्मादहेतुकः" ॥१॥

अहेतुकत्वाद् विनाशस्य कृतकत्वं नास्ति, अभावत्वात्, खरविषाणस्येव ॥२४३७॥

अत इयं गाथा—

**अणुदाहरणमभावो खरसंगं पिव मती ण तं जम्हा ।**
**कुम्भविणासविसिट्ठो भावो च्चिय पोग्गलमयो सो ॥२४३८॥**

**अणुदाहरणमभावो** इत्यादि । 'अकृतकः प्रध्वंसाभावः, अभावत्वात्, खरविषाणवत्' इति यदुक्तं तस्यापक्षधर्मत्वं हेतोः—भाव एव प्रध्वंसाभावः, पुद्गलमयत्वात् प्रागभावमृत्पिण्डवत् । तत् किमुच्यते प्रध्वंसाभाव इति ? आह—कुम्भविनाशोपलक्षितत्वात् कपालानां भावरूपाणामेवाऽपरापेक्षयैऽभावत्वात् । यथा कुम्भानुत्पत्तिमात्रविशेषणान् मृत्पिण्डस्य प्रागभावत्वं भावस्यैव, तद्वत् प्रध्वंसाभावस्येति अभावत्वमसिद्धम् । ततश्च कृतकत्वं नित्यत्वं च सिद्धं भवति ॥२४३८॥

---

१ °कायांस्वादि-इति प्रतौ । २ इत्यनन्तरं अन्नशोमर्थीमहस्मादि'-इति वर्तते । तस्य तु-संगतिर्न ज्ञायते । ३ विगा° को हे । ४ विगा° को हे । ५ °वाहिप्रा° इति प्रतौ । ६ कयगा° को हे । ७-८ प्रतौ-शञ्च-इति पाठः । ९ सिंगं को त । १० °यात्माभा° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथवा यदुच्यते नारकादिपर्यायेण कृतकत्वं जीवस्य, संसाराभावात् कर्मापगमात् मुक्तात्मना वा मोक्षस्य कृतकत्वमिति तदसिद्धत्वप्रकाशनायाह--

**किं वेगंतेण कतं पोग्गलमेत्तविलयम्मि जीवस्स ।**
**किं णिव्वत्तितमधियं णभसो घडमेत्तविलयम्मि ॥२४३९॥**

**किं वेगंतेण** कतमित्याह । कर्मपुद्गलसंयोगविनाशे जीवस्तदवस्थ एव नित्योऽकृतकश्च, द्रव्यरूपत्वात्, संयोग(गि)घटविनाशे आकाशवदिति ॥२४३९॥

अपि च प्रमाणं नित्यो जीवः द्रव्यार्थ(र्था)मूर्तत्वादाकाशवत् । एतदर्थं गाथापूर्वार्द्धम्--

**दव्वामुत्तत्तणतो मुत्तो णिच्चो णभं व दव्वतया ।**

**दव्वामुत्तत्तणतो** इत्यादि । अयमेवेष्टविघातकृद् विरुद्ध इति पश्चार्द्धेन दर्शयति ।

**णणु विभुतातिपसंगो एवं सति णाणुमाणातो ॥२४४०॥**

**णणु विभुतातिपसंगो** इत्यादि । तद्वदाकाशवत् सर्वगतत्वमपि जीवस्य प्राप्नोति । तच्चार्हतानामनिष्टम् । तस्माद्विरुद्धः । एवं सति 'णाणुमाणातो' सर्वगतत्वमनुमानविरुद्धमिति निराक्रियते--न सर्वगतो जीवः, त्वक्पर्यन्त[1]मात्रशरीरव्याप्येव, तत्रैवोपलभ्यमानगुणत्वात् घटवत् । त(अ)तश्च न सर्वगतो जीवः--बध्यमानत्वाच्च, अपराधिबद्धमुक्तदेवदत्तवत्, काष्ठभारकवद्वा । यच्च सर्वगतं तन्न बध्यते, आकाशवत् । एवमनुमानादिष्टविघातकृद्विरुद्धाभावः ॥२४४०॥

अथवा कोऽयमेकान्तग्राहः--सर्वथा नित्यमेवानित्यमेव वा, कृतकमेवाऽकृतकमेव वा, यस्मात् सर्ववस्तु पर्यायान्तरमात्रार्पणात् नित्यमप्यनित्यम्, अनित्यमपि नित्यं भवति, कृतकमकृतकं च, उत्पाद-व्यय-ध्रौव्यस्वरूपत्वाद्, घटाङ्गुलिद्रव्यादिवत् । तदर्थप्रदर्शिनी गाथा--

**को वा णिच्चग्गाहो[3] सव्वं चिय विभवभंगट्ठितिमइयं ।**
**पज्जायंतरमेत्तप्पणा[4]दि णिच्चातिववदेसो ॥२४४१॥**

**को वा णिच्चग्गाहो** इत्यादि । विविधो भवो विशिष्टो वा विभव उत्पादः । भञ्जनमामर्दनमन्यथा भवनं भङ्गो विनाशः । स्थितिरवस्थानं ध्रौव्यमित्यर्थः । विभवभङ्ग-स्थितिभिर्निर्वृत्तं विभवभङ्गस्थितिमयम् । अत एव [5]त्रितयमयस्य वस्तुनः पर्यायमात्रविवक्षावशात् येन येन रूपेणाऽर्प्यते तत्सम्भविना तत्तद्व्यपदेशं प्रतिपद्यते, इतरव्यपदेशानविवक्षितान्न(न्ना)पनयत्येव, न चोपादत्ते । अपरित्यक्तानुपात्तरूपास्ते

---

१ जीवः स्वकार्ये त मात्र°-इति प्रतौ । २ नापदिष्टंविघात°-इति प्रतौ । ३ °च्चगा° को । ४ प्पणादिणिच्चा° को °प्पणादनि° हे । ५ एव तृत°-इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

व्यपदेशास्तत्र संनिहिता एव, सम्बन्ध्यन्तरसम्बन्धविशेषापेक्षित्वात्, पितृपुत्रनप्त्रादिसम्बन्धविशेषणविशिष्टपुरुषवत् । नित्यवस्तु मृत् पिण्डरूपविवक्षान्तरप्राप्तत्वादनित्यम्, शिवकादिरूपेण जायमानत्वात् पूर्वरूपपरित्यागात् । अनित्यं शिवकादि विवक्षान्तरप्रापणान्नित्यम्, मृद्द्रव्यस्वरूपानतिरिक्तत्वात । केऽन्ये शिवकादयोऽन्यत्र मृद्द्रव्यात्, सुवर्णकटकाङ्गदादिवत् ॥२४४१॥

यच्चोक्तम्—कर्मवियोगानन्तरं जीवस्वरूपनाश एव अनुपलभ्यतद्विकारत्वात्, प्रदीपानलवदिति । तद्दूषणाय गाथा—

**ण य सव्वधा विणासोऽणलस्स परिणामतो पयस्सेव ।**
**कुंभस्स कवालाण व तधा विकारोवलंभातो ॥२४४२॥**

**ण य सव्वधा विणासो** इत्यादि । न सर्वथा विनाशः प्रदीपानलस्येति साध्यधर्मशून्यताऽपि दृष्टान्तस्य, परिणामित्वात्, पयस इव । तथा कुम्भि(म्भ)कपालदर्शनेवदुपलभ्यमानविकारत्वात् साधनधर्मशून्यतापि प्रदीपानलदृष्टान्तस्याख्यायते ॥२४४२।

अपर आह—

**[१६१-प्र०] जति सव्वधा ण णासोऽणलस्स किं दीसते ण सो सक्खं ।**
**परिणामसुहुमयातो जलदविकारंजणरयो[3] व्व ॥२४४३॥**

**जति सव्वधा ण णासो** इत्यादि । यदि सर्वथा न नश्यति प्रदीपानलः, ततः किमिति कपालवत्तद्विकारः प्रत्यक्षं नोपलभ्यत इति । अतो नास्त्येव तद्विकारः, प्रत्यक्षेणानुपलभ्यमानत्वात्, खरविषाणवत् । अयमनैकान्तिक इति दर्शयति—जलदादीनां पुद्गलात्मकत्वात् संघातविशेषादैन्द्रियकत्वम्, तेषामेव सूक्ष्मपरिणामात् पुनरदृश्यत्वम्[6], न परमाणवो विनश्यन्ति । तस्माज्जलदविकारः सन्नपि प्रत्यक्षेण नोपलभ्यत इत्यनैकान्तिकहेतुत्वम् । अञ्जनरजोवदिति दृष्टान्तबाहुल्यं सुखप्रतिपत्त्यर्थम् । संघातात् परिणामाच्चैन्द्रियकं बादरं भवतीति ॥२४४३॥

एतत् प्रपञ्चेन दर्शयन्नाह—

**होतूणमिन्दियंतरगज्झा पुणरिन्दियन्तरग्गहणं ।**
**खन्धा एन्ति ण एन्ति य पोग्गलपरिणामता चित्ता ॥२४४४॥**
**[10]एगेगिन्दियगज्झा जध वायव्वादयो तधऽग्गेया ।**
**होतुं चक्खुग्गज्झा घाणेतिगज्झतामेन्ति ॥२४४५॥**

---

१ नवहुप॰ इति प्रतौ । २ विगारं को हे । ३ सु को हे । ४ न कस्येति-इति प्रतौ । ५ जलदानात्पु॰-इति प्रतौ । ६ ॰त्वम्-इत्यनन्तरं 'न परदृश्यत्वम्' इत्यधिकम् । ७ ॰ऊणं इन्दि॰ को । ॰ऊण इन्दि॰ हे । ८ ॰रिंदियं॰ को हे । ९ खंधा एंति न एंति को हे । १० गेगंदि॰ को हे । ११ घाणिंदियगज्जं को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**होतूणमि**त्यादि। **एगेगिन्दियगज्झा** इत्यादि[1]। **होतूणमि**ति भूत्वेति संस्कृतस्य प्राकृतरूपसिद्ध्या होतूणेति भवति। क्वचिदभूतस्याप्यनुस्वारस्य प्रयोगो देशीपदच्छन्दोनुवृत्तिवशात्। **होतूणमिंदियंतरगज्झा** विवक्षितादिन्द्रियादन्यदिन्द्रियं इन्द्रियान्तरं तस्मादपीन्द्रियत्वेन विवक्षितात् पूर्वमिन्द्रियान्तरमिति। विचित्रपरिणामता पुद्गलानां लोकप्रसिद्ध्या। बादरं सूक्ष्मं भवति, सूक्ष्ममपि बादरं भवति दीनारेषु स्थूलमपि रूप्यकं ताम्रकं च प्रयोगपरिणामविशेषात् सूक्ष्मीभवति, दीनाराद-पकृष्यते, तद्रूपश्च दीनारोऽवतिष्ठते। पुनश्च सूक्ष्मरूप्यकं ताम्रकं च भस्मनिलीनं प्रयोगविशेषादग्निपाकाद्विवेच्य स्थूलं चक्षुःस्पर्शग्राह्यं पिण्डीभूतं च प्रदर्श्यते। लवणं च चक्षु-स्पर्शग्राह्यं घन-कर्कशं भूत्वा अप्सु सूपे वा चक्षु-स्पर्शविषयं न भवति, रसन-घ्राणेन्द्रियान्तरग्राह्यतां प्राप्नोति। एवमेकैकेन्द्रियग्राह्या वाय्वग्न्यादयो भूत्वा पुनस्तस्येन्द्रियस्याविषयत्वं यात्वा इन्द्रियान्तरविषयतामनुभवन्तीति चित्रता पुद्गलपरिणामस्य। एवं प्रदीपानलोऽपि सूक्ष्मधूममषीपरिणामात् सूक्ष्मतामुपगच्छति, नाभावो भवतीति ॥२४४४-४५॥

तद्वज्जीवोऽपि कर्मफलशरीरादिसम्बद्धत्वात्[2] स्थूलः स कर्मविगमात् स्वाभाविकाऽमूर्त्तपरिणाममनाबाधसुख[म]दुःखलक्षणं सूक्ष्मपरिणामं प्राप्तः परिनिर्वाण उच्यते इति। एतदर्थदर्शनी गाथा—

**जध [3]दीवो णिव्वाणो परिणामंतरमितो[4] तधा जीवो।**
**भण्णति [5]परिणेव्वाणो पत्तोऽणाबाधपरिणामं ॥२४४६॥**

**जध दीवो** गतार्था ॥२४४६॥

तस्य चैवं परिनिर्वृतस्यानाबाधलक्षणं सुखमस्तीत्युच्यते—

**मुत्तस्स परं सोक्खं णाणाणाबाधतो जधा मुणिणो।**
**तद्धम्मा पुण विरहादावरणाबाधहेतूणं ॥२४४७॥**

**मुत्तस्स परं सोक्खं** इत्यादि। मुक्तस्य कर्मभिर्जीवस्य परं सौख्यमस्ति ज्ञानित्वात्, अनाबाधत्वाच्चैवं[6] प्रज्ञानोत्पत्तिः, निःसङ्गस्य मुनेरिव। उक्तं च—

"नैवास्ति राजराजस्य तत् सुखं नैव देवराजस्य।
यत् सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥" [प्रशम० १२८]

यदि वा कश्चित् ज्ञानित्वमनाबाधत्वं चाऽसिद्धं मन्येत तत्प्रसाधनार्थम्—तद्धर्मा पुनः स्वाभाविकेन प्रकाशेन प्रकाशवान्[7] जीवः प्रकाशावरणरहितत्वात्, चन्द्रांशुवत्॥

१ °दिवत्-इति प्रतौ। २ °बन्धत्वात्-इति प्रतौ। ३ दिव्वो ४ °मन्तर° हे। ५ गिनिव्वा को· हे। ६ त्वाच्चावाप्र-इति प्रतौ। ७ जीवरहितप्रकाशावरणत्वात् इति प्रतौ। द्रष्टव्या को०वृत्तिरत्र। तत्रापि 'रहित'पदस्य विपर्ययोः दृश्यते।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

"स्थितश्चन्द्रांशुवज्जीवः प्रकृत्या भावशुद्धया ।
चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥१॥" [ योगद० १८१ ]

अनाबाधसुखसम्बन्धी जीवः विरहिताबाधहेतुत्वात् ज्वरापगमस्वस्थनरवत् अपि चोक्तम्—

"व्याबाधाभावाच्च स सर्वज्ञत्वाच्च भवति परमसुखी ।
व्याबाधाभावोऽत्र स्वस्थस्य ज्ञस्य नेनु सुसुखम् ॥२॥" ॥२४४७॥

अथवा कश्चिदाह—

**मुत्तो करणाभावादण्णाणी खं व णणु विरुद्धोऽयं ।**
**जमजीवता वि पावति एत्तो च्चिय भणति तं णाम ॥२४४८॥**

**मुत्तो करणाभावा**दित्यादि । अज्ञानी मुक्तः, अकरणत्वादाकाशवत् । नन्वेवं धर्मिस्वरूपविपर्ययसाधनाद्विरुद्धः—आकाशवदजीवोऽपि मुक्तः प्राप्नोति एतस्मादेव हेतोरिति । एवमाचार्येणोक्ते परः किल प्रत्याह—भवतु तन्नाम । नामेत्यनुज्ञायाम्—अजीवो नाम मुक्तो भवतु, न कश्चिद्दोषः । एषोऽस्याभिप्रायः—विरुद्धोऽसति बाधने, तन्नामाऽजीवत्वमिष्टमेवेति सिद्धसाधनाद्विरुद्धाभाव इति । ननु चैवमार्हतस्य ब्रुवाणस्य स्वतोऽभ्युपगमविरोध इति बाधने सति कथं विरुद्धता चोद्यते ? सर्वत्र च विरुद्धानैकान्तिकत्वेषूभयसिद्धस्य परिग्रह इति न्यायलक्षणात्, मा वा ॥२४४८॥

अत्र परिहारगाथा—

**दव्वामुत्तत्तसभावजातितो तस्स दूरविवरीतं ।**
**ण हि जच्चंतरगमणं जुत्तं णभसो वें जीवत्तं ॥२४४९॥**

इयमप्यसम्बद्धा । यतः परेणैवं चोदिते एषा युज्यते वक्तुम्, न स्वयं चोदिते विरुद्धे, तत् कथमेतद् गमनीयम् ? **पूज्यक्षमाश्रमणपादानाम**भिप्रायो लक्षणीयः । उच्यते—परस्यापि जीवपदार्थश्चाऽजीवपदार्थश्चेत्युभयं विद्यते । जीवः संसारी मुक्तश्चेति द्वेधा । तस्य मुक्तस्याऽजीवत्वापादनमनिष्टमेव । परस्यैकान्तवादिनः पदार्थसङ्करापत्तिभयात् तस्याऽजीवत्वम(त्वा)भ्युपगम एव विरोध एव, न सिद्धसाधनं भवति । यत्तु तेनाभ्युपगम्यते भवतु तन्नामेति सा मूढता तस्य । तन्मूढताप्रदर्शनार्थं परिहारगाथा युज्यते **दव्वाऽमुत्तत्तसभावजातितो** इत्यादि । आर्हतानां तु सर्वविषयाऽनेकान्तवादिनां मुक्तस्यापि जीवाजीवोभयधर्माभ्यनुज्ञानात् केनचिदंशेन नयवादान्तरविवक्षाव

१ °स्य परमसुखं हे० । २ तन्नाम को हे । ३ बाधने नन्नामो जी°—इति प्रतौ । ४ वमाहा ॥ तस्याब्रुवा° इति प्रतौ । ५ व्व हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शात् अजीवत्वमिष्टमेवेति नाभ्युपगमविरोधः। ततश्चासति बाधने विरुद्धचोदनेति युक्तमेवाचार्येण भण्यते, स्वयमार्हतस्याभ्युपगमविरोधाभावात्, परस्य च जीवपदार्थस्याजीव[त्व]प्राप्तेरनिष्टापादनात्।

कदाचित् सर्वात्मगुणहाने सिद्धत्वप्राप्तावजीवत्वमेवेत्यभ्युपगच्छेत् पर इति। तन्निवारणार्थमियं गाथा युज्यते–दव्वामुत्तत्तसभावजातितो। द्रव्यं चामूर्त्तत्वं चेति द्रव्याऽमूर्त्तत्वे ताभ्यां द्रव्यामूर्त्तत्वाभ्यां स्वभावजातिरात्मपदार्थश्चेतनः। अजीवपदार्थेभ्योऽन्येभ्य आकाशादिभ्यो द्रव्यत्वामूर्त्तत्वसामान्येऽपि न स्वभावजात्येकत्वं भवति, जात्यन्तरगमनमेव, नभस इवाचेतनस्य सतो जीवत्वगमनमिति, दूरविपरीतजात्यन्तरत्वात्। तस्मात् मुक्तस्याऽजीवत्वमनिष्टं सर्वप्रवादेष्वात्मपदार्थाभ्युपगमेषु। तच्चाजीवत्वमापद्यमानं हेतुफलाद् विरुद्धमिति स्फुट एव विरुद्धः ॥२४४९॥

ततश्च करणाभावादज्ञानी मुक्त इत्येतदसाधनम्, करणानां ज्ञानस्य चात्यन्तव्यतिरेकात्। कथमिति तदर्थं गाथा–

**मुत्तातिभावतो [1]णोवलद्धिमं[2]तिन्दि[3]याइं कुँ[4]म्भो व्व ॥**
**उवलंभद्दाराणि तु ताइं जीवो[१६१–द्वि०] तदुवलद्धा ॥२४५०॥**

**मुत्ताति०** गाहा। नोपलब्धिमन्तीन्द्रियाणि इति पक्षः। मूर्त्तादि[मत्त्वात्]। मूर्त्त[त्वं च पुद्गलसंघातरूप]त्वात् अचेतनत्वादिति। आदिग्रहणादनेकहेतुत्वम्. यत्तु ज्ञानं अनुभवसिद्धं दृष्टं तदात्मस्वरूपम्। इन्द्रियाणि तु तस्योपलब्धिद्वाराणि। [तत्र] चोपलब्धा जीवः ॥२४५०॥

न चेन्द्रियाण्यात्मा। कुतः? यस्मादियं गाथा—

**तदुवरमे वि सरणतो तव्वावारे वि णोवलंभातो।**
**इंदियभिण्णो आ[5]ता पंचगवक्खोवलद्धा वा ॥२४५१॥**

**तदुवरमे** वि गाहा। अत्र प्रमाणद्वयं यथाक्रमेण–इन्द्रियेभ्योऽन्य आत्मा [6]ज्ञाता, तदुपरमेऽपि तद्द्वारोपलब्धार्थस्मर्तृत्वात् पञ्चगवाक्षेभ्य इव देवदत्तः। अथवा इन्द्रियेभ्योऽन्यः आत्मा ज्ञाता, तद्व्यापारेऽप्यनुयुक्तस्यानुपलब्धृत्वात्, विवृतगवाक्षे इवान्यमनस्कदेवदत्तः। तस्मादात्मा ज्ञानस्वरूपः सर्वदा, [न] ज्ञानरहितः कदाचिदपि। आवर[7]णापगमसम्बन्धात्तु शुद्धाऽशुद्धज्ञानत्वं विशेषः ॥२४५१॥

१ मेवेत्युपर-इति प्रतौ। २ °द्धिमिति° त ३ °तिंदि° को हे। ४ °कुंभो हे। ५ णाता जे। ६ ज्ञानात्तदु°- इति प्रतौ। ७ °रणाप्रथमस°—इति प्रतौ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यस्य पुनर्ज्ञानरहितोऽसौ मुक्तः, तस्य जीव एवासौ न भवति, ज्ञानरहितत्वे[1] नाभ्युपगतत्वात्, परमाणुवत् । तस्माद् विरुद्धमेतत् मुक्तिभावेन सिद्धत्वेन विद्यतेऽसौ जीवः, ज्ञानरहितश्चेति, परमाणुरपि सिद्धः प्राप्नोति । तदर्थमियं गाथा —

**णाणरहितो ण जीवो सरूवतोऽणु व्व मुत्तिभावेणं ।**
**जं तेण विरुद्धमितं अत्थि य सो णाणरहितो य ॥२४५२॥**

**णाण०** गाहा । भावितार्था ॥२४५२॥

**किध[2] सो णाणसरूवो णणु पच्चक्खाणुभूतितो णियए[3] ।**
**परदेहम्मि वि गज्झो स पवित्तिणिवित्तिलिंगातो ॥२४५३॥**

कथं पुनरात्मा ज्ञानस्वरूप इति ? ज्ञानस्वरूप आत्मा, स्वात्मविज्ञानानुभवप्रत्यक्षसिद्धेः, परदेहे च इष्टानिष्टप्रतिपत्तिभ्यां स्वात्मवदित्यनुमानात् ॥२४५३॥

यदि चैवमेकदेशज्ञानावरणापगमात् किञ्चिदज्ञः, ततोऽसौ निःशेषावरणक्षयात् शुद्धतरो भविष्यत्यनावरणत्वात्, विगताभ्रावरणसूर्यवत् । प्रकाशमयत्वस्य भावादज्ञानत्वं न युक्तमिति गाथोच्यते —

**सव्वावरणावगमे सो सुद्धतरो हवेज्ज[4] सूरो व्व ।**
**तम्मयभावाभावादण्णाणित्तं[5] ण जुत्तं से[6] ॥२४५४॥**

**सव्वावरणावगमे** इत्यादि गतार्था ॥२४५४॥

एवं संसार्यवस्थायां सर्वज्ञावस्थायां सिद्धावस्थायां च प्रकाशक एव जीवः आवरणापगमविशेषात्तु किञ्चिन्मात्रावभासनं सर्वावभासनं च, प्रदीपस्येव[7] गवाक्षान्तरस्थितपुरुषस्येव वा भवतीति गाथाद्वयम् —

**एवं पयास[8]मइओ जीवो छिद्दावभासयत्तातो ।**
**किंचि[9]म्मेत्तं[10] भासति छिद्दावरणप्पदीवो[11] व्व ॥२४५५॥**
**सुबहु[12]अतरं वियाणति मुत्तो[13] सव्व[14]प्पिधाणविगमातो ।**
**अवणीत[15]घरो व्व णरो विगतावरणो[16] पदीवो व्व ॥२४५६॥**

**एवं पयासमइओ** इत्यादि । **सुबहु०** गाहा । किञ्चिन्मात्रावभासकः संसारी छिन्ना[छिन्ना]वरणत्वात् छिन्ना[छिन्ना]वरणप्रदीपवत् । उत्पन्नकेवलज्ञानः सिद्धश्च

१ ज्ञानरहितेत्वेनोभ्यु°–इति प्रतौ । २ कध । **त** । ३ विय° **को** । ४ भवे° **हे** । ५ तम्स **त** । ६ सो **त** । ७ °स्यैव इति प्रतौ । ८ पगास° **को हे** । ९ किंचि **जे त** । १० म्मेत्त° **को हे त** । ११ °णपई° **हे** । १२ °हुयरं **को हे त** १३ मुत्ता **जे** । १४ सव्वापि° **जे** १५ °णीध° **त** । १६ °रणप्प° **को हे त** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सर्वावभासको निःशेषापगतावरणत्वात् अपनीतगृहकुडच्यपुरुषवत्, विगतावरणप्रदीपवत् । एवं हि ज्ञानप्रकाशात्मकत्वं सिद्धस्याख्यातम् ॥२४५५–५६॥

अथ सांसारिकसुखदुःखानुभवाभावादत्यन्तानाबाधलक्षणसुखस्वरूपता प्रकाशनीयेति—

**पुण्णापुण्णकताइं जं सुहदुक्खाइं तेण तंणासे ।**
**तण्णासो[2] तो मुत्तो णिस्सुहदुक्खो जधागासं ॥२४५७॥**

**पुण्णापुण्णकता०** । निःसुखदुःखः सिद्धात्मा, सुखदुःखकारणपुण्याऽपुण्यात्मककर्मवियुक्तत्वात् ॥२४५७॥

**अधवा णिस्सुहदुक्खो[3] णभं व [4]देहिंदियादि[5]ऽभावातो ।**
**[१६२-प्र०] आहारो देहो च्चिय जं सुहदुक्खोवलद्धीणं ॥२४५८॥**

**अधवा** गाहा । अथवा यथा प्रमाणम्—निःसुखदुःखः सिद्धात्मा, देहेन्द्रियरहितत्वात्, आकाशवत् । सुखदुःखोपलब्धीनां देहेन्द्रियाण्याधारः । तस्याधारस्याभावे सुखदुःखयोराधेययोरप्यभाव इति ॥२४५८॥

**पुण्णफलं दुक्खं चिय कम्मोतयतो फलं व पावस्स ।**
**णणु पावफले वि समं पच्चक्खविरोधिता चेवं[7] ॥२४५९॥**

**पुण्ण०** गाहा । यदेव तत् पुण्यफलं सुखत्वाभिमतं दुःखमेवेति प्रतिपत्तव्यम्, कर्मोदयत्वात् । ननु चैवं विपर्ययसाधनमपि शक्यं वक्तुं - पापफलं दुःखत्वाभिमतं सुखमेवेति प्रतिपत्तव्यम्, कर्मोदयत्वात्, पुण्यफलवत् । अत्र प्रत्यक्षविरोधः स्वसंवेद्यः, दुःखानुभवस्य सुखत्वेनासंवेद्यत्वात् ॥२४५९॥

**जत्तो च्चिय पच्चक्खं सोम्म ! सुहं णत्थि दुक्खमेवेतं ।**
**तप्पडिकारविभत्तं तो पुण्णफलं पि दुक्खं ति ॥२४६०॥**

**जत्तो च्चिय पच्चक्खं** गाहा । यत एव प्रत्यक्षं सुखं नास्ति, अत एव सौम्य कौण्डिन्य ! सर्वं दुःखमेवेदं संसारचक्रमस्माभिः प्रपञ्च्यते । किन्तु दुःखप्रतीकाररूपत्वात् पुण्यफलं दुःखमेव सत् सुखमिति व्यपदिश्यते, गण्डच्छेदनादिचिकित्सावत् ॥२४६०॥

अतश्च—

**विसयसुहं दुक्खं चिय दुक्खप्पडिगारतो तिगिच्छं व ।**
**तं सुहमुवयारातो णे योवयारो विणा तेच्चं ॥२४६१॥**

१ तन्नासे को हे । २ °ण्णासाओ मु° को हे त । ३ °दुक्खं त । ४ देहेन्दि° को देहंदि हे । ५ °यादाभा° को हे त । ६ °खाः-इति प्रतौ । ७ चेव को हे । ८ ति हे त । ९ 'डियार' को हे । १० °गिच्छि त । ११ न य उव° को न उव° हे । १२ तित्थं त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**विसयसुहं दुक्खं** गाहा । विषयसुखं संसारानुबन्धि दुःखमेव, दुःखप्रतीकारत्वात्, अर्शोरोगप्रतीकारवदेहच्छेदवत् । नन्वेवं सुखशब्दैस्तत्रानर्थकः प्रयुज्यते । सत्यम्, अनर्थकः, परमार्थसुखं प्राप्य तत् पुनः सुखमुपचारात्, सिंहवत् । न चोपचारः परमार्थमन्तरेण भवतीति उच्यते—परमार्थसुखं सत्पदार्थः, क्वचिदुपचर्यमाणत्वात्, सिंहवत् ॥२४६१॥

**तम्हा जं मुत्तसुहं तं तच्चं दुक्खसंखएऽवस्सं ।**
**मुणिणोऽणाबाधस्स व णिप्पडिकारप्पसूतीतो ॥२४६२॥**

**तम्हा जं मुत्तसुहं** इत्यादि । मुक्तसुखं तत्त्वं परमार्थः, निष्प्रतीकारप्रसूतित्वात् परित्यक्तसर्वलोकयात्रावृत्तान्ता(त्तानाम्,) निःसङ्गयतिसुखवत् । उक्तं च—

"निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥" [प्रशम० २३८] २४६२॥

अथवान्यथा परमार्थसुखस्वरूपत्वमात्मन आख्यायते—

**जध वा णाणमयोऽयं जीवो णाणोवघाति चावरणं ।**
**करणमणुग्गहकारिं सव्वावरणक्खए सुद्धी ॥२४६३॥**
**तध सोक्खमयो जीवो पावं तस्सोवघातयं णेयं ।**
**पुण्णमणुग्गहकारिं सोक्खं सव्वक्खए सयलं ॥२४६४॥**

**जध वा णाणमयोऽयं जीवो** इत्यादि । स्वाभाविकगुणोऽयं जीवस्य मुक्तसुखम्, स्वप्रतिबन्धकाविनाभाव्यशुभकर्मोदये उपहन्यमानत्वात् । तथा स्वप्रतिबन्धकाविनाभावि देवगत्यादि, शुभकर्मोदयेऽनुगृह्यमाणत्वात्, स्वप्रतिबन्धकसर्वक्षये चात्यन्तशुद्धिपरिपूर्णत्वात्, ज्ञानगुणवत् । यथा ज्ञानावरणोदये सूक्ष्मनिगोदापर्याप्तावस्थासु प्रथमसमये एकेन्द्रियजात्याद्यविनाभाव्यशुभकर्मसु च सत्स्वत्यन्तमुपघातः, तस्यैव च देवगत्याद्यविनाभाविशुभकर्मोदये चक्षुरादिकरणैरनुग्रहोऽत्यन्तमनुत्तरौपपातिकेषु, सर्वप्रतिबन्धक्षये चात्यन्तशुद्धे सकलज्ञेयप्रकाशनात् परिपूर्णत्वम् । तच्च ज्ञानमात्मनः स्वाभाविको गुणः । एवं मुक्तसुखमत्यन्तानाबाधलक्षणं स्वप्रतिबन्धकोदये असद्वेद्याशुभपुरःसरनरकगत्यादिकर्मोदयेऽत्यन्तमुपहन्यतेऽधःसप्तमीनारकेषु, तदेव सद्वेद्यपुरःसरशुभगत्याद्यविनाभाविकर्मोदयेऽनुगृह्यतेऽनुत्तरौप[पातिकेषु, स्वप्रतिबन्धकाभावाऽ]विनाभाविमनुजगत्यादिसर्वकर्मक्षये चात्यन्तशुद्धेरपरिमाणसौख्यत्वात् परिपूर्णम् । यत आगम एवमुक्तम् "सुरगणसुहं समत्तं सव्वद्धापिण्डियं अणंतगुणं" इत्यादि ॥२४६३-६४॥

---

१ °ब्दस्त्रा° इति प्रतौ । २ मुत्ति° जे । ३ तत्थं त । ४ अह को । ५ °कारी को ६ सिद्धी त । ७ °घाइयं को हे त । ८ °कादिना इति प्रतौ । ९ एकेत्तिय° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**जध वा कम्मक्खयतो सो सिद्धत्तादिपरिणतिं लभति।**
**तध संसारातीतं पावति तत्तो चिय सुहं पि[2] ॥२४६५॥**

**जध वा कम्मक्ख०** गाहा। संसारातीतं सुखं मुक्तस्य ध(क)र्मक्षयसम्बन्धित्वात् सिद्धत्वादिधर्मवत् ॥२४६५॥

**सातासातं दुक्खं तव्विरहम्मि य [१६२-द्वि०] सुहं जतो तेणं।**
**देहिन्दिएसु दुक्खं सोक्खं देहिन्दियाभावे[6] ॥२४६६॥**

**सातासातं दुक्खमित्यादि।** सातं पुण्यफलम्, असातं पापफलम्, एतदुभयमपि देहेन्द्रियाधारप्रतिबद्धं देहेन्द्रियाभावे च उभ[यमपि न भवति] निराधारत्वात्, । अपगतकुड्यचित्रवत्। यत् पुनरिदं जीवाधारमेव संसारातीतमनाबाधसुखमेतज्जीवे आधारे विद्यमाने किमिति न भविष्यति, सदाश्रयत्वात्, घटरूपादिवत्? ॥२४६६॥

यो वा देहेन्द्रियजमेव सौख्यमिच्छति, तं प्रत्ययं दोषः-[निः]सुखो मुक्तः प्राप्नोतीति। अस्माकं त्वयमदोषः शरीरेन्द्रियाभावे संसारातीतमन्यदेव धर्मान्तरं सिद्धसुखमिति कृत्वा। एतदर्थमियं गाथा—

**जो वा देहिन्दियजं सुहमिच्छति तं पडुच्च दोसोऽयं।**
**संसारातीतमितं धम्मन्तरमेव सिद्धसुहं ॥२४६७॥**

**जो वा देहिन्दिय०** गतार्था ॥२४६७॥

तत् पुनरेवंविधं सौख्यमस्तीति कथं प्रतिपत्तव्यमिह? अनुमानात्। किमनुमानमित्युच्यते -

**कधमणुमेयं ति मती णाणाणाबाधतो त्ति णणु भणितं।**
**तदणिच्चं णाणं [14]पि य चेतणधम्मो त्ति रागो व्व ॥२४६८॥**

**कधमणुमेयं ति मतीत्यादि।** ननूक्तं प्रागनुमानं सिद्धसौख्यधर्मसम्बन्धी(धि)ज्ञानाबाधत्वात्, एवंविधमुनिवत् ॥

नन्वेवं धर्मविशेषविपरीतसाधनो विरुद्धः प्राप्नोति-यथा मुनेः सौख्यमनात्यन्तिकमेवं सिद्धस्यापि भविष्यति। अथवा पृथगेवानुमानविरोधवद् भाव्येते-'अनित्यं ज्ञानं, सौख्यं च, चेतनधर्मत्वात् रागादिवत् ॥२४६८॥

**कतकादिभावतो वा णावरणाबाधकारणाभावा।**
**उप्पातट्ठितिभंगस्स[16] भावतो वा ण दोसोऽयं ॥२४६९॥**

---

१ अह को। २ ति को हे। ३ य जओ सुहं तें को। ४ देहिं को हे। ५ देहिं को हे। ६ भावो त। ७ सापायं दु इति प्रतौ। ८ सिद्धसुद्धमि°-इति प्रतौ। ९ देहिं को हे। १० धम्मं को हे। ११ सिद्धि को हे। १२ कह णणु मे हे। १३ °बाहउ को हे। १४ वि को। १५ कयगा को हे। १६ भङ्ग को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कतकाति०** गाहा। अनित्यं ज्ञानं सौख्यं च, कृतकत्वादित्वात्[1], घटादिवत्। अत्र कृतकत्वादित्वमपक्षधर्मः, ज्ञानस्य स्वाभाविकगुणत्वात्, ज्ञानप्रतिपक्षावरणाभावात् स्वयमेव ज्ञानप्रकाशोद्भूतेः, अभ्रापगमे स्वयं ज्योत्स्नाऽऽवि[र्भावात्], कर्माभावाच्च स्वयं सौख्यस्वरूपाविर्भावात्। प्रमाणमपि–सिद्धस्य ज्ञानसौख्ये न प्रतिपक्षमलयोगिनी भविष्यतः, क्षीणप्रतिपक्षत्वात्, अत्यन्तशुद्धकनकवत्॥ एवं तावत् सिद्धस्यावरणकारणाभावाद् बाधककारणाभावाच्च नित्ये ज्ञानसौख्ये–कृतकत्वादेश्चापक्षधर्मत्वात्–[2]उक्त्वा तन्निराकरणे स्याद्वादप्रक्रियासमाश्रयात् सामर्थ्यवादं पुरस्कृत्याह–अनित्ये ज्ञानसुखे सिद्धस्येति सिद्ध[साध्यतामुपदर्शयन प]श्चार्द्धमुपन्यस्यति–**उप्पात-ट्ठितिभंगस्स भावतो वा ण दोसोऽयं**। सर्वस्यैव वस्तुनः आत्माकाशघटपटादेरुत्पादस्थितिभङ्गस्वभावत्वात् नित्यानित्यत्वे व्यपेक्षाप्रापिता(त)सांनिध्ये अविरुद्धे इति कृत्वा नैवायं दोषः धर्मविशेषविपरीतसाधनं विरुद्धत्वादिरनुमानविरुद्धादिश्चेति ॥२३६९॥

अथ वेदवादिनोऽभ्युपगमविरोधमुद्भावयन्नाह–

**ण ह वे[3] ससरीरस्स प्पियप्पियावहतिरेवमादि च[4] जं।**
**तदमोक्खे णासम्मि व [5]सोक्खाभावम्मि व ण जुत्तं ॥२४७०॥**

**ण ह वे ससरीरस्से**त्यादि। यदेतद् वेदवाक्यम्–"न ह वै शरीरस्य प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" [छान्दो० ८. १२.१] इति। एतदभ्युपगच्छतः कथं मोक्षाभावप्रतिज्ञा, प्रदीपोपशान्तिसदृशे वा मोक्षे जीवनाशप्रतिज्ञा? अथवा विद्यमानस्वरूपस्य सिद्धस्य सर्वात्मगुणहानि:(नेः) सुखदुःखस्य [हानिरिति]प्रतिज्ञायां कथमेतानि वेदपदानीति। एतेषां चार्थो व्याख्यास्यते। तस्मादभ्युपगमविरोध इति ॥२४७०॥

अथासौ पक्षे जीवनाशेऽभ्युपगमविरोधं परिहरन्नाह––

**णट्ठो असरीरो च्चिय सुहदुक्खाइं पियप्पियाइं च।**
**[6]ताइं ण फुसंति णट्ठं फुडमसरीरं ति को दोसो ॥२४७१॥**

**णट्ठो असरीरो च्चिय** इत्यादि। यस्मादशरीरं प्रियाप्रिये न स्पृशत[7] इति नष्टपक्षे अभावादशरीर एवासौ तमभाव[8]भूतं प्रियाप्रिये न स्पृशत इति सिद्धमेव वेदवाक्यम्। कोऽत्र दोष इति? ॥२४७१॥

---

१ °त्वादिवत्–इति प्रतौ। २ उक्ता यश्चि° इति प्रतौ। ३ न ह वइ **को हे**। न ह वै **त**। ४ व **को हे**। य **त**। ५ मोक्खा° **त**। ६ ताइ **जे**। ७ स्पृत–इति प्रतौ। ८ °भागभू° इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ पक्षत्रयेऽप्यक्षरव्याख्यानादभ्युपगमविरोधस्थापनम्—

**वेतपताण तमत्थं ण सुट्ठु जाणसि इमाण तं सुणसु ।**
**असरीरव्ववदेसो अधणो व्व सतो णिसेधातो ॥२४७२॥**

**वेतपताण तमत्थं ण सुट्ठु जाणसि** । हे आयुष्मन्! कौण्डिन्य! प्रभास! वेदपदानामेषां अर्थं न सुष्टु जानासि त्वम्, अधुनैतेषामर्थं शृणु। [नेत्ति निपातः प्रतिषेधार्थः। ह-वैनिपातद्वयं हिशब्दार्थे हेतौ द्रष्टव्यम्—यस्मादित्यर्थः। सह शरीरेण सशरीरस्तस्य देहवतः प्रियमिष्टं सुखमित्यर्थः। तद्विपरीतमप्रियं दुःखमित्यर्थः। तयोः प्रियाप्रिययोरपहतिरुपघातो विनाश इत्यर्थः। शरीरं हि प्रियाप्रिययोराधारस्तस्मिन् सति ते प्रियाप्रिये आधेये अवश्यमेव पर्यायेण भवत इति कथं तयोरभावः? प्रियाप्रिययोरभावो नास्ति सशरीरस्येति। वावशब्दो निपातस्तस्मादर्थे। तस्मादशरीरं सन्तं विद्यमानं देहरहितममूर्त्तं आत्मानं प्रियाप्रिये न स्पृशतः। तस्य प्रियाप्रियाभ्यां योगो नास्तीति। एवमशरीरव्यपदेशोऽस्य सत एव शरीरवियोगावस्थानव्याख्यानात् नाभावरूपप्रकाशकः। अत्र प्रमाणम्—अशरीर इति व्यपदिश्यमानः सन् पदार्थप्रतिषेधसम्बन्धित्वात्, अधनवत्। ततश्चाशरीरं सन्तं विद्यमानं प्रियाप्रिये न स्पृशत इति मोक्षावस्थायां सत्पदार्थत्वादभावं मोक्षं ब्रुवतो निःसुखं वा, तदवस्थ एवाभ्युपगमविरोध इति ॥२४७२॥

लौकिकशब्दार्थव्यवहाराच्च सम्यग् पदार्थ एवासौ। 'नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थः' इति परिभाषार्थं प्रकाशयन्नाह—

**णणिसेधतो य अण्णम्मि तव्विधे चेव पच्चओ जेणं ।**
**तेणासरीरगहणे जुत्तो जीवो ण खरसिंगं ॥२४७३॥**

**णणिसेधतो** येत्यादि। अ-मा-नो-नाः प्रतिषेधार्था इति बहुत्वात् प्रतिषेधवाचिनां सम्भवव्यभिचारयोर्विशेषणविशेष्यसमासः। नश्चासौ निषेधश्च स इति ननिषेधस्तस्मात् 'ननिषेधात्', 'अन्यस्मिंस्तद्विध एव' सत्पदार्थे 'प्रत्ययो' 'येन', 'तेन' कारणेन 'अशरीरग्रहणे' प्रतिषिध्यमानशरीरतुल्येऽर्थे जीवे संप्रत्ययो भवति, न खरशृङ्गेऽतुल्ये अभावे इति ॥२४७३॥

इतश्च कारणात्

**जं चं व[१६३-प्र०]संतं तं संतमाह वासद्दतो सदेहं पि ।**
**ण फुसेज्ज वीतरागं जोगिणमिट्ठेतरविसेसा ॥२४७४॥**

---

१ य अत्थं को हे। २ जाणासि को। ३ ताण को ४ °सदेवप° इति प्रतौ। ५ °वस्थानाव्याख्या°-इति प्रतौ। ६ सह पदा°-इति प्रतौ। ७ जेणं को। ८ °रग° हे। ९ जीवे जे। १० व हे। ११ °तं संतं तथाह को त। संतं तमाह हे। १२ °सेसो जे।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

जं च **वसंतमि**त्यादि गाथा। अथ वाशब्दो विकल्पार्थः। **अशरीरं वसन्तं** क्वापि तिष्ठन्तमित्यर्थः। ततश्च वसनाद् वसन्तमाह। वाशब्दात् सदेहमपि सशरीरमपि सन्तं प्रियाप्रिये न स्पृशतः। कः पुनः सशरीरोऽपि प्रियाप्रियाभ्यां न स्पृश्यते? अत आह--**ण फुसेज्ज वीतरागं जोगिणमिट्टेतरविसेसा**–इष्टं प्रियं तस्मादितरमप्रियम्, इष्टेतरयोर्विशेषाः इष्टेतरविशेषाः, प्रियाप्रियभेदा इत्यर्थः। ते न स्पृशेयुः वीतरागद्वेषं योगिनमिति। एकत्ववितर्कशुक्लध्यायी वीतरागश्च स एवोच्यते। अतस्तं योगिनं शुक्लध्यायिनमित्यर्थः। अतो वाशब्दो विकल्पार्थो घटितः ॥२४७४॥

अथवा नायं वाशब्दो विकल्पार्थः। किं तर्हि? वावेति–

**[1]वावेति वा णिवातो वासद्दत्थो भवंतमिह संतं।**
**बुज्झाऽव त्ति व संतं णाणातिविसिट्ठमधवाह ॥२४७५॥**

**वावे** इत्यादि। वावेति निपातो वाशब्दार्थः–विकल्पार्थ इत्यर्थः। अशरीरं वा सन्तं विद्यमानं भवन्तमित्यर्थः। तमेवंविधं प्रियाप्रिये न स्पृशतः, कारणाभावात्। विकल्पार्थत्वात् सशरीरं वा वीतरागमिति। अथवा अशरीरं वा अव बुद्ध्यस्व, 'अव रक्षण-गति-प्रीत्यादिषु' गत्यर्था धातवो ज्ञानार्था अपि भवन्तीति। सन्तं ज्ञानादिविशिष्टं सत्पदार्थं प्रियाप्रिये न स्पृशत इति एवं चाह व्याख्याता ॥२४७५॥

ननु चैवमक्षरकुट्टिरन्यथाऽपि शक्या वक्तुम्-अशरीरं वा अवसन्तं 'वस निवासे' इति नञ्पूर्वः वसनप्रतिषेधेन वाऽभावे व्याख्यातो भवति। अवसन्तमतिष्ठन्तमविद्यमानमित्यर्थः। एवं चेत् कस्यचिन् मतिः स्यात्[6], तन्निवारणार्थमुच्यते—

**ण वसंतं अवसंतं ति वा मती णासरीरगहणातो।**
**फुसणाविसेसणं [8]पिव जतो मतं संतविसयं ति ॥२४७६॥**

**ण वसंतमि**त्यादि। तत्र अशरीरग्रहणादेवैतत् सिद्धं किं पुनरुच्यते। अथैवं मन्येथाः–तस्यैवाऽशरीरत्वप्रतिपादितस्याऽभावस्य समर्थनार्थमवसन्तमित्युच्येताऽनुवादार्थम्। न चानुवादे पुनरुक्तदोष इति। तदपि च न। प्रियाप्रिये न स्पृशत इति स्पर्शनप्राप्त्यपकर्षस्सत्पदार्थविषय इति ॥२४७६॥

**एवं पि होज्ज मुत्तो णिस्सुहदुक्खत्तणं तु तदवत्थं।**
**तण्णो पियप्पियाइं जम्हा पुण्णेतरकताइं ॥२४७७॥**

---

१ वावत्ति **को हे त**। २ बज्झा **जे**। ३ वाशब्दो वि° इति प्रतौ। ४ 'ता'-इति प्रतौ। ५ वासावे एवा°-इति प्रतौ। ६ स्यात्तं नि° इति प्रतौ। ७ पुस° **जे**। ८ पि य **को हे त**। ९ तं नो **को हे**।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एवं पि** गाहा। एवमपव्याख्यानमपाकृत्यापि पूर्वव्याख्यानैर्मुक्तः सन् पदार्थ इत्येतावद्भवेत्, निःसुखदुःखत्वं तदवस्थो दोष इति। तदपि च न, मुक्तसुखस्य प्रतिपादितत्वात्। ये तु [प्रिया]प्रिये पुण्यापुण्यकृते, ताभ्यां न स्पृश्यते मुक्तः, पुण्यापुण्यकर्माभावात्। अन्यत्तु मौक्तं सुखमव्याबाधमस्त्येवेति। तच्च प्राक् प्रतिपादितम् ॥२४७७॥

**णाणाबाधत्तणतो ण फुसंति ण वीतरागदोसस्स।**
**तस्स [1]पियमप्पियं वा मुत्तसुहं को पसंगो त्थ ॥२४७८॥**

**णाणाबाधत्तणतो** इत्यादि। ज्ञानाऽनाबाधत्वात् वीतरागद्वेषस्य प्रियाप्रियाभावः, तद्वत् सांसारिकसुखदुःखाभावः सिद्धस्य, मुक्तसुखाभावे कः प्रसङ्गः? इति तद् मुक्तसुखं स्वाभाविकं स्वप्रतिबन्धविगमात् स्वयमेवाविर्भवतीत्युक्तं यत् ॥२४७८॥

**छिण्णम्मि संसयम्मि[2] जिणेण जरमरणविप्पमुक्केणं।**
**सो समणो पव्वइतो तिहिं[3] तु सह खण्डियसतेहिं ॥४८४॥२४७९॥[4]**

**॥ गणधरा समत्ता ॥**

**छिण्णम्मि संसयम्मि।** एवमेकादशो गणधरः छिन्नसंशयत्वात् सम्यग्ज्ञानप्रभासं अधिगम्य प्रभासः श्रमणो भूतस्त्रिभिः सह खंडिकशतैरिति। गणधरप्रतिपादनं प्रव्राजनं प्रव्राजनवक्तव्यता समाप्ता ॥२४७९॥

अथेदानीमेतेषामेव गणधराणामविनाभाविकारणानि निर्वर्त्तक-निमित्ताऽपेक्षा-परिणामीनि वस्तुसद्भावप्रतिपादनाय यथायोगमनुयोगाङ्गानि सम्भवत एकादशामूनि भण्यन्ते—

**खेत्ते[5] काले जम्मे [6]गोत्तमगार छतुमत्थपरियाए।**
**केवलिय आयु आगम परिणेव्वाणे[7] तवे चेव[8] ॥४८५॥२४८०॥**

द्वारगाथा ॥२४८०॥

एतेषां द्वाराणां यथानुक्रममेव प्रतिनिर्देशः ॥ क्षेत्रं जनपद-ग्राम-नगरादि—

**मगधा गोबरगामे[9] जाता तिण्णेव गोयमसगोत्ता[10]।**
**[१६३-द्वि०] कोल्लागसण्णिवेसे[11] [12]जातो वियत्तो सुधम्मो य ॥ ४८६ ॥ ॥२४८१॥**

---

१ प्पिय° हे। २ °यम्मी को हे तं। ३ तिहि ओ स° हे। ४ ॥छ॥५३॥ ४७६ गणधर वादात् पूर्वं १५४९ उभयं २०२५ इत्येकादशगणधरवादः समाप्तः तत्समाप्तौ च समाप्ता सर्वाऽपि गणधरवादवक्तव्यता ॥छ॥ त। ५ खित्ते म। ६ गुत्तम° म। ७ °रिनिव्वा° हे म। ८ इतः परं तप्रतौ 'इत्येवमेता अष्टादशनिर्युक्तिगाथाः' इत्येवं निर्दिष्टम्। गाथाः नोद्धृताः। हेप्रतावपि नोद्धृताः। ९ गोब्बर° को दी हा। गुब्बर° म। १० गोयमा जे त हे। ११ कुल्लाग° म। १२ जाउ म।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[1]मोरीयसण्णिं[2]वेसे दो भा[3]तुंग [4]मंदिमोरिया जाता।
अयलो य कोसलाए मिधि[5]लाए अ[6]कंप्पिओ जातो ॥४८७॥२४८२॥
तुंगीयसण्णिं[7]वेसे मे[8]त्तज्जो वच्छभूमिए जातो।
भयवं वि[9] य [10]पभासो रायगिहे गणधरो जातो ॥४८८॥२४८३॥

**मगधा गोवरगामे** इत्यादि गाथात्रयेण ॥२४८१–८३॥

कालो नक्षत्र-चन्द्रयोगोपलक्षितः—

जेट्ठा [11]कत्तिय साती स[12]मणो हत्थुत्तरा महाओ य।
रोहिणि उत्तरसाढा [13]मयसिर तध अस्सिणी पूसे[14] ॥४८९॥२४८४॥

**जेट्ठा कत्तिय साती** इत्यादि। एतदुभयमपेक्षाकारणम् ॥२४८४॥

अथ निमित्तकारणं परिणामिकारणं वा मातापितरौ, निर्वर्त्तककारणं कर्म नाम गोत्रं च। एतत् त्रितयं गाथात्रयेण—

वसुभूती धणमित्ते[15] धम्मिल धणदेव मोरिए देवे[16]।
[17]वसुदेवे तह दत्ते बले य पितरो गणधराणं ॥४९०॥२४८५॥
पुधवी य वारुणी भट्टि[18]ला य विजयदेवा तधा [19]जयंती य।
ण[20]न्दा य वरुणदेवा अतिभद्दा[21] [य] मातरो ॥४९१॥२४८६॥
तिण्णि य गोतमगोत्ता[22] भार[23]द्दा अग्गिवेस वासिट्ठा।
कासव गोतम हारित कोंडिण्ण[24]दुगं च गो[25]त्ताइं ॥४९२॥ २४८७॥ दारं

**वसुभूती** इत्यादि ॥२४८५–८७॥

अथवा परिणामिकारणं जीवः छद्मस्थकैवल्यायुष्कागमपरिनिर्वाणत[26]पसां पर्यायाणाम्। तानि चानुक्रमेणैव—

पण्णा छातालीसा बाताला पण्ण[27] होति पण्णाय।
[१६४-प्र०] तेवण्ण पं[28]चसट्ठी अडतालीसा य छा[29]याला ॥४९३॥२४८८॥

---

१ मोरिय° **को**। २ °संनिवेसे **म**। ३ भायरो **को दी हा**। भायर **म**। ४ मण्डिमो° **को**। मंडमो° **दी**। मंडिमो° **हा म**। ५ महिलाए **दी हा**। ६ अकंपि° **को दी हा म**। ७ °संनि° **म**। ८ मेयज्जो **को**। ९ पि **को दी हा म**। १० पभासो **म**। ११ कित्तिय **दी हा**। १२ सवणो **म**। १३ मिगसि° **को दी हा म**। १४ पुस्सो **को म**। पूसो **दी हा**। १५ °मित्तो **म**। १६ चेव **को दी हा म**। १७ देवे वसू य दत्ते ब° **को दी हा म**। १८ भद्दिला **को दी हा म**। १९ जयन्ती **को**। २० णंदा **को दी हा म**। २१ अईभद्दा य मा° **म**। °भद्दा **जे**। २२ °मगुत्ता **म**। २३ भरद्दा **जे**। २४ कोडिल्लदु° **को**। कोडिण्ण° **दी हा म**। २५ गुत्ताइं **म**। २६ °तएसौ प°–इति प्रतौ। २७ होइ पण्ण पण्णा **दी हा म**। होंति पण्ण पण्णा **को हे**। २८ पण्णसट्ठी **को**। २९ छायत्ता **जे**।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

छत्तीसा सोलेसगं[1] अगारवासो भवे गणधराणं ।
छतुमत्थपरीयागं[2] अधक्कमं कित्तइस्सामि ॥४९४॥२४८९॥
तीसा बारस दसगं बारस बायाल[3] चोद्दसदुगं[4] च ।
णवगं बारस दस अट्ठयं[5] च छतुमत्थपरियाओ ॥४९५॥२४९०॥ दारं
छतुमत्थपरीयागं[6] अगारवासं च वोगसित्ताणं[7] ।
सव्वाउअस्स[8] सेसं जिणपरियागं वियाणाहि[9] ॥ ४९६॥२४९१॥
बारस सोलस अट्ठारसेव अट्ठारसेव अट्ठेव ।
सोलस सोलस[10] तध एक्कवीस चोद्दस सोले य सोले य ॥ ४९७॥२४९२
बाणउती चतुसत्तरि[11] सत्तरी तत्तो भवे असीति य ।
एगं च सतं तत्तो तेसीती पंचणउती य[12] ॥४९८॥२४९३॥
अट्ठत्तरिं[13] च वासा तत्तो बावत्तरिं च वासाइं ।
बासट्ठी[14] चत्ता खलु सव्वगणधराउअं एतं ॥४९९॥२४९४॥
सव्वे य माहणा जच्चा सव्वे अज्झावया विदू ।
सव्वे दुवालसंगी[15] सव्वे चोद्दसपुव्विणो[16] ॥५००॥२४९५॥ दारं
परिणिव्वुता गण[१६४-द्वि०]हरा जीवंते णातए[17] णव जणा तु ।
सुधम्मो[18] इन्दभूती[19] य रायगिहे णिव्वुते वीरे ॥५०१॥२४९६॥ दारं
मासं पाओवगता सव्वे वि य सव्वलद्धिसंपण्णा ।
वज्जरिसभसंघतणा समचतुरंसा य [20]संठाणे ॥५०२॥२४९७॥ दारं ॥

पण्णा। छातालीसा० इत्यादि गतार्था ॥२४८८-९७॥

जिणगणधरणिग्गमणं भणितमतो खेत्तणिग्गमावसरो[21] ।
कालंतरंगदरिसणहेतुं[22] तु विवज्जओ तध वि ॥२४९८॥

जिणगणधरणिग्गमणं भणितमतो इत्यादि । उपोद्घातनिर्युक्तिद्वारावसरे निर्गमो जिण-गणधराणामभिहितस्तदनन्तरं क्षेत्रद्वारावसरे प्राप्ते कालाभिधानं "दव्वे

---

१ °सा (तह) सोलस अ° **को** । २ °त्थपरि° **जे त**। °त्थं परि° **म**। °त्थय-परि° **दी हा** । °त्थपरि° **को** । ३ बायत्त **जे** । ४ चउदस° **म** । ५ °ट्ठगं च **दी हा म** । °ट्ठगं छउम° **को** । ६ °त्थप्परिया° **को म** । ७ वुक्कसि° **म** । ८ °उगस्स **दी हा** । ९ °णाहि **दी**। १० सोल तहेकवीस चोद्द सोले **दी हा** । सोलस इगवीस चउदस सोले **म** । ११ चउहत्तरि **दी हा म**। १२ आ **म** । १३ अट्ठुत्त° **को**। १४ बावट्ठी **दी हा म** । १५ °संगी य **दी हा** । °संगीआ **म**। १६ चउदस° **म** । १७ णायते **को**। १८ इंदभूती सुहम्मे य **को**। १९ इंदभूई सुहम्मो य **दी हा म** । २० संठाणे **को** । संठाणा **दी हा म** । २१ खित्त° **को हे** । २२ °हेओ **हे** ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

अद्ध अधाउय०"[गा० २५०२] किमर्थम्? इति क्षेत्रात् कालोन्तरङ्ग इत्येतद् दर्शयत्याचार्यः–"कालंतरंगदरिसणहेतुं तु विवज्जओ तध वि" कालान्तरङ्गदर्शनहेतोस्तु विपर्ययाभिधानम् ॥२४९८॥

कालस्यान्तरङ्गत्वे उपपत्तिगाथा—

**जं वत्तणातिरूवो वत्तुरणत्थंतरं मतो कालो।**
**आधारमेत्त[2]मेव तु खेत्तं तेणंतरंगो[3] सो ॥२४९९॥**

**जं वत्तणातिरूवो** इत्यादि। "वर्त्तना-परिणाम-क्रियाः पराऽपरत्वे च कालस्य" [तत्त्वार्थ०५. २२] उपग्रहः उपकार इति आदिग्रहणेन परिगृह्यते, वर्त्तना आदिरेषामिति वर्त्तनादीनि रूपाणि यस्य सोऽयं वर्त्तनादिरूपः। वर्त्तना च "वृत् वर्त्तने" स्वयं सद्भावेन वर्त्तमानमर्थं या प्रचोदयति वर्त्तस्व वर्त्तस्व मा न(नि)वर्तिष्ठाः। "न्या(ण्या)सश्रन्थो युच्"[पाणिनि० ३–३–१०७]इति भावप्रत्ययः स्त्रीलिङ्गे, वर्त्तना क्रिया, सा च—'व[र्त्ति]तुरनर्थान्तरं' वर्तितुर्भावादनर्थान्तरम्—कालस्तत्परिणामत्वात्। क्षेत्रं पुनराधारमात्रमेव। तस्मात् कालोऽन्तरङ्ग इति ॥२४९९॥

अथ कालशब्दस्य व्युत्पत्तिः क्रियाकारकभेदपर्यायकथनवाक्यान्तरैः। तत्र क्रियाकारकभेदः—

**कलणं पज्जायाणं कलिज्जते तेण वा जतो वत्थुं।**
**कलयंति तयं तम्मि व समयातिकलासमूहो वा ॥२५००॥**

**कलणं पज्जायाणं** इत्यादि। "कल शब्द-संख्यानयोः" कलनं काल इति भावे प्रत्ययो घञ्। कल्यते वा तेन यस्माद् वस्तु "अकर्त्तरि च कारके संज्ञायाम्" [पाणिनि० ३–३–१९] इति घञ्। कलयन्ति वा समयादिपर्यायास्तमिति कालः, तस्मिन् वा स्थिताः कलयन्ति, समयादीनां कलानां समूहः कालै इति। यद्यपि कापोतं मायूरमिति च सामूहिकप्रत्ययो नपुंसकाभिधायी प्रायेण, तथापि शिष्टप्रयोगाद् रूढेश्च "लिङ्गमशिष्यम्, लोकाश्रयत्वात्" इति परिहारः [महाभाष्ये अ० ५। पा० ३। आ० २। सू० ६६। रूपप्रत्ययाधिकरणे पृ० ३८९] ॥२५००॥

**सो वत्तणातिरूवो कालो दव्वस्स चेव पज्जाओ।**
**किंचिम्मेत्तविसेसेण दव्वकालादिववदेसो ॥२५०१॥**

१ "हेतु इति प्रत्यन्तरे"– इति टिप्पणं प्रतौ। २ °रमित्त° हे। ३ रंगं हे। ४ अत्र 'देहमण्णिवि'–इति अधिकं प्रतौ दृश्यते। ५ °लोऽनंतर इति प्रतौ। ६ पज्जायणं–इति प्रतौ। ७ कालयति–इति प्रतौ। ८ दवस्स जे त। ९ °चिम्मेत्त° हे। °चिम्मित्त° त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सो वत्तणा०** गाहा। स च वर्त्तनादिरूपः काल इति द्रव्यस्यैव पर्यायः, किञ्चिन्मात्रविशेषात्तु[1] विवक्षावशाद् द्रव्यकालादिव्यपदेशः, द्रव्यकालः अद्धाकालः अथायुष्काल इत्यादि व्यपदेशः ॥२५०१॥ स चायं भण्यते—

**दव्वे अद्ध अधाउय उवक्कमे देस काल काले य।**
**तध य पमाणे[2] वण्णे भावे पगदं तु भावेणं ॥५०३॥२५०२॥दारगाधा**
**चेतणमचेतणस्स वँ[3] दव्वस्स ठिँती[4] तुँ[5] जा चतुविकँप्पा[6]।**
**सो[7] होति दव्वकालो अथ[१६५प्र०]वा दवियं[8] तु तं चेव ॥५०४॥२५०३॥**

**दव्वे अद्ध। चेतण०।** द्रव्यकाल इति षष्ठीसमासो भेदविवक्षायाम् ॥२५०२॥

**दव्वस्स वत्तणा जा स दव्वकालो तदेव वा दव्वं।**
**ण हि वत्तणातिँभिण्णं[9] दव्वं[10] जम्हा जतोऽभिहितं ॥२५०४॥**

**दव्वस्स वत्तणा जा स दव्वकालो** इत्यादि। द्रव्यमेव काल इति कर्मधारयः समासः द्रव्यार्थाऽभेदविवक्षायाम्। न हि वर्त्तनादिक्रियातो भिन्नं द्रव्यमस्ति यस्मादभिहितम् ॥२५०४॥

क्वेति चेत्तत इयं गाथा—

**सुत्ते जीवाजीवा समयावलियादयो पवुच्चेंन्ति[11]।**
**दव्वं पुण सामण्णं भण्णति दव्वट्ठतामेत्तं ॥२५०५॥**

**सुत्ते।** सूत्रे-एकस्यापि समयस्य प्रतिद्रव्यमभेदेन वृत्तत्वादानन्त्यम्। द्रव्यं च द्विविधं, जीवाजीवात्मकत्वात्। तस्माज्जीवाऽजीवाः समयावलिकादयो भेदाः प्रोच्यन्ते। द्रव्यं पुनः सामान्यं द्रव्यार्थतामात्रमेकमभिन्नं सर्वस्यापि। तस्माच्चेतनद्रव्यस्य या स्थितिर्वर्त्तना, अचेतनद्रव्यस्य वा सादिसपर्यवसितादिभेदेन चतुर्विकल्पा स(सा) द्रव्यस्य कालः। वर्त्तनैव वा समयादिरूपा अभेदेन चेतनद्रव्यमचेतनं वा ॥२५०५॥

तस्याश्चतुष्प्रकारायाः अपि स्थितेर्जीवविषयायाः, अजीवविषयायाश्च यथासङ्ख्येनोदाहरणगाहा—

**सुरसिद्धभव्वऽभव्वा सातिसपज्जवसितादयो जीवा।**
**खंधाणागतऽतीता णभातयो चेतणारहिता ॥२५०६॥**

---

१ °षात्तु–इति प्रतौ। २ °माणं म। ३ य हे त म। ४ ठिइ दी हा। ५ उ दी हा म। ६ विगप्पा को हे। ७ सा दी हा। ८ °यं तयं चे° को हे त। ९ °णाविभि° को हे। ९ णातिरित्तं त। १० जम्हा दव्वं को हे त। ११ °च्चंति को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सुरसिद्ध** । तत्र जीवाः सुराश्च सिद्धाश्च भव्याश्चाभव्याश्च सुरसिद्ध[भव्याऽ]-भव्याः । सुरग्रहणमत्र [उप]लक्षणताप्रदर्शनमात्रम् । चतसृष्वपि गतिषु सुरा मनुष्या-स्तिर्यञ्चो नारकाश्च प्रत्येकं सादयः सपर्यवसिताश्च, सिद्धाः प्रत्येकं सिद्धपर्यायेण सादयः अपर्यवसानाः, भव्या भव्यत्वेनाऽनादयः सपर्यवसानाः, अभव्या [अ]भव्य-त्वे[न] अनादयः अपर्यवसानाः, न कदाचिदभव्यत्वं जहतीति । एवं तावज्जीवाः स्थितिकालं प्राप्य चतुर्द्धा । अथाऽजीवा ये चेतनारहितास्तेऽपि चतुर्धैव—**खंधाणा-गतऽतीता णभातयो चेतणारहिता** । स्कन्धा द्विप्रदेशिकाद्यनन्तप्रचयाः पुद्गलाः सादयः सपर्यवसानाश्च, अनागताद्धा सादिरपर्यवसाना, अतीताद्धा अनादि-सपर्यवसाना, नभोधर्माधर्मास्तिकाया अनादिर(द्य)पर्यवसानाः । एष द्रव्यसम्बन्धी द्रव्यकालः ।

ननु च "**चेतणमचेतणस्स व दव्वस्स ठिती तु जा चतुविकप्पा**"[गा० २५०३]इति सूत्रस्य **चतुर्दशपूर्विस्थविरेद्दब्धस्य** कोयं निर्देशः **चेतणमचेतणस्स व दव्वस्स ?** चेतनस्याचेतनस्य वा द्रव्यस्येति वक्तव्ये चेतनमित्ययुक्ताभिधानम् । यदि वा प्राकृतव्याकरणरूपसिद्ध्या परिहार उच्यते—प्राकृतशब्दसमासोऽयं चेतणं चाऽचेतणं चेति, ततः चेतणाचेतणमिति प्राप्ते अभूतोऽनुस्वार आगमः क्रियते ।

"णीया लोवमभूया य आणिया दो वि बिंदूभावा ।
अत्थं वहंति तं चिय जो च्चिय सिं पुव्वणिद्दिट्ठो ॥"

इत्यादि सत्यमेव—समासपदात् षष्ठीति चेतणस्सेति—समाहितम् । एवं हि वाशब्दो विकल्पार्थो न घटते । चेतणस्स अचेतणस्स वा दव्वस्सेति भिन्नपदे वाशब्दो घटते, न समासपदे, एकपदत्वात् । न चेदमघटमानकमेवेति शक्यं वक्तुम्, आप्तोपदिष्टत्वात् । अतोऽत्राभिप्राय उन्नीयते—समासपदं तावदभूताऽभ्याहृतबिन्दुसमाहितमभेदविवक्षां दर्शयति—द्रव्यमेव काल इति । वाशब्दो भिन्नपदविषयस्तस्यैव भेदविवक्षां दर्शय-तीति—द्रव्यस्य कालः स्थितिरित्यर्थः । अतो युक्त एव निर्देशः । "विचित्रा च सूत्रस्य कृतिः" इति ॥२५०६॥

अद्धाकालोपवर्णनार्थम्—

**सूरकिरियाविसिट्ठो गोदोहातिकिरियासु णिरवेक्खो ।**
**अद्धाकालो भण्णति समयखेत्तम्मि समयाती ॥२५०७॥**

---

१ °रद्दब्धस्य-इति प्रतौ । २ चेतनस्या वा-इति प्रतौ । ३ गोदाहा° त । ४ °यखे° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सूरकिरियाविसिट्ठो** इत्यादि । सूर्यस्य ग्रहणमयो(त्रो)पलक्षणमात्र(त्रं) । पञ्चप्रकारा ज्योतिष्काः सूर्यचन्द्रग्रहनक्षत्रप्रकीर्णताराः मेरुप्रदक्षिणा नित्यगतयो नृलोके तत्कृतः कालविभाग इति । तेषां गमनादिक्रियाविशिष्टः समयावलिकादिरद्धाकालः । यद् आकाशखण्डमादित्येन स्वयं किरणैश्च संयुक्तम्, तस्याहरिति नाम । यदन्यत्, सा रात्रिरिति । तस्याहोरात्रस्य परमसूक्ष्मोऽत्यन्तविच्छेदः कश्चिदविभागी भागः समय उच्यते गोदोहादिक्रियानिरपेक्षः । परिणामवती क्रियैव काल इति येषां दर्शनं कालद्रव्यापलापिनां तन्निषेधार्थं गोदोहादिक्रियानिरपेक्ष इति । सोऽयमद्धाकालः समयादिः समयक्षेत्रप्रतिबद्धः ॥२५०७॥

समयादिरित्यादिग्रहणस्य फलम्—

**समयाऽऽवलियं[2] मुहुत्ता दिवसमहोरत्तपक्खमासा[3] य ।**
**संवच्छर-जुग-पलिता सागर-ओसप्पि-परियट्टा ॥५०५॥२५०८॥दारं॥**

**समयाऽऽवलिय-मुहुत्ता** इत्यादि । समयाऽऽवलिकादिसंवत्सरपर्यवसानं परिभाषितमेव । पञ्च संवत्सराणि युगम् । असंख्येयानि युगानि पलितोवमम्, उत्तरपदलोपात् पलितं । एवं सागरोपमं सागरः । उत्सर्पिण्यवसर्पिणीयुगमेव कल्पः उत्सर्पिणीशब्देन गृहीतः । अनन्ताः कल्पाः पुद्गलपरिवर्त्तः, पूर्वपदलोपात् परिवर्त्तः ॥२५०८॥

अयमेवाद्धाकालः आयुष्ककर्मविशिष्टः सर्वजीवानां वर्त्तनादिमयः अथायुष्क[का]ल उच्यते, यो जीवो यावत् कालं येन वर्त्तते—

**आउअमेत्तविसिट्ठो स एव जीवाण वत्तणादिमयो ।**
**भण्णति अधायुकालो वत्तति जो जच्चिरं जेणं[7] ॥२५०९॥**

**आउअमेत्तविसिट्ठो** इत्यादि ॥२५०९।

**णेरइयतिरियमणुयादेवाण अधाउयं तु जं जेणं ।**
**णिव्वत्तितमण्णंभवे पालेन्ति[10] अधाउकालो तु[11] ॥५०६॥२५१०॥**

**णेरिइयतिरिय०** इत्यादि गतार्था ॥२५१०॥

अथोपक्रमकालः—"क्रमु पादविक्षेपे" उपक्रमणमुपक्रमः, अभिप्रेतस्यार्थस्य सामीप्यानयनमुपक्रमणकालः भूयिष्ठक्रियापरिणामः—

---

१ °लिकाद्विकालः इति–प्रतौ । २ 'समयावलियमुहुत्ता' इत्यस्याः पूर्वं एषा निर्युक्तिगाथा **दीहाम**प्रतिषु अस्ति—

**गइ सिद्धा भवियाया अभविय पोग्गल अणागयद्धा य ।**
**तीयद्ध तिन्नी काया जीवाजीवट्ठिई चउहा ॥**

पुग्गल **म** । ३ °लिमु° **हे** । ४ °स अहो° **म** । ५ मासो **म** । ६ पल्यिट्टो **को** । पलिय° **हे** । ७ जेण **को हे** । ८ °णुस्सदे° **म** । ९ मत्तभ° **त** । १० °लेंति **को दी हा** । °लंति **हे म** । ११ °कालं ति **को** । १२ सो **दी हा म** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**जेणोवक्कामिज्जति समीवमाणिज्जते जतो जं तु ।**
**[१६५-द्वि०] स किलोवक्कमकालो क्रियापरिणामभूइट्ठो ॥२५११॥**

**जेणोवक्कामिज्जति** इत्यादि ॥२५११॥

**दुविधोवक्कमकालो सामायारी अधाउगं चेव ।**
**सामायारी तिविधा ओहे दसधा पदविभागे ॥५०७॥२५१२॥**

**दुविधोवक्कमकालो** इत्यादि । द्विविधश्चासावुपक्रमकालश्चेति समानाधिकरणः समासः–द्विविधोपक्रमकालः । समाचरणं समाचारः–विशिष्टाचरितक्रियाकलापः, तस्य भावः "गुणवचनब्राह्मणादिभ्यः कर्मणि च"[पाणिनि० ५. १. १२४] सामाचार्यं नपुंसके भावे ष्यत्करणसामर्थ्यात् स्त्रीलिङ्गे भावे स्त्रियां टीषु(ङीष्) सामाचारी, तस्या उपक्रमणं उपरिमश्रुतादधस्तादिहानयनम्; यथायुष्कस्योपक्रमः दीर्घकालभोग्यस्य लघुतरेण कालेन भोग इति ।

सामाचारी त्रिविधा ओघः सामान्यम् । ओघसामाचारी सामान्यतः संक्षेपाभिधानम् । **ओघनिर्युक्तिर**स्मिन् स्थाने वक्तव्येति । दशधा सामाचारी इच्छाकारादि । पदविभागसामाचारी छेदसूत्राणि ॥२५१२॥

अथायुष्कोपक्रमस्य भेदाः—

**अज्झवसाण-णिमित्ते आहारे वेतणा पराघाते ।**
**फासे आणापाणू सत्तविधं भिज्जते आयुं ॥५०८॥२५१३॥**

**अज्झवसाण-णिमित्ते ।** अतिहर्षातिविषादाभ्यामधिकमवसानं चिन्ता अध्यवसानम् । ततो हृदयसंरोधाद् मरणम् । निमित्तं कारणं दण्ड-क[शा]-शस्त्रादि बहुप्रकारम् । अतिमात्रया आहारो मरणाय । वेदना शूलादि । पराघातो योऽन्यतो घातः प्रहारः । स्पर्श उरगादिः(देः)। आन-प्राणयोर्निरोधः । इत्येतानि सप्ताऽऽयुर्भेदस्य कारणानि ॥२५१३॥

निमित्तम् —

**दण्ड कस सत्थ रज्जू अग्गी उदग पडणं विसं वाला ।**
**सीतुण्हं अरति भयं खुधा पिवासा य वाधी य ॥५०९॥२५१४॥**
**मुत्त-पुरीसणिरोधे जिण्णाजिण्णे य भोअणे बहुसो ।**
**घंसणघोलणपीलणया आयुस्स उवक्कमा एते ॥५१०॥२५१५॥**

१ किलाव° जे । २ °स्तादिनायनं–इति प्रतौ । ३ °ष्कस्यापक° इति प्रतौ । ४ °पाणु दी हा । ५ झिज्झए को । झिजए दी हा । जिज्झए म । ६ दंड को हे म दी हा । ७ जिण्णेऽजि० को । जिन्नजि° हे । °जिण्णं म । ८ भोयणं को म । ९ घण त । १० °चालण आ° को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पूर्वस्मिन् ४६६ पृष्ठे मुद्रितायाः २५१२ गाथाया अनन्तरं निम्नलिखिता निर्युक्तिगाथाः सन्ति—

इच्छा मिच्छा तहाकारो आवसिया य निसीहिया ।
आपुच्छणा य पडिपुच्छा छंदणा य निमंतणा ॥
उवसंपया य काले सामायारी भवे दसहा ।
एएसिं तु पयाणं पत्तेय परूवणं वोच्छं ॥ दारगाहाओ ॥
जइ अब्भत्थेज्ज परं कारणजाए करेज्ज से कोई ।
तत्थ वि इच्छाकारो न कप्पई बलाभिओगो उ ॥
अब्भुवगमंमि नज्जइ अब्भत्थेउं ण वट्टइ परो उ ।
अणिगूहियबलविरिएण साहुणा ताव होयव्वं ॥
जइ हुज्ज तस्स अणलो कज्जस्स वियाणती ण वा वाणं ।
गिलाणाइहिं वा हुज्ज वियावडो कारणेहिं सो ॥
राइणियं वज्जेत्ता इच्छाकारं करेइ सेसाणं ।
एयं मज्झं कज्जं तुब्भे उ करेह इच्छाए ॥
अहवाऽवि विणासेंतं अब्भत्थेंतं च अण्ण दट्ठूणं ।
अण्णो कोइ भणेज्जा तं साहुं णिज्जरट्ठीओ ॥
अहयं तुब्भं एयं करेमि कज्जं तु इच्छकारेणं ।
तत्थऽवि सो इच्छं से करेइ मज्जायमूलियं ॥
अहवा सयं करेन्तं किंची अण्णस्स वावि दट्ठूणं ।
तस्सवि करेज्ज इच्छं मज्झं पि इमं करेहित्ति ॥
तत्थवि सो इच्छं से करेइ दीवेइ कारणं वाऽवि ।
इहरा अणुग्गहत्थं कायव्वं साहुणो किच्चं ॥
अहवा णाणाईणं अट्ठाए जइ करेज्ज किच्चाणं ।
वेयावच्चं किंची तत्थ वि तेसिं भवे इच्छा ॥
आणाबलाभिओगो णिग्गंथाणं ण कप्पई काउं ।
इच्छा पउंजियव्वा सेहे राईणिए [य] तहा ॥
जह जच्चवाहलाणं आसाणं जणवएसु जायाणं ।
सयमेव खलिणगहणं अहवा वि बलाभिओगेणं ॥



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुरिसज्जाएऽवि तहा विणीयविणयंमि नत्थि अभिओगो ।
सेसंमि उ अभिओगो जणवयजाए जहा आसे ॥
अब्भत्थणाए मरुओ वानरओ चेव होइ दिट्ठंतो ।
गुरुकरणे सयमेव उ वाणियगा दुण्णि दिट्ठंता ॥
संजमजोए अब्भुट्ठियस्स सद्धाए काउकामस्स ।
लाभो चेव तवस्सिस्स होइ अद्दीणमणसस्स ॥
संजमजोए अब्भुट्ठियस्स जं किंचि वितहमायरियं ।
मिच्छा एतं ति वियाणिऊण 'मिच्छ'त्ति कायव्वं ॥
जइ य पडिक्कमियव्वं अवस्स काऊण पावयं कम्मं ।
तं चेव न कायव्वं तो होइ पए पडिक्कंतो ॥
जं दुक्कडं ति मिच्छा तं भुज्जो कारणं अपूरेंतो ।
तिविहेण पडिक्कंतो तस्स खलु दुक्कडं मिच्छा ॥
जं दुक्कडं ति मिच्छा तं चेव निसेवए पुणो पावं ।
पच्चक्खमुसावाई मायानियडीपसंगो य ॥
'मि'त्ति मिउमद्दवत्ते 'छ'त्ति य दोसाण छायणे होइ ।
'मि'त्ति य मेराए ठिओ 'दु'त्ति दुगुंछामि अप्पाणं ॥
'क'त्ति कडं मे पावं 'ड'त्ति य डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥
कप्पाकप्पे परिणिट्ठियस्स ठाणेसु पंचसु ठियस्स ।
संजम-तवड्ढगस्स उ अविकप्पेणं तहाकारो ॥
वायणपडिसुणणाए उवएसे सुत्तअत्थकहणाए ।
अवितहमेयं ति तहा पडिसुणणाए तहक्कारो ॥दारं॥
जस्स य इच्छाकारो मिच्छाकारो य परिचिया दोऽवि ।
तइओ य तहक्कारो न दुल्लभा सोग्गई तस्स ॥
आवस्सियं च णितो जं च अइंतो निसीहियं कुणइ ।
एयं इच्छं नाउं गणिवर ! तुब्भंतिए णिउणं ॥
आवस्सियं च णितो जं च अइंतो णिसीहियं कुणइ ।
वंजणमेयं तु दुहा अत्थो पुण होइ सो चेव ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एगग्गस्स पसंतस्स न होंति इरियाइया गुणा होंति।
गंतव्वमवस्सं कारणंमि आवस्सिया होइ॥
आवस्सिया उ आवस्सएहिं सव्वेहिं जुत्तजोगिस्स।
मणवयणकायगुत्तिंदियस्स आवस्सिया होइ॥
सेज्जं ठाणं च जहिं चेएइ तहिं निसीहिया होइ।
जम्हा तत्थ निसिद्धो तेणं तु निसीहिया होइ॥
सेज्जं ठाणं च जदा चेतेति तया निसीहिया होइ।
जम्हा तदा निसेहो निसेहमइया च सा जेणं॥
आवस्सियं च णितो जं च अइंतो निसीहियं कुणइ।
सेज्जाणिसीहियाए णिसीहियाअभिमुहो होई॥ [ भाष्यम् ]
जो होइ निसिद्धप्पा निसीहिया तस्स भावओ होइ।
अणिसिद्धस्स निसीहिय केवलमेत्तं हवइ सद्दो॥
आवस्सयंमि जुत्तो नियमणिसिद्धो त्ति होइ नायव्वो।
अहवाऽवि णिसिद्धप्पा णियमा आवस्सए जुत्तो॥ दारम्॥ [ भाष्यम् ]
आपुच्छणा उ कज्जे पुव्वनिसिद्धेण होइ पडिपुच्छा।
पुव्वगहिएण छंदण णिमंतणा होअगहिएणं॥
उवसंपया य तिविहा णाणे तह दंसणे चरित्ते य।
दंसणणाणे तिविहा दुविहा य चरित्तअट्ठाए॥
वत्तणा संधणा चेव, गहणं सुत्तत्थतदुभए।
वेयावच्चे खमणे, काले आवकहाइ य॥
संदिट्ठो संदिट्ठस्स चेव संपज्जई उ एमाई।
चउभंगो एत्थं पुण पढमो भंगो हवइ सुद्धो॥
अथिरस्स पुव्वगहियस्स वत्तणा जं इहं थिरीकरणं।
तस्सेव पएसंतरणट्ठस्सऽणुसंधणा घडणा॥
गहणं तप्पढमतया सुत्ते अत्थे य तदुभए चेव।
अत्थग्गहणंमि पायं एस विही होइ णायव्वो॥
मज्जणणिसेज्जअक्खा कितिकम्मुसग्ग वंदणं जेट्ठे।
भासंतो होई जेट्ठो नो परियाएण तो वन्दे॥

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

ठाणं पमज्जिऊणं दोण्णि निसिज्जाउ होंति कायव्वा ।
एगा गुरुणो भणिया बितिया पुण होंति अक्खाणं ॥
दो चेव मत्तगाइं खेले तह काइयाए बीयं तु ।
जावइया य सुणंती सव्वेऽवि य ते तु वंदंति ॥
सव्वे काउस्सग्गं करेंति सव्वे पुणोऽवि वंदंति ।
णासण्णे णाइदूरे गुरुवयणपडिच्छगा होंति ॥
णिद्दाविगहापरिवज्जिएहिं गुत्तेहिं पंजलिउडेहिं ।
भत्तिबहुमाणपुव्वं उवउत्तेहिं सुणेयव्वं ॥
अभिकंखंतेहिं सुहासियाइँ वयणाइँ अत्थसाराइं ।
विम्हियमुहेहिं हरिसागएहिं हरिसं जणंतेहिं ।
गुरुपरिओसगएणं गुरुभत्तीए तहेव विणएणं ।
इच्छियसुत्तत्थाणं खिप्पं पारं समुवयंति ॥
वक्खाणसमत्तीए जोगं काऊण काइयाईणं ।
वंदंति तओ जेट्ठं अण्णे पुव्वं चिय भणन्ति ॥
चोएति जइ हु जिट्ठो कहिंचि सुत्तत्थधारणाविगलो ।
वक्खाणलद्धिहीणो निरत्थयं वंदणं तंमि ॥
अह वयपरियाएहिं लहुणोऽवि हु भासओ इहं जेट्ठो ।
रायणियवंदणे पुण तस्स वि आसायणा भंते ! ॥
जइवि वयमाइएहिं लहुओ सुत्तत्थधारणापडुओ ।
वक्खाणलद्धिमंतो सो चिय इह घेप्पई जेट्ठो ॥
आसायणा वि णेवं पडुच्च जिणवयणभासयं जम्हा ।
वंदणयं राइणिए तेण गुणेणं पि सो चेव ॥
न वओ एत्थ पमाणं न य परियाओऽवि णिच्छयमएणं ।
ववहारओ उ जुज्जइ उभयनयमयं पुण पमाणं ॥
निच्छयओ दुन्नेयं – को भावे कम्मि वट्टई समणो ? ।
ववहारओ उ कीरइ जो पुव्वठिओ चरित्तंमि ॥
ववहारोऽवि हु बलवं जं छउमत्थं पि वंदई अरहा ।
जा होइ अणभिण्णो जाणंतो धंमयं एयं ॥ (भाष्यम्)
एत्थ उ जिणवयणाओ सुत्तासायणबहुत्तदोसाओ ।
भासंतगजेट्ठगस्स उ कायव्वं होइ किइकम्मं ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दण्ड कस सत्थादिगाथाद्वयेन शेषं गतार्थमिति ॥२५१४-१५॥

अथ सामाचारी कथं उपक्रमकाल इति ? तद्व्याख्यानाय भाष्यगाथा --

**जेणोवरिमसुतातो सामायारिसुतमाणितं हेट्ठा ।**
**ओहाति तिविध एसो उवक्कमो समयचज्जाए ॥२५१६॥**

जेणोवरिमसुतातो इत्यादि । ओघसामाचारी, दशविधा सामाचारी, पदविभाग-सामाचारी येस्माच्च ओघादिस्त्रिविध एष उपक्रमकालः, समयचर्यमा(या) सिद्धान्त-मर्यादया उच्यते ॥२५१६ ॥

अथाऽऽयुष्कोपक्रमव्याख्यार्थं भाष्यगाथा--

**जं जीवितसंवट्टणमज्झवसाणादिहेतुसंजणितं ।**
**सोवक्कमाउयाणं स जीवितोवक्कमणकालो ॥२५१७॥**

जं जीवितसंवट्टणमित्यादि । प्रसारितस्य सङ्कोचनं संवर्त्तनमुच्यते । तत् अध्यवसान निमित्तादिसप्तविधहेतुसञ्जनितं जीवितसंवर्त्तनं सोपक्रमायुषां जीवानामायुष्कोपक्रमणकाल उच्यते । निरुपक्रमायुषां बद्धायुष्कनिहितनिकाचितचतुष्करणसङ्गृहीत-कर्मणामुपक्रमाभावाज्जीवितसंवर्त्तनाभावः ॥२५१७॥

---

दुविहा य चरित्तंमी वेयावच्चे तहेव खमणे य ।
णियगच्छा अण्णंमि य सीयणदोसाइणा होति ॥

इत्तरियाइविभासा वेयावच्चंमि तहेव खमणे य ।
अविगिट्ठविगिट्ठंमि य गणिणो गच्छस्स पुच्छाए ॥

उवसंपन्नो जं कारणं तु तं कारणं अपूरेंतो ।
अहवा समाणियंमी सारणया वा विसग्गो वा ॥ दारं ॥

इत्तरियं पि न कप्पइ अविदिन्नं खलु परोग्गहाईसुं ।
चिट्ठित्तु निसिइत्तु व तइयव्वयरक्खणट्ठाए ॥

एवं सामायारी कहिया दसहा समासओ एसा ।
संजम-तवड्ढयाणं निग्गंथाणं महरिसीणं ॥

एयं सामायारिं जुंजंता चरणकरणमाउत्ता ।
साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥

दी० ६६७-७२४ । म० ६६६-७२३ । हा० ६६६-७२३ ।

१ पञ्चमोघा इति प्रतौ ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

इदमन्यत् प्रासङ्गिकमुच्यते—

**सव्वपयतीणमेवं परिणामवसादुवक्कमो होज्ज ।**
**पायमणिकाइताणं तवसा तु णिकाइताणं पि ॥२५१८॥**

**सव्वपयतीणमेव**मित्यादि । प्रसारितस्य सङ्कोचनं संवर्त्तनमुच्यते । तदध्यवसान निमित्तादिविशेषात् संवर्त्तनाख्य उपक्रमो भवेत् । सोऽप्यनिकाचितानां प्रायशः । प्रायोग्रहणान्निकाचितानामपि तपोविशेषान्निर्जरणकालेऽपीति । उक्तं हि—"पुव्वं खलु भो! कडाणं कम्माणं वेदइत्ता मोक्खो नत्थि, अत्थि वेअइत्ता तवसा वा ज्झोसइत्ता"[3] इति अतस्तपो ध्वंसकं कर्मणां भवति ॥२५१८॥

अत्र चोद्यम्—

**कम्मोवक्का[१६६-प्र०]मिज्जति अपत्तकालं पि जति ततो पत्ता ।**
**अकतागम-कतणासा मोक्खाणासासदा दोसा ॥२५१९॥**

**कम्मोवक्कामिज्जति** इत्यादि । यद्युपक्रमवशादप्राप्तकालमपि कर्म परिपाच्यते ततो नियतकालादारात् विना कर्मणा फलप्राप्तेः 'अकृतस्य कर्मणस्तत् फलम्' इत्यकृतागमः । 'यच्च तस्मिन् काले परिपाटीलभ्यं कर्म तन्नि(न्न)ष्टम्'इति कृतनाशः । एवं यदि कृतं नश्यति अकृतं चाऽऽगच्छत्यकस्मात् ततः कस्यचिदपि न मोक्ष इत्यमोक्षदोषः, मुक्तो वा कथञ्चिदकृतागमात् पुनरपि बध्येत, ततश्चानाश्वासदोषः ॥२५१९॥

यत्तु प्रमाणमुपक्रमवादिनः 'कृतं कर्म नश्यति, अकृतं चाऽऽगच्छति अप्राप्तकाले अपि भुज्यमानत्वाद्, बालदारकवृद्धत्ववत्, दत्तदण्डबन्धनवत्, अनपराधबन्धवच्च'—एतदनैकान्तिकख्यापनाय—

**ण हि दीहकालियस्स वि णासो तस्साणुभूतितो खिप्पं ।**
**बहुकालाहारस्स व दुतमग्गियरोगिणो भोगो ॥२५२०॥**

**ण हि दीहकालियस्स** इत्यादि । इह दीर्घकालिकं वर्षशतभक्तं कोष्ठागारीकृतं अत्यग्निव्याधिना शीघ्रकालभुक्तं न नश्यति, नाप्यभूतमागच्छति । तत्र[7] चाप्राप्तकालभोगो दृष्टः इत्यनैकान्तिकः । एवं दीर्घकालिकं कर्म परिणामविशेषात् भस्मकव्याधिसदृशात् शीघ्रतरानुभूतेर्न नश्यति नाभूतमागच्छति ॥२५२०॥

अपि च चतुर्द्धा कर्मणो विभागः—प्रकृतिस्थित्यनुभावप्रदेशैः । तत्र प्रदेशकर्म सर्वमुपभुज्यते, अनुभावकर्म तु भजनया—तथा चान्यथा चेति । तस्मात् प्रदेश-

१ सा उव को । २ होज्जा को हे । ३ भगव० १. ४. सू०. ४० । ४ तओ को हे त । ५ तत्तो त । ६ दुवम° त । ७ तच्च चाप्रा° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कर्म प्राप्याऽवश्याऽनुभवे के नाम दोषाः कृतनाशादयः? नैव भवन्तीत्यभिप्रायः । तत इयं गाथा—

**सव्वं च पतेसतया भुञ्जति कम्ममणुभावतो भइतं।**
**तेणावस्साणुभवे के कतणासादयो तस्स? ॥२५२१॥**

**सव्वं च प०** गाहा गतार्था ॥२५२१॥

यस्माच्च सिद्धान्ते —

**उदय-क्खय[2]-क्खयोवसमोवसमा जं च कम्मणो[3]ऽभिहिता[4] ।**
**दव्वातिपंचयं पति जुत्तमुवक्कामणमतो वि ॥२५२२॥**

**उदय-क्खय०** इत्यादि । उदयोऽनुभवः, क्षयो निर्जरा, देशक्षय-देशोपशमौ क्षयोपशमः, अनुदयावस्था विद्यमानस्योपशमः । एते भावाः कर्मणोऽभिहिताः द्रव्यादिपञ्चकं प्रति द्रव्यं क्षेत्रं कालं [भवं] भावं च प्रतीत्य यथासम्भवमुद[याद]यश्चत्वारोपि भवन्तीति युक्तमुपक्रामणं कर्मण इति । प्रमाणम्—उदयक्षयक्षयोपशमोपशमाः कर्मणो यथाकालमयथाकालं च भवन्ति, बाह्यद्रव्यादिपञ्चकापेक्षत्वात्, यथा प्रपञ्चितदीर्घकालिकाहारकवत् । अथवा पुण्यापुण्यकृतसातासातोदयादिवत् ॥२५२२॥

एतद्दृष्टान्तभावनार्था गाथा—

**पुण्णापुण्णकतं पि हु सातासातं जधोदयातीए ।**
**बज्झबलाधाणातो देति तधा पुण्ण-पावं पि ॥२५२३॥**

**पुण्णापुण्णकतं पि हु** इत्यादि । तथा पुण्यपापमपीति दार्ष्टान्तिकोऽर्थः प्रदर्श्यते कर्मेत्यर्थः ॥२५२३॥

कर्मोपक्रममनभ्युपगच्छतो दोषख्यापनं गाथाद्वयेन—

**जति वाणुभूतितो[6] च्चिय खविज्जते कम्ममण्णधा ण मतं ।**
**तेणासंखभववज्जितणाणागतिकारणत्तणतो ॥२५२४**
**णाणाभवाणुभवणाभावादेकम्मि[8] पज्जएणं वा ।**
**अणुभवतो बंधातो [9]मोक्खाभावो स चाणिट्ठो ॥२५२५॥**

**जति वाणुभूतितो च्चिय । णाणाभवाणुभवणा** इत्यादि च । यदि वा अनुभवादेकैकस्मात् क्षिप्येत कर्म[10], नोपक्रमादपि, तेनासङ्ख्येयभवार्जितकर्मणो नानागति[11]-कारणभूतस्य एकस्मिन् भवे नानाभवानुभवनाभावात्, पर्यायेणानुभवात्, पुनश्च तेषु

१ °म्मयणु° त। २ °यखयखयो° हे। ३ कम्मुणो त। ४ भणिया को हे त। ५ पुण्ण° इति प्रतौ। ६ ताणु° त। ७ °भूइउ को हे। ८ °देक्कम्मि को हे त। ९ सोक्खा° जे। १० कर्मतोप° इति प्रतौ। ११ °गच्छतिका इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भवेष्वनेककर्मोपचयात्तादृग्विवादे च सर्वदा बन्ध एव, न मोक्षो नाम कस्यचिदिति मोक्षाभाव एव सर्वदा। स चानिष्टः। तस्मादुपक्रमेण नानागतिकारणस्य कर्मणोऽनुभवादेकेनापि भवेन क्षीयमाणत्वात् मोक्षसद्भाव इत्युपक्रमकालः प्रतिपत्तव्य इति ॥२५२४-२५॥

पुनराह चोदकः—उपक्रमेऽप्यकृतागमादयो दोषाः कथं परिह्रि(हि)यन्ते।

**णणु तं ण जधोवचितं तधाणुभ[१६६-द्वि०]वतो कतागमादीया।**
**तप्पायोग्गं चियं तं चितं सज्झरोगो व्व ॥२५२६॥**

**णणु तं ण** गाहा। ननु तत् कर्म यथोपचितं बन्धकाले, अनुभवकाले च तथा नानुभवतः अकृतागमादय इति भवतोऽभिप्रायस्तन्न, यस्मात् तत् कर्म बन्धकाल एव तदनुभवप्रायोग्यमुपचितं अनुभवकाले तथैवानुभूयते साध्यरोगवत् ॥२५२६॥

**अणुवक्कमतो णासति कालेणोवक्कमेण खिप्पं पि।**
**कालेणेवासज्झो सज्झासज्झं तधा कम्मं ॥२५२७॥**

**अणु०** गाहा। साध्यरोगो हि अनुपक्रान्तः कालेन नश्यति, उपक्रमेण तु क्षिप्रतरम्। यः पुनरसाध्यः, स औषधोपक्रमागम्यः कालेनैव मारणान्तिकेनेति। एवं कर्मापि द्विप्रकारं [साध्यम]साध्यं च ॥२५२७॥

**सज्झासज्झं कम्मं किरियाए दोसतो जधा रोगो।**
**सज्झमुवक्कामिज्जति एतो च्चिय सज्झरोगो व्व ॥२५२८॥**

**सज्झासज्झमित्यादि**। साध्यासाध्यं कर्म, दोषापेक्षत्वात्, रोगवत्। साध्यमुपक्रम्यते, दोषापेक्षत्वात्, साध्यरोगवत्। असाध्यमुपेक्ष्यते, दोषापेक्षत्वादसाध्यरोगवत् ॥२५२८॥

**सज्झामयहेतूतो सज्झणिदाणासओ तधा सज्झं।**
**सोवक्कमणमयं पिव देहो देहादिभावातो ॥२५२९॥**

**सज्झा०** गाहा। अथवा सोपक्रमणं साध्यं कर्म, साध्याऽऽमयहेतुत्वात् साध्यनिदानाश्रयत्वात्, देहादौ भावात्, दृष्टान्तोऽयमेव प्रत्यासन्नो देह इति।२५२९।

**किंचिदकाले वि फलं पाविज्जति पच्चते यं कालेणं।**
**तह कम्मं पाविज्जति कालेण वि पच्चते चऽण्णं ॥२५३०॥**

१ बन्धन एव इतिप्रतौ। २ °णोनानु° इति प्रतौ। ३ °ग्गं तं चिय जेण चियं को हे, °य त तेण चि° त। ४ °लेणं वा° हे। ५ एते २५२७-२८ गाथे त प्रतौ न स्तः। ६ °णासओ को हे त। ७ हवा त को हे। ८ साध्ये इति प्रतौ। ९ देहस्यादिमा° इति प्रतौ। १० व को। ११ पाएण त। १२ वण्णं को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**किंचिद्०** गाहा । अकालेऽपि पच्यते कर्म, विशिष्टप्रयत्नापेक्षत्वात् , आम्रादिफलवत् । यथोपचितपाककालादुपरि विधार्यते कर्म प्रयत्नापेक्षत्वादाम्रफलवदेवेति ॥२५३०॥

**जध वा दीहा रज्जू दे[1]ज्झति कालेण पुंजिता खिप्पं ।**
**वितितो पडो य[2] सुस्सति पिं[3]डीभूतो य कालेणं ॥२५३१॥**
**भागो व[4] णिरोअट्टो[5] हीरति कमसो जधण्णधा खिप्पं ।**
**किरियाविसेसतो वा समे[6] वि रोगे [7]तिगिच्छाए ॥२५३२ ॥**

**जध** गाहा । एकरूपमेव वा कर्म दीर्घकालदाह्यं शीघ्रकालदाह्यं च भवति, प्रयत्नविशेषापेक्षत्वात्, दीर्घावस्थितपुञ्जितरज्जुवत, पिण्डीकृतविततपटशोषणवत, निरपवर्त्तन-सापवर्त्तनभागहारक्रियावत् , क्रियाविशेषापेक्षरोगचिकित्सावत् ॥२५३१-३२॥

**भिण्णो जधेह कालो तुल्ले वि पधम्मि गतिविसेसातो ।**
**सत्थे व[9] गहणकालो मतिमेधा[१६७-प्र०]भेतं[10]तो भिण्णो ॥२५३३॥**

**भिण्णो** गाहा । गतिविशेषापेक्षबह्वल्पकालगम्यपथवत् मेधा-धारणाविशेषापेक्षा(क्ष)शास्त्रग्रहणकालवत् ॥२५३३॥

**तध तुल्ले[12]म्मि वि कम्मे परिणामातिकिरियाविसेसातो ।**
**भिण्णोऽणुभवणकालो जेट्ठो मज्झो जहण्णो य ॥२५३४॥**

भावितार्था ॥२५३४॥

अथ देशकालनिरूपणार्था गाथा ।

**जो जस्स जतावसरो कज्जस्स सुभासुभस्स [13]सोवायं ।**
**भण्णति स देसका[14]लाऽऽदेसोऽवसरो त्ति थक्को त्ति ॥२५३५॥**
**णिद्धूमयं[15] च गामं महिलातित्थं[16] च सुं[17]ण्णयं दट्ठुं ।**
**णीअं च काका [18]ओलेन्ति जाता भिक्खस्स हरे[19]हरा ॥५११॥२५३६॥**

**जो जस्स** आदेशोऽवसरः प्रस्तावो भाग इति पर्यायाः । यो यस्य यदावसरः प्रस्तावः स तस्य देशकाल इति भण्यते । यथा भिक्षाचरस्य भिक्षावेला प्रस्तावः

१ उज्झ° को हे त । २ व को हे त । ३ पिंडी° को हे । ४ य हे त । ५ °रोवट्ठो त । ६ साम वि रामो विमिच्छाए त । ७ चिगि° को हे । ८ २५३१-२५३२ एते गाथे कोहेतप्रतिषु २५३४ गाथायाः पश्चादनुवर्तिन्यौ । ९ वि त । १० °धाभावतो त । ११ पव्ववत् इति प्रतौ । १२ तुल्लंमि को । १३ सोपायं को हे त । १४ कालोदे° को हे त । १५ निध्धू° दी । १६ °लाथूभं को हे त दी हा म । १७ थुण्ण° त । १८ वोलेंति को । ओलिंति हे म । १९ °हारा त ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रन्धनपरिसमाप्तौ निर्धूमको ग्रामः, पानीयवाहिकाशून्यं च जलनिपानम्, नीचैः काकनिलयनं च दृष्ट्वा भिक्षादेशकालः इमे हरन्तीत्येवं क्रियाभूयस्त्वं हरहर ॥२५३५-३६॥

**णिम्मच्छियं मधुं पायडो णिधी खज्जयोमणो सुण्णो।**
**जा अंगणे पसुत्ता पउत्थपतिया य मत्ता य ॥५१२॥२५३७॥**

**णिम्मच्छियं मधुं** गाहा । ग्रहणदेशकालो वर्तत इति ॥२५३७॥

अथ कालः—कालनिरूपणम्—कलनं कालः इत्येकः कालशब्दः प्राग् निरूढः, द्वितीयः कालशब्दः पारिभाषिकः समयनिबद्धः, कालो मरणमुच्यते तस्य मरणस्य कलनं क्रिया कालकालः —

**कालो त्ति मतं मरणं जधेह मरणं गतो त्ति कालगतो।**
**तम्हा स कालकालो जो जस्स मतो मरणकालो ॥२५३८॥**

**कालो** गाहा गतार्था ॥२५३८॥

अस्यैव कालशब्दस्यानेकार्थतां रूढिगतां गीतिकया दर्शयति —

**कालेण कतो कालो अम्हं सज्झायदेसकालम्मि ।**
**तो णेणं हतो कालो अकाले कालं करेन्तेणं ॥५१३॥२५३९॥**

**कालेण** । कालो वर्णः कृष्ण इत्युच्यते । तेन 'कालकेन' कृष्णवर्णेन 'कृतः कालः' इति कालशब्दो मरणवाची देशीपदानुवृत्त्या संज्ञायां कन् । 'अस्माकं स्वाध्यायदेशकाले' स्वाध्यायप्रस्तावे ततस्तेन कालकेन 'अकाले' अभागे 'कालं कुर्वता' मरणं गच्छता 'हतः कालः' स्वाध्यायकालविघातः कृतः, अस्वाध्यायिकं कृतमिति ॥२५३९॥

अथ प्रमाणकालनिरूपणार्था गाथा —

**अद्धाकालविसेसो पत्थयमाणं व माणुसे खेत्ते ।**
**सो संववहारत्थं पमाणकालो अहोरत्तं ॥२५४०॥**

**अद्धा०** अद्धाकालः सूर्यक्रियाविशिष्टः समयादिरुक्त एव । तस्यैवाद्धाकालस्य विशेषः कश्चिद्भेदः, प्रस्थकमानवत् । समयक्षेत्रे सिद्धान्तपदार्थमानसंव्यवहारनिमित्तं प्रमाणकालः अहोरात्रमुच्यते ॥२५४०॥

---

१ °उज्जगावणो को हे, °यावणो त । २ पओत्थ° त । ३ पमत्ता त । ४ गउ त्ति को हे । ५ मओ स मर° को हे । ६ तेण को हे त दी हा म । ७ °कालि को म । °काल त दी । ८ कालयं को । ९ करं° को हे । करें° दी हा । करंतेण म । १० खित्ते को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तद्विशेषणार्थमाह —

[१६७-द्वि०] दुविधो पमाणकालो दिवसपमाणं च होति [1]रत्ती य ।
चतुपोरिसिओ[2] दिवसो रत्ती[3] चतुपोरिसी चेव ॥५१४॥२५४१॥
पोरिसिमाणमणियतं दिवसणिसावड्ढिहाणिभावातो[4] ।
हीणं तिण्णि[5] मुहुत्तद्धपंचमा माणमुक्कोसं ॥२५४२॥
वड्ढी[6] बावीसुत्तरसतभाओ[7] पतिदिणं मुहुत्तस्स ।
एवं हाणी वि मता अयणदिणविभागतो[8] णेया ॥२५४३॥

दुविधो गाहा । दिवसप्रमाणं चतस्रः पौरुष्यः । रात्रिरप्येवमेव । पौरुषी-शब्देन च सिद्धान्ते याम उच्यते । पुरुषः प्रमाणमस्याः छायायाः सेयं पौरुषी । एकत्र लक्षणतया दृष्टेति सर्वत्र रूढिः कृता । गमनाद् गौरिति तिष्ठतो गोत्वं भवत्येवेति । यद्यपि दिवसस्य रात्रेश्च [च]तुर्थो भागः पौरुषी तथापि दिवसरात्रिवृद्धिहानिभ्यामनियतं पौरुषीप्रमाणम् । सर्वलघुपौरुषीप्रमाणं त्रयो मुहूर्त्ताः, सर्वोत्कृष्टं अर्द्धपञ्चमा मुहूर्त्ताः द्वादशकाष्टादशके अहोरात्रप्रमाणे । पौरुष्याश्च प्रतिदिनं मुहूर्त्तद्वाविंशतिशतभागो वर्द्धते हीयते वा । अस्याश्च वृद्धेर्हानेर्वा कथमनुगमनमिति ? तदाह— अयनदिनविभागतो ञे( ने )या ज्ञातव्या, ज्ञेया वा ज्ञातव्येत्यर्थः ॥२५४१–४३॥

अयनस्य च दिनानि त्र्यशीतिशतम्, तेभ्यः परिज्ञानं त्रैराशिकेन । यदि त्र्यशीत्यधिकशतेन जघन्योत्कृष्टपौरुषीप्रमाणयोरंशार्द्धो मुहूर्त्तस्तत एकदिवसेन किमिति अनुपाते लब्धं फलं मुहूर्त्तस्य द्वाविंशशतभागः । त्रैराशिकार्थं गाथा चेमा —

उक्कोसजहण्णाणं जदंतरालमिह पोरिसीणं तं ।
तेसीतसतविभत्तं वड्ढि[9] हाणिं च [10]जाणाहि ॥२५४४॥

उक्कोस० गतार्था ॥२५४४॥

वर्णकालनिरूपणाय —

पंचण्हं वण्णाणं जो खलु वण्णेण[11] कालओ वण्णो ।
सो होति वण्णकालो वण्णिज्जति[12] जो व जं कालं ॥५१५॥२५४५॥
पज्जायकालभेतो वण्णो कालो त्ति वण्णकालोऽयं ।
णणु एस णामतो[13] च्चिय कालो णाणियमतो तस्स ॥२५४६॥दारं॥

---

१ राईअ दी हा म को हे त । २ °रिसीओ जे त । ३ राई को हे त म दी हा । ४ °सावुड्ढी° को हे । ५ तिण्ण त । ६ वुड्ढी को हे त । ७ °सगभा° त । ८ °दिणभा° हे । ९ वुड्ढि को हे । १० णिं° जा° जे । ११ वन्नेण त । १२ वणिज्ज° दी । १३ नामउ को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[पंचण्हं], पज्जाय० गाहा । कलनं कालः, पर्यायाणां कलनं परिमाणं पर्यायकालः, तस्य भेद एकांशः, कोऽसौ वर्णः ? रूपमित्यर्थः । वर्णश्चासौ कालश्चेति वर्णकालः कृष्णरूपमित्यर्थः । ननु च लोकप्रसिद्धत्वात् कालो वर्ण एवेति गम्यते । तच्च न, यस्मादनियमेनाऽन्यत्रापि समयाद्यर्थे, मरणार्थे च कालशब्दो वर्तत इति तद्व्यवच्छेदार्थं वर्णकालः ॥२५४५–४६॥

अथ भावकालनिरूपणार्थं भावा औदयिकादयस्त्रिपञ्चाशत्, तेषां कालो भावकालः । स च चतुर्द्धा —

**साती सपज्जवसितो चतुभंगविभागभावणा [1]एत्थं ।**
**ओदइयादीयाणं तं जाणसु भावकालं तु ॥५१६॥२५४७॥**

साती सपज्जवसितो इत्यादि । सादिसपर्यवसितादीनां चतुर्णां भङ्गानां विभागः । अनन्तरगाथायाः भावना च इत्थं वक्ष्यमाणा नारकादिभावादि ॥२५४७॥

**साती संतोऽणंतो एवमणाती वि एस चतुभंगो ।**
**ओद[2]इयादीयाणं हो[२६८–प्र०]ति जधाजोग[3]मायोज्जो ॥२५४८॥**

[4]साती गाहा । सादिः सान्तश्चानन्तश्चेति भङ्गद्वयं लभ्यते । एवमनादिरपि सान्तश्चानन्तश्चेति भङ्गद्वयम् । एष चतुर्भङ्गका(कः), एष चौदयिकादीनां यथायोगमायोज्य इत्यादेशः ॥२५४८॥

स चायम् —

**जो णारगातिभावो तध मिच्छत्तातयो [5]य भव्वाणं ।**
**ते चेवाभव्वाणं ओद[6]यियो बितियवज्जोऽयं ॥२५४९॥**

जो णारगातिभावो । औदयिकादिभावः गतिकषायलिङ्गमिथ्यादर्शनाऽज्ञानाऽसंयताऽसिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदा इत्येकविंशतिविधः । तत्र गतिर्नारकादिरौदयिकः सादिसपर्यवसानश्च । मिथ्यादर्शनादिर्भव्यानां अनादिः सपर्यवसानः, मिथ्यादर्शनादिरभव्यानामनादिरपर्यवसानः, एवमौदयिको द्वितीयभङ्गवर्जस्त्रिभङ्गः । न हि कश्चिदौदयिकस्सादिरपर्यवसान इति ॥२५४९॥

तथा —

**सम्मत्तचरित्ताइं साती संतो य ओ[7]वसमिओऽयं ।**
**दाणातिलद्धिपणयं चरणं पि य खाइयो होति[8] ॥२५५०॥**

१ इत्थं म । २ उदईआ° म । ३ सादी पज्ज० इति प्रतौ । ४ °जोग्गमाउज्जा को । °माउज्जो हे, । °माओज्जा त । ५ °त्ताइओ को । ६ वि हे त । ७ उदईओ त । ८ उवसमीओ त । ९ भावो को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सम्मत्तणाणदंसणसिद्धत्ताइं तु सातिओऽणंतो ।**
**णाणं केवलवज्जं साती संतो खयोवसमो ॥२५५१॥**
**मतिअण्णाणादीया भव्वाभव्वाण ततियचरिमोऽयं ।**
**सव्वो पोग्गलधम्मो पढमो परिणामिओ होति ॥२५५२॥**
**भव्वत्तं पुण ततिओ जीवाऽभव्वाति [1]चरिमभंगो तु ।**
**भावाणमयं कालो भावावत्थाणतोऽणण्णो [2] ॥२५५३॥**

**सम्मत्तचरित्ताइं । संमत्तणाणदंसण० । मतिअण्णाणादीया । भव्वत्तं पुण ।** गाहा । औपशमिको भावो द्विविधः--सम्यक्त्व-चारित्रे । तस्य प्रथमभङ्गः---सादिस्सान्तश्च । क्षायिको नवभेदः । तत्र दानलाभभोगोपभोगवीर्याणि लब्धिपञ्चकं क्षायिकचारित्रं च प्रथमभङ्ग एव सादिः सान्तश्च । क्षायिकं सम्यक्त्वं ज्ञानदर्शनसिद्धत्वानि द्वितीयभङ्गः सादिरपर्यवसानः । क्षायोपशमिकोऽष्टादशभेदस्तत्र केवलवर्जं ज्ञानचतुष्टयं सादिः सान्तः प्रथमभङ्गः । मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं च भव्यानां तृतीयभङ्गः अनादिः सान्तश्च । एतदेव त्रितयमभव्यानामनादिरनन्तश्चतुर्थभङ्गः तथा पारिणामिकः "जीवभव्याभव्यत्वादीनि च"[तत्त्वार्थ० २.७.]इति । आदिग्रहणादपरिसंख्यानः । तत्र यावान् पुद्ग-लधर्मपरमाण्वादिः स सर्वः सादिः सान्तश्च प्रथमभङ्गः । भव्यत्वं तृतीयभङ्गः अनादिः सान्तश्च । तस्मादवश्यं सर्वे भव्याः सेत्स्यन्ति । यदि पुनः केचिद् भव्या अपि न सिद्धे(ध्ये)युस्ततश्चतुर्थभङ्गानुज्ञाऽपि स्यादेव । चतुर्थभङ्गः पारिणामिकः अभव्यत्वम् अनादिरपर्यवसानः । जीवत्वं चतुर्थभङ्ग एव । भावानामयं कालो भावावस्थानादनन्यः, तत्पर्यायवत ॥२५५०-५३॥

**एत्थं पुण अधिगारो पमाणकालेण होति णातव्वो ।**
**खेत्तम्मि [4] कम्मि [5] कालम्मि [6] भासितं जिणवरिंदेणं [7] ॥५१७॥२५५४॥**
**वइसाहसुद्धए [8] कारसीयं [9] पुव्वण्ह देसकालम्मि [10] ।**
**महसेणवणुज्जाणे अणंतरपरंपरं [11] सेसं ॥५१८॥२५५५॥**
**खयियम्मि [12] वट्टमाणस्स भगवतो [13] णिग्गतं जिणवरस्स [14] ।**
**भावे खयोवसमियम्मि [15] वट्टमाणे [16] हि तं गहितं ॥५१९॥२५५६॥**

१ °चरमो° हे त । २ °चरम° हे त । ३ °णत्थो त । ४ खेत्तंमि दी हा । ५ कंमि दी हा म । ६ काले दी हा । ७ °देण को हे म । ८ °द्धइक्का° को हे म त । °द्धएक्का° दी हा । ९ °सीए हे । °सीइ त म । १० °लंमि दी हा । ११ °तरं प° हा हे । °रंपर° दी । १२ °यंमि दी हा । १३ °स्स निग्गयं भयवओ जि° दी हा म । १४ जिणिंदस्स दी हा म को हे त । १५ °यंमि दी हा । १६ °णेहिं को हे दी हा म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एत्थं पुण** गाहा । **वइसाह**०गाहा । **खयियम्मि** गाहा ॥२५५४–५६॥

अत्र चोद्यम् —

**किंध[२६८–द्वि०] पगतं भावेणं किंधमधिकारो पमाणकालेणं ।**
**खाइयकालेऽरुहता पमाणकालम्मि जं भणितं ॥२५५७॥**

मूलसूत्रे उक्तं कालो नवविधः "**दव्वे अद्ध अधाउय**" [गा० २५०२] इत्यादि । नवमो भावकालः । "**पगदं तु भावेण**" [गा० २५०२] भावकालेनात्र प्रकृतमुपयोग इत्यर्थः । पुनश्चोच्यते **एत्थं पुण अधिगारो पमाणकालेण** [गा० २५५४] त्ति कथमेतद् विरुद्धमेकेन प्रकृतमन्येनाधिकार इति ? तमविरोधमाहाचार्यः–क्षायिककाले अर्हता भाषितं सामायिकम्, प्रमाणकाले च पूर्वाह्णे इत्यविरुद्धमुभयम् अथवा नैवेदमुभयम् । किं तर्हि ? एकमेवेदं प्रमाण-भावकालश्चेति ॥२५५७॥ तद्दर्शयति —

**अधवा पमाणकालो त्ति भावकालो त्ति जं च सेसो वि ।**
**किंचिम्मत्तविसिट्ठा सव्वे च्चिय भावकाल त्ति ॥२५५८॥**

**अधवा पमाण**० गाहा । प्रमाणकालपूर्वाह्णः, स एव भावकालः, अद्धाकालस्वरूपत्वात् । न केवलमयमेव भावकालः किन्तु शेषा अपि किञ्चिन्मात्रविशेषाद् भिद्यमानाः भेदमुपयान्ति । परमार्थतस्तु तेऽपि भावकाल इति । तस्मादेकमेवेदं प्रकृतमधिकारश्चेति ॥२५५८॥

**आधिक्केणं[10] कज्जं पमाणकालेण जमधिकारो त्ति ।**
**सेसा वि जधासंभवमायोज्जा[11] णिग्गमे काले ॥२५५९॥ दारं ॥**

**आधिक्केणं** गाहा । आधिक्येन कार्यं प्रमाणकालेनेति अधिकारवाचोयुक्त्या भण्यते । निर्गमद्वारेऽस्मिन् शेषा अपि द्रव्यकालादयो यथासम्भवमायोज्याः ॥२५५९॥

अथावसरप्राप्तं क्षेत्रमुच्यते, बहिरङ्गत्वात्—

**खेत्तं मतमाकासं सव्वदव्वावगाहणा लिंगं ।**
**तं दव्वं चेय णिवासमेत्तपज्जायतो खेत्तं ॥२५६०॥**

**खेत्तं मतमाकासं** "क्षि[15] निवास-गत्योः" इति खे(क्षे)त्रमाकाशमिति मतमिष्टम् । "आकाशस्यावगाहः" [तत्त्वा० ५. १८] इति सर्वद्रव्यावगाहना लिङ्गम् तदपि द्रव्यमेवं सत् निवासपर्यायस्य [धारण]मात्रेण क्षेत्रमुच्यते ॥२५६०॥

---

१ कध त । २ कधम° त, कहम° को हे । ३ °यभावेऽ को हे त । ४ °काले य जं को त । °कालेग जं हे । ५ °भागका° जे । ६ °काल त्ति को । ७ सेसा को हे । ८ °चिम्मेत्त° को हे । °चिम्मित्त° त । ९ वि य त । १० °क्केण कज्जेणं प° त । ११ °माउज्जा को हे । १२ काले त । १३ °व्वदव्वा° हे । १४ चेव को हे त । १५ क्षि नि० इति प्रतौ । १६ व तानि इति प्रतौ । १७ °स्य मात्र इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**तं च महसेणवणोवलक्खितं जत्थ णिग्गतं [1]पुव्वं ।**
**सामाइयमण्णेसु तु परंपरविणिग्गमो तस्स ॥२५६१॥ दारं ॥**

**तं च [2]महसेणवणो०** इत्यादि । तच्च क्षेत्रं महासेनवनोपलक्षितमनन्तरनिर्गमं प्रति सामायिकस्य । अन्येष्वपि क्षेत्रेषु भगवता भाषितमेव, तंत् परंपरनिर्गमः सामायिकस्य ॥२५६१॥

अथ पुरुषस्वरूपवर्णनाय—

**दव्वाभिलावचिंधे वेते धम्मत्थ भोग भावे य ।**
**भावपुरिसो तु जीवो भावे पगतं तु भावेणं ॥५२०॥२५६२॥**

**दव्वाभि०**गाहा । द्रव्यपुरुषादिरष्टधा पुरुषः । भावपुरुषेणात्र शुद्धेन भगवता तीर्थकरेणाधिकारः ॥२५६२॥

**आगमतोऽणुवयुत्तो इतरो दव्वपुरिसो तिधा ततिओ ।**
**एगभवियाति तिविधो मूलुत्तरणिम्मितो वा वि ॥२५६३॥**

**आगमतो** गाहा । द्रव्यपुरुषो द्वेधा-आगमतो नोआगमतः । आगमतः पुरुषपदार्थज्ञोऽनुपयुक्तः । इतरः इति [व्यति]रिक्तो द्वेधा—मूलगुणनिर्मितः, उत्तरगुणनिर्मितश्च ॥२५६३॥

अथाभिलापपुरुषः—

**अभिलावो [3]पुंलिंगाभिधाणमेत्त घडो व्व चिंधे तु ।**
**पुरिसागिती णपुंसो वेदो वा [१६९-प्र०] पुरिसवेसो वा ॥२५६४॥**

**अभिलावो** गाहा । अभिलापः शब्दः पुंलिङ्गाभिधानमात्रम्—घट इति पट इति वा-अभिलापपुरुषः । चिह्नपुरुषस्तु अपुरुषोऽपि स्वयं पुरुषचिह्नोपलक्षितः नपुंसकः श्मश्रुचिह्नः, पुरुषवेदो वा चिह्नपुरुषः, तेन चिह्न्यते पुरुष इति । पुरुषवेषो[8] वा यः स्त्र्यादिः ॥२५६४॥

वेदपुरुषनिरूपणायाह —

**वेतपुरिसो तिलिंगो वि पुरिसवे[9]ताणुभूतिकालम्मि ।**
**धम्मपुरिसो तदज्[10]जणवावारपरो जधा साधू ॥२५६५॥**

---

१ महासे॰ जे । २ पुव्विं त । ३ य को हे । ४ महा इति प्रतौ । ५ सत् प॰ इति प्रतौ । ६ तहा को हे । ७ पुलिं॰ त । ८ ॰षो वस्त्रादेरपि इति प्रतौ । ९ ॰वेसाणु॰ त । १० ॰ज्जयण॰ त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**वेतपुरिसो** गाहा । त्रिष्वपि लिङ्गेषु तृणज्वालोपमवेदानुभवकाले **वेदपुरुषः**, धर्मपुरुषस्तु साधुधर्मार्जनव्यापारः । २५६५॥

**अत्थपुरिसो तदज्जणपरायणो मम्मणो व्व णिधिपालो ।**
**भोगपुरिसो समज्जितविसयसुहो चक्कवट्टि व्व ॥२५६६॥**

**अत्थपुरि०** इत्यादि । अर्थाऽर्जनपरोऽर्थपुरुषः, मम्मणनिधिपालवत् । समा(म)र्जितसमस्तविषयसुखः स्वयं भोगसमर्थश्च भोगपुरुषश्चक्रवर्त्तिवत् ॥२५६६॥

**भावपुरिसो तु जीवो सरीरपुरि सयणतो णिरुत्तवसा ।**
**अधवा पूरणपालणभावातो सव्वभावाणं ॥२५६७॥**

**भावपुरिसो** इत्यादि । पूः शरीरं पुरि शेते इति निरुक्तिवशात् पुरुषो जीवः संसारी, शरीरशयनात्, सत्सर्वभावपूरणपालनसामर्थ्याद्वा सर्व एव जीवः पुरुषः शुद्धः स्वभावावस्थानात् ॥२५६७॥

**दव्वपुरिसादिभेदा वि जं च तस्सेव[3] होन्ति[4] पज्जाया ।**
**तेणेह भावपुरिसो सुद्धो जीवो जिणिन्दो[5] व्व ॥२५६८॥**

**दव्व०** गाहा । येऽपि च द्रव्यपुरुषादयो भेदास्तेऽपि तस्यैव शुद्धद्रव्यस्य पर्याया इति भावपुरुषः शुद्धो जीवस्तीर्थकरवत् ॥२५६८॥

**पगतं विसेसतो तेण वेतपुरिसेहिं[6] गणधरेहिं च ।**
**सेसा वि जधासंभवमायोज्जा उभयवग्गे वि ॥२५६९॥**

**पगतं विसेसतो** इत्यादि । 'प्र'शब्दोऽतिशये, यद्यपि सर्वे कथञ्चिद्यथायोगमुपपद्यन्ते, तथापि तेन भावपुरुषेण, वेदपुरुषैश्च गणधरैरत्रातिशयेन विशेषेणाधिकार इति । शेषा अपि यथायोगमायोज्या धर्मपुरुषाऽभिलापपुरुषवत् उभयवर्गेऽपि तीर्थकरे गणधरेषु चेति ॥२५६९॥

**णिक्खेवो[10] कारणंम्मि चतुव्विधो[11] दुविधो[12] होयि दव्वम्मि ।**
**तद्दव्वमण्णदव्वे अधवा वि णिमित्तणेमित्ती ॥५२१॥२५७०॥**
**समवायि असमवायी छव्विध कत्ता य करणं कम्मं च ।**
**तत्तो य संपताणावताण तध संणिधाणे य ॥५२२॥२५७१॥**

१ °रुत्तिव° को । २ पुंसः श°-इति प्रतौ । ३ °सेव को हे त । ४ होंति को हे। ५ °णिंदो को हे। ६ °सेहिं को हे। ७ विसेसा हे । ८ °माउज्जा को हे । ९ °मुपयते-इति प्रतौ । १० °क्खेवु म । ११ °णंमी दी हा। °णम्मी त को हे म । १२ व्विह को। १३ °विहो य को, °विहु हे दी हा। °व्विह म । १४ य कम्म करणं दी हा त । १५ °णापता° दी म हा को हे त । १६ संान° दी हा को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

निक्खेवो कारणम्मीत्यादि। करोतीति कारणं कर्त्तरि कारके स्वात्मानं कार्यं निर्वर्त्तयतीत्यर्थः। 'कारणस्य निक्षेपः' इति वक्तव्ये 'कारणे निक्षेपः' इति अधिकरणनिर्देशः पर्यायाणां घटपटादीनां मृत्-तन्त्वादिद्रव्यं कारणमाधार इत्येवं प्रकाशनार्थः। स च कारणे वक्तव्ये निक्षेपश्चतुर्विधः पूर्ववन्नामादि–नामकारणं स्थापनाकारणं च निर्दिष्टार्थम्, द्रव्यकारणं द्विविधमागमतो नोआगमतश्च। एतदपि पूर्वेण समानम्। यस्तु विशेषः स उच्यते–ज्ञशरीर-भव्यशरीरव्यतिरिक्तं नोआगमतो द्विविधं द्रव्यकारणम्। तद्द्रव्यमन्यद्रव्यं चेति। अथवा अन्यथा द्विविधत्वं निमित्तकारणं नैमित्तकारणं च।

अथवा द्विविधं समवायिकारणमसमवायिकारणं चेति। अथवा षड्विधम्–नोआगमतो द्रव्यकारणम् षड्विधमित्यनुस्वारोऽत्र प्राकृतशैल्या लुप्तो निर्दिष्टः। कर्त्ता कारणम्, करणम् कारणम्, एवं सम्प्रदानम्, अपादानम्, तथा सन्निधीयतेऽस्मिन्निति सन्निति(धिः) सन्निधानं अधिकरणमुच्यते ॥२५७०–७१॥

एषां विकल्पानामेकैको(कैकस्य) विवक्षावशादर्थनिगमी(म)सम्भवप्रदर्शनार्थम्, अनेकपर्यायख्यापनार्थं च वस्तुनः प्रपञ्चशोऽनेकभेदाभिधानं अर्थक्रमेण व्याख्यानमिति भाष्यगाथा—

तद्दव्वकार[१६९–द्वि]णं तंतवो पडे॑स्सेह जेण तं॑म्मयता। दारं।
विवरीतमण्णकारणमिट्ठं वेमा॑दयो तस्स ॥२५७२॥ दारं॥

तद्दव्वकारणमित्यादि। तस्यैव द्रव्यं तद्द्रव्यम्, तच्च तत्कारणं च 'तद्द्रव्यकारणम्' यथा तन्तवः पटस्य। 'येन तन्मयता' तच्छब्देन तन्तवोऽभिसम्बन्ध्यन्ते, तैर्निर्वृत्तस्तन्मयस्तस्य भावस्तन्मयता। तन्तुमयपट इति तस्यैव पटस्य कार्यस्य द्रव्यं कारणं तन्तवः। तद्विपरीतमन्यद्रव्यकारणं वेमादयः। विपरीतता अतन्मयत्वम्, अन्यस्यापि कार्यान्तरस्य शौटक-शाटिकादेर्वेमादयः साधारणं कारणमित्यन्यद्रव्यकारणम्। यैः पुनः पटो निर्वृत्तस्तन्तुभिस्ते तस्यैवासाधारणं कारणं नान्यस्यापीति ॥२५७२॥

यद्येवं तस्यैव ते नान्यस्य। ततः कार्यकारणयोरेकत्वं प्राप्तम्–तन्तवः पट एवेति, असाधारणत्वात्, पटस्वरूपवत्। ततस्तदर्थप्रदर्शनी गाथा—

जति तं तस्से॑यं मतं हेतू णणु कज्जकारणेगत्तं।
ण य तं जुत्तं ताइं जतोभिधाणातिभिण्णाइं ॥२५७३॥

१ तं दव्व॰ जे। २ पदस्से॰ जे। ३ तंम॰ को,। ४ वेसाद॰ जे। ५ शादकशादिकादेगर्वमा॰ इति प्रतौ। ६ ॰स्सेव को हे त।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जति गाहा। यद्येवं ततो न तन्तवः पटस्य कारणम्, अभिन्नत्वात्, तन्तुस्वरूपवत्। कार्यकारणव्यपदेशाभावश्च। न चैतद्युक्तमेकत्वम्, उपपत्तिविकलत्वात्। प्रतीपं चोपपत्तिरस्ति–नाना कार्य-कारणे, भिन्नाभिधानत्वात्, गवाश्ववत्॥२५७३॥

अत्र दूषणमुच्यते—

तुल्लोऽयमुवालंभो भेते वि ण तंतवो घडस्सेव ।
कारणमेगत्ते वि य जतोभिधाणादयो भिण्णा ॥२५७४॥

तुल्लो गाहा। कार्यकारणभेदवादिनोऽप्ययमुपालम्भः समानः। भिन्नमपि नैव कस्यचित् कारणं कार्यं वा भवितुमर्हति–न तन्तवः पटस्य कारणम्, भिन्नत्वात् घटस्येव। ननु चैवं दृष्ट-लोकविरुद्धः उच्यते। न विरोधः। सत्यं दृष्टास्तन्तवः पटस्य कारणत्वेन लोके, न च प्रतिपन्नास्ते तन्तवः एवंप्रतिपत्त्या भिन्ना अभिन्ना इति चैकान्तेन निश्चिताः। भिन्नाभिन्नरूपत्वात् कारणमिति वक्ष्यामः स्याद्वादनिरूपणायाम्। यदपि चोक्तं नाना कार्य-कारणे, भिन्नाभिधानत्वात्, गवाश्ववदित्ययमनैकान्तिकः, एकत्वेऽपि 'यतोऽभिधानादयो भिन्नाः' इति भिन्नाभिधानत्वमिति–एकत्वेऽपि शक्रपुरन्दरवत् दृष्टमिति ॥२५७४॥

तस्माद्भिन्नाभिन्नपक्षयोर्दोष इत्येकान्तपक्षमवधूय उभयदोषनिराकरणादुभयगुणोपसंग्रहाच्च वस्तुस्वरूपस्था[प]नी स्याद्वादप्रक्रियैवाश्रयणीयेति गाथा—

जं कज्जकारणाइं पज्जाया वत्थुणो जतो ते य ।
अण्णेऽणण्णे य मता तो कारणकज्जभयणेयं ॥२५७५॥

जं गाहा। कार्य-कारणमिति वस्तुनः पर्यायौ, विवक्षावशोपनयात्। तौ च पर्यायौ वस्तुनः पर्यायिणः कथञ्चिद्भिन्नौ संज्ञा-स्वालक्षण्य-स्वतत्त्व-प्रयोजन-मिति-भेदादिभिः; कथञ्चिदभिन्नौ, ज्ञेयसद्द्रव्यपृथिवीमृदादिसामान्यपर्यायैरविनाभाविभिः। तस्मादन्यानन्यौ मताविति। कार्यकारणभजना चेयं विवक्षाजनिता। पृथिवी कारणम्, मृत् कार्यम्। पुनश्चोत्तरविवक्षाभेदात् मृत् कारणम्, पिण्डः कार्यम्, तत उत्तरभेदापेक्षया पिण्डः कारणम्, शिवकः कार्यम्, एवं कार्यकारणरूपत्वमेकस्य वस्तुनोऽपेक्षावशादिति॥२५७५॥

अन्याऽनन्यत्वमेकवस्तुविषयं सिद्धान्तप्रसिद्धोदाहरणेन भाव्यते—

णत्थि पुढवीविसिट्ठो घडो त्ति जं तेण जुज्जति अणण्णो ।
जं पुण घडो त्ति पुव्वं ण आसि पुढवी ततो अण्णो ॥२५७६॥ दारं॥

१ पड° त। २ °मेगंते को हे। ३ °न्नातेत्तुनैव प्रतिपत्त्यत्त्या सिन्ना अभि° इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**णत्थि** गाहा। पार्थिवो घट इति पृथिव्या विकारः, पृथिव्या निर्वृत्तः, पृथिव्या अयमिति वा पार्थिवः। विकार-विकारिणोश्च यदन्यत्वं ततः पृथिवी विकारवती प्राक् प्रत्यक्षप्रसिद्धा दृष्टा, ताम् विरहय्य [1]मुंज(जे)सीकावत् पृथग्भूतो विकारो घटाख्यः कश्चिन्नास्ति–पृथिव्येवाकारान्तरविशिष्टा लक्ष्यते। तस्मात् 'पृथिवीविशिष्टः' पृथिवीतो भिन्नः पृथग् घटो नास्तीति कृत्वा तेन कारणेन युज्यते अनन्यः पृथिवीतो घट इति। यद्येवं घटाकारोत्पत्तेः प्राक् पृथिवी विद्यमाना घट इति किं न भण्यते? ब्रूयाश्चेद्–घटाकारस्तदा नास्तीति। एवं तर्हि घटाकारः पृथिवी न भवति, येन विना पृथिवी घटव्यपदेशं न लभते, तस्मादन्यो घटः पृथिवीतः। एतदर्थं पश्चार्धम् **जं पुण घडो त्ति पुव्वं ण आसि पुढवी ततो अण्णो**। एवमेकं द्वैतं गतम् ॥२५७६॥

द्वितीयं द्वैतं निमित्तनैमित्तिकम्—

**जध तंतवो णिमित्तं पडस्स।दारं। वेमातयो तधा तेसिं।**
**जं चेट्ठातिणिमित्तं तो ते पडयस्स णेमित्तं ॥२५७७॥ दारं॥**

**जध तंतवो णिमित्तं पडस्स** इत्यादि। तन्तून्निमित्तमाश्रित्य पटो भवतीति तन्तवो निमित्तकारणं पटस्य। यथा च तन्तुभिर्विना पटो न भवतीति तन्तवः कारणम्, तथा तन्तूनामातानवितानादिचेष्टामन्तरेण पटनिष्पत्तिर्न भवति। तस्याश्चेष्टायाः शलाकाकुकुट्टिकाहस्तोत्क्षेपाङ्गुलिसमाक्रमणदेशतिर्यगादानतप्रक्षेपानुसारतलप्रचयलेखनी-विघट्टितादिकारणमिति वेमादयो नैमित्तकारणं नै(नि)मित्तस्येदं नि(नै)मित्तमिति वेमाद-[यः] सम्बन्ध्यन्ते। तद् वेमादि नैमित्तं कारणम् ॥२५७७॥

अथ तृतीयं द्वैतं समवाय्यसमवायिकारणमिति निरूपणीयम्, तदर्थं गाथा—

**समवायि कारणं तंतवो पडे जेण ते समवयंति[2]।दारं।**
**ण समेति जतो कज्जे वेमाति ततो असमवायी ॥२५७८॥ दारं॥**

**समवायि** गाहा। समेकीभावे, अव अपृथग्भावे 'इण् गतौ', 'अय गतौ' वा, एकीभावेनाऽपृथग्गमनं समवायः संश्लेषः, स येषां विद्यते ते समवायिनः। पटस्तेषु तन्तुषु समवैतीति। समवायिनश्च ते कारणं चेति समवायिकारणम्। आर्हताना-मेतदेव परिणामिकारणमुच्यते तद्द्रव्यकारणमिति यावत्। वैशेषिकाणां च नैगमनया-नुवादिनां समवायः पृथग्पदार्थ एव–सामान्यविशेषभूतानाम्, सत्ताद्रव्यादीनाम्, गुणिगुणभूतानां वा घटरूपादीनाम्, कारणकार्यभूतानां वा तन्तुपटादोनामाश्रयि-भूतानां चापृथग्वर्त्तिनां द्रव्यकर्मादीनां इहबुद्धिहेतुः। इहेति यतः कार्यकारणयोः

१ मुञ्जेषीका° को। २ °यन्ति को।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समवाय इति तन्तुषु कारणद्रव्येषु कार्यद्रव्यं पटाख्यं समवैति । अस्यां च गाथाया-मेतदेव विपरीतमुपवर्ण्यते–'समवायि कारणं तन्तवो पडे जेण ते समवयंति' तत् कथमे-तदुत्सिद्धान्तमाचार्येणोच्यते इति । अत्र समाधिः- नैवाचार्येण परमतमुपजीव्य तेनो(०म्य उ)क्तमिति, नैगमनयस्य प्रत्याख्यानमेव । दुःश्लिष्टत्वात् । वस्तुस्वभावगत्याचार्येण व्याख्यानं क्रियते । न चान्यत्वमेव कार्यकारणानाम्, कारणनित्यत्वात्तदनन्यभाविकार्यनित्यत्वात् पैटाख्ये कार्यद्रव्ये तन्तवः समवयन्ति, तन्तूनामौत्तराधर्येण पटदर्शनात् । तस्मात् सुष्ठूच्यते **'पडे जेण ते समवयन्ति'** । अत्रैवाऽसमवायिकारणं वेमादयः–**'ण समेति जतो कज्जे वेमाति ततो असमवाय'** कार्यद्रव्येति वृत्तेः पटाख्ये । यथा तन्तवः समवायेनो(न) दृश्यन्ते न तथा वेमादय इति अतोऽसमवायिकारणमुच्यते ॥२५७८॥

एतदप्युत्सिद्धान्तमेवेति आचार्य एव पराभिप्रायं प्रकाशयन्नाह—

**वेमातयो णिमित्तं संजोगा असमवायि[2] केसिंचि ।**
**ते जेण [3]तंतुधम्मा पडो य दव्वंत[१७०-प्र०]रं जेण ॥२५७९॥**

**वेमातयो** गाहा । काणादानां हि सिद्धान्तः समवायिनः कार्यद्रव्यस्य कारणं तन्तव इति समवायिकारणम्, तन्तुगुणाः 'तन्तुधर्माः' तन्तुसंयोगाः । कारणद्रव्यान्तरधर्मत्वात् पटस्य कार्यद्रव्यान्तरस्य दूरवर्त्तित्वात् असमवायिनः इत्यसमवायिकारणं तन्तुसंयोगाः–इत्येष परेषां सिद्धान्तः । वेमादयस्तु संयोगनिमित्तभूतत्वात् निमित्तकारणमुच्यन्ते । न पुनः समवायकारणमिति, द्रव्यान्तरसमवायित्वापत्तेः ॥२५७९॥

उपपत्तिगाथा—

**दव्वंतरधम्मस्स य ण जतो दव्वंतरम्मि समवायो ।**
**समवायम्मि वें पावति कारणकज्जेगता जम्हा ॥२५८०॥**

**दव्वंतरधम्मस्स** य गाहा । द्रव्यान्तरधर्मस्य अप्सु शीतादेः तेजसि द्रव्यान्तरे समवायो नास्तीत्युपपत्तिप्रदर्शनमात्रम्, प्रमाणं तु–संयोगाः पटे न समवेष्यन्ति, द्रव्यान्तरधर्मत्वात, शीतादय इव तेजसीति । अथाभ्युपगमात्तन्तुसंयोगाः पटेन समवायिन इष्येरन् । ततोऽयं गाथापश्चार्द्धेन दोष उच्यते–तन्तुपटादिकारणकार्ययोरेकत्वं भविष्यति, परस्परं गुणसमवायित्वात्, तन्तुस्वरूपवत्, पटस्वरूपवद्वा ॥२५८०॥

आर्हतानां तु स्यादन्याऽनन्यत्ववादिनां गुण एवायमन्यत्वं परेण प्रतिपन्न एव, तदनन्यत्वमप्रतिपन्नमिति तत्तदीयोपपत्तिभिरेव प्रतिपाद्यते—

---

१ पयख्ये इति प्रतौ । २ °याई हे । ३ तन्तु° हे । ४ °व्वन्त° को । ५ य को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**जध तंतूणं धम्मा संजोगा तध पडो वि सगुणो व्व ।**
**समवायादित्तणतो दव्वस्स गुणादयो चेवं ॥२५८१॥**

**जध तंतूणं** गाहा । पटोऽपि तन्तूनां धर्म एव, तेषु समवायित्वात्, तन्तुसंयोगवत्, शुक्लतादिगुणवद् वा ।

अत्राशङ्क्यते परवचनम्—धर्मत्वापादनेऽपि नैवानन्यत्वं सेत्स्यति, किन्तु इष्टविघातकृद्धर्मविशिष्टविपरीतसाधनो विरुद्धोऽयं समवायित्वादिति । यथैव तन्तुसंयोगानां शुक्लादीनां च धर्मत्वात् पटस्य तन्तुधर्मत्वमापादयति, एवमनन्यविपर्ययेणान्यत्वेन व्याप्तत्वादन्यत्वविशिष्टधर्मत्वमप्यापादयतीति नैवानन्यत्वमिष्टं सिद्धमिति । उच्यते—नायं विरुद्धः । कथमिति ? न्यायलक्षणात् विरुद्धे सति साधने । इह च विरुद्धाभिधायिप्रमाणस्य अन्यत्वविशिष्टधर्मत्वापादनस्य तन्तुसंयोग-वस्तु-शुक्लत्वादिदृष्टान्तस्यानुभवसिद्धत्वात्, अन्यतरसाध्यविकलदृष्टान्तयोगाद्विरुद्धो न सः । न ह्यार्हतानां तन्तुसंयोगाः शुक्लतादयो वा गुणास्तन्तुभ्योऽन्ये । अत्राप्यन्याऽनन्यत्वोभयधर्मविषयस्याद्वादावलम्बनात् । दर्शयत्याचार्यः—"**दव्वस्स गुणादयो चेवं**" द्रव्यस्य तन्त्वादेर्गुणादयः । आदिग्रहणात् संयोगकार्यद्रव्यसामान्यविशेषधर्माः सम्बध्यन्ते । तेऽप्यन्यानन्यरूपा इति नैकान्तवादः ॥२५८१॥

अथ कश्चिदत्राशङ्केत काणादः—द्रव्यादन्ये गुणाः—बुद्ध्यभिधानलक्षणादिभिन्नत्वात्, गवाश्ववत् । एतदनैकान्तिकत्वप्रख्यापनाय, अनुमानविरुद्धप्रतिज्ञादोषकथनाय वा गाहा—

**अभिधाणबुद्धिलक्खणभिण्णा वि जधा सदत्थतोऽणण्णे ।**
**दिक्कालादिविसेसा तध दव्वातो गुणातीया ॥२५८२॥**

**अभिधाण०** अभिधानबुद्धिलक्षणभिन्नत्वं हि विपक्षे अनन्यत्वे सदर्थादि(दि)क्कालादिषु दृष्टमित्यनैकान्तिकः । अथवाऽनुमानमेवेदम्—पृथक् स्वतन्त्रा द्रव्यादनन्ये गुणाः, अभिधानबुद्धिलक्षणभिन्नत्वे सति परिणामित्वात्, विशेषणविशेष्यरूपत्वात्, सदर्थादि(दि)कालादय इव । सदर्थः सत्ताशब्दवाच्यः सामान्यपरिणामः । दिक्कालाकाशादयस्तस्य विशेषाः पर्यायाः इत्यर्थः । यदि दिक्कालादयः सदर्थादन्ये, असन्तस्तर्हि खरविषाणवत् । अथाऽनन्ये, सदर्थमात्रम्, न नाम केचिदिकालादयस्तद्व्यतिरिक्ताः । तस्मान्नैकान्तेनान्यत्वमिति । सदर्थश्च सामान्यपर्यायः दिक्कालादयो विशेषपर्यायाः । एवं द्रव्य-गुणादयोऽप्यन्यानन्यत्वसामान्यविशेषरूपेण द्रष्टव्याः ॥२५८२॥

---

१ °गुणव्व को, °गुणा व्व हे । २ चेव त । ३ °तवशिष्टं - इति प्रतौ । ४ °द्धो स सः—इति प्रतौ । ५ °त्वादय° इति प्रतौ । ६ °मारमे°—इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यद्यनन्ये सदर्था दिक्कालादयो द्रव्यगुणादयश्च । ततोऽत्यन्ताऽभेदादेकत्वाद् 'दिगियम्' 'कालोऽयम्' इति को विशेषः ? उच्यते—

**उवयारमेत्तभिण्णा ते चेव जधा तधा गुणादीया ।**
**तध कज्जं कारणतो भिण्णमभिण्णं च को दोसो ? ॥२५८३॥**

**उवयारमेत्तभिण्णा** इत्यादि । उपचारो व्यवहारः । तेन संव्यवहारमात्रेण भिन्नास्तथा विवक्षितत्वात् दिक्कालादयो विशिष्टा भण्यन्ते । अन्यथाऽस्तित्वमात्रमेव सर्वं द्रव्यार्थतो वस्तु । तथा द्रव्यगुणादयोऽपि चक्षुरादीन्द्रियशेषकरणा(ण)विशेषान्नानात्वं लभन्ते । अन्यथा द्रव्यमेव गुणा इति । तथैव यदि पटादिकं तु कारणात् भिन्नमभिन्नं च भवेत्ततः को दोष इति तुल्यतापादनात् पूर्वदोषपरिहार इति । उक्तं द्विविधत्वं कारणस्य ॥२५८३॥

इदानीं षड्विधत्वं कारणस्योच्यत इति गाथा—

**कारणमधवा छद्धा तत्थ सतंतो त्ति कारणं कत्ता ।**
**कज्जप्पसाधकतमं करणम्मी[3] पिण्डदण्डादी ॥२५८४॥**

**कारणं** । करोतीति कारणं कर्तरि व्युत्पत्तेः षडपि कारकाणि कारणं कार्यस्य, स्वेन स्वेन व्यापारेणावश्यमुपयुज्यमानत्वात्, सर्वेषां च स्वव्यापारे स्वतन्त्रत्वादविनाभावित्वम्, यथाविवक्षं च तस्य तस्य कारकस्याभीष्टव्यपदेशात् । यथैकस्य धनुषः कारकत्रयव्यपदेशः । दृढत्व-स्वाकारत्व-बद्धत्व-गुणवत्त्वादिभिः कारणैः स्वातन्त्र्यात् धनुरि(रे)व विध्यतीति कर्तृत्वं धनुषः । तथा तस्मादेव तद्विधगुणाद्धनुषोऽपादानात् बाणम्, निष्कृतेन बाणेन करणभूतेन देवदत्तो विध्यति । अथवा तस्य देवदत्तस्य कर्तुः सर्वमेव सबाणं धनुः । धनुषा विध्यतीति । एवमन्यान्यपि योज्यानि इति । तत्र कार्ये निर्वर्त्ये स्वतन्त्रः कर्तेति स्वातन्त्र्येणोपयोगात् कर्ता कारणं कार्यस्य, तेन विना तस्याभावादिति । तथा साधकतमं करणमिति अतिशयवत्साधनयोगात् कार्यप्रसाधकतमं सन्निपत्योपकारित्वात् करणं मृत्पिण्डदण्डादि ॥२५८४॥

अथ कर्मकारणम्—क्रियते निर्वर्त्यते तदिति कर्म कार्यं सत् कथं कारणमिति गाथा—

**कम्मं किरिया कारणमिह णिच्चेट्ठो जतो ण साधेति ।**
**अधवा करणं कुम्भो स कारणं बुद्धिहेतु त्ति ॥२५८५॥**

१ पटादितंतुकारणभिन्नमभिन्नत्व° च—इति प्रतौ । २ °ज्जस्स साहगत° को °ज्जपसाहगत° हे । ३ °णम्मि उ को हे त । ४ पिंडदं° को । °डाइ त, पिंडदंडाइं हे । ५ सबाणं को । ६ °य वचनयो° को । ७ च्चिट्ठो को हे । ८ कम्मं कुम्भो को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**कम्मं**। कर्म च कारकं चेति व्यपदेशात् कारणम्। कस्य? कार्यस्येति। ननु कार्यं कर्म चेत्, कर्मैव वस्तु। तत् कथं स्वात्मन एव कारणं भवति? कारणं स्वयं लब्धात्मलाभम्। अलब्धात्मलाभस्य कार्यस्य निर्वर्त्तनाय क(का)रणं भवतीति। तत् पुनः स्वयमलब्धात्मलाभं कथं स्वस्यैव कारणतां प्रतिपत्स्यत इति? न हि सूच्यग्रं स्वमात्मानं विध्यति, स्वात्मनि क्रियाविरोधादिति।

अथ आहाचार्यः-सत्यम्, साक्षात् कर्म कर्तुरीप्सिततमं कार्यस्य कारणं न भवति, पारम्पर्येण भवतीत्युपचारात् कर्म कारणं कार्यस्य। यासौ कर्तुः क्रिया कार्यनिर्वर्त्तनक्षमा, तस्याः क्रियायाः कारणं कर्म वा कर्माधारा सा क्रियेति कृत्वा। सा च क्रिया कर्मेत्युपचर्यते, तया निर्वर्त्यमानत्वात्। कर्म तु कार्यम्, यत एव—

निर्वर्त्यं वा विकार्यं वा प्राप्यं वा तत् क्रियाफलं।
तददृष्टादृष्टसंस्कारं कर्म कर्तुर्यदीप्सितम् ॥

अथ ब्रूयात् कश्चित्—कर्म कार्यस्य कारणमिति निर्ज्ञातव्ये क्रिया कर्मकारणमुच्यते इति अप्रस्तुताभिधानसम्बन्धमिव लक्ष्यते। आचार्यः—क्रिया हि चेष्टा कर्तुः, तया चेष्टया कर्त्ता कर्म निष्पादयतीति क्रियैवात्र प्रधानम्, यतो निश्चेष्ट आकाशवन्न किञ्चित् साधयति। अथवा किमुपचारेण? मुख्यमेव कर्मास्तु कर्तुरीप्सिततमम्—कुम्भकारः कुम्भं करोति कर्मण्युपपदे अण्प्रत्यय इति कुम्भ एव कर्म। तदेव तस्य कार्यं निर्वर्त्यमिति स एव कुम्भः कारणं कुम्भस्य कार्यस्य। कथमिति? यस्माल्लोके मृत्पिण्डमर्दनचक्रारोपणदण्डग्रहणकाले कुम्भकारः पृष्टः किं करोषीति। प्रत्याह कुम्भं करोमीति। न ब्रवीति मृदं मृद्नामि, चक्रे आरोपयामि, दण्डकं गृह्णामीति वा। तस्मादेवं लक्ष्यते—कोऽपि बुद्धिस्थोऽर्थः कुम्भाख्यः कर्मास्य, येनोच्यतेऽस्यामेवस्थायां कुम्भकार इति। स च बाह्योर्थ उत्पत्स्यमानो वर्त्तमानस्य विज्ञानस्वरूपस्य कुम्भस्य तदालम्बनत्वात् कारणम्, कुम्भबुद्धेर्हेतुत्वादिति। अत एव लोकव्यवहारः सर्वत्र भाविनि भूतवदुपचार इति ॥२५८५॥

ततः(त्)समर्थनी गाथा—

**भव्वो त्ति व जोगो[3] त्ति व सक्को त्ति व सो सरूवलाभस्स।**
**कारणसंण्णेज्झम्मि[4] वि जं णागासत्थमारंभो[5] ॥२५८६॥**

**भव्वो त्ति**। भविष्यतीति भव्यः, भवनयोग्यः शक्यो वा भावयितुम्। एवं बुद्धिस्थोऽसौ स्वरूपलाभस्य कारणम्। यतश्च कारणसन्निधानेऽपि यावन्न बुद्ध्याऽऽलो-

---

१ न तर्हि सू°—इति प्रतौ। न हि सू° को। २ °स्यानव°-इति प्रतौ। ३ जोग्गो को हे। ४ संनेज्झ को। संनिज्झ हे। ५ °रंभो को हे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चितं 'कार्यमिदमेवंविधमनेन क्रियाकलापेन निष्पाद्यम्' इति तावदभीष्टकार्यनिष्पत्ति-रेव न भवति। न चैवं कश्चिज्जिज्ञासनार्थमेव सर्वकार्याणि करोति। एवं क्रियमाणे [न] किमपि भविष्यतीति। न च कश्चिदाकाशनिर्वर्तनार्थमारम्भं करोति, कारणानि वा सम्पादयतीति ॥२५८६॥

तस्मात् वस्तुस्वभावगत्या लोकक्रियासंवादाच्च—

**वज्झणिमित्तावेक्खं कज्जं चियं कज्जमाणकालम्मि ।**
**होति सकारणमिधरा विवज्जयाभावतो होज्जा ॥२५८७॥**

**बज्झ०** गाहा। दण्डचक्रादिबाह्यनिमित्तापेक्षं विज्ञानमन्तरङ्गं कार्यं 'क्रियमाण काले' मृन्मर्दनचक्रारोपादिकाले कारणं भवति तस्य स्वस्यैवात्मन इत्यर्थः। 'इतरथा' अन्यथा निरूपणायां विपर्ययो भवेत्—कुम्भे आरब्धे शरावो निष्पाद्येत, पटो वा, अभाव एव वा स्यात्। कथमभावभवनमाशङ्केत? एतदुक्तं भवति—कुम्भ आरब्धे नैव किञ्चि-दपि कार्यं निष्पाद्येत, तान्यपि कारणानि नश्येयुरिति। न चैतदुभयमिष्टं कदाचिद् भूतपूर्वमिति। तस्माद्यथोक्तमेव कर्म कारणं कार्यस्य कर्मण एव सिद्धमिति ३॥२५८७॥

अथ सम्प्रदानं कारणम्—सम्यक् सत्कृत्य वा प्रयत्नेन दानं सम्प्रदानं अन्व-र्थसंज्ञा, महत्त्वात्। अत एव च रजकस्य वस्त्रं ददातीति न सम्प्रदाने चतुर्थी। तदपि सम्प्रदानं कार्यस्य कुम्भस्य प्रस्तुतस्य कारणम्, तेन विना तस्याऽभूतत्वात्तेन सह तस्य जायमानत्वात्, मृदादिवत्, कर्तृ-करण-कर्मवद्वा प्रसाधितत्वात्। तदर्थनि-रूपणी गाथा—

**देयो स जस्स तं संप[१७०-द्वि०]दाणमिह तं पि कारणं तस्स।**
**होति तदत्थित्तातो ण कीरते तं विणा जं सो ॥२५८८॥**

**देयो स जस्स।** यस्येति प्राकृतशैल्या चतुर्थ्येव षष्ठीरूपेण प्राकृते परिण-मति। शेषं भावितमेव गाथासम्बन्धे ४॥२५८८॥

अथापादानं कारकं कारणं कार्यस्येति निरूप्यते।

**भूपिण्डावायातो पिण्डो वा सक्करादवायातो ।**
**चक्कमधावागो वाऽवादाणं कारणं तं पि ॥२५८९॥दारं॥**

**भूपिण्डा०** गाहा। 'दो अवखण्डने' दानम् अपसृत्य मर्यादया खण्डनम्, यस्मा-दपगम्यते। गतिमता गतिमाश्रित्यान्याधारा क्रियावस्थान्तरासंक्रामणी। पूर्वं स्वेन क्रियारूपेण युक्तमप्यविवक्षितत्वादक्रियमगतिर्ध्रुवं निश्चलमित्यर्थः। अन्यस्यापाये सति

१ विय हे त। २ भावया को हे। ३ भूपिं को हे। ४ पिंडो को हे। ५ वाऽपा को त हे। ६ तम्पि को।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पूर्वं ध्रुवमपादानसंज्ञं भवति । एवं च सिद्धं पुरुषपतनक्रियया वक्तुर्विवक्षितया स्वल्प-यापि पुरुषोऽपायवान्-गतिमान्--चल इत्यर्थः । तया पुरुषाधारया क्रियया वेस्त्वन्तरा-श्रितया एकद्रव्यं कर्मेति धावन्नप्यश्वो निष्क्रियो ध्रुवः, अश्वक्रियाया अविवक्षितत्वात्, 'धावतोऽश्वात् पतितः' इति अश्वस्यैव ध्रुवस्यापादानसंज्ञा "विवक्षातः कारकाणां प्रवृत्तिः"[ ]इति न्यायात् । अत एव च विवक्षाधीनं ध्रुव-चलत्वमित्यनेकमपादानं प्रद-र्शितमाचार्येण। पिण्डापायात् पिण्डापगमाद्विवक्षिताद्भुवो ध्रुवत्वादपादानसंज्ञा 'भुवः पिण्डो निष्पद्यते' इति। अथवा पिण्डो ध्रुवः 'पिण्डाच्छर्करादयः', चक्रं वा चलमपि विवक्षाव-शात् ध्रुवं चक्रात् कुम्भोऽवतार्यते । आपाको ध्रुवः 'आपाकात् कुम्भः उच्छ्रि(द्रि)यते । एतदपि विचित्रमपादानं कारणं कुम्भस्य, तद्भावे भावात्, तदभावे चाऽभावात् मृदादिवदिति भावितमेव ५ ॥२५८९॥

अथाधिकरणं कारकम्—आधिक्येन करणं अधिकरणम्, स चाधारः, आधारेण विना सर्वकारणकार्याण्ययोग्यानि भवन्तीत्याधारस्याधिक्यम् । तदपि तद्भावभावित्वा-दभावेऽभावित्वात् कार्यस्य कारणं यथाविवक्षितम्—

वसुधाऽऽगा[4]सं चक्कं सरूवमिच्चादि सेणिधाणं जं ।
कुंभस्स तं पि कारणसंभावतो तस्स जमंसिद्धी ॥२५९०॥

वसुधाऽऽगासं चक्कमित्यादि । कुम्भकार्यमाधेयं तस्याधारश्चक्रम्, चक्रस्यापि वसुधा, वसुधाया आधार आकाशम्, आकाशस्यान्य आधारो नास्ति, स्वरूप-प्रतिष्ठमाकाशम् तस्मान्निश्चयनयस्य वस्तु । वस्तुत्वात् कुम्भोऽपि स्वरूपाधार इति कार्यमेवाधारः कारकमधिकरणम्, कार्यमेव चाऽऽधेयं कर्मविचारवत्, कार्यकारणयोरेक-त्वमथ च नानात्वं षट्कारक[त्र्य]पदेशादिति द्रव्यकारणमनेकधाऽभिहितम्॥२५९०॥

अथ भावकारणम्--भावात्मकं कारणं भावकारणम् । भावाश्च षट् औपशमिका-दयः सान्निपातिकपर्यवसानाः । तेऽपि केचित् संसारकारणत्वादप्रशस्ताः, केचिद् मोक्षकारणत्वात् प्रशस्ताः । प्रशस्तभावेनाधिकारः, मोक्षशास्त्रस्य प्रस्तुतत्वात् । तत्प्ररू-पणाय गाथात्रयम्—

भावम्मि होति दुविधं अपसत्थ पसत्थयं च अपसत्थं ।
संसारस्सेक्कविधं दुविधं तिविधं च णेगविधं ॥५२३॥२५९१॥

१ वस्तून्तराश्रितया—इति प्रतौ । २ धातवोऽश्वोत्तरित इति—इति प्रतौ । ३ सुधा त । ४ °मासं जे । ५ संनि° को हे । ६ °णमभा° को हे त । ७ जदसि° को हे, जह सि° त । ८ चावत्ते°–इति प्रतौ । ९ दुविहं च होइ भावे दी हा म । १० नायव्वं को हे त दी हा म ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अस्संजमो य एक्को[1] अण्णाणं अविरती य दुविधं तु[2] ।
मिच्छत्तं[3] अण्णाणं च[4] अविरती चेव तिविधं तु ॥५२४॥२५९२॥
होति पसत्थं मोक्खस्स[5] कारणं एग[6] दुविध तिविधं वा[7] ।
तं चेव य विवरीतं अधिकारो[8] पसत्थएणेत्थं[9] ॥५२५॥२५९३॥

भावम्मि होति । अप्रशस्तसंसारकारणमेकमेवाऽसंयमः अवतरतीत्यर्थः । साक्षादनन्तरकारणत्वात् असंयमः प्राधान्यादेक एव निर्दिश्यते । अन्यदस्यैवोपबृंहणत्वादुपकरणमिति पारम्पर्येण संसारकारणम् । तद् व्यवहारनयापेक्षयोच्यते । ज्ञानस्वभावो जीवः । स च ज्ञानसामर्थ्यादक्रियायां न प्रवर्त्तते । तत्र ज्ञानावरणच्छादितत्वादज्ञानमविरतौ जीवं प्रवर्त्तयति । तस्मादविरतिकारणमज्ञानमपि संसारकारणं[10]मिति द्विविधत्वम् । ज्ञानमपि च मिथ्यादर्शनोदयसाहचर्यादज्ञानमुच्यते तस्मादज्ञानकारणं मिथ्यादर्शनमपि संसारकारणमिति त्रिविधत्वम् ।

यत् पुनर्मोक्षकारणं तत् प्रशस्तम् । एतद्विपर्ययेण एकविधः संयम[ः], द्विविधं ज्ञानसंयमौ, त्रिविधं सम्यग्दर्शनज्ञानसंयमा इति । इह च प्रस्तुतसामायिकव्याख्याने प्रशस्तभावकारणेनाऽधिकारः, मोक्षाङ्गत्वात् ॥२५९१-९३॥

अस्य च सामायिकस्यार्थं भाषते तीर्थकरः । स पुनः कृतार्थत्वात् किं कारणं भाषत इति वक्तव्यम् । तदर्थं गाथा—

तित्थकरो किं कारणं[11] भासति सामाइयं तु अज्झयणं ? ।
तित्थकरणामगोत्तं[12] बद्धं[13] मे वेदितव्वं ति ॥५२६॥२५९४॥
तं च कधं वेतिज्जति अगिलाए धम्मदेसणादीहिं[14] ।
बज्झति तं तु भगवतो ततियभवोसक्कइत्ताणं ॥५२७॥२५९५॥[15]
[१७१-म०] गोतममाती सामाइयं तु किं कारणं णिसामेन्ति[16] ? ।
णाणस्स तं तु सुंदरमंगुलभावाण[17] उवलद्धी ॥५२८॥२५९६॥

---

१ एक्कं जे । २ च को हे, वा त । ३ अण्णाणं मिच्छत्तं दी हा म । ४ °णाणं अवि° को हे त म । ५ मुक्ख° म । ६ °णमेगविह हे त, °णं एगविह को । ७ च हे । ८ अहिगारु को म, °कारा त, °अहिगार हे । ९ °एणत्थं त °एणित्थ म । १० °णमपि-इति प्रतौ । ११ कारणं हे । १२ °मकम्मं को, मगुत्तं म । १३ कम्मं दी हा म । १४ °णाईहिं को हे दी हा म । १५ एतद्गाथायाः पश्चात् को हे त दी हा म प्रतिषु इयं गाथा अस्ति—
नियमा मणुयगईए इत्थीपुरिसेयरो व्व सुहलेसो । आसेवियबहुलेहिं वीसाए अण्णयरएहिं
१६ °मेंति को हे म, °मिन्ति दी हा । १७ सुन्दरमङ्गुल° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

होति पवित्ति णिवित्ती संजमे तव पावकम्म अग्गहणं ।
कम्मविवेगो य तधा कारणमसरीरता चेव ॥५२९॥२५९७॥
कम्मविवेगो असरीरयाइ असरीरता अणाबाधं ।
होतणवाधणिमित्तं अवेतणमणाउलो णिरुयो ॥५३०॥२५९८॥
णिरुयत्ताए अयलो अयलत्ताए य सासतो होति ।
सासतभावमुवगतो अव्वाबाधं सुहं लभति ॥५३१॥२५९९॥

**तित्थकरो किं कारण** गाहा षट् । अयं गोत्रशब्दः संज्ञायां वर्त्तते लोकप्रसिद्धेः । तथा च गोत्रस्खलितनायकस्य नायिकायाः प्रतिपक्षसंज्ञयाह्वानात् विपर्यास इत्यर्थः । एवमत्रापि तीर्थकरनामेति यस्य संज्ञा तत् तीर्थकरनामगोत्रं कर्म—तीर्थकरनामसंज्ञमित्यर्थः—तदनेन सामायिकभाषणेन वेद्यते क्षिप्यते । तीर्थकरनामकर्मक्षयस्य कारणमिदं सामायिकाभिधानम् । गौतमादयस्तु किं कारणं तत्सकाशे निशामयन्ति ?—शृण्वन्तीत्यर्थः । उच्यते—तं भगवदर्हदुच्चरितं सामायिकशब्दं श्रुत्वा तदर्थविषयं ज्ञानमुत्पत्स्यत इति सामायिकशब्दश्रवणं सामायिकज्ञानकारणमिति । एतद् गौतमादीनां प्रशस्तं भावकारणम् । तदपि च ज्ञानं "**सुन्दरमंगुलभावाण उवलद्धी**" । इयं चतुर्थी विभक्तिर्द्रष्टव्या । सुन्दरं शुभं मंगुलमशुभम् । ते शुभेतरग्रहणे[न] व्याख्याते ॥२५९४-९९॥

**तित्थकरणामकम्मक्खयस्स कारणमिणं जिणिन्दस्स ।**
**सामाइयाभिधाणं णाणस्स तु गोतमादीणं ॥२६००॥**
**तं पि सुभेतरभावोवलद्धिए सा पवित्ति-णियमाणं ।**
**एवं णेयं कमसो पुव्वं पुव्वं परणिमित्तं ॥२६०१॥**

शुभेतराश्च भावाश्च शुभेतरभावाः, तेषामुपलब्धिः शुभेतरभावोपलब्धिः । तदर्थं तन्निमित्तं तदर्थे चतुर्थी शुभेतरभावोपलब्ध्यै, सा च सुन्दरमंगुलभावोपलब्धिः प्रवृत्ति-निवृत्तो कारणम्—ज्ञात्वा सुन्दरे भावे प्रवृत्तिर्भवेत् मङ्गुलाच्च भावान्निवृत्तिरिति यथासंख्यं निर्देशः । ते च सुन्दर-मङ्गुलप्रवृत्ति-निवृत्ती संयम-तपसोः कारणम्, संयम-तपसी पापकर्माग्रहणस्य कारणम्, कर्मविवेकस्य च यथासंख्येन । उक्तं च "संयमे अणण्हयफले तवे वोदाणफले" । [व्याख्याप्रज्ञप्ति शतक २ उद्देशक ५ तुङ्गिकानगरीश्रावकसूत्रम् ] अणण्हयो अनास्नवः—अनाश्रवः—कर्मानुपादानम् । वोदाणं "दो अवखण्डने"

१ °जय तं जे । २ °रीरता जे त, रयाय दी हा । ३ °ऽणबाहाए को हे म, °बाहा दी हा । ४ °वेयणोऽणा° को, °वेयणु अणा° हे म । ५ °रुयत्ता° को हे त दी हा म । ६ °ए सा° जे । ७ होई त । ८ °ह्वाज्ञावि°—इति प्रतौ । ९ °मिदं को हे त । १० °णिद° को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

व्यपदानमवखण्डनम् - कर्मनिर्जरणम्-कर्मविवेकः-जीवात् पृथक्करणमित्यर्थः । कर्मविवेकः अशरीरतायाः कारणम् । अशरीरता हि अनाबाधकारणम् । अशरीरं हि न प्रतपन्त्युपद्रवाः । अनाबाधत्वमवेदक(न)त्वस्य कारणम् । अवेदनत्वमनाविलत्वस्य अनाकुलस्येत्यर्थः । अनाविलत्वं निरुजत्वमचलत्वस्य कारणम्, अचलत्वं शाश्वतत्वमव्याबाधसुखस्य-एवं ज्ञेयं क्रमशः पूर्वं पूर्वं परस्यापरस्य निमित्तम्-कारणमित्यर्थः । एवं कारणपदार्थो निरूपितः ॥२६००-२६०१॥

प्रत्ययनिरूपणार्थमुच्यते ।

**पच्चयणिक्खेवो खलु दव्वम्मी[१] तत्तमासगादीओ[२] ।**
**भावम्मि[३] ओधिमादी तिविधो पगतं तु भावेणं ॥५३२॥२६०२॥**
**केवलणाणि त्ति अहं अरहा[४] सामाइयं परिकधेन्ति[५] ।**
**तेसिं पि पच्चयो खलु[१७१-द्वि०] सव्वण्णु[६] त्ती णिसामेन्ति[७] ॥५३३॥**
**॥२६०३॥**

**पच्चयणिक्खेवो** गाहा । **केवलणाणि** गाहा । प्रत्याययति विवक्षितपदार्थमिति प्रत्ययः, प्रत्यायनं वा प्रत्ययः, प्रतीयतेऽनेनास्मिन्निति वा प्रत्ययः, प्रतीयते वाऽस्मादिति प्रत्ययः, यथायोगम् ॥२६०२-३॥

नामादिपु प्रत्ययेपु नाम-स्थापने पूर्ववत् । व्यतिरिक्तद्रव्यप्रत्यये विशेष उच्यते-

**दव्वस्स दव्वतो वा दव्वेण ये दव्वपच्चयो णेओ ।**
**तव्विवरीतो भावे [१०]सोऽवधिणाणादिओ तिविधो ॥२६०४॥**

**दव्वस्स** गाहा । प्रत्ययो हेतुः समयः अवष्टम्भो लिङ्गं सम्प्रत्यय इति यावत् द्रव्यस्य प्रत्ययः प्रत्याय्यपुरुषस्य प्रतीतिरुत्पादनीयेति सत्यमेतदित्यवबोधः द्रव्यप्रत्ययः । अपहृ(हृ)तद्रव्यैकदेशरिक्थप्रदर्शनात द्रव्येण प्रत्ययः, कोशफालधरोदकविषादिना बाह्यलोकप्रतीतेन वा तप्तमाषकादिना त्रिसत्योच्चारणादिना येन प्रतीतिः प्रत्याय्यस्य भवति स द्रव्यप्रत्ययः । तद्विपरीत इति द्रव्यालम्बनं मुक्त्वा बाह्यलिङ्गकरणनिरपेक्षः आत्मस्वरूपावबोधः त्रिविधोऽवधि-मनःपर्याय-केवलाख्यो भावप्रत्ययः । प्रकृतं सामायिकमुररीकृत्य भावप्रत्ययो व्याप्रियते ॥२६०४॥

केन प्रत्ययेन केन चावष्टम्भेन भापतेऽर्हन्निति आह----

---

१ °व्वंमी दी हा म । २ तन्नमा° त । ३ °गादओ दी हा । ४ भावंमी दी हा म । ५ अरिहो को, अरिहा हे । ६ °कहेइ को हे त म, °कहेई दी हा । ७ °ण्णू तो हे त दी हा म । ८ °मेंति को °मिति हे दी हा, °मंति म । ९ व को हे त । १० सो वि हु नाणा° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**केवलणाणित्तणतो अण्ण च्चिय पच्चओ जिणिंन्दस्स ।**
**तप्पच्चक्खत्तणतो तत्तो च्चिय गोदमादीणं ॥२६०५॥**

केवलप्रत्ययात् सर्वत्राप्रतिहतज्ञानोऽहमिति केवलज्ञानादेव तस्य प्रत्ययः, प्रत्याय्य-जीवलोकस्य च यथार्थप्रतीत्युत्पादनात्, केवलज्ञानानन्यरूपत्वादात्मैव प्रत्ययोऽर्हतः । स च भगवान् गौतमादीनां सर्वसंशयपरिच्छेदादवि(धि)गतसर्वज्ञत्वः प्रत्यक्ष इति तत्-प्रत्ययादेव केवलप्रत्ययादेव सामायिकार्थशब्दश्रवणमिति ॥२६०५॥

ननु चावबोधसामान्ये सति मति-श्रुतज्ञनाप्रत्ययत्वं सामायिकस्य प्राप्तम् । तत् किमिति नोच्यते ? आहाचार्यः—

**जेणाणिंदि[1]यं[2]मिट्ठं[3] सामइयं तोऽवधातिविसयं तं ।**
**ण तु मति-सुतपच्चक्खं जं ताइं परोक्खविसयाइं ॥२६०६॥**

**जेणा०** गाहा । अपसृतानीन्द्रियाणि यस्मात् सामायिकमतीन्द्रियम्, रूपिद्रव्य-निबन्धनानीन्द्रियाणीति । सामायिकं चात्मरूपत्वादमूर्त्तम्, मनोऽपीन्द्रियसहचारि-त्वात् परोक्षविषयत्वात्, तस्मादपनीयत एव । प्रत्यक्षप्रमाणं चाऽविसंवादित्वात् प्रत्यय इष्यते । न तु परोक्षम् । मति-श्रुते च उभये अपि परोक्षज्ञाने । तस्मात्तयोः सम्प्रत्ययो नास्तीति अवध्यादिविषय एव प्रत्ययः ॥२६०६॥

एवं तर्हि सामायिकं प्राप्य केवलज्ञानमेव प्रत्ययो युक्तः सर्वद्रव्यपर्यायविषयत्वात् केवलस्य । सामायिकं चात्मपरिणामत्वादरूपम् । रूपिद्रव्यनिबन्धके चावधि-मनः-पर्यायज्ञाने । तस्मात्तयोरविषयः सामायिकमिति । त्रिविधश्चावध्यादिप्रत्ययः सूत्रे वर्णितः । स कथमित्युच्यते—

**जुत्तमिह केवलं चे[6]अ पच्चयो णोधि-माणसं णाणं ।**
**पोग्गलमेत्तविसयतो सामइयारूवता जं च ॥२६०७॥**
**जं [7]लेस्सापरिणामो पायं सामाइयं भवत्थस्स ।**
**तप्पच्चक्खत्तणतो तेसिं तो तं पि पच्चक्खं ॥२६०८॥**

**जुत्तमित्यादि । जं लेस्सा०** गाहा । इह सामायिकं जीवस्य—भवस्थस्येति वचनात्—सद्द्रव्यलेश्यापरिणामसंग्रहार्थम्—प्रायेण लेश्यापरिणामो विशुद्धः । प्रायो-ग्रहणादात्मस्वरूपमपि सामायिकम् । यदा च लेश्यापरिणामः सामायिकलेश्या-

१ णिद' को हे । २ प्रत्ययार्हत । स'– इति प्रतौ । ३ 'णाइंदि' को हे त । ४ 'यनिट्ठं त । ५ 'स्य च सा'—इति प्रतौ । ६ चेव को हे त । ७ लेसा को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

द्रव्याणि च पुद्गलात्मकत्वाद्रूपाणि, तानि चावधि-मनःपर्याययोः प्रत्यक्षाणि । अतस्तयोः प्रत्यक्षत्वात् 'तत्प्रत्यक्षत्वात्' 'तेसि' तयोरवधि-मनःपर्याययोः सामायिकमपि लेश्यापरिणामित्वात् प्रत्यक्षमिति युक्तः एवं त्रिविधः प्रत्यय इति ॥२६०७-८॥

एवं तर्हि—

**ओधातिपच्चयं चिय जति तं ण सुतंम्मि[1] पच्चयो पत्तो ।**
**पच्चक्खणाणिवज्जस्स[2] तेण वयणं ण सद्धेयं ॥२६०९॥**

**ओधाति०** गाहा । अवधिमनःपर्यायप्रत्ययमेव[3] यदि सामायिकम्, ततः श्रुतज्ञानप्रत्ययता तस्य हीयत इति । हीयताम्, को दोष इति चेत्, अतो दोषप्रदर्शनम्—प्रत्यक्षज्ञानिनं मुक्त्वाऽन्यस्य श्रुतज्ञानवतो वचनमश्रद्धेयं प्राप्नोति । इष्यते चाप्तानां त्रयाणां गणधर-प्रत्येकबुद्ध-स्थविराणां श्रुतज्ञानप्रत्ययत्वमिति ॥२६०९॥

एतत्परिहारगाथा—

**सुतमिह सामइयं चिय पच्चइयं तं[4] जतो य तं[5] वयणं ॥**
**पच्चक्खणाणिणो च्चिय पच्चायणमेत्तवावारं ॥२६१०॥**

**सुतमिह** इत्यादि । सामायिकं श्रुतज्ञानमेव प्रत्ययोऽस्यास्तीति प्रत्ययिकं तत् । न स्वयं प्रत्ययः । अवध्यादिप्रत्यक्षज्ञानप्रत्ययात्तत् प्रतीयते । अथवा सामायिकं यस्माद्वचनं 'प्रत्यक्षज्ञानिनः' केवलिनः, तत् केवलज्ञानमेव परप्रत्यायनमात्रव्यापारम्, यस्मात् केवलज्ञानप्रणयनात् द्रव्यश्रुतमपि प्रमाणम् ॥२६१०॥

यत एव च

**[१७२-प्र०] ओधातिपच्चओ त्तिय भणिते तो तं[6] पि पच्चयोऽभिहितं।**
**ओधातिलिंगं[7] वँ कधं तदभावे पच्चयो होज्ज[8] ॥२६११॥**

**ओधातिपच्चयो त्ति य** इत्यादि । अवध्यादिप्रत्यय इत्युक्ते, तदपि श्रुतज्ञानप्रत्ययादुक्त एव भवति, श्रुतज्ञानाभावे अवध्यादिप्रत्ययस्वरूपमेव न ज्ञायत इति ॥२६११॥

अथवाऽन्यथा प्रत्ययत्रयं वर्ण्यते—

**आता गुरवो[9] सत्थं ति पच्चया वाऽऽदिमो च्चियं[10] जिणस्स ।**
**सप्पच्चक्खत्तणतो सीसाण तु तिप्पयारो वि ॥२६१२॥**

---

१ सुयंमि को, सुयं पि हे त । २ °णिवज्जस्स को हे त । ३ °पर्याय एव प्रत्ययं यदि इति प्रतौ । ४ जं ततो त । ५ तव्व° को हे । ६ तम्पि को । ७ च को हे । ८ होज्जा को हे । ९ गुरवो त । १० त्ति य त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आता गुरवो इत्यादि । आत्मा गुरवः शास्त्रमिति च प्रत्ययास्त्रयः । वाशब्दो विकल्पार्थः । तत्राऽऽदिम एवात्मप्रत्ययः 'जिनस्य' तीर्थकरस्य, स्वप्रत्यक्षत्वात्, स्वसंवेद्यत्वादित्यर्थः । तच्छिष्य-प्रशिष्याणां तु त्रिप्रकारोऽपि प्रत्ययः ॥२६१२॥

आत्मा तावत्तेषां स्वसंवेद्यज्ञानत्वात् । गुरवः कथं प्रत्यय इति तदुच्यते—

**एस गुरू सव्वण्णू पच्चक्खं सव्वसंसयच्छेत्ता[1] ।**
**भयरागदोसरहितो तल्लिंगाभावतो जं च ॥२६१३॥**
**अणुवगतपराणुग्गहपरो पमाणं च जं तिभुवणस्स ।**
**सामाइओवदेसे[2] तम्हा सद्धेयवयणो त्ति ॥२६१४॥**

एस गुरू सव्वण्णू इत्यादि, अणुवगतपराणुग्गह० इत्यादि च गतार्थम् ॥२६१३–१४।

अथ शास्त्रं कथं प्रत्यय इत्युच्यते—

**सत्थं च सव्वसत्तोवकारि पुव्वावरा[4]विरोधीदं ।**
**सव्वगुणादाणफलं सव्वं[5] सामाइयज्झयणं ॥२६१५॥**

सत्थं च सव्व० इत्यादि । प्रमाणमेतच्छास्त्रम्, सर्वसत्त्वोपकारित्वात्, पूर्वापराऽविरोधित्वात्, सर्वगुणादानफलत्वात्, केवलज्ञानवत् ।.२६१५।।

अथात्मप्रत्ययता शिष्याणामित्यत्रोपपत्तिः प्रमाणम्—

**बुज्झामो णं[6] णियमिव विण्णाणं संसयादभावातो ।**
**कम्मक्खयोवसमतो य होति सप्पच्चयो तेसिं ॥२६१६॥दारं॥**

'बुद्ध्यामहे' इत्यादि । सामायिकज्ञानं स्वप्रत्ययमिति विगतसंशय-विपर्ययाऽनध्यवसायत्वात्[7], कर्मक्षय-क्षयोपशमहेतुकत्वात्, निर्जविज्ञानवत्[8] ॥२६१६॥

प्रत्ययानन्तरं लक्षणस्वरूपनिर्द्धारणायेदम् उच्यते—

**णामं ठवणा दविए सरिसयसामण्णलक्खणागारे[9] ।**
**गतिरागतिणाणंत्ती[10] णिमित्तउप्पातविगंती[11] य ॥५३४॥२६१७॥दारगाथा॥**

---

१ °च्छेया को हे त । २ °इयउव° को हे । ३ °देसो त । ४ °रावरो° त । ५ सच्चं को । ६ °णं इत्यादि बुद्ध्यामहे ॥सा °–इति प्रतौ । ७ °शयो विपर्ययोऽनध्य°–इति प्रतौ । ८ °निजावि° इति प्रतौ । ९ °रिसे साम° को हे त दी हा म । १० °णत्ते म । ११ °विगमे को दी हा म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वीरियभावे य तधा लक्खणमेत्तं[1] समासतो भणितं ।
अधवा वि भावलक्ख[१७२-द्वि०]ण चतुव्विधं सद्दहणमादी ॥५३५॥
॥२६१८॥

सद्दहण जाणणा खलु विरती मीसं च लक्खणं कधए ।
ते वि णिसामेन्ति तधा चतुलक्खणसंजुतं चेव ॥५३६॥२६१९॥

णामं ठवणा दविए इत्यादि गाथात्रयम् ३ । नामादिर्द्वादशधा लक्षणनिक्षेपः ॥२६१७-१९॥

तत्र नामलक्षणम्—

लक्खणमिह जं णामं जस्स वँ लक्खिज्जते व जो जेणं ।
ठवणाऽऽगारविसेसो विण्णासो लक्खणाणं वा ॥२६२०॥

लक्खणमिह जं इत्यादि । लक्षणमित्येषा वर्णानुपूर्वी—नाम चेदं लक्षणं चेति नामलक्षणम्, नाम्नो वा लक्षणम्—संज्ञायाः प्रकृतिप्रत्ययादिव्युत्पत्त्याऽऽख्यानम्—नामलक्षणम्, लक्ष्यते वा येन नाम्ना यः कश्चित्तस्य नामलक्षणम् । स्थापनालक्षणमाकारविशेषः—[8]अकारादिवर्णानाम्, अथवा लक्षणानां विन्यासः स्वस्तिक-श्रीवत्सादीनां रेखा-वर्णकादिभिः ॥२६२०॥

लक्खिज्जति जं जेणं दव्वं तं तस्स लक्खणं तं च ।
गच्चुवगारातीयं बहुधा धम्मत्थिकादीणं ॥२६२१॥

लक्खिज्जति जं जेणं यद् द्रव्यं येनान्यतो व्यवच्छिद्य लक्ष्यते, स्वरूपेऽवस्थाप्यते, तद् द्रव्यलक्षणमिति बहुधा 'गत्युपकारादि' धर्मा[स्ति]कायादीनाम् ॥२६२१॥

अथैतदेव द्रव्यलक्षणम् किञ्चिन्मात्रविशेषात् सादृश्य-सामान्य-आकार-गत्यागति-नानात्व-निमित्त-उत्पाद-विगम-वीर्य-भावलक्षणतां प्रतिपद्यते, द्रव्यधर्मत्वात् भावलक्षणत्वात् । अत आह—

[10]किंचिम्मत्तविसिट्टं दव्वं चिय सेसलक्खणविसेसा ।
जं दव्वलक्खणं चिय भावो वि स दव्वधम्मो त्ति ॥२६२२॥

किंचिम्मत्तविसिट्टं दव्वं चिय सेसलक्खणविसेसा इत्यादि गतार्था ॥२६२२॥

अथ किञ्चिन्मात्रविशेषप्रदर्शनार्थं गाथा—

१ °मेयं को हे त दी हा म । २ ऽभिहियं त । ३ विय को । ४ मंसं त, मीसा दी हा म । ५ कहइ त म । ६ °मेंति को, °मिंति हे दी हा । °मंत म । ७ °स्स लक्खि° जे । ८ °शेषो अका°–इति प्रतौ । ९ गच्छुव° त । १० किंचि° जे, °चिम्मित्त° हे त । ११ एयं को हे, एवं त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**तुल्लाकारदरिसणं सरिसं दव्वस्स लक्खणं तं पि ।**
**जध घडतुल्लागारो घडो त्ति तध सव्वमुत्तीसु ॥२६२३॥**

**तुल्लाकारदरिसणं सरिसमि**त्यादि । तुलया सम्मितं तुल्यं समपरिणामित्वात् । आकरणमाकृतिराकारः संस्थानविशेषः । तुल्य आकारो यस्य तत् तुल्याकारम् । दर्शनं प्रत्ययः प्रतीतिः । तुल्याकारस्य प्रतीतिः—तुल्याकारस्य दर्शनं सदृशमुच्यते । समानदक्त्वं यत्र द्रष्टृणां तत् सदृशम्—यथा—घटतुल्याकारोऽन्यो घट इति सदृशाकारता द्रव्यलक्षणम् । एवं सर्वमूर्त्तिषु आकारवत्त्वात् ॥२६२३॥

अमूर्त्तेषु सामान्यलक्षणं वक्ष्यते । तच्चेदम्—

**सामण्णमप्पितमणप्पितं च तत्थंतिमं जधा सिद्धो ।**
**सिद्धस्स होति तुल्लो सव्वो सामण्णधम्मेर्हि ॥२६२४॥**

**सामण्णमप्पितमणप्पितं चे**त्यादि । 'ऋ गतौ' इत्यस्य धातोर्णिजन्तस्य प्रयोज्यकर्त्तरि अर्पितम्—उपनीतम्—विवक्षितम्—आमृष्टम्—विशेषितमित्यर्थः । तद्विपर्ययादनर्पितम् । एतद्द्वयोः प्रक्रान्तयोः 'अन्तिमम्—यथा सिद्धः' इत्येवं सामान्यधर्मार्पणात् यथाविवक्षितानर्पितोदाहरणम् । सद्-द्रव्य-जीव-मुक्तामूर्त्त-ऽक्षायिकसम्यक्त्व-ज्ञान-दर्शन-भव्यत्वविगम-सिद्धत्वादिसामान्यधर्मैः सिद्धः सिद्धस्य सर्वस्य तुल्य इति सामान्यलक्षणम् ॥२६२४॥

**एगसमयातिसिद्धत्तणेण पुणरप्पितो स तस्सेव ।**
**तुल्लो सेसाऽतुल्लो सामण्णविसेसधम्मं त्ति ॥२६२५॥**

योऽसावनर्पितनयस्य(श्च) सिद्धस्य(श्च) द्रव्यामूर्त्तत्वादिभिः सामान्यधर्मैः सर्वसिद्धानामन्येषां तुल्यः, स एव पुनरर्पितः—एकसमयसिद्धत्वेन अथवा द्विसमयसिद्धत्वेन संख्येयसमयसिद्धत्वेन अनन्तसमयसिद्धत्वेनेत्यादि, आदिग्रहणस्यैतत् फलम्—स एकसमयसिद्धत्वेनार्पितो विशेषधर्मेण तस्यैव तुल्यः । कस्येति चेत्? प्रकृतत्वादनन्तरविशेषधर्मेणार्पितस्यान्यस्य एकसमयसिद्धस्यैव, न द्विसमयादिसिद्धस्य । अत एव आह—'**सेसाऽतुल्लो**' एकसमयसिद्धत्वविशेषधर्मार्पितादन्यः शेषः द्विसमयादिसिद्धः । ते चानन्ताः शेषास्तेषां शेषाणामतुल्यः शेषातुल्यः । कुत एतदिति चेत्? अत उपपत्तिमाह—'सामान्यविशेषधर्मत्वात्' सामान्यविशेषा धर्मा यस्य स सामान्यविशेषधर्मा, तद्भावः सामान्यविशेषधर्मत्वम्, तस्मात् सामान्यविशेषधर्मत्वात् । यथा सिद्धस्तथा सर्वे पदार्थाः । एवमुक्तं सामान्यलक्षणम्, तदविनाभावि विशेषलक्षणमपि, सा-

---

१ °तादुच्य ल°—इति प्रतौ । २ °दनिर्पि° इति प्रतौ । ३ °तर्पित° इति प्रतौ । ४ °द्रव्याजी° इति प्रतौ । ५ सेसोऽतु° को त । ६ °धम्मो को हे त । ७ °क्षणात्मतद°—इति प्रतौ ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मान्यस्यैवोऽर्पणविशेषाद् विशेषत्वम्, विशेषस्य वाऽर्पणविशेषादेव सामान्यरूपत्वम्, नैतदत्यन्तभिन्नजातीयम्, न चैकमेवैकान्ततो वस्तु स्याद्वादसामर्थ्यात् ॥२६२५॥

**बाहिरचेट्ठागारो लक्खिज्जंति जेणं माणसागूतं ।**
**[१७३-प्र०] आहारादिच्छा हत्थ-णेत्त-वत्तादिसण्णाहिं ॥२६२६॥**

**बाहिरचेट्ठागारो** इत्यादि । आक्रियतेऽनेनाभिप्रेतं गृह्यते–ज्ञायते–इति यावत्, स आकारः आकूतं येन लक्षणेन [लक्ष्यते] परस्य, तदाकारलक्षणं बाह्यचेष्टा । कुतो बाह्यत्वम् ? मनसाऽकृतत्वात् । स च–बाह्या चेष्टा–हस्त-वदन-नेत्रादिव्यापारः । अभ्यन्तरचेष्टा आहारादीच्छा, तद् आन्तरमाकूतं हस्तसंज्ञया बाह्यया लक्ष्यत इति आकारः लक्षणम् ॥२६२६॥

गत्यागतिलक्षणमिदानीम्—

**अपरोप्परं पदाणं विसेसणविसेसणिज्जता जत्थ ।**
**गच्चागती य दोण्हं गच्चागतिलक्खणं तं तु ॥२६२७॥**

**अपरोप्परं पदाणं** इत्यादि । द्वयोर्द्वयोः पदयोर्विशेषणविशेष्यता–अपरस्परशब्दः पदद्वयविषयः, प्राकृते द्विवचनस्याभावात् द्वित्वेऽपि बहुवचनं 'पदानाम्' इति तयोर्द्वयोरपि पदयोर्गत्यागती–गतिरनुकूलगमनम्, तस्यैव प्रत्यावृत्त्या प्रातिकूल्येन गमनमागतिरुच्यते । गतिश्चागतिश्च गत्यागती, ताभ्यां गत्यागतिभ्यां लक्षणं गत्यागतिलक्षणम् ॥२६२७॥

तत् पुनश्चतुर्द्धा—

**पुव्वावरोभयेगुं वाहतमव्वाहतं च तं तत्थ ।**
**जीवो देवो देवो जीवो त्ति विकप्पणियमोऽयं ॥२६२८॥**

**पुव्वापरो** गाहा । व्याघातो व्यभिचारः । पूर्वमाद्यमित्यर्थः अपरमुत्तरपदमित्यर्थः । [पूर्वपदव्यभिचारः], उत्तरपदव्यभिचारः, उभयपदव्यभिचारः, अव्यभिचार इति । तत्रोदाहरणानि आह–जीवो देव इति पूर्वपदव्यभिचारः, देवो नियमादवधारणाज्जीवः उत्तरपदमव्यभिचारि, जीवस्तु स्याद्देवः स्याददेवो मनुष्यादिरिति पूर्वपदव्यभिचारः । देवो जीवः इत्येव विशेष्यताप्रक्रमे 'देव'पूर्वपदमव्यभिचारि, 'जीव'उत्तरपदं व्यभिचारीति स्याद्देवः स्याददेव इति विकल्पाद् व्यभिचारः । नियमोऽवधारणमव्यभिचार इत्यर्थः । जीव

१ °स्यैवालक्षणार्पणं विशे°–इति प्रतौ । २ °रचिट्ठा° को हे । ३ °ज्जए हे । ४ तेण हे त । ५ हत्थवयणनेत्ता को, हे हत्थवयणेत्ता° त ६ °कूतं इति प्रतौ । ७ गच्छाग° जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एव देवः इति पूर्वपदव्याघाते उत्तरावधारणं यत एव कारकाणां ततोऽन्यत्रावधारणमिति लक्षणात् । तथा अपरव्याघाते देवो जीव एवेति पूर्वपदावधारणं **पूर्वपदनियम** इत्यर्थः । उत्तरपदं तु जीवशब्दः प्राणधारणोपलक्षिते संसारिणि तद्वियुक्ते च सिद्धे दृष्टः इति व्यभिचारित्वात् विकल्पः ॥२६२८॥

एवमेव—

**जीवति जीवो जीवो जीवति णियमो मतो विकप्पो य ।**
**देवो भव्वो भव्वो देवो त्ति विकप्पसो दो वि ॥२६२९॥**

जीवो जीवते(ती)ति उत्तरपदावधारणम्, पूर्वपदव्यभिचारः । अतो विकल्पनियम-श्चेति भावना । यदि पुनर्जीवशब्दः क्रियाकारक-उत्पत्तिसमाश्रयणात् क्रियाशब्द उच्यते तदा उभयपदाव्यभिचारः । प्राणधारणयुक्त एवार्थो जीवः, न सिद्धः, प्राणधारणा-भावात् । तदा नियम एवोदाहरणम् । यो जीवति, स जीवति, यश्च जीवः स जीवति, नान्यः, इत्युभयाव्याघातः । तथा "**देवो भव्वो, भव्वो देवो त्ति विकप्पसो दो वि**" देवः स्याद् भव्यः, स्यादभव्य इति व्यभिचारः, भव्योऽपि स्याद्देवः स्याददेव इति व्यभिचार एवेत्युभयत्रापि व्याघात इत्युभयपदव्यभिचारः ॥२६२९॥

अथास्यैव प्रपञ्चार्थमिदं **व्याख्याप्रज्ञप्ति**गदितोदाहरणं विवरणार्थं च—

**[1]जीवो जीवो जीवो जीवो त्ति दुगे वि गम्मते णियमो ।**
**जीवो जधोवयोगो तधोवयोगो वि[3] जीवो त्ति ॥२६३०॥**

**जीवो जीवो जीवो जीवो त्ति दुगे हि गम्मते णियमो** इत्यादि । अत्रैको जीवशब्दः आत्मवाची रूढिशब्दः, द्वितीयो जीवशब्दः 'उपयोगलक्षणो जीवः' इति लक्ष्यलक्षणैक्याद् उपयोगवचनः तदा भिन्नार्थत्वात् पदद्वयमेतत् समानश्रुति विशेषण-विशेष्यभावेनोपात्तम् । अक्षाः, पादाः, माषा इति यथा अन्यथैव पदे विशेषणविशे-ष्यत्वाभावात् विकल्प-नियमयोरभाव एव । तस्मात् पदद्वयेऽप्यस्मिन्नुभयाव्याघातः– उभयपदावधारणादव्यभिचार इत्यर्थः । तमेव गाथापश्चार्धेन व्याचष्टे–'**जीवो जधोव-योगो तधोवयोगो वि जीवो त्ति**' । जीवो जीव एवेति पूर्वपदावधारणम्–यो जीवः आत्मा स जीवो जीवोपयोगस्वरूप इत्यर्थः । अथवा जीव एव जीवो इति उत्तरपदावधारणम्–य उत्तरपदे जीवाख्य उपयोगः स जीवात्मैवेत्यर्थः । एते पूर्वपदोत्तरपदावधारणे सुखप्रबोधार्थं पृथक् पृथग्दर्शिते । युगपत्तूभयत्रैवकारश्रवणात् उभय-पदावधारणं स्फुटम्, जीव एव जीव एवेति एवं तावल्लोकोत्तरोदाहरणम् ॥२६३०॥

---

१ व्याख्याप्रज्ञप्तौ षष्ठे शतके दशमे उद्देशके "जीवे णं भंते ! जीवे ? जीवे जीवे ?" इत्यादिरूपेण इयं चर्चा समागता । २ दुगविगप्पणे गि° को । ३ य को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ सर्वव्यापित्वप्रदर्शनार्थं लौकिकोदाहरणम्—

**रूवी घडो त्ति चूतो दुमो त्ति णीलुप्पलं ति जंगम्मि।**
**जीवो सचेतणो त्ति य विकप्पणियमादयो सिद्धा ॥२६३१॥**

**रूवी घडो त्ति चूतो दुमो त्ती**त्यादि। रूपी घटः—मूर्तो घट इत्यर्थः। उत्तरपदावधारणादुत्तरपदे नियमः—घटस्तावन्नियमाद्रूपी, रूपी पुनर्घटो वा स्याद्घटो वा अनवधारणाद्विकल्पः। चूतो द्रुमः इति एतद्विपर्ययेण पूर्वपदावधारणात् पूर्वपदनियमः। द्रुम एव चूते इति चूतो नियमाद् द्रुमः, द्रुमस्तु चूतो वा स्यादन्यो वा अनवधारणादुत्तरपदे विकल्पः, नीलोत्पलमिति उभयार्थानवधारणादुभयत्र विकल्पः—नीलमुत्पलं चानुत्पलं च, उत्पलमपि नीलं चाऽनीलं चेति। जीवः सचेतनः इत्यव्यभिचारात् उभयत्रावधारणादुभयत्र नियमः—जीव एव सचेतनः, सचेतनो जीव एवेति लोकेऽपि विकल्प-नियमादयः सिद्धाः। पूर्वत्र व्याहतमपरत्र व्याहतमुभयत्र व्याहतमिति गत्यागतिलक्षणद्वारम् ॥२६३१॥

**णाणं त्ति विसेसो सो दव्व-क्खेत्त-काल-भावेहिं।**
**असमाणाणं णेयो समाणसंखाणमविसेसो ॥२६३२॥**

**णाण त्ति विसेसो** इत्यादि। नानाभावो नानात्वम्—विशेषः—पृथक्त्वम्। स च विशेषश्चतुर्द्धा—द्रव्य-क्षेत्र-काल-भावैः। द्रवति द्रूयते ऽर्विकारो द्रव्यं द्रव्यपरिणामार्पणात् प्रायशः पुद्गलद्रव्यम्, विचित्रपरिणामत्वात्, सिद्धान्ते बाहुल्येन व्यवहारसिद्धेः धर्माधर्माकाश-जीव-कालानां परिणामान्तरसमर्पणान्न तदन्तर्भावः—तद्यथा—धर्माधर्माकाशानां निवासगतिस्थितिलक्षणपरिणामसमर्पणात् द्रव्यत्वे सत्यपि क्षेत्रव्यपदेशः। तेन द्रवणपरिणामस्य निवासगतिपरिणामस्य नानात्वादसमानत्वम्। ततो नानालक्षणम्। तथा कलनपरिणामान्तरसमर्पणात् कालः पृथग् द्रव्य-क्षेत्र-भावेभ्यः। तथा तद्भावभवनसमर्पणाज्जीवाः तदुपयोगो वा गुण-पर्याया वा पृथग् द्रव्य-क्षेत्र-काल-भावेभ्यः। तथा द्रव्यत्वेऽपि समाने क्षेत्रे कालत्वे भावे वा तुल्येऽपि संख्यानानात्वं लक्षणम्। समानसंख्यानां द्रव्याणां द्रव्यत्व-संख्याभ्यां समानत्वादविशेष इति नानात्वलक्षणाभावः ॥२६३२॥

तत्रोदाहरणगाथा—

**परमाणु-दुअणुयाणं जध णाणत्तं तधावसेसाणं।**
**असमाणाणं तध खेत्त-काल-भावप्पभेदाणं ॥२६३३॥**

१ च लोयम्मि को हे त। २ भूतो—इति प्रतौ। ३ णाणित्ति त। ४ भावम्मि त वहिं को हे। ५ °र्मान्तरजी इति प्रतौ। ६ द्रव्यः क्षेत्रकालभा° इति प्रतौ। ७ धाविसे त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

परमाणुरेकसंख्यः, द्व्यणुको द्विसंख्यः इति भिन्नसंख्यत्वाद् नानालक्षणम् । परमाणोः परमाण्वन्तरस्य च द्रव्यत्वैकसंख्याभ्यामविशेषात् परमाणुः परमाणुरिति च सर्वत्र परमाणुत्वपरिणामान्वयादेकजातित्वमिति नानात्वलक्षण(णा)भावः । यथा परमाणोर्दर्शितमेवं शेषाणामपि त्र्यणुक-संख्येयाऽसंख्येयाऽनन्ताणुकानाम् असमानानां संख्यया नेतव्यम् । यथा च द्रव्यभेदानाम्, तथा क्षेत्र-काल-भावभेदानामपि एकप्रदेशिक-द्विप्रदेशादीनामेकसमय-द्विसमयादीनाम् एकगुण-द्विगुण¹कृष्णत्वादीनामिति नानात्वलक्षणं गतम् ॥२६३३॥

इदानीं निमित्तलक्षणम्—

लक्खिज्जते² सुभासुभमणेण तो लक्खणं णिमि[१७३-द्वि०]त्तं³ पि ।
⁴भोम्माति तदट्ठविधं तिकालविसयं जिणाभिहितं ॥२६३४॥

लक्खिज्जते गाहा । 'भौमादि तदष्टविधं' निमित्तम्—भौमम्, अन्तरीक्षम्, दिव्यम्, अङ्गम्, स्वरः, व्यञ्जनम्, स्वप्नः, उत्पात इति । एकैकमतीतानागत-वर्तमानकालविषयं सर्वज्ञैर्जिनैरभिहितत्वात् ॥२६३४॥

निमित्तलक्षणानन्तरमुत्पादो लक्षणम्—

णाणुप्पन्नं लक्खिज्जते जतो वत्थुलक्खणं तेणं ।
उप्पातो संभवतो तध चेय⁵ विगच्छतो विगमो ॥२६३५॥

णाणुप्पन्नं गाहा । यस्मात् नाऽनुत्पन्नं वस्तु लक्ष्यते, तेनोत्पादोऽपि लक्षणम् । कस्य ? संभवतो—वस्तुनः उत्पद्यमानस्येत्यर्थः । तथैव च विगमोऽपि लक्षणम् । कस्य ? विगच्छतः- वस्तुनः विनश्यतः इत्यर्थः ॥२६३५॥

'तथैव'इत्युपमानादुक्ताऽप्युपपत्तिः विगमस्य च प्रपञ्चेनोच्यते—

लक्खिज्जति जं विगतं विगमेण विणा व जण्णं⁶ संभूती ।
विगमोऽवि लक्खणमतो विगच्छतो वत्थुणोऽणण्णो ॥२६३६॥

लक्खिज्ज० गाहा । यथोत्पन्नं वस्तु उत्पादेन लक्ष्यते तथा विगतमपि विगमेन लक्ष्यते । यो वाऽसावुत्पादो लक्षणमिष्यते सम्भूतिरुत्पादपर्यायः, सा सम्भूतिर्यस्मान्न विना विगमेन भवति, तस्माद्वस्तुलक्षणस्योत्पादस्याङ्गत्वाद् विगमोऽपि लक्षणम् विगच्छतो वस्तुनोऽनँन्यत्वात्⁷ ॥२६३६॥

---

१ कृष्टत्वा°—प्रतौ । २ ज्जइ हे, ज्जई त । ३ ति को हे । ४ लोमाइ को हे, भोमाइय अट्ठ त । ५ चेव को हे त । ६ जं न को हे । ७ वस्तुनो नान्य° इति प्रतौ ।

एतदेव भावयन्नाह—

**अंगुलिरियुता णिययप्पसूतिवक्कत्तणासतो समयं ।**
**लक्खिज्जति णेतरधा तध [2]सव्वद्व्वपज्जाया ॥२६३७॥**

अंगुलि० गाहा । अङ्गुलिश्च-द्रव्यम्-ऋजुता च-तत्पर्यायः-अङ्गुल्यृजुते, नित्यत्वं च प्रसूतिश्च नित्यत्व-प्रसूती, अङ्गुल्यृजुतयोर्नित्यत्व-प्रसूती च वक्रत्व-नाशश्च अङ्गुल्यृजुतानित्यत्वप्रसूतिवक्रत्वनाशमिति -"द्वन्द्वश्च" [पाणिनीय अ० २ । पा० ४ । सू० २] इति योगविभागादेकवचनम्, नपुंसकलिङ्गं च—तस्मादङ्गुल्यृजुतानित्यत्व-प्रसूतिवक्रत्वनाशतः समकमेव वस्तु लक्ष्यते, नेतरथा, अङ्गुलिनित्यत्वाभावान्निराश्रया-वुत्पाद-विगमौ, कस्य ऋजुता-वक्रत्वे, अङ्गुलेरभावात् , खरविषाणस्य भविष्यतः, ऋजुत्वपर्यायरहिता वा का नामाङ्गुलिरपर्यायत्वात् । एतत्त्रितययोगे तु वस्तुलक्षणम् , नान्यथा । यथाङ्गुलिः ऋजुत्व-वक्रत्वानुगता, तथा सर्वद्रव्य-पर्यायाः ॥२६३७॥

अत्राह कश्चित्—

**उप्पातस्स हि जुत्ता लक्खणता णासतो विणासस्स ।**
**[4]णासोवलक्खितं वा वत्थुमभावो खपुप्फं व ॥२६३८॥**

**उप्पातस्स हि जुत्ता** इत्यादि । उत्पादो वस्तुलक्षणमिति युज्यते सत्त्वात्, ध्रुवत्व-वत् । यत् पुनरिदं नाशो लक्षणमिति तदयुक्तम्, स्वयमसत्त्वात्, वन्ध्यापुत्रवत् । त्वन्म-तेन वा तदेवंप्रकारं वस्तु अभाव एव, नाशोपलक्षितत्वेन त्वयाभ्युपगतत्वात्, खपुष्प-वत् । अभावो नाश इति पर्यायः । अत एतदुक्तं भवति—अभावोपलक्षितत्वात् [अभावो नाश इति स कथं लक्षणं स्यात्?] ॥२६३८॥

अत्रोच्यते—

**णासो भावो संभूतिहेतुतो वत्थुणो धुवत्तं वा ।**
**अधव समुप्पातो इव वत्थुप्पभवादिभावातो ॥२६३९॥**

**णासो भावो** इत्यादि । भाव एव नाश उत्पादहेतुत्वात्, ध्रुवत्ववत् । ततश्च पूर्वप्रमाणे नाशोपलक्षितत्वेनाभ्युपगतत्वादित्यस्याऽसिद्धत्वं हेतोः । भाव एव नाश इति कृत्वा । अथवा प्रमाणान्तरोपन्यासः—कस्यचिद् वादिनः—ध्रुवत्वं नास्त्येव । उत्पाद-व्यया-वेव केवलौ, तदर्थमिदं भाव एव नाशः, वस्तुप्रभवादिभावात्, उत्पादवत् । को हेत्वर्थः? इति चेत्, उच्यते—प्रकर्षेण भवनं प्रभवः—जन्म, अनन्तरं स्वरूपास्तित्वपरिणामः, ततो विपरिणामः, ततो वर्द्धनम् , ततोऽपक्षयः, ततो विनाशः, ततः पुनरपि जन्मेति षड्भावविकारचक्रकस्यापरिसमाप्तेर्वस्तुनः प्रभवोऽयमीदृशः, तस्य वस्तुप्रभवस्याऽऽदि-भावत्वात् विनाशो भाव एव समुत्पादवदिति सिद्धम् ॥२६३९॥

---

१ वक्कंत्त त । २ °सव्वे दव्व° को हे । ३ °ल्यरिजु°—इति प्रतौ । ४ नासोव को हे, णोसोव । ५ °धुसभा जे °धु न भा° हे । ६ हेऊओ हे । ७ व को हे , च त । ८ वर्धमानं-प्रति प्रतौ ९ ततोऽपि क्ष°-इति प्रतौ । १० °वतिकार° इति प्रतौ । °वविकार°- को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एवं नाशस्य भावत्वेऽपि सिद्धे नैव तन्नाशोपलक्षितं भावो भवति, किं तर्हि? अभाव एव। इत्थं तत्परिणामस्वभावत्वाद् अन्यथा नाशपरिणामात्, अन्यथा उत्पादेन ध्रौव्येण चोपलक्षितं तद् वस्तु अभावो भवतीत्येतदर्थप्रदर्शनी इयं गाथा—

**णासोवलक्खियं ¹पि य तदभावो च्चिय तदण्णहाभावो ।**
**आह णणु पत्तमेवं भावाभावोभयसभावं ॥२६४०॥**

**णासो०** गाहा। पूर्वार्द्धं भावितार्थमाचार्यस्य। उत्तरार्द्धमपि चोदकपक्षाश्रयम्। एवं तर्हि विलक्षणद्वयाद्भावाभावोभयस्वभावं वस्तु प्राप्तम्। अनिष्टं च विरुद्धधर्मद्वयानुभवनमेकस्यै²कैककालमिति दोषः ॥२६४०॥

तत आचार्य आह—

**एवं चिय तं वत्थुं सव्वा³भावे व तं खपुप्फं व ।**
**भावे ⁴वं सव्वधा सव्वसंकरेगत्तणिं⁵च्चादि ॥२६४१॥**

**एवं चिय तं वत्थुं।** एवमेव तद् वस्तुतां लभते यदि केनचित् पर्यायेण भवनावेशाद् भवति, केनचित् पर्यायेण नाशान्न भवति, ततः स्वरसत एव भावो [भावा]भावोभयस्वभावः।

यस्य पुनरेकान्तेन नाशान्न भवत्येव सर्वथा, तस्य तद्⁶ वस्त्वेव न भवति, सर्वथा अभावात् खपुष्पवत्। यस्य चैकान्तेन सर्वथोत्पत्तेर्भवत्येव सर्वथा, तस्यापि तत् तत्त्ववदिति वस्तु⁷ न भवति, सर्वथैव भावात्, सामान्यास्तित्ववत्। ततश्च सर्वसंकर-एकत्व-नित्यत्वादिदोषः। घटस्य पटाद्यात्मना पटादेर्घटात्मना निर्विशेषणास्तित्वपरिणामादिति संकरः, घटस्यैकस्य सर्वत्रैलोक्यरूपापत्तिरेकत्वम्। नित्यत्वं तेनैव रूपेण सर्वदावस्थानम्। तस्मादुभयत्राप्येकान्ते दोषदर्शनादनेकान्ताश्रयणाद् भावाभावरूपत्वं वस्तुनः सिद्धम्॥२६४१॥

नन्वेवं व्यवहाराभावः प्राप्य[तः]—उत्पन्नमप्यनुत्पन्नम्, विनष्टमप्यविनष्टम्, उभयस्वभावत्वात्, किं कदा वक्तुं शक्यमिति? उच्यते—अर्पितानर्पितसिद्धेरस्त्युपायः। अर्पितं विशेषितं स्वपर्यायैः। सामान्यरूपेण विशेषस्यानिराकृताऽनुपाकृ[त]त्वं सामान्यं द्रव्यमात्रम्, तथैव विशेषानर्पणात्। तदेव द्रव्यमुत्पन्नं विगतं वा तेन विशेषेणार्पितमुपनीतं⁸ उत्पन्नमिति वा विगतमिति वोच्यते, तत्पर्यायसमावेशात् तद् द्रव्यं सामान्यरूपमपहाय विशेषेणावस्थितेः, विवक्षितस्य सामान्यस्य तदा न(ना)सद्भावः, नात्यन्ताभाव एवेति वस्तुस्वरूपं च व्यवहारसिद्धिश्चेति। एतदर्थप्रदर्शनी गाथा—

१ चिय हे त २ °स्यैव का° इति प्रतौ। ३ वत्थ अभा को। ४ वि त। ५ °च्चाई को, च्चाइं हे त। ६ तद्वस्थेव–इति प्रतौ। ७ वस्तुनः भ° इति प्रतौ। ८ °मुपेत–इति–प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**उप्पण्णं विगतं वा[१७४-प्र०]ऽणप्पितमविसेसितं सधम्मेहिं ।**
**तं चिय पज्जायंतरविसेसितमिहऽप्पितं णामं ॥२६४२॥**

**उप्पण्णं विगतं वा**–इत्यादि गतार्था ॥२६४२॥

अथ वीर्यलक्षणार्थम्—

**विरियं ति बलं जीवस्स लक्खणं जं व जस्स सामत्थं ।**
**दव्वस्स चित्तरूवं जध विरियमहोसधादीणं ॥२६४३॥**

**विरियं ति बलमि**त्यादि । उत्तानार्था ॥२६४३॥

भावलक्षणार्थम्––

**जमिहोदइयादीणं भावाणं लक्खणं त एवऽधवा ।**
**तं भावलक्खणं खलु तत्थुदयो पोग्गलविवागो ॥२६४४॥**

**जमिहोदइयादीणं** इत्यादि । भावशब्देनात्र औदयिकादयः पञ्च भावाः । तेषां भावानां लक्षणं पुद्गलविपाकादि । अथवा समानाधिकरणसमासः–त एव भावाः लक्षणम्, नान्यत् तेभ्यो व्यतिरिक्तम्, भावाश्च ते लक्षणं च तदिति । कस्य ते लक्षणम् ? जीवस्येति । 'खलु'शब्दो लक्षणद्वारपरिसमाप्त्यर्थः । तत्रोदयस्य लक्षणं पुद्गलविपाकित्वं गति-कषाय-लिङ्गादि ॥२६४४॥

**उदए सति जो तेण व णिव्वत्तो उदय एव वोदइओ ।**
**उदयविघातउवसमो उवसम एवोवसमियं त्ति ॥२६४५॥**

**उदये सती**त्यादि । उदये सति भवतीति । उदये भवः औदयिकः, उदयेन वा निर्वृत्तः उदय एव वा औदयिक इति स्वार्थिकष्टक् । उपशमलक्षणम् उदयविघातः । उपशम एवौपशमिकः ॥२६४५॥

**खयमिह कम्माभावो तब्भावे खाइओ स एवऽहवा ।**
**उभयसभावो मीसो खओवसमिओ तधेवायं ॥२६४६॥**

**खयमिहे**त्यादि । कर्माभावः क्षयः, तस्मिन् भवः । क्षय एव क्षायिकः । क्षयश्चोपशमश्चेत्युभयस्वभावो मिश्रः । क्षयोपशमाभ्यां निर्वृत्तः, क्षयोपशमयोर्भवः–क्षयोपशमापेक्षा(क्षः) क्षायोपशमिकः । तथैवायमिति पूर्वव्युत्पत्त्यतिदेशः ॥२६४६॥

---

१ गमं त । २ °म्मेहिं को हे । ३ °सियमह हे । ४ नाम हे को । ५ वीरि हे । ६ वीरि हे । ७ निव्वत्तो को डे त । ८ ओद° हे । ९ °मिउ को हे । °मिओ क । १० °य इह को हे । ११ °म्म अभा° को ।

**सव्वत्तो इर णामो परिणामोऽभिमुहता स एवेह ।**
**परिणा[2]मिओ त्ति सुद्धो जो जीवा[3]जीवपरिणामो ॥२६४७॥**

**सव्वत्तो इर णामो** इत्यादि । 'परि'इत्युपसर्गः–समन्ततो भावेन नैतं नाम–प्रह्वताऽभिमुखता, सर्वतो नमन्न क्वचिद् व्याहन्यते इति–परिणामः । 'इर'इति प्राकृतवचनम् किलशब्दापभ्रंशः परोक्षास्त(स्तु) वचनसंसूचनार्थोऽयम् । सोऽयं परिणामः सर्वपर्यायानुभवनाभिमुखता 'स एव'इत्यनेन स्वार्थिकप्रत्ययख्यापनम्–परिणाम एव पारिणामिकः । स द्वेधा–शुद्धो मिश्रश्च । तत्र शुद्धः **'जो जीवाजीवपरिणामो'** जीवत्वमजीवत्वम् भव्यत्वमभव्यत्वमित्यादि ॥२६४७॥

जीवत्वे सति तद्गुणश्चतुर्विधं सामायिकम्–सम्यक्त्वसामायिकादि । तत्र भावलक्षणमवधार्यते—

**सम्मत्त-चरित्ताइं मीसोवसम क्खयस्सभावाइं ।**
**सुत-देसे[5]विरतीओ खओवसमभावरूवाओ ॥२६४८॥**

**सम्मत्त॰** गाहा । सम्यक्त्वसामायिकम् चारित्रसामायिकं च भावत्रयेण लक्ष्यते, मिश्रोपशम-क्षयस्वभावत्वात् । एतद् द्वितयम् क्षायोपशमिकं औपशमिकं क्षायिकम् । [श्रुतसामायिकम्], देशविरतिसामायिकं च क्षायोपशमिकभावलक्षणमेव ॥२६४८॥

**सामाइएसु एवं संभवतो सेसलक्खणाइं पि ।**
**जो[6]ज्ज भावतो वा [7]वैसेसियं[8]लक्खणं [१७४–द्वि०] चतुधा ॥२६४९॥**

**सामा॰** गाहा । यथैतद्भावलक्षणं सामायिकेषु चतुर्ष्ववतारितमेवं यथासम्भवं शेषलक्षणान्यपि नाम-स्थापना-द्रव्य-सदृश-सामान्याऽऽकार-गत्यागति-नानात्व-निमित्तोत्पाद-विगम-वीर्यादियाणि योजनीयानि ॥२६४९॥

भावतो लक्षणमिदमन्यदपि वैशेषिकं चतुर्द्धा—

**सद्दहणातिसभावं जध सामइयं [10]जिणो परिकधेति ।**
**तल्लक्खणं चिय तयं परिणमते गोतमादीणं ॥२६५०॥**

**सद्दहणा॰** गाहा । औदयिकादिभावपञ्चकलक्षणं सामान्यविषयम्, अन्येष्वपि जीवाजीवगुणेषु वृत्तमिति । श्रद्धानादिलक्षणं सम्यक्त्वं सम्यग्दर्शनमित्यर्थः । अव-

---

१ किर को हे त । २ °मिउ को हे । ३ जीवो जी° त । ४ मृतम्–इति प्रतौ । ५ °देसोवर° को हे त । ६ जोइज्ज त । ७ वइसे° को हे त । ८ °सियं त । ९ सामाइ° हे । १० जिणे को ।

बोधलक्षणं श्रुतसामायिकं श्रुतज्ञानमित्यर्थः । चारित्रसामायिकं विरतिलक्षणं संयम इत्यर्थः । चारित्राचारित्रसामायिकं विरत्यविरतिलक्षणं देशसंयम इत्यर्थः । यथैतच्चतुर्विधं सामायिकं केवलज्ञानेन ज्ञात्वा जिनः कथयति तल्लक्षणमेव तच्छ्रोतॄणां गौतमादीनां परिणमते श्रुतज्ञानतया ॥ लक्षणद्वारं गतम् ॥२६५०॥

इदानीं नयद्वारम् । तत्र नयलक्षणगाथा—

**एगेण वत्थुणोऽणेगधम्मणो जमवधारणेणेव ।**
**णयणं धम्मेण तओ होति णओ सत्तधा सो य ॥२६५१॥**

**एगेण वत्थुणो** गाहा । नयनं नीतिर्नय इति शब्दव्युत्पत्तितः । पुनर्नयनं केन प्रकारेण ? इति आह—एकेन धर्मेण नित्यत्वादिना वस्तुनोऽनेकधर्मणः सतो य[दवधारणेनैव निदर्शनम्—नित्यमेव, अनित्यमेव वा—स नय इति ।] कथं पुनरेकं वस्त्वनेकधर्मकमिति ? तत्रोपपत्तिः—सर्वमेव वस्तु सपर्यायम् । पर्यायाश्च द्वेधा—केचिद्युगपद्भाविनः केचित् क्रमभाविनः । उभयेषामपि केचिद् व्यञ्जनपर्यायाः, केचिदर्थपर्यायाः । तेषामपि सर्वेषां केचित् स्वपर्यायाः, केचित् परपर्यायाः । तेषामपि केचित् स्वाभाविकाः, केचिदापेक्षिकाः । तेषामेकैकः अतीताऽनागत-वर्तमानकालविशेषित इत्यनन्तधर्मत्वम् । तस्यानन्तधर्मणो वस्तुन एकधर्मावधारणे शेषधर्मनिरसनेन सद्भावव्याघातो भवतीत्येकनयप्रस्थानमपरमार्थः, नयसमुदायः परस्परापेक्षः परमार्थः ॥२६५१॥

स च नयः सप्तधा

**णेगम संगह-ववहारुज्जुसुते[2] चेव[3] होति बोद्धव्वे[4] ।**
**सद्दे य समभिरूढे एवंभूते य मूलणया ॥५३७॥२६५२॥**
**णेगेहिं माणेहिं मिणति त्ती णेगमस्स[5] णेरुत्ती ।**
**सेसाणं पि[6] णयाणं लक्खणमिणमो सुणध[7] वोच्छं ॥५३८॥२६५३॥**
**संगहितपिण्डितत्थं संगहवयणं समासतो बेन्ति[8] ।**
**वच्चेति[9] विणिच्छेयत्थं[10] ववहारो सव्वदव्वेसु[11][12] ॥५३९॥२६५४॥**
**पच्चुप्पण्णग्गाही उज्जुसुतो णयविधी मुणेतव्वो ।**
**इच्छति विसेसिततरं पच्चुप्पण्णं[13] णयो सद्दो ॥५४०॥२६५५॥**

---

१ °धम्मुणो त को हे । २ °हार-उ° हे त दी हा । ३ चेव को हे दी हा म त । ४ बोधव्वो हे । ५ °स्स य णे° को । ६ वु म । ७ सुणेह दी हा । ८ °विंडिय° को हे दी हा म । ९ बिंति हे, बेति दी हा म । १० इच्छति त ११ °णिच्छिय° हे त दी हा । १२ °व्वेसुं दी हा १३ °प्पण्णो म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वत्थूतो संकमणं होति अवत्थुं णए समभिरूढे ।
वंजण-अत्थ-तदुभयं एवंभूतो विसेसेति ॥५४१॥२६५६॥

**णेगम०** गाहा । **णेगेहिं०** गाहा । **संगहित०** गाहा । **पच्चुप्पण्ण०** गाहा । **वत्थूतो** गाहा । **सूत्रगाथाः** पञ्च ॥२६५२–५६॥

अथ आसां क्रमेण **भाष्यगाथाः**—

**णेगाइं माणाइं सामण्णोभयविसेसणाणाइं ।**
**जं तेहि मिणति [१७५ प्र०] तो णेगमो णयो णेगमाणो त्ति ॥२६५७॥**

**णेगाइं** गाहा । न एको नैक इति प्रकृत्या 'न'शब्दावस्थानम्, नैरुक्तविधानात् । नैकेन मानेन मिनोतीति नैकमः इति नैरुक्ताः । किं पुनस्तदनेकमानमिति ? उच्यते–सामान्यमुभयं विशेष इति एतानि त्रीणि ज्ञानानि, जातितस्तिस्रो बुद्धय इत्यर्थः । सर्वत्रानुप्रवृत्तिहेतुः सामान्यम्, व्यावृत्तिबुद्धिहेतुर्विशेषः, अनुप्रवृत्ति-व्यावृत्तिबुद्धिहेतुः सामान्यविशेषः । आदौ महासत्ता सामान्यमेव, पर्यन्तपरमाणुष्वन्त्यविशेषा अन्यत्वबुद्धिकारिणो विशेषा एव, मध्ये सामान्यविशेषाः । एतैर्मानैः परस्परनिरपेक्षैर्मिथ्येति परिछिनत्ति वस्त्विति, विचित्रमानत्वान्नैकमः ॥२६५७॥

**लोगत्थणिबोधा वा णिगमा तेसु कुसलो भवो वाऽयं ।**
**अधवा जं णेगगमो णेगपधो णेगमो तेणं ॥२६५८॥**

**लोगत्थ०** गाहा । लोकेऽर्थाः जीवादिपदार्थाः, तेषां निबोधाः परिच्छेदाः, निश्चयगमकत्वात्, तेषु निगमेषु ज्ञानविशेषेषु कुशलः, तेषु भवो वा तत्र कुशलस्तत्र भव इति वा तद्धितप्रत्ययान्नैगमः । अथवा तृतीया व्युत्पत्तिः–नैगम इति प्राकृते ककारस्याश्रवणात् गमनं गमः पन्थाः–नै[क]गमो नैकपथः अनेकमार्गः, सामान्यादिमार्गानेकत्वात् ॥२६५८॥

**सो कमविसुद्धभेतो लोगपसिद्धिवसतोऽणुगंतव्वो ।**
**विधिणा णिलयण-पत्थय-गामोवम्मातिसंसिद्धो ॥२६५९॥**

**सो कम०** गाहा । स नैगमः क्रमविशुद्धभेदः यावदादिसामान्यं तावदविशुद्धः, पश्चात् क्रमेण विशेषसामान्यावतारी विशुद्धो भवति. विशेषेऽभिप्रेतेऽवस्थानाद्विशुद्ध इति क्रमविशुद्धा भेदा यस्य 'स क्रमविशुद्धभेदः' लोकप्रसिद्धिवत् अनुगन्तव्यः । 'विधिना' सिद्धान्ताभिहिताचारेण निलयनं वसतिः, प्रस्थकः कुडवो मानविशेषो दारवः,

१ गा० २६५२–५६ । एताश्चतस्रोऽपि गाथा अनुयोगद्वारसूत्रे मूल पाठे द्रष्टव्याः पृ० १६१ । २ वत्थुओ हे । ३ °त्थु हे त दो हा म । ४ °णमत्थ° दी हा त । ५ °भए को हे म । ६ °समाणा° त । ७ °णाइं को हे । ८ तेहिं को हे । ९ वस्थिति–इति प्रतौ । १० °गागमा त । ११ तेणं को हे । १२ अहवा इति प्रतौ । १३ नकार इति प्रतौ । १४ विबुद्धि° प्रतौ । १५ कुटयो प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ग्रामो जनसन्निवेशः, उपमा उपमानं दृष्टान्तः, उपमायाः भाव औपम्यम्, निलयन-प्रस्थक-ग्रामा एवौपम्यानि 'निलयन-प्रस्थक-ग्रामौपम्यानि' । आदिशब्दः प्रकारार्थे, एतदाद्या अन्येऽपि दृष्टान्ता द्रष्टव्याः । तैः '[सं]सिद्धः' प्ररूपितः । तद्यथा—**अनुयोगद्वारे** वचनम् "दुविहो णेगमो सव्वसंगाही देससंगाही य । तस्सेतस्स दुविधस्सावि परूपणं कासामो वसहीदिट्ठंतेणं, पत्थयदिट्ठंतेण य त्ति"[1] इत्यादिः अविशुद्ध-विशुद्धानुगमः प्रपञ्चशः कर्त्तव्यः ॥२६५९॥

सामान्य-विशेषयोर्विवक्षानिगमी नैगमः इति । सामान्यविशेषश्चान्यः सामान्यात् भिन्ननिमित्तत्वात् , भिन्नकार्यत्वाच्च, घट-पटवत् । एतन्निरूपणायाह —

**सामण्णमण्णदेव हि हेतू सामण्णबुद्धि वयणाणं[2] ।**
**तस्स विसेसो अण्णो विसेसमति-वयणहेतु त्ति ॥२६६०॥**

**सामण्ण०** इत्यादि । न हि निर्णिमित्ता सामान्यबुद्धिर्वचनं वा प्रवर्त्तत इति तयोः सामान्यबुद्धि-वचनयोर्हेतुः प्रवर्तकं कारणं सामान्यमिति, विशेषबुद्धि-वचनहेतुर्विशेषः निमित्तेन भिद्यन्ते(ते), कार्येण चेति अन्यत् सामा[न्यम्, अ]न्यो विशेष इति ॥२६६०॥

अथवा सामान्य-विशेषयोः परस्परं भेदोऽस्तीति सिद्धम् । तदाधाराद् द्रव्यात् किमर्थान्तरं सामान्य-विशेषाविति ? अर्थान्तरत्वप्रतिपादनायाह —

**सदिति भणितेऽभिमण्णति दव्वादत्थंतरं ति सामण्णं ।**
**अविसेसतो मतीए सव्वत्थाणुप्पवित्तीतो[3] ॥२६६१॥**

**सदिति** गाहा । सदिति यतो द्रव्य-गुण-कर्मसु सा सत्ता । द्रव्य-गुण-कर्माणि स्वलक्षणैर्भिन्नानि । तेषु भिन्नेष्वपि सर्वत्र सत्प्रत्ययानुप्रवृत्तेरेकस्याः 'सत्'बुद्धेर्हेतुरेकैव सत्ता समवेता । सा च तेभ्योऽर्थान्तरभूता, एकत्वादेव । अनर्थान्तरत्वे सत्यैक्यवद् द्रव्य-गुण-कर्मणामप्यैक्यप्रसङ्गात् । अतो द्रव्य-गुण-कर्मभ्योऽर्थान्तरं सत्तेति ॥२६६१॥

एवमेव गोत्वादयो गवादिषु अनुप्रवृत्तिलक्षणं सामान्यम्, व्यावृत्तिलक्षणो विशेष इत्युभयरूपदर्शनाच्च —

**गोत्तातयो[4] गवातिसु णिययाधाराणुवित्तिबुद्धीतो ।**
**परतो य णिवित्तीतो सामण्णविसेसणामाणो ॥२६६२॥**

---

१ अनुयोगद्वारे नैवंरूपः पाठः उपलभ्यते । तत्र "से किं तं नयप्पमाणे ? नयप्पमाणे तिविहे पन्नत्ते, तं जहा—पत्थगदिट्ठंतेणं"—इत्यादिरुपलभ्यते—द्रष्टव्यम् अनु० सू० १४८ । महावीरविद्यालयद्वारा प्रकाशिते अनुयोगद्वारे पाठान्तरमत्र द्रष्टव्यम्—अनु० सू० ४७३ । २ °यणेणं त । ३ °त्तीए को हे । ४ गातात° जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गोत्वादयो निजाधारेषु गवादिषु 'गौर्गौः' इत्यनुप्रवृत्तिबुद्धिहेतुत्वात् परतश्चाश्वादिभ्यो व्यावृत्तिहेतुत्वादुभयस्वभावाः सामान्यविशेषाख्याः ॥२६६२॥

तथा —

**तुल्लाकिति गुण किरिएगदेसऽतीताऽऽगतेऽणुदव्वम्मि ।**
**अण्णत्तबुद्धिकारणमंतविसेसो त्ति से बुद्धी ॥२६६३॥**

**तुल्ला०** गाहा । आकृतिः संस्थानम् । परिमण्डलसंस्थानाः सर्व एव परमाणव इति तुल्याकृतित्वं पार्थिवाणूनाम् । पार्थिवाणुभिः सर्वैः समानगुणत्वम् । "अणु-मनसोश्चाद्यं कर्म[वैशेषिकसूत्रे अध्याय५, आह्निक२, सूत्र१४] इति अदृष्टकारितक्रियावत्त्वं सर्वेषां समानमिति, आधारोऽप्येकाकाशदेशः, तस्मादाकाशदेशात् कश्चित् परमाणुरतिक्रान्तः कश्चिच्च तत्समकालमेव तत्रायातः, तत्र 'अयमन्यः पूर्वस्मात्' इति अन्यप्रत्ययो निर्निमित्तः परमर्षेरपि न भवति, दृष्टश्चान्यप्रत्ययः-तस्यान्यप्रत्ययस्य यो हेतुः सोऽन्त्यविशेषः-तस्मात् 'परमाणुद्रव्यादन्यः' इत्येवं नैगमनयस्य 'बुद्धिः' मतमभिप्रायोऽध्यवसाय इति यावत् ॥२६६३॥

एवं ब्रुवन्नाचार्य एतद् दर्शयति-एतस्य नयस्यैतन्मतं मिथ्यादर्शनम्, नायं परमार्थ इति । अतश्चोदक आह-नैगमः सम्यग्दृष्टिरेव, द्रव्यार्थिक-पर्यायार्थिकमतावलम्बित्वात्, जैनसाधुवत् । अतः किमिति मिथ्यादर्शनभेदोऽयमित्युच्यते ? एतदर्थप्रदर्शनी गाथा —

**णणु दव्वपज्जयट्ठियमतावलम्बि त्ति णेगमो चेअ ।**
**सम्मदिट्ठी साधु व्व कीस मिच्छत्तभेतोऽयं ॥२६६४॥**

**णणु दव्व०** गाहा । भावितार्था ॥२६६४॥

अत्र प्रतिविधीयते —

**[१७५-द्वि] जं सामण्णविसेसे परोप्परं वत्थुणो[4] य सो भिण्णे[5] ।**
**मण्णति अच्चन्तमतो[6] मिच्छद्दिट्ठी कणादो[7] व्व ॥२६६५॥**

**जं सामण्ण०** गाहा । यदेतत् प्रमाणमुक्तम् 'सम्यग्दृष्टिरेव नैगमः, द्रव्यार्थिक-पर्यायार्थिकमतावलम्बित्वात्' इत्ययं हेतुरपक्षधर्मः, यद्वा साधनशून्यो दृष्टान्त इति दूषणद्वयमनया गाथया चोद्यते, यस्माद् न्यायशास्त्रे न वा(व)चनमात्रं हेतुः, किन्त्वर्थो ज्ञानं चेति । तत्र नैगमनयः-द्रव्यार्थिकमतम् अत्यन्तभिन्नं सामान्यम्, पर्यायार्थिकमतमपि-विशेषमत्यन्तभिन्नं परस्परतः, आधाराच्च वस्तुनोऽत्यन्तभिन्नमेव-मन्यत इति ।

१ °ल्लागइ° हे । २ °ज्जवट्ठि° को हे त । ३ °यनयाव° को हे । ४ °त्थुओ को हे त । ५ भिन्नो त । ६ अच्चं° को हे । ७ करणा° त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एवमाऽऽकारकमुभयमतावलम्बित्वं साधौ नास्तीति साधनधर्मासिद्धो दृष्टान्तः। अथ यत् साधौ परस्परापेक्षद्रव्यार्थिक-पर्यायार्थिकमतं कथञ्चिद्भेदाभेदरूपम्, तदवलम्बित्वं नैगमनये नास्तीत्यपक्षधर्मता हेतोः। तस्माद् दूषणद्वयात् पूर्वपक्षप्रमाणं दुष्टमिति न सम्यग्दृष्टिर्नैगमः। किं तर्हि ? मिथ्यादृष्टिरेवेति विशेष्य पक्षः क्रियते, अत्यन्तभिन्नद्रव्यार्थिक-पर्यायार्थिकमतावलम्बित्वात्, कणादवदिति ॥२६६५॥

एतद्दृष्टान्तव्याख्यानार्थं गाथा —

[1]दोहि वि णएहिं[2] सत्थं[3] णीतमुलूएण तध वि मिच्छत्तं ।
जं सविसयप्पधाणत्तणेण अण्णोण्णणिरवेक्खा ॥२६६६॥

दोहि वि गाहा। "सामान्यम् विशेषः इति बुद्धयपेक्षम्[4]" भवति [इति] सिद्धान्तः। ततश्च सामान्यमर्थान्तरभूतं विशेषात्, विशेषश्च सामान्यादर्थान्तरमिति न युज्यते वक्तुमिति नैगमनय उपालभ्यते उत्तरेण संग्रहनयेन, "समनन्तरानुलोमाः पूर्वविरुद्धा निवृत्तनिरनुशयाः" इति लक्षणात् ॥२६६६॥

अनिष्टापादनप्रमाणमपि—विशेषोऽपि सामान्यमिति भवतु, सामान्यबुद्धिहेतुत्वात्। कथं सामान्यबुद्धिहेतुत्वं विशेषस्य ? इति चेत् —

जति सामण्णं सामण्णबुद्धिहेतु त्ति तो विसेसो त्ति[5] ।
सामण्णमण्णसामण्णबुद्धिहेतु त्ति को भेदो ? ॥२६६७॥

जति सामण्णं सामण्णबुद्धिहेतु त्ति। गोत्वमश्वादिभ्यो व्यावर्त्तमानत्वाद् विशेषः। तदेव खण्ड-मुण्ड-शाबलेय-बाहुलेयादिषु सामान्यबुद्धिहेतुरिति दृष्टम्। तथा मनुष्यत्वं गवादिव्यावृत्तेर्विशेषः ब्राह्मणादिष्वन्वयात् सामान्यबुद्धिहेतुः। तथा पुनः ब्राह्मणत्वं विशेषः, क्षत्रियादेर्व्यावर्तमानत्वात्, माठर-कौण्डिन्यादिष्वनुप्रवृत्तिबुद्धिहेतुत्वात् सामान्यबुद्धिहेतुत्वं सापेक्षिकमिति सामान्यमेव। विशेषश्च सामान्यं चावश्यमभ्युपगन्तव्यम्, भवताऽपि स्वसिद्धान्ते प्रणयनादिति। एवं सामान्य-विशेषयोरभेद एवेति ॥२६६७॥

पुनरप्यभेदप्रतिपादनायाह —

जति जेण विसेसिज्जति स विसेसो तेण जं पि सामण्णं ।
तं पि विसेसोऽवस्सं सत्तातिविसेसयत्तातो ॥२६६८॥

जति गाहा। विशेष्यतेऽनेनेति विशेषः। एवं तर्हि सामान्यमपि विशेषत्वं प्राप्नोति, अन्यसामान्यविशेषत्वात्, अन्त्यविशेषवत्। सत्तासामान्यं गोत्वं न भवति।

१ दोहिं हे। एषा गाथा सन्मतौ (३. ४९) द्रष्टव्या। २ नएहिं को हे। ३ नोयं सत्थमुं को हे त। ४ एतद्वचनं वैशेषिकसूत्रे प्रथमाध्याये द्वितीयाह्निके समागतेन तृतीयसूत्रेण तुलनीयम्। ५ वि को हे त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गोत्वं च सत्तासामान्यं न भवतीति विशेषत्वम्। एवं तावत् परस्परतः सामान्यविशेषयोरभेदः प्रतिपादितः ॥२६६८॥

अथ वस्तुनोऽप्याधारात्[त्] तद[भेद]प्रतिपादनायोच्यते—

**सत्ताजोगादसतो सतो व सत्तं हवेज्ज दव्वस्स।**
**असतो ण खपुप्फस्स व सतो व किं सत्तया कज्जं? ॥२६६९॥**

**सत्ताजोगादसतो** गाहा । सदिति यतो द्रव्य-गुण-कर्मसु द्रव्य-गुण-कर्मभ्योऽर्थान्तरं सत्तेति त्रिपदार्थसत्करी सत्तेति । अतो द्रव्यस्य सत्तायोगात् सत्तासमवायात् स्वयं सतो विद्यमानस्य सत्त्वं भवति, आहोस्विदविद्यमानस्य ? इति । तद् अविद्यमानस्य तावन्न भवति सत्तायोगात् सत्त्वम्, अविद्यमानत्वात्, खपुष्पस्ये[व] । अथ विद्यमानस्य सत्ता, एवं तर्हि अनर्थकं सत्त्वम्, प्रागेव विद्यमानत्वात्, प्रकाशितप्रकाशवत् ॥२६६९॥

**[1]पतिवत्थुं सामण्णं जति तो णेगं [2]ण यावि सामण्णं ।**
**अध [3]सव्वेसु तदेगं तध वि सदेसं ण सामण्णं ॥२६७०॥**

**पतिवत्थुं** गाहा । अथ सत् तत् सामान्यम्, तत् स्वाधारे प्रत्येकं परिसमाप्तं चेत, ततः सामान्यमेव न भवति, प्रतिवस्तु समाप्तत्वात्, प्रतिवस्तुस्वरूपवत् । अनेकं च सामान्यम्, प्रतिवस्तुवृत्तत्वात्, प्रतिवस्तुस्वरूपवत् । अथ तेषु भिन्नेष्वप्येकं तत्, भूतकण्ठे गुणवत्, ततः सदेशम्, ततः सावयवं प्राप्तम् बहुष्वेकस्य वृत्तत्वात्, स्रक्सूत्रवत् । ततश्च न सामान्यम्, सावयवत्वाद्, गोपिण्डव्यक्तिवत् ॥२६७०॥

**अध [4]पडिवत्थुमिहेगं च तध वि तं णत्थि खरविसाणं व ।**
**ण य तदुवलक्खणं तं सव्वगतत्तणओ [5]खं [6]व्वं ॥२६७१॥**

**अध पडि०**गाहा । अथ प्रतिवस्तु च वर्तते एकं च तदिति । एवं तर्हि नास्त्येव, अनुपपद्यमानवृत्तित्वात्, खपुष्पवत् । अभ्युपगम्याप्युच्यते तत् सामान्यं द्रव्यस्योपलक्षणं न भवति, सर्वगतत्वात्, आकाशवत् ॥२६७१॥

**सामण्णविसेसकतं जति णाणं तेसु किंणिमित्तं तो ।**
**अध तत्तो च्चिय तम्हा [१७६-प्र०] तं परहेतुं [7]ति णेगंतो ॥२६७२॥**

**सामण्ण०**गाहा । यदि च द्रव्यादिष्वर्थान्तरनिमित्तकृता सामान्यबुद्धिर्विशेषबुद्धिर्वा, ततः सामान्ये या सामान्यबुद्धिः,सामान्यविशेषे वा सामान्यविशेषबुद्धिरेपाऽप्यर्थान्तरनिमि-

---

१ अपि च पति° त । २ तया त । ३ दव्वे° को हे त । ४ पइव° को हे । ५ °गयत्तओ हे । ६ व को हे । ७ °हेउ त्ति को हे । परिहे° त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्तजनिता भविष्यति,सामान्यबुद्धित्वाद् द्रव्यादिष्विव। अथ ब्रूयात्–सामान्यविशेषेषु सामान्यविशेषाऽभावात्तत एव ज्ञानमिति, द्रव्यादिष्वप्येवं भविष्यति सामान्यविशेषवत्॥२६७२॥

**तम्हा वत्थूणं चिय जो सरिसो पज्जयो स सामण्णं।**
**जो विसरिसो विसेसो स मतोणत्थंतरं तत्तो ॥२६७३॥**

**तम्हा वत्थूणं** गाहा। तस्मान्नैकान्तेनार्थान्तरभूतं निमित्तम्, न चानर्थान्तरभूतमेव। किं तर्हि? वस्तुनः एवान्यानन्यभूतोऽयं सदृशपर्याय[:], तत् सामान्यम्, यस्तु विसदृशपर्यायः स विशेष इति परमार्थः। ननु च नैगमनयस्य संग्रहेणानन्तरत्वात् व्याघाते कृते परपक्षनिवर्त्तनं भवतु, स्वपक्षस्थापनं वा, तदुभयमपि मिथ्यादर्शनम्, किमिदमस्थाने स्याद्वादपरमार्थवचनमिति? उच्यते–लाघवार्थमनन्तराभिधानं नयपर्यन्तेऽवश्यम्, एतच्च संस्कारव्यवधानात् धारणप्रतिपत्तिमाद्ध्यादिति ॥२६७३॥

नैगमनयवक्तव्यतानन्तरं संग्रहनयः। तस्य लक्षणम्—

**संगहणं संगिण्हति संगिज्झंते[4] व तेण जं भेता।**
**तो संगहो त्ति संगहित[5] [6]पिण्डितत्थं वयो जस्स ॥२६७४॥**

**संगहणमित्यादि**। संग्रहणं संग्रह इति भावसाधनः, संगृह्णातीति कर्तृसाधनः, संगृह्यन्ते तेन भेदाः इहेति संग्रहः करणसाधनः, संगृह्यन्त इति संग्रहः कर्मसाधनः, संगृहीतपिण्डितार्थं 'वचो' वचनं यस्य ॥२६७४॥

अथ संगृहीत-पिण्डितयोः को विशेष इति? गाथा—

**संगहितमागिहीतं [9]संपिण्डितमेगजातिमाणीतं।**
**संगहितमणुगमो वा वतिरेओ [10]पिण्डितं भणितं ॥२६७५॥**

**संगहितमागिहीतमित्यादि**। 'सं'शब्द आभिमुख्ये। आभिमुख्येन गृहीतं सामान्याभिमुख्यम्, तदेव सामस्त्येन पिण्डितम् 'एकजातिमानीतम्' सङ्गृहीतं च तत् संपिण्डितं च तदिति समानाधिकरणः समासः, स सङ्गृहीतपिण्डितोऽर्थो यस्य संग्रहवचनस्य तत् 'संगृहीतपिण्डितार्थम्' समासत इति संक्षेपात् ब्रुवते सर्वविदः। अथवा संगृहीतमनुगमोऽन्वयः, पिण्डितं व्यतिरेकः। एतदुक्तं भवति- अन्वय-व्यतिरेकाभ्यां यस्य वचः परमतभेदव्यतिरेकात् स्वमतसामान्यानुगमादिति ॥२६७५॥

अथवा शतभेदत्वात् संग्रहस्य प्रकारान्तरैरभिधानमिति सर्वसामान्यसंग्रहात्–

१ °ज्जवो को हे। २ स मओऽण° को हे। मताण° जे। ३ °नाद्ग्रधावनप्र°-इति प्रतौ। ४ °ज्झतं त। ५ °हितं त। ६ पिंडि° को हे। ७ °हियं आगहियं को। ८ °मागही हे त। ९ °पिंडि को हे। १० पिंढि को हे।

**अधव महासामण्णं संगहितं[1] [2]पिण्डितत्थमितरं ति ।**
**सव्वविसेसाणण्णं सामण्णं सव्वधा भणति[3] ॥२६७६॥**

**अधव महा०** गाहा । महासामान्यं सत्ता संगृहीतशब्देन, अपान्तराल-सामान्यम्[4]-इतरत् पिण्डितग्रहणेन सर्वथा संक्षेप[:], सर्वविशेषाः अनन्ये **यस्य तत्** सर्वविशेषाऽनन्यं सामान्यं संग्रहनयस्येति ॥२६७६॥

तत्स्वरूपोपवर्णनम्—

**एक्कं[5] णिच्चं णिरवयवमक्किरयं सव्वगं च सामण्णं ।**
**णिस्सामण्णत्तातो णत्थि विसेसो खपुप्फं व ॥२६७७॥**

**एक्कं णिच्चं** गाहा । एकं विशेषणाभावात्, नित्यं कालभेदाभावात्, निरवयवं प्रदेशाभावात्, सर्वगतमक्रियत्वात् । तदेवंरूपं सामान्यमस्ति । तद्विपरीत-विशेषाः—अनेकानित्यसावयवसक्रियाऽसर्वगताः परेणाभ्युपगताः न सन्ति, सामान्य-रहितत्वात्, सामान्यादर्थान्तरत्वात्, खपुष्पवत् ॥२६७७॥

उपपत्तिरपि—

**सदिति भणितम्मि जम्हा सव्वत्थाणुप्पवत्तते बुद्धी ।**
**तो सव्वं तम्मत्तं णत्थि तदत्थंतरं किंचि ॥२६७८॥**

**सदिति** गाहा । सर्वत्र द्रव्यगुणकर्मादावन्त्यविशेषपर्यन्ते वस्तुनि सत्सदित्यनु-[6]प्रवर्तते बुद्धिः । नैगमस्याप्येतदभिमतम् । एतस्मात् सर्वत्र तन्मात्रमेव तत्, सदनर्था-न्तरत्वात्, यत् सतोऽर्थान्तरं नास्त्येव, सतोऽर्थान्तरत्वात, खपुष्पवत् ॥२६७८॥

तदेवं प्रपञ्चेनाह—

**कुंभो भावाणण्णो जति तो भावो अधऽण्णधाऽभावो ।**
**एवं पडादयो वि हु भावाणण्ण त्ति तम्मत्तं[7] ॥२६७९॥**

**कुंभो** गाहा । यदि 'सतोऽर्थान्तरत्वात्' इत्यसिद्धं मन्येथास्ततः कुम्भो भावमात्र-मेव, सदनर्थान्तरत्वात्, सत्स्वरूपवत् । अथाऽर्थान्तरं सत्तायाः, ततोऽसन्, सतोऽर्था-न्तरत्वात्, खपुष्पवदित्येवं घ(प)टादयोऽपि सर्वे भावाः सन्मात्रम् ॥२६७९॥

अथवा—

**सम्मत्तमिह विसेसा[8] सामण्णं पिव[9] पमेयभावातो ।**
**[१७६-द्वि०] सव्वत्थसम्मतीतो वभिचाराभावतो वा वि ॥२६८०॥**

१ °हियपिं° हे । २ पिंडि° को । ३ भणियं को हे त । ४ °न्यमितिरत्पि°-इति प्रतौ । ५ ऐगं को हे । ६ °प्रवृत्तिते-इति प्रतौ । ७ तम्म° हे । ८ °सेसो हे । ९ पिय त ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सम्मत्त०** गाहा । सन्मात्रं विशेषाः, प्रमेयत्वात्, सर्वत्र चानुप्रवृत्ति(त्त)सदबुद्धे-र्व्यभिचाराभावात्, सत्सामान्यवत् ॥२६८०॥

**[1]चूतो वणस्सति चिय मूलातिगुणो त्ति तस्समूहो व्व ।**
**गुम्मातयो वि एवं सव्वे ण वणस्सतिविसिट्ठा ॥२६८१॥**

**चूतो वण०** गाहा । चूतो वनस्पतिभेदः, स वनस्पतिरेव सामान्यम्, मूलादि-गुणत्वात्, चूतादिसमूहवत् । एवं चूतवद् गुल्मादयोऽपि वनस्पतिरेव, मूलादिगुणत्वात्, तत्समूहवत् । इदमुक्तमपि कुम्भादिगाथया सर्वत्र विशेषव्यापिताख्यानाय प्रपञ्चार्थम् ॥२६८१॥

**सामण्णातो[2] विसेसो अण्णोऽणण्णो व्व णत्थि जति अण्णो ।**
**णिस्सामण्णत्तणंतोऽणण्णो[3] सामण्णमेत्तं सो ॥२६८२॥**

**सामण्णतो** गाहा । भावितार्था । एवं सङ्ग्रहनयः ॥२६८२॥

तदनन्तरं व्यवहारनयस्तस्य शब्दव्युत्पत्तिः—

**ववहरणं ववहरते स[4] तेण ववहीरते व सामण्णं ।**
**ववहारपरो य[5] जतो विसेसतो तेण ववहारो ॥२६८३॥**

तेणेह [5]कज्जमाणं णियमेण कतं कतं तु भयणिज्जं ।
किंचिदिह कज्जमाणं उवरतकिरियं व्वे [6]होज्जाहि ॥२८०२॥

**तेणेह कज्जमाणं** इत्यादि । तेन तस्मात् इह नये ऋजुसूत्रे क्रियमाणं नियमात् कृतं तावन्मात्रनिष्पत्तेः । कृतं तु वस्तु भजनीयं द्विधा सम्भवित्वात्–स्यात् क्रियमाणमाविष्टक्रियम्, स्यादुपरतः(त)क्रियमभिलषितकार्यनिष्पत्तेः कृतार्थत्वात् ॥२८०२॥

अथ दार्ष्टान्तिकार्थनिरूपणाय प्रकृतः संस्तारकवस्तूपनयः—

जं जत्थ णभोदेसे [१८४–द्वि०] अत्थुव्वति जत्थ जत्थ समयम्मि ।
तं तत्थ तत्थ[7]मत्थुतमत्थुव्वंतं पि तं [8]चेअ ॥२८०३॥

**जं जत्थ णभोदेसे** इत्यादि । यत्र(यद्) आकाशदेशे वस्त्रमास्तीर्यते यत्र तत्र समये तत् तत्र वस्त्रमास्तीर्णं भवत्यास्तीर्यमाणं च, तदेवं यावत् सर्वपाश्चात्यवस्त्रान्त(स्त)रणमन्त्यसमये, तदास्तीर्णमेवोपरतास्तरणक्रियम् ॥२८०३॥

बहुवत्थत्थुरणविभिण्णदेसकिरियादिकज्जकोडीणं ।
मण्णसि दीहं कालं जति संथ[10]ारस्स किं [11]तत्थ ! ॥२८०४॥

**बहुवत्थ०** गाहा । एवं बहुवस्त्रास्तरणविभिन्नदेशक्रियादिसूक्ष्मकाल[12]कार्यकोटीनां यदि त्वं दीर्घकालं मन्यसे किं तत्र संस्तारकस्योपान्त्यसमयारब्धस्यान्त्यसमयनिष्पन्नस्येति ? ॥२८०४॥

पतिसमयकज्जकोडीविमुहो संथारयाधिकतकज्जो ।
पतिसमयकज्जकालं कि[13]धं [14]संत्थारम्मि लाएसि ॥२८०५॥

**पतिसमय०** गाहा । गतार्था ॥२८०५॥

---

१ चरमं° हे । २ पडमु त । ३ °रई को । ४ चोवं° जे । ५ व को, च हे । ६ हुज्जा° हे । ७ वत्थ° को । ८ चेव को हे त । ९ वत्थुत्तर° त, °त्थत्थर को, °त्थत्तर हे । १० संथा° को हे त । ११ तस्स हे । १२ °कार्यनोदीनां-इति प्रतौ । १३ कथं हे, वह त । १४ संथा° को हे त ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

सो उज्जुसुतणयमतं अमुणंतो ण पडिवज्जते जाधे ।
ताधे समणा के[1]यि उवसंपण्णा जिणं [2]चेअ ॥२८०६॥
पियदंसणा वि प[3]तिणोऽणुरागतो तम्मतं चिय पवण्णा ।
ढंकोवहिताऽगणिद[4]द्धवत्[5]थदेसा तयं भणति ॥२८०७॥
सावय ! संघाडी मे तुमए दड्ढ त्ति सो वि य तमाह ।
णणु तुब्भ डज्झमाणं द[6]ड्ढन्ति मतोऽ[7]यं सिद्धंतो ॥२८०८॥
[8]डड्ढं ण [9]डज्झमाणं जति वि गतेऽणागते व का संका ।
काले तदभावातो संघाडी कम्मि ते [10]डड्ढा ? ॥२८०९॥

**सो उज्जुसुत०** गाहा । **पियदंसणा वि** गाहा । **सावय ! संघा०** गाहा । **डड्ढं** गाहा । यदा प्रतिपद्यमानोऽपि जमालिः ऋजुसूत्रनयमतमश्रद्दधद् भगवद्वचनं न प्रतिपद्यते, तदा शेषप्रव्रजिताः सम्बुद्धाः भगवन्तमुपसम्पन्नाः । प्रियदर्शना तु तद्भार्या भर्तृ(र्तुः) अनुवृत्त्या जमालिदर्शनं प्रतिपन्ना सती ढंकश्रावकोपहिताग्निदग्ध(ग्ध)वस्त्रदेशा श्रावकमुपालभमाना 'संघाडी मे दग्धा' इति ब्रुवती ढंकेन पर्यनुयुक्ता–आर्ये ! दह्यमाना सङ्घाडी दग्धेति भवता ममायं सिद्धान्तः कथम् उच्यते ? नन्वयमभ्युपगमविरोधः आर्यायाः— यदि दह्यमानं न दग्धम्, विगते दाहकालेऽनागते वा का दग्धाशङ्का, अतीताऽनागतयोरभावाद्, वर्तमाने च दग्धाभावात् कस्मिन् काले तव सङ्घाडी दग्धा ? ॥२८०६–९॥

तमेव वाभ्युपगमं ढंकस्य दढयन्ति—

अध वा ण [11]डज्झमाणं दड्ढं दाहकिरि[१८५-प्र०]यासमत्[12]तीयें ।
किरियाभावे दड्ढं जति दड्ढं किं ण तेलोक्कं[13] ? ॥२८१०॥

अथैवमार्यायाः अभिप्रायः—दह्यमानं दग्धं न भवति किन्तु दाहक्रियापरिसमाप्तौ दग्धं भवति, एवं तर्हि त्वन्मते त्रैलोक्यमपि दग्धं भवतु, अविद्यमानदाहक्रियत्वात्, परिसमाप्तदाहाभिप्रेतकार्यवत् ॥२८१०॥

उज्जुसुतणयमतातो वीरजिणे[14]न्दवयणावले[15]म्बीणं ।
जुज्जेज्ज डज्झमाणं [16]डड्ढं वोत्तुण [17]तुब्भं ति[18] ॥२८११॥

१ केई को हे त । २ चेव को हे त । ३ पिइणो त । ४ °दड्ढव° को हे त । ५ °वत्थुदे° त । ६ °इढं ति को हे । ७ न को हे । ८ दड्ढं को हे त । ९ डज्झ° को हे त । १० समय–इति प्रतौ । ११ डज्झ° को हे त । १२ °त्तीए को हे त । १३ तेलुक्कं हे । १४ °जिणिंद° को हे । १५ °लंबो° को हे । १६ दड्ढं को हे । १७ तुज्झं को, तुज्झ हे । १८ पि को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

उज्जुसुत० गाहा । एतदस्माकं जिनेन्द्रवचनावलम्बिनां ऋजुसूत्रनयमतेन युक्तं वक्तुम्, न युष्माकं निह्नवजमालिमतानुसारिणाम् ॥२८११॥

यस्मात्—

**समए समए जो जो देसोऽगणिभावमेति डज्झंस्स[1] ।**
**तं तम्मि दंज्झमाणं[2] दंड्ढं[3] पि तमेव तत्थेव ॥२८१२॥**

**समए समए** इत्यादि । यस्मीद्[4] दाह्यस्य वस्तुनः समये समये यो यो देश अग्निसाद् भवति स स देशस्तस्मिन् काले दह्यमानो भवति, दग्धश्च स एव ॥२८१२॥

**णियमेण दंज्झमाणं[5] दड्ढं दड्ढंन्ति[6] होति भयणिज्जं ।**
**किंचिदिह दंज्झमाणं[7] उवरतदाहं वं[8] होज्जाहि[9] ॥२८१३॥**

**णियमेण दज्झमाणं** गाहा । भावितार्था ॥२८१३॥

**इच्छामो संबोधणमज्जो ! पियदंसणादयो ढंकं ।**
**वोत्तुं जमालिमेगं[10] मोत्तूण गता जिणसगासं ॥२८१४॥[11]**

**इच्छामो संबोधण०** गाहा । स्फुटार्था ॥२८१४॥

**॥ प्रथमनिह्नववक्तव्यता ॥**

अथ द्वितीयस्य वक्तव्यता—

**सोलस वासाइं तया जिणेण [12]उप्पादितस्स णाणस्स ।**
**जीवपदेसियंदिट्ठी[14] तो[15] उसभपुरे[16] समुप्पण्णा ॥२८१५॥[17]**
**रायगिहे गुणसिलए वसु चोदसपुव्वि[18] तीसगुत्तो[19] य ।**
**आमलकप्पा णगरी मित्तसिरी कूरपिउ[20]दाती ॥२८१६॥[21]**
**आतप्पवातपुव्वं अधिज्जमाणस्स तीसगुत्तस्स ।**
**णयमतमयाणमाणस्स[22] दिट्ठिमोहो[१८५-द्वि०] समुप्पण्णो ॥२८१७॥**
**एकातयो पतेसा णो जीवो णो[23] देसहीणो वि ।**
**जं तो स जेण पुण्णो स एव जीवो पतेसो त्ति ॥२८१८॥**

---

१ °ज्झमाणस्स हे । २ डज्झ° को हे त । ३ दट्ठं हे । ४ °स्माद्दाह्यस्य-इति प्रतौ । ५ डज्झ° को हे त । ६ °ड्ढं तु को हे, °ड्ढन्तु त । ७ डज्झ° को हे त । ८ च हे । ९ हुज्जा° हे । १० °मेक्कं हे । ११ ॥३२५॥ इति बहुरताख्यः प्रथमा जमालिनिह्नवः ॥ त । १२ °साणि को हे दी हा म त । १३ °प्पाडियस्स को हे दी हा म त । १४ °दसीय° त । १५ दी हा म प्रतिषु नास्ति । १६ °सपुरे त, °पुरम्मी म, °पुरंमी दी हा । १७ हेसम्मता एषा निर्युक्तिगाथा । दीसम्मता एषा भाष्यगाथा । १८ °द्दस° को, चउदस° हे म । १९ °गुत्ते हे त, °गुत्ताओ दी हा म । २० °डडाई को हे त, °उडाइ दी म, °पिडाई हा । २१ हेसम्मता एषा निर्युक्तिगाथा । दीसंमता एषा भाष्यगाथा । २२ °याणुमा° त । २३ न य को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**सोलस वासाइं। रायगिहे। आतप्पवातपुव्वं। एकातयो पतेसा** इत्यादि। इह **व्याख्याप्रज्ञप्तौ** प्रश्नः–"एगे जीवप्पएसे जीवे त्ति वत्तव्वं सिया? णो इणट्ठे समट्ठे। एवं बे जीवपएसा, तिन्नि, संखेज्जा, असंखिज्जा वा जाव एगेणावि पएसेण ऊणो णो जीवे त्ति वत्तव्वं, जम्हा कसिणे पडिपुण्णे लोगागासतुल्लप्पदेसे जीवे त्ति वत्तव्वं–"[ ] अत एव सूत्रमूरीकृत्य **तिष्यगुप्तो** व्युत्थितः–यदेकादयो जीवप्रदेशा नोजीवः–'नो'शब्दः सर्वप्रतिषेधे 'न जीवः' इति–जीवाख्यां न लभन्ते, यावदेकेनापि प्रदेशेन न्यूनो न जीवः, सम्पूर्णस्तु जीवः, स ह्यजीवः सन् येन प्रदेशेन पूर्णो जीवाख्यां प्राप्तः स एवैकः प्रदेशो जीव इति वक्तव्यम्, शेषप्रदेशा अजीवा एवेति ॥२८१५–१८॥

अस्य प्रत्युत्तरम्—

**गुरुणाऽभिहितो जति ते[2] पढमपतेसा[3] ण सम्मतो[4] जीवो।**
**तो तप्परिमाणो[5] च्चिय जीवो कधमन्तिमपदेसो[6] ॥२८१९॥**

**गुरुणा** गाहा। त्वदभिमतोऽन्त्यप्रदेशो न जीवः, आद्यप्रदेशेन तुल्यपरिमाणत्वात्, प्रथम-द्वितीयादिप्रदेशवत् ॥२८१९॥

अथवा भवतोऽप्यनिष्टापादनम्–प्रथमप्रदेशोऽपि ते जीवः, शेषप्रदेशैस्तुल्यत्वात्, अन्त्यप्रदेशवत्। तदर्थमियं गाथा—

**अधव स जीवो किं[7]ध णातिमो त्ति[8] को वा विसेसहेतू ते।**
**अध पूरणो त्ति बुद्धी एक्केक्को पूरणो तस्स ॥२८२०॥**

**अधव स जीवो** गाहा। विशेषहेतोरभावात् सर्वप्रदेशानां तुल्यतेति पक्षधर्मत्वमाचष्टे। अथ ब्रूयास्त्वम्–साधनधर्मविकलो दृष्टान्तः, अन्त्यप्रदेशः परिपूरणः, असंख्येयसंख्यापूरणः, प्रथमादयो न तथेति अन्त्यप्रदेशस्य शेषप्रदेशैस्तुल्यत्वमिति। 'अध पूरणो त्ति बुद्धी' एवंप्रकारोऽपि बुद्धिरबुद्धिरेव, एकैकस्य प्रदेशस्य तत्संख्यापूरणत्वात्। न ह्येकेनापि विना सा संख्या पूर्यत इति ॥२८२०॥

**एवं जीवबहुत्तं पतिजीवं सव्वधा वि[10] तदभावो।**
**इच्छा विवज्जओ वा विसमत्तं सव्वसिद्धी वा ॥२८२१॥**

---

१ "आत्मप्रवादनामकं पूर्वमधीयानस्य तिष्यगुप्तस्यायं सूत्रालापकः समायातः–तद्यथा—एगे भंते! जीवपएसे जीव त्ति" इत्यादि। अत्र मलधारिवृत्तौ अस्मिन् पाठेऽपि पाठभेदः–म० वृ० पृ० ९४६। व्याख्याप्रज्ञप्तौ अयं विषयश्चर्चितः परन्तु तत्र प्रधानतया धर्मास्तिकायं समुद्दिश्य प्रश्नोत्तराणि संजातानि। तेषामन्ते "एगपएसूणे वि य णं धम्मत्थिकाये 'नो धम्मत्थिकाए' त्ति वत्तव्वं सिया।......एवम् अहम्मत्थिकाए वि, आगासत्थिकाए वि, जीवत्थिकाय-पोग्गलत्थिकाए वि एवं चेव"–शतक द्वितीय, उद्देशक १०। २ तो त। ३ °पएसो न को हे त। ४ संम° को हे। ५ °रिणामो को हे त। ६ °मंति° को हे। ७ कह हे त। ८ त्ति को हे त। ९ पूर्णासं–इति प्रतौ। १० वि त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एवं जीवबहुत्तं** गाहा । एवमुपपत्त्या सर्वप्रदेशानां जीवत्वे एकस्मिन्नेव जीवबहुत्वं प्राप्तम् । अथ ते प्रदेशा जीवा न भवन्त्यतो जीवाभाव एव प्राप्तः । अथ जीवपदार्थापलापोऽशक्य इति इच्छा–द्वितीय–तृतीयादयः प्रदेशा जीवो भवतु । विपर्ययो वा प्रथमप्रदेश एव जीवो नान्त्यप्रदेशः । विषमत्वं वा कश्चिज्जीवः कश्चिदजीवोऽस्तु । सर्वसिद्धिर्वा यद् यदभिप्रेतमिच्छा–विपर्ययादीनाम्, सर्वेऽपि वा इच्छादयः समुदिताः सिध्येयुरिति ॥२८२१॥

**जं सव्वधा ण दीसुं सव्वेसु वि तं ण रेणुतेल्लं व ।**
**सेसेसु असंभूतो जीवो कधमंन्तिमपतेसो[3] ॥२८२२॥**

**जं सव्व०** गाहा । सर्वेष्वपि प्रदेशेषु जीवत्वं मा भूत्, प्रत्येकमभूतत्वात्, सिकतारेणुतैलवत्, अन्त्यप्रदेशेऽपि केवले नैवास्ति जीवत्वं बहुषु तत्तुल्येष्वभूतत्वात्, एकसिकतातैलवत् ॥२८२२॥

**अध देसतोऽवसेसेसु तो[5] वं किध सव्वधंतिमे जुत्तो ।**
**[6]अंतम्मि व जो हेतू स एव सेसेसु वि समाणो ॥२८२३॥**

**अध देसतो** गाहा । अथैतद्दोषभयादन्त्यप्रदेशं मुक्त्वाऽवशेषदेशे[8] मात्रया जीवत्वम्, अन्त्यप्रदेशे तु सर्वात्मना जीवत्वमिति कल्पना चेत्, अन्त्येऽपि प्रदेशे सर्वात्मना जीवत्वमयुक्तम्, प्रदेशत्वात्, अवशेषप्रदेशवत् । यो वाऽन्त्ये पूरणादित्वं हेतुः स सर्वेषु समान इति ॥२८२३॥

अत्र दोषोपक्षेपपरिहारं प्रदर्शयितुकामः प्रमाणमाह—

**णेह पदेसत्तणतो अंतो जीवो जधांतिमपदेसो ।**
**आह सुतम्मि [10]णिसिद्धा सेसा ण तु अंतिमपदेसो ॥२८२४॥**

**णेह पदेस०** गाहा । इहान्त्यः प्रदेशो जीवो न भवति, प्रदेशत्वात्, आद्यप्रदेशवत् । एवमाचार्येणानुमाने कृते पर आह–अन्त्यप्रदेशो जीवो न भवतीति भवतामागमविरोधः, यस्माज्जीवत्वेन सर्वप्रदेशान्निषिध्य सूत्रेणाऽन्त्यप्रदेशस्य जीवत्वमनुज्ञातमिति ॥२८२४॥

अत्राचार्यः सूत्रमेव प्रमाणीकुर्वन्नाह—

**णणु एगो त्ति णे सिद्धो सो वि सुते जति सुतं[१८६–प्र०]पमाणं ते ।**
**सुत्ते सव्वपतेसा भणिता जीवो ण चरिमो त्ति ॥२८२५॥**

१ °संभू° को । २ °मंति° को हे । ३ °पएसे हे । ४ बहुश्च इति प्रतौ । ५ त्तो त । ६ वि को हे त । ७ अह त° हे त, °तंमि को । ८ °शेन मा°–इति प्रतौ । ९ अन्तो हे । १० न सि° त । ११ उन्तिम° हे । १२ णिसिद्धो को हे ।

Jain Educationa International     For Personal and Private Use Only     www.jainelibrary.org

**णणु** गाहा । ननु सूत्रे जीवत्वनिषेधनमपरिपूर्णत्वादवशेषदेशानाम्, तत एवापरिपूर्णत्वादन्त्यप्रदेशोऽपि निषिद्ध एव । सूत्रे कृत्स्नः परिपूर्णसर्वप्रदेशसंघातो जीवः उक्तः, न चरमप्रदेश एव केवलमिति नैवास्माकमभ्युपगमविरोधः । सूत्रप्रमाणकस्य भवत एवाभ्युपगमविरोधोऽन्त्यप्रदेशस्य जीवत्वं निषिद्धमभ्युपगच्छतः ॥२८२५॥

अपि च प्रमाणम्—

**तंतू पडोवकारी ण समत्तपडो य समुदिता ते तु ।**
**सव्वे समत्तपडओ सव्वपदेसा तधा जीवो ॥२८२६॥**

**तंतू** गाहा । एकस्तन्तुः समस्तपटो न भवति, पटोपकारित्वात्, तन्त्वेकदेशवत् । एवमेकप्रदेशो जीवो न भवति, तदुपकारित्वे तदेकदेशत्वात्, एकतन्तुपटत्ववत् । सर्वप्रदेशा जीवः तदुपकारित्वे परिपूर्णत्वात्, समस्ततन्तुपटत्ववत् ॥२८२६॥

**एवंभूतणयमतं देसपतेसा ण वत्थुणो भिण्णा ।**
**तेणावत्थुं ति मता कसिणं चिय वत्थुमिट्ठं से ॥२८२७॥**

**एवंभूत०** गाहा । एवम्भूतनयस्य देश–प्रदेशा वस्तुनो न वि(भि)द्यन्ते, वस्त्वेव कृत्स्नं परमार्थः तद्देश-प्रदेशास्तदतिरिक्ताः अभावः, तदव्यतिरिक्तित्वात्तदेव वस्तु, किं तैः कल्पितैरिति ? ॥२८२७॥

**जति तं[3] पमाणमेवं कसिणो जीवो अधोवयारातो ।**
**देसे वि सव्वबुद्धी पवज्ज सेसे वि तो जीवं ॥२८२८॥**

**जति तं पमाण०** गाहा । यद्येवम्भूतनयमतं प्रमाणम्, ततः कृत्स्नो जीवः प्रपद्यताम् । अथोपचारादन्त्यप्रदेशो(शे) जीवत्वमवशेषेष्वप्युपचारादेव जीवत्वं प्रतिपद्यस्व ॥२८२८॥

**जुत्तो[4] व तदुवयारो देसोणे[5] ण तु पदेसमेत्तम्मि[6] ।**
**जध तंतूणं[7] वि पडे पडोवयारो ण तंतुम्मि ॥२८२९॥**

**जुत्तो व** गाहा । युक्ततरो वा तदुपचारः, एकदेशोनबहुत्वात् । न तु देशमात्रे, एकत्वात् । एकप्रदेशोने[8]वा जीवे जीवोपचारो युक्तः, तत्कार्याभिव्यक्तेः, एकतन्तूने पटे पटोपचारवत् ॥२८२९॥

**इय पण्णवितो जाधे ण पवज्जति सो ततो[9] कतो वज्झो ।**
**तत्तो[10] आमलकप्पाये[11] मित्तसिरिणा सुहोवायं ॥२८३०॥**

---

१ °त्थु त्ति **को हे** । २ °त्थु सिद्धं° **त** । ३ संप° **त** । ४ जत्तो **हे** । ५ देसूणे **को हे** । ६ मि **त**, °णम्मि **को** । ७ ननु इति प्रतौ । ८ °शोने वा जीवे वा जोवो इति प्रतौ । ९ कतो तता **हे त** । १० ततो **हे** । ११ °ए **हे त** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**भक्ख[1]ऽण्ण-पाण-वंजण-वत्थंतावयवलाभितो भवंति ।**
**सावय ! विहम्मिता मो[2] कीस त्ति ततो भणति सड्ढो ॥२८३१॥**
**णणु तुब्भं[4] सिद्धंतो पज्जंतावयवमेत्तओऽवयवी ।**
**जति सच्चमिणं तो कीं वि[१८६-द्वि०]धम्मणा मिच्छमिधरा भे ॥२८३२॥**

इय गाहा । **भक्खऽण्ण०** गाहा । **णणु तुब्भं** इत्यादयः स्फुटार्थाः ॥२८३०-३२॥

**[5]अन्तावयवो ण कुणति समत्तकज्जं ति जति ण सोऽभिमतो ।**
**संववहारातीते तो तम्मि कतोऽवयविगाहो ? ॥२८३३॥**

**अन्तावयवो** गाहा । अन्त्यावयवोऽवयवी न भवति, समस्तावयविकार्याकरणात्, तत्संव्यवहारातीतत्वात्, आदिमावयववत्, अवयवा(व्य)न्तरकुम्भादितत्वात् (दिवद्वा) ॥२८३३॥

**अन्तिमतंतू ण पडो तक्कज्जाकरणतो जधा कुंभो ।**
**अध तदभावे वि पडो तो[6] किं ण घडो खपुप्फं व ॥२८३४॥**

**अंतिम०** गाहा । अन्त्यतन्तुर्न पटः पटकार्याऽस(श)क्तत्वात् कुम्भवत् । अथ तत्कार्याकरणेऽपि तन्तोश्चेत् पटत्वमिष्यत्वे(ते), कुम्भोऽपि तर्हि पट एवास्तु, खरविषाणं वा पटः, पटकार्याऽस(श)क्तत्वात् अन्त्यतन्तुवत् ॥२८३४॥

अथवा —

**उवलंभव्ववहाराऽभावातो णत्थि भे[10] खपुप्फं व ।**
**[11]अन्तावयवेऽवयवी दिट्ठंताभावतो [12]आऽवि ॥२८३५॥**

**उवलंभ०** गाहा । अन्त्यावयवेऽवयवी नास्ति, अनुपलभ्यमानत्वात्, व्यवहाराभावात् खपुष्पवत् । एकावयवे अवयवी तिष्ठतीत्युभय(या)सिद्धः, दृष्टान्ताभावाच्चानन्वयः ॥२८३५॥

**पच्चक्खतोऽणुमाणादागमतो वा [13]पसिद्धिरत्थाणं ।**
**सव्वप्पमाणविसयातीतं मिच्छत्तमेतं[14] भे ॥२८३६॥**

**पच्चक्खतो** गाहा । 'एकावयवेऽवयवी जीवः' इत्येतद् वाक्यं मिथ्यार्थं वा सर्वप्रमाणविषयातीतत्वात् खरविषाणवत् ॥२८३६॥

---

१ °वखण° हे । २ भणइ **को हे त** । ३ म्हे **को हे** । ४ तुज्झं **को हे** । ५ 'वमित्तिओ' **को**, °वमित्त° **हे** । ६ कह **त** । ७ अंतोव° **हे**, °अन्तोव° **त** । ८ सो **को हे त** । ९ अत्यंतं त–इति प्रतौ । १० मे **को**, ते **हे त** । ११ अंता° **को हे** । १२ वावि **को हे त** । १३ °सिद्धी अत्था° **हे** । १४ °मेवं **को हे त** ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इय [1]चातितसंबुद्धो खामित पडिलाभितो पुणो विधिणा ।
गंतु[2] गुरुपा[3]दमूलं ससीसपरिसो पडिक्कंतो ॥२८३७॥

इय गाहा । गतार्था ॥२८३७॥

॥ इति जीवप्रदेशवादी तिष्यगुप्तनामा द्वितीयो निह्नवः ॥

[4]चोद्दा दो वाससता तइया सिद्धिं गतस्स वीरस्स ।
तो अ[5]व्वत्तयदिट्ठी[6] सेतवियाए समुप्पण्णा ॥२८३८॥[7]
सेतवि पोलासाढे [8]जोग्गे तद्दिवस हितयसूले य ।
सोधम्मे[9] णलिणिगुम्मे रायगिहे मुरिय[10] बलभद्दे ॥२८३९॥[11]
गुरु[१८७-प्र०]णा देवीभूतेण समणरूवेण वाइता सीसा ।
सब्भावे परिकधिते अव्वत्तयदिट्ठिणो जाता ॥२८४०॥
को जाणति किं साधू देवो वा तो ण वन्दणिज्जो[12] त्ति ।
होज्जाऽसंजतणमणं होज्ज मुसावायमसुंओ[13] त्ति ॥२८४१॥

चोद्दा दो गाहा । सेतवि गाहा । गुरुणा देवी० । को जाणति गाहा। न ह्येतत् ज्ञातुं शक्यं साधुरयमसाधुरयम्, साधुवेषक्रियायुक्तत्वात्, अहमिव । अस्मद्गुरुणा आषाढसाधुना देवीभूतेनानैकान्ति[कः,] षण्माससाधुवेषक्रियायुक्तत्वं देवेऽप्यसाधौ दृष्टमिति । तस्मात् सा[14]धुत्वाऽनिश्चयव[15]दव्यक्तत्वादेवाज्ञानिकपक्षाश्रयः । एकत्रासंयतनमनादविरत्यनुमतेर्दोषः, अवन्दनेऽपि 'अयममुकः' इति कदाचिन्मृषावादाद् मुख्यगुणघात इति तूष्णींभाव एव श्रेयान् ॥२८३८-४१ ॥

तथा सर्वसाधुक्रियाकलापलोप इत्यनिष्टमापद्यते । ततः स्थविरवचनं तत्सम्बोधनार्थम्—

थेरवयणं जति परे संदेहो किं सुरो त्ति साधु त्ति ।
[16]देवे कधं ण संका किं सो देवो ण देवो त्ति ॥२८४२॥

थेरवयणं गाहा । यद्ययमेवं साधावनैकान्तः, देवे कथं निश्चयः—सोऽपाढो देव एवेति ? ॥२८४२॥

तेण कहिते[17] त्ति व मती देवो हं रूवदरिसणातो य ।
साधु त्ति अहं कधिते समाणरूवे[18]म्मि का संका ? ॥२८४३॥

---

१ चोति° को हे त । २ गंतु° को हे। ३ °पामू° को । । ४ अयं पाठः त प्रतौ । ५ चउद्दस हे त म । ६ अव्वत्तयाण दिट्ठी दी हा म । ७ एषा हे सम्मता निर्युक्तिगाथा । ८ जोगे को हे दी हा म त । ९ सोहंमि दी सोहम्मि म । १० मूरि° हे । ११ एषापि हे सम्मता निर्युक्तिगाथा । १२ °णिज्ज त । १३ °ममुओ को हे त १४ सव्वेत्वा° इति प्रतौ । १५ °चयावदव्य°-इति प्रतौ । १६ देवो जे । १७ °हियं ति को हे त । १८ रूवं पि जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तेण कहिते त्ति । देव एवासाविति निश्चितं सत्यमेतत्, तेनाख्यातत्वात् 'दया धर्मः' इति यथा । नन्वेवं प्रतिप्रमाणमपि—साधुरहमिति सत्यमेतत्, तेनाख्यातत्वात्, दयाधर्मवाक्यवत् । तथा साधुरेवाहम्, साधुरूपवेषधारित्वात्, प्रसिद्धसाधुवत् ॥२८४३॥

**देवस्स व किधं[1] वयणं सच्चं[2]न्ति ण साधुरूवधारिस्स ।**
**ण परोप्परं पि वंदध[3] जं जाणंता[4] वि जतयो त्ति ॥२८४४॥**

**देवस्स** व गाहा । देवस्य वचनं सत्यम्, न साधोः—साधुरूपधारिण इति विशेषहेतोरभावात् कथमिदं प्रतिपत्तव्यम् ? यतश्च भवतां स्वसंवेद्येऽपि परस्परं यतित्वे परस्परावन्दनात् सन्देहः ॥२८४४॥

तेषां हि कथम्—

**जीवादिपतत्थेसु[5] अ[6] सुहुम-व्ववहित[7]-विकिट्ठरूवेसु[8] ।**
**अच्चंन्त[9]परोक्खेसु अ किध ण जिणादीसु भे संका ? ॥२८४५॥**

जीव० इत्यादि । जीवादिपदार्थेषूत्पन्नसूक्ष्म-व्यवहित-विप्रकृष्टेष्वत्यन्तपरोक्षेषु [किं] न सन्देहः स्यात् ? तत्सन्देहे सर्वमेव दीक्षादिविफलमिति मुच्यतामसद्ग्राहः ॥२८४५॥

**तव्वयणातो व मती णणु तव्वयणे सुसाधुचित्तो त्ति ।**
**आलयविहारसमितो समणोऽयं वन्दणिज्जो त्ति ॥२८४६॥**

तव्वयणातो गाहा । स्यादेषा बुद्धिः—तद्वचनाज्जीवादिपदार्थेषु न संदेहः । एवं तर्हि तद्वचने इदमप्यस्ति **'आलयविहारसमितो समणोऽयं वन्दणिज्जो'** त्ति ॥२८४६॥

**जध वा जिणिन्द[10]पडिमा[11] जिणगुणरहितं[12] त्ति जाणमाणा[13] वि ।**
**परिणामविसुद्धत्थं [१८७-द्वि०]वंदध तध किं ण साधुं पि ? ॥२८४७॥**

**जध** वा गाहा । अथवा आलयविहारसमिताः सर्वेणापि वन्दनीयाः, परिणामविशुद्धिहेतुत्वात्, जिनगुणरहितजिनेन्द्रप्रतिमावत् ॥२८४७॥

एतत्- प्रमाणान्वयप्रदर्शनार्थं गाथेयम्—

**होज्जं[14] ण वा साधुत्तं जतिरूवे णत्थि चेव पडिमाए ।**
**सा कीस वंदणिज्जा जतिरूवे कीस पडिसेधो ? ॥२८४८॥**

---

१ किं हे त । २ सच्चंति को हे । ३ वन्द° हे । ४ °णन्ता हे । ५ जयउ को हे त । ६ वि को । ७ °ववहिं° त ८ °वेसु को हे त । ९ °च्चंत° को । १० °णिद° को हे । ११ °डिमं को हे त । १२ °हियं ति को हे । १३ °माणो जे । १४ हुज्ज हे ।

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

**होज्ज ण वा** गाहा । प्रतिमायां निःसन्दिग्धं जिनगुणरहित[त्व]मचेतनत्वात् । यदि[ति]रूपे कदाचित् संयमगुणसम्भवोऽपि । ततस्तत्र किं प्रतिषेधः ? —'किमिति क्षेपे'—न युक्तः प्रतिषेध इति काक्वाऽभिधानम् ॥२८४८॥

इतर आह—

**[1]अस्संजतजतिरूवे पावाणुमती मती ण पडिमाए[2] ।**
**णणु देवाणुगताए पडिमायें त्ति[3] होज्ज[4] सो दोसो ॥२८४९॥**

**अस्संजत०** गाहा । अत एव कदाचित् सम्भवात् कदाचिदसम्भवात् यतिरूपे युक्तः प्रतिषेधः, असंयतयतिरूपे सावद्यक्रियानुमोदनात्, प्रतिमायां तद्दोषासम्भवादेकान्तेन वन्दनीयत्वमिति । ननु प्रतिमायामपि सन्निहितदेवतायाम् असंयतपापानुमतिस्तुल्येति तत्रापि प्रतिषेधः प्राप्तः, नेष्यते ॥२८४९॥

तत्प्रतिसमाधानार्थमाह—

**अध पडिमायँ[5] ण दोसो जिणबुद्धीय[6] णमतो विसुद्धस्स ।**
**तो जतिरूवं णमतो [7]जतिबुद्धीए कधं दोसो ? ॥२८५०॥**

**अध पडिमाय** गाहा । यतिरूपमसंयतमपि गुणवद्बुद्ध्या नमस्यतो न दोषः, प्रत्युत निर्जरागुणप्राप्तिरपि, विशुद्धभावत्वात्, सन्निहितासन्निहितदेवता[म्] जिनप्रतिमामिव ॥२८५०॥

अथात्र ब्रूयात्—साध्यधर्मविकलो दृष्टान्तः, जिनप्रतिमायामपि दोष एव देवताशङ्कयेति अत आह—

**अध पडिमं पि ण वंदध देवासंकाय तो ण [8]घेत्तव्वा ।**
**आहारोवधिसेज्जा[9] मा देवकता [10]हवेज्ज पहु ॥२८५१॥**
**को जाणति किं भत्तं किमयो किं पाणयं जलं मज्जं ।**
**किमलाबुं माणिक्कं किं सप्पो चीवरं हारो[11] ॥२८५२॥**
**को जाणति किं सुद्धं किमसुद्धं किं [12]सज्जीव-णिज्जीवं ।**
**किं भक्खं किमभक्खं पत्तमभक्खं ततो सव्वं ॥२८५३॥**

**अध पडिमं पि** गाथात्रयम् । दृष्टान्तप्रसाधनमिदम्—जिनप्रतिमायां गुणबुद्ध्या न दोषः, भावविशुद्धिग्रहणात्, आहारोपधिशय्यादिष्विव । अथाहारादिष्वपि

१ असंज° हे । २ °माए को हे त । ३ हे । प्रत्यां नास्ति । ४ होज्ज को, हुज्ज हे त । ५ °माए को हे, °माइ त । ६ °द्धीए को हे त । ७ °काए को, °काइ हे त । ८ तो घेत्त° जे । ९ °धिसज्जा हे । १० भवे° को हे, °वेज त । ११ दोरो को । १२ °वमज्जो° को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शङ्कैव-किं भक्तम् ? किं कृमयः ? किं पानम् ? ओहोस्वित् मद्यम् ? किम् अलाबु ? किं माणिक्यम् ? चीवरमपि किं सर्पः ? किं हारः ? इति सर्वत्र संशयात् सर्वव्यवहारलोपा-लोकागमविरोधौ। एवमेवान्येऽपि दोषाः इति अभ्युपगमविरोधं सूचयति ॥२८५१–५३॥

जतिणा वि ण सहवासो सेओ पमयाकुसीलसंकाए ।
होज्ज गिही वि जति त्ति[3] य तस्सासीसा ण दातव्वा ॥२८५४॥
ण य सो दिक्खेतव्वो भव्वोऽभव्वो त्ति जेण को मुणति ।
[१८८-प्र०][4]चोरो त्ति [5]चारियो त्ति [6]य [7]होज्ज [8]वे परदारगामि त्ति ॥
२८५५॥

को जाणति को सीसो को व गुरू तो ण तव्विसेसो वि ।
गज्झो ण [9]योवदेसो को जाणति सच्चे[10]मलियं ति ॥२८५६॥
किं बहुणा सव्वं चिय संदिद्धं जिणमतं जिणिन्दा[11] य ।
परलोगसग्गमोक्खा[12] दिक्खाये[13] किमत्थमारम्भो ? ॥२८५७॥
जतिणा गाहा ४ भाविताऽर्थाः ।

अध संति जिणवरिन्दा[14] तव्वयणातो य सव्वपडिवत्ती।
तो तव्वयणातो[15] च्चिय जति[16]वन्दणयं कधं ण मतं ? ॥२८५८॥
जति जिणमतं पमाणं मुणि त्ति तो बज्झकरणपरिसुद्धं ।
देवं पि [17]वन्दमाणो विसुद्धभावो विसुद्धो[18] [19]तु ॥२८५९॥

अध सन्ति गाथाद्वयम् । अथ लोकाभ्युपगम-विरोधौ मा भूतामिति जिनेन्द्रा जिनप्रवचनं [च] निःसन्दिग्धम् । तदुक्तत्वादेव यतिवन्दनमपि गुणबुद्ध्या कर्तव्यम्, [भग]वद्भिरुक्तत्वात्, आहारादिग्रहणवत्, गुरूपदेशादिवद्वा । अवि-धात्राशङ्कैव न युक्ता कर्तुम्, अन्यस्य देवस्य यतिवेषधारिणः क्वचिदप्यदृष्टत्वात्, योऽन्यदषाढशरीराच्छरीरमधिष्ठास्यति ॥ २८५४–५९ ॥

अत इयं गाथा—

जध वा सो जतिवेसो[20] दिट्ठो तो[21] [22]केत्तिया सुरा अण्णे ।
तुब्भेहि[23] दिट्ठपुव्वा सव्वत्थापच्चयो जं भे ॥२८६०॥

१ °माहोस्समलाबुद्धिमाणिक्यम्-इति प्रतौ । २ संवा° हे त । ३ त्ति तस्सा° जे । ४ चोह को हे त । ५ °रिउ को हे । ६ व त । ७ होइ हे । ८ तओ हे । ९ चोव° त हे । १० °च्चमिलि° त । ११ °णिंदा को हे । १२ °क्खाइ त । १३ °क्खाए को हे त । १४ °रिंदा को हे । १५ °णाउ को हे । १६ °वंद° को हे १७ °वंद° को । १८ °सुद्ध त । १९ त्ति हे त । २० °तिरूवो हे त । २१ तह को हे त । २२ कित्ति° हे । २३ °ब्भेहिं को हे ।

Jain Educationa International     For Personal and Private Use Only     www.jainelibrary.org

जध वा सो यतिवेषधारित्वं सविशेषणं यत्तत्रैवाषाढदेवे दृष्टम् , तत्रैव संयमकारिणं आषाढसाधुशरीराधारयतिवेषधारित्वादेवोपमिति[तिः,] नैवान्यत्र साधौ देवत्वं गमयति असाधारणत्वाद् दृष्टान्ताभावात् ॥२८६०॥

अथोपसंहारगाथा निगमनाय —

छतुमत्थसमयचज्जा ववहारणयाणुसारिणी सव्वा ।
तं तध समायरंतो सुज्झति सव्वो वि सुद्धमणो ॥२८६१॥
संववहारो वि बली जमसुद्धं पि गहितं सुतविधीए ।
कोवेति ण सव्वण्णू वन्दयि य कतायि छतुमत्थं ॥२८६२॥
णिच्छयववहारणओ[१८८-द्वि०]वणीतमिह समाणं जिणिन्दाणं ।
एकतरपरिच्चाओ मिच्छं संकातयो जे य ॥२८६३॥

छतुमत्थसमयेत्यादि गाथात्रयम् । सर्वैव छद्मस्थकालिकी चर्या व्यवहारनयानुसारिणीति । प्रमाणमत्र—छद्मस्थस्य भावशुद्ध्या असंयतयतिरूपवन्दनं न दोषाय सूत्रानुसारिव्यवहारनयानुवर्तित्वात्, सूत्रविधिगृहीतसर्वज्ञानुमतसदोषाऽऽहारपरिभोगवत्, अथवा केवलिनः छद्मस्थवन्दनवत् । तस्मान्निश्चयव्यवहारद्वयोपसंगृहीतशासनेऽस्मिन्नेकतरपरित्यागो मिथ्यादर्शनमिति शङ्का न कार्या ॥२८६१–६३॥

जति जिणमतं पवज्जध तो[१] मा ववहारणयमतं मुयध ।
ववहारपरिच्चाए[२] तित्थुच्छेतो जतोऽवस्सं ॥२८६४॥

जति जिण० गाहा । व्यवहारनयो न परित्याज्यः, जिनेन्द्रानुमतत्वान्निश्चयनयवत् । व्यवहारनयपरित्यागाच्च तीर्थोच्छेदोऽवश्यं भावी । सम्प्रत्यपि संयमक्रियानुष्ठानात् दुः(सु)षमदुःषमायामिव ॥२८६४॥

इय ते णासग्गाहं मुअंति जाधे वहुं पि भण्णंन्ता ।
तो संघपरिच्चत्ता रायगिहे णिवतिणा णातुं ॥२८६५॥
वलभद्देणक्खाता भणंति ते[६] सावयं[७] तवस्सि त्ति ।
मा कुरु संकमसंकारुहेसु भणिते भणति राया ॥२८६६॥
को जाणति के तुब्भे किं चोरा चारिया अहिमर त्ति ।
संजतरूवच्छण्णा सेज्जमहं भे विवादेमि ॥२८६७॥

१ °णिदा° को हे । २ ता को । ३ °रनिच्छए को । ४ °रनउच्छेए को । ५ °ण्णंता को हे । ६ सावय को हे त । ७ वयं को त, वं हे । ८ °हिरम त । ९ अज्ज° को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

णाणचे[1]रियाहि[2] णज्जति समणोऽसमणो व कीस जाणंतो ।
तं सावय ! संदेहं करेसि[3] भणिते [4]णिवो भणति ॥२८६८॥
तुब्भं चिय ण परोप्प[5]र वीसंभो सावगो त्ति [6]किध मज्झं ।
णाणच[7]रिया[8]हि जायतु चोराण [9]वं [10]कि[11]ण्णे ता संति ॥२८६९॥
उवव[12]त्तितो भयातो य पवण्णा[13] सच्चं[14]मयसम्[15]ग्गाहो[16] ।
णिक्खामिताभिगंतु गुरुमूलं ·ते पडिक्कंता[17] ॥२८७०[18]॥

इय ते इत्यादिसर्वाः स्फुटार्थाः ॥२८६५–७०॥

॥ इति तृतीयोऽव्यक्ताभिधाननिह्नववादः ॥

वीसा दो वास[१८९-प्र०]सता तइया सिद्धिं गतस्स वीरस्स ।
सामुच्छेइयदिट्ठी मिथिलपुरीए समुप्पण्णा ॥२८७१[19]॥
मिथिलाए लच्छिघरे महगिरि को[20]ण्डिं[21]ण्ण आसमित्ते य ।
णेउणियं[21]णुप्पवाते रायगिहे खण्डरक्खा य ॥२८७२॥
णेउणमणुप्पवाते अधि[22]ज्जिंतो वत्थुमासमित्तस्स ।
[23]एक्कसमयातिवोच्छेतसुत्ततो णासपडिवत्ती ॥२८७३॥

वीसा दो वाससता गाहा । मिथिलाए । णेउणमणुप्पवाते गाहा । अश्वमित्रस्यानुप्रवादपूर्वमधीयानस्य नैपुणं नाम वस्तुसूत्रम् तत्र एकसमयाद्युत्पादविनाशप्रबन्धात् सर्ववस्तुविनाश इति प्रतिपत्तिरुपजाता ॥२८७१-७३॥

तस्याश्चोपपत्तिः–

उप्पाताणंतरतो सव्वं चिय सव्वधा विणासि त्ति ।
गुरुवयणमेगणयमतमेतं मिच्छं ण सव्वमतं ॥२८७४॥

उप्पाताणंतरतो गाहा । सत्यम्, उत्पादानन्तरं विनाशो भवति । एतदेकनयमतमेकान्तेन मिथ्यादर्शनेन, [न] सर्वेषां नयानां मतम् ॥२८७४॥

ण हि सव्वधा विणासो अद्धा[24]पज्जायमेत्तणासम्मि ।
[25]सपरप्पज्जायाणंतध[26]म्मिणो वत्थुणो जुत्तो ॥२८७५॥

१ °णकिरि° को त । २ °याहिं को हे । ३ °रेमि त । ४ पुणो त । ५ परोप्परं हे । ६ कह हे । ७ °णकिरि° को त । ८ °याहिं को हे । ९ °यइ हे त । १० चि को हे त । ११ किं न को हे । १२ °वउत्ति° हे । १३ पव्वण्णा हे त । पव्वणा को । १४ पव्वम° त, सव्वम° हे । १५ °यमसग्गाहा को, °यमसग्गाहे हे । १६ °ग्गाहे त । १७ °वकंता ॥ १८ अयं पाठः त । १९ एसा हेसम्मता निर्युक्तिगाथा । २० कोडि° को हे त म दी हा । २१ °णियाणु° हे दी हा । एषापि २८७२ संख्यावती हेसम्मता निर्युक्तिगाथा । २२ अहिज्जओ को हे त । २३ एगस° को हे त । २४ °सोऽद्धा° हे । २५ रपज्जा° जे त हे । २६ धम्मिणो जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ण हि** गाहा । योऽपि चासावुत्पादानन्तरं विनाशः, सोऽपि न सर्वथा छेद एव किन्तु अद्धापर्यायमात्रना[शोऽ]सौ, यतो द्रव्य-क्षेत्र-काल-भाव-पर्यायावनद्धस्व-परपर्यायानन्तधर्मकं वस्तु, तस्यैकेन समयमात्रविशेषणेन नाशात् सर्वथा विनाशो वक्तुं न युक्त इति ॥२८७५॥

एवं गुरुणाऽभिहितेऽश्वमित्रः[1] पुनराह—आगमप्रमाणा गुरवः वयं च । ततो यत्सूत्रेऽभिहितं तत् कथमप्रमाणं भविष्यतीति आगमविरोधः किलाचार्यस्येति । तत उच्यते—

**अध सुत्तातो[2] त्ति मती णणु[3] सुत्ते सासतं पि णिद्दिट्ठं ।**
**वत्थुं दव्वट्ठाए असासतं पज्जवट्ठाए[4] ॥२८७६॥**

**अध सुत्तातो** गाहा । ननूक्तमस्माभिः—एकनयमतमेतत् यतो द्वितीयनय-मतमपि सूत्रेऽस्ति—द्रव्यार्थतः शाश्वतं वस्तु, पर्यायार्थात्(द)शाश्वतमिति ॥२८७६॥

**एत्थ वि ण सव्वणासो समयादिविसेसणं जतोऽभिहितं ।**
**इधरा ण सव्वणासे समयातिविसेसणं जुत्तं ॥२८७७॥**

**एत्थ वि** गाहा । अत्रापि च पर्यायनयमतेन सर्वनाशः किन्तु एकसमयोत्पा-दादेकसमयविनाशात् स्वसमयविशेषणान्न सर्वप्रकारोत्पाद-विनाशौ ॥२८७७॥

तदुदाहरति—

**को पढमसमयणारगणासे बितिसमयणारगो णाम ।**
**ण सुरो घडो अभावो व होति जति सव्वधा णासो ॥२८७८॥**

**को पढम०** गाहा । प्रथमसमयोत्पन्नो नारकः 'प्रथमसमयः' इत्युच्यते । स एव तेन प्रथमसमयविशिष्टनारकत्वेन विनश्यन् द्वितीयसमयस्थितिविशेषणात् 'द्वितीयसमयनारकः' इति व्यपदिश्यते । समया उत्पद्येते(न्ते) विनश्यन्ति च, नारकत्वं तु असंख्येयकालस्थितिभवान्तकालमवतिष्ठते । तेन द्वि(हि) प्रथमसमयादिकालपर्याये-णोत्पद्यन्ते विनश्यन्ति चेति तदुत्पादविगमान्न सर्वथा विनाशः । तस्य प्रथ समयनारक-विनाशे सर्वात्मना नारकोच्छेदः(दे) कोऽसौ द्वितीयसमये नारको नाम पूर्वस्माद् अत्यन्त-भिन्नजातीयः किं देवः ? आहोस्विद् घटः ? किमभाव एव सर्वथा नाशात् ? उच्यते च भवता 'नारकः' इति । तस्मान्नारकपर्यायाऽव्ययी स स्थितिकालावस्थायी न विनष्ट इति तेना(न) व्यपदिश्यते ॥२८७८॥

---

१ °तश्वमिथः पु-इति प्रतौ । २ °त्ताउ **को हे** । ३ सुत्ते नणु **को हे** । ४ °ज्जयट्ठा° **हे** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अधव समाणुप्पत्ती समाणसंताण[१८९-द्वि०]तो मती होज्जा ।**
**को सव्वधा विणासे संताणो किं व सामण्णं ॥२८७९॥**

अधव गाहा । सेनानग(सेनावन)सन्ततिवासनातः समानरूपोत्पत्तिरिति सादृश्य-भ्रान्त्या स एवेति व्यपदेशः । तत्[२] तु अत एवायुक्तम् । सर्वथा विनाशे निरन्वये कः सन्तानः, किं वा सामान्यम् ? ॥२८७९॥

अपि च—

**संताणिणो ण भिण्णा जति संताणो ण णाम सन्ताणो ।**
**अध भिण्णो ण क्खणियो खणियो वा जति ण सन्ताणो ॥२८८०॥**

**संताणिणो** गाहा । नासौ सन्तानः, सन्तानिभ्यः सकाशाद[न]न्यत्वात्, सन्तानिवत् । अथायं दोषो मा प्रापदिति भिन्नत्वमभ्युपगम्यते, ततः सन्तानोऽक्षणिकः प्राप्नोति, क्षणिकेभ्यः सन्तानिभ्योऽन्यत्वात्, आकाशवत् । ततश्च क्षणिकं सर्वमिति पूर्वाभ्युपगमविरोधः । अथैतस्यापि क्षणिकत्वमभ्युपगम्यते । ततोऽसौ सन्तानो न भवति, क्षणिकत्वात्, सन्तानिवत् ॥२८८०॥

**पुव्वाणुगमे समता होज्जं[३] ण सा सव्वधा विणासम्मि ।**
**अध सा ण सव्वणासो तेण समं वा णणु खपुप्फं ॥२८८१॥**

**पुव्वाणुगमे[४]** गाहा । यदि पूर्वमुत्तरत्रानुगच्छति, ततः समता सादृश्यं भवेत् । सर्वथा विनाशयुक्तं तदभ्युपगम्यतेऽनुगमाऽभावात् । पूर्वविज्ञानस्य च सविषयस्य नष्टत्वात् उत्तरक्षणवस्तु कस्य समानम्, कस्य वा समबुद्धिरुभयोर्निरन्वयनष्टयोः ? । अथ सा समता अभ्युपगम्येत, न तर्हि सर्वथा नाशः, कस्यचिदंशस्यान्वयिनो नित्यस्याभ्युपगमात् । अथ सर्वथा विनाशेऽपि सभागसंततेः समताऽभिमन्यते । ततः खपुष्पमपि पूर्वेण समानमस्तु, निरन्वयात्, उत्तरक्षणवत् ॥२८८१॥

अपि चानिष्टप्रसङ्गः—

**अण्णविणासे अण्णं जति सरिसं होति होतु [५]तेल्लोक्कं ।**
**तदसंबद्धं च मती सो वि[६] कतो सव्वणासम्मि ॥२८८२॥**

**अण्णविणासे** गाहा । पूर्वस्मिन्निरन्वयेऽपि नष्टे तत्सदृशं सर्वं त्रैलोक्यमुत्पद्यताम्, निरन्वयत्वात्, तदुत्तरक्षणवस्तुवत् । न च त्रैलोक्यं तत्सदृशमुत्पद्यते, दृष्टेष्टविरोधात् ।

१ णासो त । २ तत्त्व एवायुक्तं सं—इति प्रतौ । ३ हुज्ज हे । ४ पुव्वणुभंग इति प्रतौ । ५ तेलुक्कं हे । ६ वि को हे त ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ पूर्वेण सह सम्बन्धोऽस्ति प्रत्यासन्नि(त्ति)रुत्तरस्येति युक्तं तत्र सादृश्यम्, न त्रैलोक्यस्य, असम्बद्धत्वादिति । आचार्य आह-सोऽपि सम्बन्धो नैव सर्वनाशे युज्यत इत्यभिप्रायः ॥२८८२॥

अपि चासौ क्षणिकवादी पर्यनुयुज्यते—

**किध[1] वा सव्वं खणियं विण्णातं जति मती सुतातो[2] त्ति ।**
**तदसंखसमयसुत्तत्थगहणपरिणामतो जुत्तं ॥२८८३॥**

**किध** गाहा। कथमेतत् त्वया विज्ञातं सर्वं क्षणिकमिति ? क(का)दाचिद्रूपाच्छ्रुतज्ञानादिति । ततः असंख्येयसमयसूत्रार्थग्रहणपरिणामपरिसमाप्तेः असंख्येयकालावस्थानं युक्तम् ॥२८८३॥

**ण तु पतिसमयविणासे[3] [4]जेणेक्केक्कक्खरं चिय पदस्स ।**
**संखातीतसमइयं [5]संखेज्जाइं[6] पदं ताइं ॥२८८४॥**
**[7]संखेज्जपतं वक्कं तदत्थगहणपरिणामतो[8] [9]होज्जा ।**
**सव्वखणभंगणाणं तदजुत्तं समयणट्ठस्स ॥२८८५॥**

**ण तु पतिसमय०** गाहा । नैव प्रतिसमयविनाशे श्रुतज्ञानोपयोगः, यस्मात् पदस्यावयवा अक्षराणि, तत्रैकैकमक्षरमसंख्येयसमयम्, संख्येयान्यक्षराणि पदम्, संख्येयानि पदानि वाक्यम्, वाक्यात्तदर्थग्रहणपरिणामः-सर्वं जगत् क्षणिकमिति एतावन्तं कालमवस्थितस्यैकस्याऽक्षणिकविज्ञाने युज्यते वक्तुम्, न तु समयमात्रनष्टस्य ॥२८८४-८५॥

न केवलमेतदेवायुक्तमन्यदपि क्षणभङ्गवादिनो न युज्यते—

**तेत्ती[10] समो किलामो[11] सारिक्खविवे[12]क्खपच्चयादीणि ।**
**अज्झयणं [१९०-प्र०] ज्झाणं भावणा [13]यं का सव्वणासम्मि ॥२८८६॥**

**तेत्ती समो** गाहा । तेत्ती तृप्तिः [14]घ्राणिरित्यर्थः, श्रमः खेदः, "किलामो" क्लमो ग्लानिरित्यर्थः, सादृश्यं साधर्म्यं, विपक्षो वैधर्म्यं, प्रत्ययः प्रतीतिरवबोधः, अध्ययनं ग्रन्थाभ्यासः, ध्यानमेकालम्बनस्थैर्यम्, भावना वासना-पुनः पुनः क्रियाभ्यावृत्तिः- एतानि सर्वनाशे सर्वाणि न युज्यन्ते । ततश्च लोकागमविरोधौ ॥२८८६॥

एतान्येव भावयन्नाह—

---

१ कध त । २ सुयाउ को हे । ३ पयस° त । ४ जेणिक्कि° हे । ५ °साम° हे । ६ संखिज्जा° को हे । ७ संखिज्ज° हे । ८ °थग्गह° हे । °थगाह° त । ९ हुज्जा को हे । १० तित्ती को हे । बत्तीं त । ११ °लासो त । १२ °विरक्ख° त । १३ य को हे त । १४ तृप्तिः णिरि°-इति प्रतौ ।

**अण्णोण्णो[1] पतिगासं भोत्ता[2] अंते[3]ण सो वि कॅा[4] तेत्ती[5] ।**
**गंतादयो[6] वि एवं इय संववहारँवोच्छित्ती[7] ॥२८८७॥**

**अण्णोण्णो पतिगासं** । "ग्रसु ग्लसु अदने" ग्रसनं ग्रासः कवलप्रक्षेपः, ग्रासं ग्रासं प्रति प्रतिग्रासं भोक्ता देवदत्तः अन्यश्चान्यश्च क्षणिकवादे भवति, अन्ते पुनः क्रियायाः भुजो(जे)रभावः, भोक्ताऽपि नास्ति, ततोऽन्त्यग्रासे क्षिप्ते का तृप्तिः, कस्य वा ? एतन्न युज्यत एव । तथा च न गच्छतो गन्तुः श्रमो भवतीति । गन्ताऽप्येवम्-प्रथमपादो द्धारे गन्ता यः स द्वितीयपादो द्धारे नष्ट इत्यन्यो गन्ता, पुनरप्यन्यः पुनरप्यन्य इति अन्त्यपादो द्धारे गतेरभावाद्गन्तैव नास्ति, कः श्रमो नाम ? कस्य वासौ ? एकस्य खेदाभावात् । एवं सर्वेषु भावना । ततश्च लोकशास्त्रव्यवहारोच्छेदः प्राप्त इति क्षणिकवादस्यायुक्तः ॥२८८७॥

अथाश्वमित्रः प्रत्यवतिष्ठते —

**जेणं चिय पतिगासं भिण्णा तेत्ती[8] अतो च्चिय[9] विणासो ।**
**तित्तीए तित्तस्स य एवं चिय सव्वसंसिद्धी ॥२८८८॥**

**जेणं** गाहा । प्रतिग्रासमिति वीप्सा प्रथमग्रासभोक्ता द्वितीयग्रासभोक्तुरन्यः, भिन्नविशेषणत्वात्, भोक्तृस्नातृवत् । प्रथमग्रासश्च द्वितीयग्रासे न भवत्यतो ग्रासभेदादेव तद्भोक्तुरन्यत्वमिति भोक्तारो भिन्नाः, तृप्तयोऽपि च भिन्ना एवेति ग्रासस्य मुत्कर्षात् । येनैव कारणेन भोक्तृभेदस्तृप्तिभेदश्च तेनैव कारणेन पूर्वविनाशादुत्तरोत्पादात् क्षणभङ्ग इति । एवमेव तृप्तितृप्तयोर्विनाशसिद्ध्या सर्वेषां गन्तृश्रमादीनां विनाशसिद्धिरिति ॥२८८८॥

आचार्यः प्रत्युत्तरमाह—

**पुव्विल्लसव्वणासे [10]वड्ढी [11]तेत्तीए किं णिमित्तातो[12] ।**
**अध सा वि तेऽणुवत्तति सव्वविणासो[13] कधं जुत्तो ॥२८८९॥**

**पुव्वि०** गाहा । पूर्वग्रासस्य सर्वथा नाशे तृप्तेर्वृद्धिर्दृष्टा सा किं निमित्ताऽभावतः क्षणभङ्गवादिनः ? अथासौ वासनाऽपेक्षेति पूर्ववासनामनुवर्त्तते । नन्वेवं न सर्वात्मना नाशः पूर्ववासनान्वयत्वात् ॥२८८९॥

**दिक्खा वि[14] सव्वणासे किमत्थमधवा मती विमोक्खत्थं ।**
**सो जति णासो सव्वस्स तो तओ [15]किन्थ दिक्खाए ॥२८९०॥**

---

१ अण्णण्णो को हे त । २ भुत्ता हे । ३ अन्नेण त । ४ को को । ५ तित्ती को हे । ६ गंतोदए त । ७ °रवुच्छि° हे । ८ तित्ती को हे । ९ चिय हे । विय त । १० वुड्ढी को हे त । ११ तित्ती य को हे त । १२ °त्ता मे को । १३ °णासे हे । १४ व को हे त । १५ किन्थ को, कि व हे त ।

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

**दिक्खा वि सव्वणासे** गाहा। प्रव्रज्या दीक्षाख्यफला सर्वथा नाशे अभावफलत्वात् वन्ध्याप्रवाहनवत्। अथैषा बुद्धिर्मोक्षार्थं दीक्षेति। असिद्धो हेतुः। अत्रोच्यते–मोक्षो यदि भावः, न तर्हि सर्वनाशः-इत्यभ्युपगमविरोधः। अथाभावो मोक्षः ततः सिद्ध एव हेतुः, सर्वस्यापि च प्रयत्नमन्तरेण नाशस्यावश्यं भावित्वाद्विनैव [1]दीक्षया मोक्षप्राप्तिरिति विफला दीक्षा ॥२८९०॥

**अ[2] णिच्चो ण खणिअं तो सव्वं अध मती स संताणो[3]।**
**णे[4] हतो त्ति ततो दिक्खा णिस्संताणस्स मोक्खो त्ति ॥२८९१॥**

**अध णिच्चो** गाहा। अथ नित्यो मोक्षः सर्वस्यावश्यं भावित्वाद्भावश्च। ततः सर्वं क्षणिकमिति प्रतिज्ञाहानिः। अथवा दीक्षा प्र(अ)ति[5]दीर्घसंतानविच्छेदाय, निःसन्तानस्य मोक्ष इति ॥२८९१॥

एवमपि—

**छिण्णेण[6]ाछिण्णेण व किं संताणेण सव्वणट्ठस्स।**
**किं वाऽ[7]भावीभूतस्स सपरसन्ताण[8]चिन्ताए[9] ॥२८९२॥**

**छिण्णेण** गाहा। सर्वथानष्टस्य सर्वस्यैव सन्तान[ः] छिन्न इति न दीक्षादियत्नेनार्थः। किं वा तस्याभावीभूतत्वात् स्वपरसन्तानविच्छेदचिन्तया, वन्ध्यापुत्रस्येव सन्तान इति न दीक्षादियत्नेनार्थः ॥२८९२॥

यदुक्तं 'सर्वं क्षणिकं [इति] प्रतिज्ञाहानिः प्राप्ता' इति तत्समाधानार्थमाह–

**सव्वं पयं व खणियं पज्जंते णासदरिसणातो[10] त्ति।**
**णणु एंतो[11] च्चिय ण [12]ख[१९०-द्वि०]णियमंतणे[13]ासोवलद्धीतो ।२८९३।**

**सव्वं** गाहा। सर्वं क्षणिकं पर्यन्तेऽवश्यम्भाविनाशत्वात्। आचार्य आह-अत एव न क्षणिकं सर्वं, पर्यन्तेऽवश्यम्भाविनाशत्वात् पयोवदिति धर्मस्वरूपविपरीतसाधनो विरुद्ध इत्यभिप्रायः आरादविन[14]ष्टमग्रे विनश्यतीति ॥२८९३॥

**इ[15]धेरादितो च्चिय तओ [16]दीसेज्जंते [17]व्वँ कीस व समाणे[18]।**
**सव्वविणासे[19] णासो दीसति [20]अंते ण सोण्णत्थ ॥२८९४॥**

**इधरादितो च्चिय** गाहा। यस्य सर्वं क्षणिकं तस्यादित एव नाशेन भवितव्यं क्षणिकत्वा[21]त्तदन्तवत्। किमिति सर्वनाशे समाने पर्यन्त एव दृश्यते नाशः,

१ दीक्षायया इति प्रतौ। २ अह° त, अहउ हे। ३ °स्संता° को हे। ४ मुक्ख हे। ५ दीर्घः-इति प्रतौ। ६ °णेण अछि° को। ७ किं अभा° को, किं चाभा° हे। ८ °संता° को हे। ९ °चिंता° को हे। १० णाउ को हे। ११ इत्तो को हेत। १२ खणि को हे। १३ मंते नासो को हे त। १४ नष्टं मग्रेवि इति प्रतौ। १५ °राइउ को हे, °रातो त। १६ दीसज्जं° त। १७ व को। १८ माणो हे त। १९ °णासो त। २० अन्नो ण त। २१ °त्तदंभवत्-इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नान्यत्रादौ मध्ये वा ? ॥२८९४॥

अंते व सव्वणासो पडिवण्णो केण जतुवलद्धीतो ।
कप्पेसि ख[1]णविणासं[2] णणु पज्जायंतरं तं पि ॥२८९५॥

अंते व सव्व० गाहा । अन्ते वा केन सर्वनाशः प्रपन्नः पर्यन्तेऽवश्यंभाविनाशत्वादित्यन्यतराऽसिद्धः । ततश्च सर्वक्षणिकसाध्यधर्मविकल्पनाऽपगता, यथैवाद्यो नाशः पर्यायान्तरमेवमन्त्योऽपि नाशः पर्यायान्तरमेव, दीपादेर्मषीपरिणामापत्यादिवत् ॥२८९५॥

जेसिं च[3] ण पज्जंते विणासदरिसणमिहं[4]वरातीणं ।
तं[5] णिच्चब्भुवगमतो सव्वख[6]णविणासं[7]मनहाणी ॥२८९६॥

जेसिं च गाहा । अथवाभ्युपगम्य पर्यन्ते नाशं आकाशवैधर्म्यदृष्टान्तसद्भावादक्षणिकत्वमम्बरादीनाम् । अतः सर्वक्षणिकप्रतिज्ञाहानिः तदवस्था ॥२८९६॥

पज्जायणयमतमिणं जं सव्वं विगमसंभवसभावं ।
दव्वट्ठियस्स णिच्चं एगतरमतं च मिच्छत्तं ॥२८९७॥

पज्जाय० गाहा । एतच्च क्षणिकत्वं पर्यायनयमतम् । सर्वं हि वस्तु परमार्थतः विगमसम्भवपर्यायद्वयोपगूढं पर्यायनयमतम् । द्रव्यार्थिकनयस्य मतम् सर्वमेव ध्रुवं नित्यम् । एकतरपरित्यागादेकतरपरिग्रहो मिथ्यादर्शनमित्युभयसङ्ग्रहः कार्यः ॥२८९७॥

जमणंतपज्जयमयं वत्थुं भुवणं व चित्तपरिणामं ।
[8]थितिविभवभंगरूवं णिच्चाणिच्चातितोभिमतं ॥२८९८॥

जमणंतपर्यायं स्थितिविभवभङ्गरूपैश्चित्रपरिणामं वस्तु, अनन्तपर्यायत्वात्, नित्यानित्योभयरूपवक्रत्वर्जुत्वविगमसम्भवाङ्गुलिद्रव्यवध(त्) सकलभुवनवत् । यदेव किञ्चिदिष्टं स एव दृष्टान्त इत्यर्थः ॥२८९८॥

सुहदुक्खबंधमोक्खा[10] उभयणयमताणुवेत्तितो[11] जुत्ता ।
एगतरपरिच्चाए सव्ववहार[12]विच्छित्ती ॥२८९९॥

सुह० गाहा । सुखदुःखबन्धमोक्षभाक् स्याद्वादी संसारी पुरुषः, द्रव्यपर्यायोभयरूपत्वात्, राजापराधिकृतं(त)प्रसाददेवदत्तवत् ॥२८९९॥

---

१ वखण° हे । २ °णासो त । ३ व हे । ४ °हंचरा° त । ५ तन्निच्च° को हे । ६ व्वक्ख° को हे । ७ °णासिम हे । ८ ठिइवि° को हे त । ९ °वसङ्ग° इति प्रतौ । १० °धमुक्खा हे । ११ °णुवित्तिणो त, वट्टिणो हे, °त्तिणा को । १२ °रवोच्छि° को हे, °रवुच्छि° त ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

ण मुहाति पज्जयमते णासातो सव्वधा मतस्सेव ।
ण य दव्वट्ठियपक्खे णिच्चत्तणतो णभस्सेव ॥२९००॥

ण सुहाति गाहा । पर्यायनयपरिकल्पितपुरुषः सुखदुःखबन्धमोक्षभाग् न भवति, क्षणभङ्गनाशित्वात्, मृतपुरुषवत् । द्रव्यार्थनयकल्पितपुरुषोऽपि न सुखादिभाक्, एकान्तं नित्यत्वात्, आकाशवत् ॥२९००॥

जति जिणमतं पमाणं तो[2] मा दव्वट्ठियं परिच्चयसु ।
[१९१-प्र०]सक्कस्स व होति[3] जतो तण्णासे सव्वणासो ते[4] ॥२९०१॥

जति जिणमतं । अपि च, जिनप्रवचनप्रमाणको भवान् । जैन एवं न भवति, पर्यायमात्रग्राहित्वात्, शाक्यवत्, द्रव्यार्थनाशात् द्रव्यार्थपरित्यागात्, पर्यायमात्रत्वे सर्वनाश एव ते भवतीति ॥२९०१॥

इय पण्णवितो वि जतो ण पवज्जति सो ततो कतो बज्झो ।
विहरंतो रायगिहे णातुं तो खण्डरक्खेहिं ॥२९०२॥
गहितो सीसेहिं समं एतेऽहिमर त्ति जंपमाणेहिं ।
संजतवेसच्छण्णा सज्जं सव्वे समाणेध ॥२९०३॥
अम्हे सावयजतओ कत्युप्पण्णा कहिं व पव्वइता ।
अमुगत्थ[11] बेन्ति सड्ढा ते वोच्छिण्णा तदा चेअ ॥२९०४॥
तुब्भे तव्वेसधरा भणिते भयतो सकारणं च त्ति ।
पडिवण्णा गुरुमूलं गंतूण ततो पडिक्कंता[15] ॥२९०५॥

इय पण्णवितो । गहितो सीसेहिं समं । अम्हे । सावयजतओ वयं, श्रावकयतिवेषाचारयुक्तत्वात्, त्वदभिमतयतिवत् । श्रावक उवाच-- अस्मदभिमतयतयः आचार्यसकाशे व्रतोच्चारणपूर्वं भगवद्वेषक्रियाधारिणः संयता भवन्ति । ननु भवतः-युष्माकं पिता माता तत्पुत्रव्यपदेशः, आचार्यस्तदुपदेशः, तद्वेषक्रियाकलापश्च-सर्वं क्षणध्वंसित्वादुच्छिन्नम्, सम्प्रतिकाले भवद्भिरभिमरैर्भूत्वा वेषो गृहीत इति अन्य एव भवन्तः पूर्वस्मात् प्रव्रज्याकालादित्यसिद्धो हेतुः । अतः पक्षधर्मत्वप्रतिपत्त्यर्थं भयादुपपत्तितश्च द्रव्यार्थस्थितिरभ्युपगता, सम्यक्त्वमुपजातं, गुरुपादमूलं गत्वा प्रतिक्रान्ताः । इति सामुच्छेदिकदृष्टिश्चतुर्थो निह्नवः समाप्तः ॥२९०२-५॥

---

१ °हायप° त । २ ता त । ३ सक्कस्स=बौद्धस्य-टि० । ४ जुतो त । ५ दव्व० त । ६ त्ति को हे त । ७ कओ तओ को हे । ८ °सेहिं को हे । ९ °छणा को । १० सज्जं हे । ११ बेंति को हे । १२ वोच्छि° हे । १३ चेव को हे त । १४ विं त । १५ °क्कन्ता हे । १६ °ता ॥३५॥४१६॥ इत्यश्वमित्रनामा चतुर्थः सामुच्छेदिकनिह्नवः त ॥ १७ द्रव्यवच्छित्तिर-इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

[1]अट्ठावीसा दो वाससता तइया सिद्धिं गतस्स वीरस्स ।
दोकिरियाणं दिट्ठी उल्लुगतीरे समुप्पण्णा ॥२९०६॥
णति खेड जणवतुल्लु[2]अ महगिरि धणगुत्त अज्जगंगे य ।
किरिया दो रायगिहे महातवोतीरमणिणाए[3] ॥२९०७॥
णतिं[4]मुल्लुगं[5]मुत्तरतो सरते सीतजलमज्ज[6]गंगस्स ।
सूराभितत्तसिरसो सीतो[7]सँणवेतणोभयतो ॥२९०८॥
[१९१-द्वि]लग्गोऽयमसग्गाहो जुगवं उभयकिरियोवयोगो त्ति ।
जं दो वि समयमेव य [8]सीतोसिणवेतणाओ मे ॥२९०९॥

अट्टावीसा दो वाससता इत्यादि गाथाश्चतस्रः । आर्यगङ्गस्य लग्नोऽयं असद्ग्राहः-सर्वोऽपि युगपत् द्वे विरुद्धक्रिये वेदयते, एककाले उभयोर्वेदयितृत्वात्, अहमिव पादशिरोगतशीतोष्णवेदनयोः ॥२९०६-९॥ अत्र गुरुवचनम्—

तरतमजोगेणायं गुरुणाभिहितो तुमं ण लक्खेसि ।
समयादिसुहुमतातो मणोऽतिचलसुहुमतातो य ॥२९१०॥

[9] तरतमजोगेणायं । एककाले उभयोर्वेदयितृत्वमसिद्धम्, यस्मात्तरतमयोगेन क्रमेणेत्यर्थः, समयत्रुटिलवादीनां सूक्ष्मत्वात्, मनसोऽपि सूक्ष्मत्वादाशुचरत्वात् दुर्लक्षः काल इति क्रमं न लक्षयति भवान् । ततश्चापक्षधर्मः ॥२९१०॥

एतदेवायुगपद् वेदनमुपपत्त्या दर्शयन्नाह—

सुहुमासु चरं चित्तं इंदियदेसे[10]णँ जेण जं कालं ।
संवज्झति तं तं[11] मत्तणाणहेतु त्ति णो [12]तेणं ॥२९११॥
उवलभते किरियाओ [13]जुगवण्णो दूरभिण्णदेसाओ ।
पातसिरोगतसीतुण्हवेतणाणुभवरूवाओ ॥२९१२॥
उवयोगमओ जीवो उवउज्जति जेण जम्मि जं कालं ।
सो तम्मयोवयोगो होति [14]जहिन्दोवयोगम्मि ॥२९१३॥
सो तदुवयोगमेत्तोवउत्तसत्ति त्ति तस्समं चेअं[15] ।
अत्थंतरोवयोगं[16] जातु कधं केण वंऽसेणं[17] ॥२९१४॥

---

१ एषा हेसम्मता निर्युक्तिगाथा । २ ल्लुग को हे त दी हा म । ३ °णाओ दी म । एषापि हेसम्मता निर्युक्तिगाथा । ४ नईमु° को । ५ ल्लुग को हे । ६ मज्झगं त । ७ °सिण को त । सीउसिण हे । ८ सीउसि हे । ९ लग्नेयं-इति प्रतौ । १० यदोसे त । ११ तम्मत्तमाण° को हे, तस्सत्तणा° त । १२ तणे को हो । १३ जुगवं दो दू° को हे । १४ जहिंदो° को हे । १५ चेव को हे । १६ योगे त । १७ °सेण हे ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

समयातिसुहुमतातो मण्णसि जुगवं च भिण्णकालं पि ।
उप्पलदलसतवेधं व जध व तमेलातचक्कन्ति[1] ॥२९१५॥
चित्तं पि [2]णेन्दियाइं समेति सममध य [९२-प्र०]खिप्पचारि त्ति ।
समयं व सुक्कसक्कुलिदसणे सव्वोवलद्धि त्ति ॥२९१६॥
[4]सव्विन्दियोवलंभे जति संचारो मणस्स दुल्लक्खो ।
एगिंन्दियोवयोगंतरम्मि किह होतु सुल्लक्खो ॥२९१७॥
अण्णविणिउत्तमण्णं विणियोगं लभति जति मणो तेण ।
हत्थि पि थितं पुरतो किमण्णचित्तो ण लक्खेति ॥२९१८॥
विणियोगंतरलाभे व किं थे णियमेण तो समं चेयं ।
पतिवत्थुमसंखेज्जाऽणंता वा जेण्ण विणियोगा ॥२९१९॥
बहुबहुविधातिगहणे णेणूवयोगबहुता सुतेऽभिहिता ।
तमणेगग्गहणं चिय उवयोगाणेगता णत्थि ॥२९२०॥

**सुहुमासु०** गाहा । गाथाप्रबन्धसंलग्ना एव यावद् **बहुबहुविधाति०** गाथा । इह मनःसंज्ञकमन्तःकरणं चित्तम् । तच्च सूक्ष्मम्, मनोवर्गणाप्रचितसूक्ष्मद्रव्यत्वात्, सर्वशरीरव्यापित्वेऽपि सूक्ष्म[म]चक्षुर्ग्राह्यम्, न लौकिकानामणुमात्रत्वात् सूक्ष्ममुच्यते । आशुचरमिति शीघ्रचारि, मनसो देशान्तरगमनप्रतिषेधात् स्वशरीर एव प्रतीन्द्रियं उपयोगगमनात्, येन येन निर्वृत्त्युपकरणद्रव्येन्द्रियदेशेन यत्कालं सम्बध्यते तं कालं तन्मात्रज्ञानहेतुरिति, तेन कारणेन नोपलभते क्रियाद्वयं युगपत् पाद–शिरोगतशीतोष्णवेदने एकेन नानुभूयेते, दूरभिन्नदेशत्वात् हिमवद्-विन्ध्यशिखरस्पर्शनवेदनाद्वयवत् ।

यस्मादुपयोगमयो जीवः, स येनेन्द्रियेण यस्मिन् काल उपयुज्यते यस्मिन् अर्थे ज्ञानोपयोगात् तज्ज्ञानमय एव तत्कालं भवति उपयोगमयत्वात् इन्द्रज्ञानोपयुक्तेन्द्रवत् ।
स च तदुपयोगमात्रोपक्षीणशक्तिरिति तत्समकमेवार्थान्तरोपयोगं कथमिव यायात ? तस्मिन् काले पूर्वेणार्थोपयोगेन परिणतत्वात् अर्थान्तरानवकाशः ।

१ तदला° हे । २ °वक्कंति को हे । ३ णेंदि को हे । ४ सव्वेंदि° को हे । ५ एगेंदि° को हे । ६ सुल° हे त । ७ण्णवि° हे । ८ तेणं हे । ९ ठियं को त, ट्ठियं हे । १० °गन्त° हे । ११ त्थ को हे, च त । १२ चेव त । १३ जं न को हे । १४ नणुव° हे । १५ तत्थालं-इति प्रतौ

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

उपयुज्यमानश्च सर्वात्मनोपयुज्यत इति अंशाभावादंशेनाप्यर्थान्तरोपयोगासम्भव इति मत्वा ब्रवीति–केन वांशेनेति ।

समयादिश्च कालोऽतिसूक्ष्मत्वात् भिन्नोऽपि लक्षयितुमशक्यः, उत्पलदलव्यधनकालभेदवत्, अलातचक्रभ्रमणकालवत् ।

कदाचिच्चित्तं युगपद् सर्वाणीन्द्रियाणि प्राप्नुयादित्याशङ्का । तन्निवारणमपि –नेन्द्रियाणि समकं युगपत् समेति संप्राप्नोति; अथ च सूक्ष्मत्वात् कालस्य युगपत् प्राप्तिरिव लक्ष्यते, शुष्कशष्कुलीदशने रूप-रस-गन्ध-स्पर्श-शब्दोपलब्धिवत् ।

यदि च सर्वेन्द्रियेषु बहुना भिन्नेन कालेन सञ्चरतो मनसः कालभेददुर्लक्षता किमु नैकस्मिन् स्पर्शनेन्द्रियोपयोगे भिन्नार्थविषये स्तोकतरत्वात् कालस्य ? दुर्लक्ष्य एकेन्द्रियोपयोगकालभेदः, सूक्ष्मत्वात्, पञ्चेन्द्रियोपयोगकालभेदवत् ।

अपि च शीतवेदनाविनियुक्तं मनस्तस्मिन्नेव काले उष्णवेदनोपयोगं न यास्यति, अर्थान्तरोपयुक्तत्वात् , अर्थान्तरोपयुक्तविचित्र(त्त)कपुरुष इव पुरा स्थितहस्त्युपयोगम् ।

अथ चैकस्मिन् काले एक‌ि मन्नर्थोपयोग(गे) प्रतिवस्तु असंख्येया अनन्ता उपयोगाः स्युः, अर्थान्तरातिक्रान्तिः(न्तेः), एकक्रियोपयोगे द्वितीयक्रियावत् । किमर्थं नियमत एव द्वे क्रिये वेद्येते ? क्रियासहस्राण्यपि तद्वद्वेद्यन्तामित्यर्थः ।

अत्राह परः--अनेकोपयोगताऽपीष्टैवेति सिद्धसाधनम् , यस्माद् बहु बहुविधादिभेदा अर्थावग्रहादयोऽनुज्ञाताः । आचार्य आह–एकस्मिन्नुपयोगेऽनेकोपयोगता साध्यत्वेन प्रतिज्ञाता, बहुविधादयस्त्वेर्थावग्रहास्तेष्वेककालमेक एवोपयोगो नानेकोपयोगता । ग्रहणमुपयोगः । अनेकस्मिन् ग्रहणमनेकग्रहणमिति समासः । ततश्च न सिद्धसाधनम् । शीतोष्णवेदनयोस्तु एकस्मिन् काले भिन्नमेवोपयोगद्वयम्, विरुद्धार्थत्वात् ॥२९११–२०॥

पुनश्चोदक एवाह—

**समयमणेगग्गहणं जति सीतोसिणदुगम्मि को दोसो ? ।**
**केण व भणितं दोसो उवयोगदुगे वियारोऽयं ॥२९२१॥**
**समयमणेगग्गहणं[2] एगाणेगोवओगभेतो को ? ।**
**सामण्णमेगजोगो खंधावारोवयोगो व्व ॥२९२२॥**
**खंधारोऽयं सामण्णमेत्तमेगोवयोगता समयं ।**
**पतिवत्थुविभागो पुण जो [१९२–द्वि०]सोऽणेगोवयोगातो ॥२९२३॥**

१ °यस्तर्थावग्रहास्ते°– इति प्रतौ । २ °हणं को हे त । ३ °णेगाव° जे । ४ °धावारो° त । ५ °वओग त्ति को हे, °वओगो त्ति त ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ते च्चिय ण संति समयं सामण्णाणेगगहणमविरुद्धं ।**
**एगमणेगं पि तयं जम्हा सामण्णभावेणं ॥२९२४॥**

**समयमणे०** इत्यादि । य इत्थमेवैकस्मिन् काले शीतोष्णवेदनानुभवः [स] किं नानुज्ञायते ? भवत्वेवासौ अनेकार्थग्रहणत्वात् एककाल:, अनेकार्थस्कन्धावारोपयोगवत् । आचार्य आह—**केण व भणितं दोसो ?** सिद्धसाधनमेवेत्यभिप्रायः । शीतोष्णार्थभेदेऽपि अनेकार्थविषय एकोपयोगो वेदनामात्रसामान्यानुभवः केन वार्यते ? उष्णवेदनेयं शीतवेदनानि च, एकस्मिन् काले उपयोगद्वयं नेष्यत इति विचारः ।

स्कन्धावारोपयोगे तु युगपदनेकार्थग्रहणे एकानेकोपयोगभेदविचार एव नास्ति, सामान्यतः स्कन्धावारोपयोगे(ग) एक एवेति । ये पुनरमी प्रतिवस्तु भेदेन पटकुटीकुटीरकुर्व(ट)जहस्त्यश्वरथपदातिजयनशालाविचित्रापणपण्याद्युपयोगास्ते बहव एव, भिन्नकालाश्च प्रतिस्वम्, न हस्त्युपयोगः पदात्युपयोगतां लभते ।

**त एव च** भिन्नकालाः समकं न भवति(न्ति) शीतोष्णवेदनाद्वयवत्, सामान्यस्कन्धावारोपयोगस्तु अनेकात्मकैकत्वसामान्यरूपेण भवत्येवेति ॥२९२१-२४॥

**उसिणो[3]ऽयं सीतो[4]ऽयं ण विभागे[5]णोवयोगदुगमिट्ठं[6] ।**
**होज्ज समं दुगगहणं सामण्णं वेतणा मे त्ति[7] ॥२९२५॥**

**उसिणोऽयं** इत्यादि गतार्था ॥२९२५॥

**जं सामण्णविसेसा विलक्खणा तण्णिबंधणं जं च ।**
**णाणं जं च विभिण्णा सुदूरतोऽवग्गहावाया ॥२९२६॥**
**जं च विसेसं[10] णाणं सामण्णेणाणपुव्वयमवस्सं ।**
**तो सामण्णविसेसं[12] णाणाइं णेगसमयम्मि ॥२९२७॥**

**जं सामण्णविसेसा** इत्यादि । एवं च कृत्वा एकस्मिन् काले सामान्यविशेषोपयोगौ युगपन्न भवतः विलक्षणत्वादि(द्), भिन्नज्ञाननिबन्धनत्वात्, भिन्नावग्रहेहापायधारणत्वात्, पूर्वोत्तरकालभावित्वात्, वेदनासामान्यशीतोष्णवेदनाविभागज्ञानवत् ॥२९२६-२७॥

आर्यगङ्ग आह —

---

१ तम्हा **को हे त** । २ '°वागौ मेकार्थत्वात् । पुनश्चोदक एवाह.........मेकार्थग्रहणत्वात्'-इति पुनः आवृत्त्या लिखितं प्रतौ । ३ °सिणेयं **को हे त** । ४ सीयेयं **को हे त** । ५ °भागो णो° **हे त** । ६ °मित्थं हे । ७ °णमेत्तं° **को**, म त्ति त । ८ °बध° **को हे** । ९ ताणं **त** । १० °सन्नाणं **को हे** । ११ °मन्नन्नाण° **को हे** । १२ °सन्नाणा° **को हे** ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**होज्ज ण विलक्खणाइं समयं सामण्णभेतणाणाइं ।**
**वहुआण को विरोधो समयम्मि विसेसणाणाणं ॥२९२८॥**

**होज्ज** गाहा। सामान्य-विशेषयोर्विलक्षणत्वं युक्तम्, अनाकार-साकारोपयोगग्रहणभेदात्। शीतोष्णवेदनादीनां तु विशेषाणां बहूनामपि साकारोपयोगग्रहणाविशेषात् विलक्षणत्वं नास्तीति साधनधर्मासिद्धो दृष्टान्तः। ततश्च बहूनामपि विशेषाणामेककाले ग्रहणं युक्तम्, अविशेषग्रहणत्वात् एकोपयोगवत् ॥२९२८॥

आचार्य आह—

**लक्खणभेतातो[1] च्चिय सामण्णं च जमणेगविसयं ति ।**
**तमवेत्तुं ण विसेसण्णाणाइं [2]तेण समयम्मि ॥२९२९॥**

**लक्खणभेतातो च्चिय**। एतदेव हि विशेषाणां विशेषत्वं यत्ते परतो विशिष्यन्ते एतदेव लक्षणं भेदानाम्, संज्ञास्वालक्षणा(ण्य)स्वतत्त्वप्रयोजनमतिभेदात्। सामान्यं चानेकविषयम्, अनेकत्वं च लक्षणभेदकृतमिति विशेषज्ञानानि विलक्षणान्येवेति सिद्धः पक्षधर्मः, त्वदीयप्रमाणे वा विलक्षणत्वादिति प्रत्युत उभयासिद्धो हेतुरिति, सामान्यमगृहीत्वा विशेषग्रहणमेव नास्तीति। तेनैकस्मिन् समये बहूनि विशेषज्ञानानि छद्मस्थस्य नेष्यन्ते ॥२९२९॥

**तो सामण्णग्गहणाणंतरमीहितमवेति तब्भेतं ।**
**इय सामण्णविसेसावेक्[3]खा जावंतिमो भेतो ॥२९३०॥**

**तो सामण्णग्गहणा०** इत्यादि। ततः सामान्यग्रहणानन्तरमीहाविशेषादीहितमवायेना[4]ऽवैति तद्भेद[म्],एवं तरतमयोगात् सामान्यविशेषापेक्षा, यावदन्त्यो भेदो विशेष एव, न सामान्यमिति ॥२९३०॥

**इय पण्णवितो वि जतो[5] ण पवज्जति सो[6] ततो कतो वज्झो ।**
**तो रायगिहे स[7]मयं किरियाओ दो प[१९३-प्र०]रू[8]वेन्तो ॥२९३१॥**
**मणिणागेणारद्धो भयोववत्तिपे[9]डिबोधितो वोत्तुं ।**
**इच्छामो गुरुमूलं गंतूण ततो पडिक्कंतो[10] ॥२९३२॥**

**इय [11]पेण्ण०। मणिणागेण** गतार्था ॥२९३१–३२॥

**पंचसता चोताला तइया सिद्धिं गतस्स वीरस्स ।**
**पुरिमंतरंजियाए तेरासियदिट्ठि[12] [13]उप्पण्णा ॥२९३३॥**

---

१ °भेयाउ हे। २ इं ण य समेंतण°जे। ३ °वेक्खा हे। ४ °तमाचायेना° इति प्रतौ। ५ जया को। ६ तो हे। ७ भयवं त समयं किरियातो। ८ °रूवंतो हे, °वेंतो को। ९ °त्तिओ प° हे। १० °तो ॥२७॥४४३॥ इति, गङ्गाख्यः पञ्चमो निह्नवः त। ११ इय पंचमोवि–इति प्रतौ। १२ °दिट्ठी हे दी हा, °दिट्ठिमुप्प° त। १३ उववण्णा दी हा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुरिमंतरंजि भूतगुह बलसिरी[2] सिरिगुत्त रोहगुत्ते य।
परिवायपोट्टसाले घोसण पडिसेवणावादे ॥२९३४॥
विच्चुय सप्पो[6] मूसग मई वराही य काकि पोताई।
एताहिं विज्जाहिं सो तु परिव्वायओ कुसलो ॥२९३५॥
[11]मोरी णउलि बिराली सीही[12] वग्घी य उलुइ[13]ओवाती।
एताओ विज्जाओ गेण्हे[14] परिव्वायमथणीओ ॥२९३६॥
जेतूण पोट्टसालं छलुंओ भणति गुरुमूलमागंतुं।
वातम्मि मएऽवंसितो सुणध जधा सो सभामज्झे ॥२९३७॥

पंचसता गाथाः पञ्च स्फुटार्थाः ॥२९३३-३७॥

रासिदुगगहितपक्खो ततियं णोजीवरासिमादाय।
[17]गिहलोलियादिपुच्छच्छेतोदाहरणतोऽभिहिते ॥२९३८॥

**रासिदुग०** इत्यादि। परिव्राजं पोट्टशालम्बादे[व] जिव्वा(त्वा) **रोहगुप्त** आचार्यसमीपमागत्य 'एवं मया स पराजितः' इति प्रत्युच्चरति–तेन परिव्राजेन 'राशिद्वयं जगत् सर्वम्' इति प्रतिज्ञातम् 'जीवाश्चाजीवाश्च एतद्व्यतिरिक्तं तृतीयं वस्तु नास्ति, प्रमाणैरनुपलभ्यमानत्वाद्वन्ध्यापुत्रवत्'। अत्र मया सिद्धान्त[त] एव तद्बुद्धिं परिभूय 'तृतीयो नोजीवराशिरस्ति' इति प्ररूपितं गृहकोकिलापुच्छच्छेदोदाहरणात्। गृहकोकिलापुच्छं छिन्नमपि स्पन्दनादिक्रियया अजीवो न भवति, जीवोऽपि च न भवति, एकस्यां गृहकोकिलायामनेकजीवत्वप्रसङ्गात्। अत उच्यते 'नोजीवः' इति। तच्च प्रत्यक्षानुमानादिप्रमाणविषय इति प्रमाणैरनुपलभ्यमानत्वमसिद्धो हेतुः। ततो मया जित इत्येवमभिहिते–॥२९३८॥

भणति गुरू सुट्ठु [१९३-द्वि०]कतं किं पुण जेतूण कीस णाभिहितं।
अयमत्तसिद्धंतो णे ततिओ णोजीवरासि त्ति ॥२९३९॥

---

१ °गिह को हे त। २ °सिरि को दी हा म त। ३ °पुट्ट° म। ४ °सेहणा° को हे दी हा म। ५ विच्छु° को त दी हा, विच्छु स° म, विच्छू य हे। ६ सप्पे को दी हा म। ७ भिगी को हे त म, भिई दो हा। ८ काग को हे त हा। ९ य को हे त। १० °रिवाय° हे। ११ मोरिय म। १२ वग्घी सिही य को हे म, वग्घी सीही य त, वग्घी सोही उ° हा, सीहीयउल्लुगि दी। १३ उवा° हे। १४ गिण्ह हे म। २९३३-३६ गाथाः उपर्युक्ताः चत्वारि हेसम्मतनिर्युक्तिगाथाः। १५ °लुओ हे। १६ विजितो को हे त। १७ °हकोलि° को, °हकोकिलाइपु° हे त। १८ °च्छच्छे° को हे त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भण० गाहा । गतार्था ॥२९३९॥

एवं गते वि गंतुं परिसामज्झम्मि भणसु णायं णे[1] ।
सिद्धंतो किंतु मए बुद्धिं परिभूय सोऽवसितो ॥२९४०॥
बहुसो स भण्णमाणो गुरुणा पडिभणति किमवसिद्धंतो ? ।
जति णाम जीवदेसो [3]णोजीवो होज्ज को दोसो ? ॥२९४१॥

जं देसणिसेहपरो णोसद्दो जीवदव्वदेसो य ।
[5]गिहिलोलियाँतिपुंछं विलक्खणं तेण णोजीवो ॥२९४२॥

एवं गते वि । बहुसो । जं देसणिसेह० इत्यादि । गतार्थाः ॥२९४०-४२॥

धम्माति दसविधा देसतो वं देसो वि जं पिधं वत्थुं ।
अपिहंब्भूतो किं पुण [11]छिण्णं गिहंलोलियाँपुंछं ॥२९४३॥

धम्माति गाहा । आह रोहगुप्तः—नैवायमपसिद्धान्तः सूत्रेऽभिहितत्वात्, धर्मास्तिकायादिदेशप्रदेशवत् । अपि च—गृहकोलिका(किला) पुच्छं पृथक् पदार्थः, देशत्वाद्धर्मास्तिकायदेशवत् ॥२९४३॥

इच्छति जीवपदेसं णोजीवं जं च समभिरूढो त्ति ।
तेणत्थि तओ समए घडदेसो णोघडो[14] जध वा ॥२९४४॥

इच्छति जीवपदेसं । गृहकोकिलाजीवस्यैकदेशो नोशब्दोपपदं वस्तु, समभिरूढनयमतत्वात्, नोघटवत् ॥२९४४॥

आचार्य आह—

जति ते सुतं पमाणं तो रासी तेसु तेसु सुत्तेसु ।
दो जीवाजीवाणं ण सुते [16]णोजीवरासि त्ति ॥ २९४५ ॥

जति ते गाहा । यदि भवतः श्रुतं प्रमाणं ततो नोजीवराशिस्तृतीयः सूत्रे नोक्त इत्यसिद्धो हेतुः—सूत्रेऽभिहितत्वादिति । न च धर्मास्तिकायादिदेशा अत्यन्तपृथग्भूता एव विच्छिन्नाः, गृहकोकिलापुच्छमप्येवमेव ॥२९४५॥

यस्मात्—

---

१ °सु णाएण त । २ धसिं° को, समिओ हे त । ३ णाजी° जे । ४ हुज्ज हे । ४ °णिसेव जे । ५ गिहकोलि° को त । ६ पुच्छ को त, ७ गिहकोइलाइपुच्छं हे । ८ य को हे । ९ पिहुं को हे त । १० °पिहु° हे त । ११ च्छिन्नं हे । १२ °हकोलि° को हे त । १३ °पुच्छं को हे त । १४ °घडे त । १५ ते सुयं प° को हे । १६ तो जी° त

**गिह[1]कोलियातिपुंच्छे[2] छिण्णे[3] वि[4] तदंतरालसंबं[5]न्धो ।**
**[१९४-प्र०] सुत्तेऽभिहितो सुहुमा[6]मुत्तत्तणतो तदग्गहणं ॥२९४६॥**

**गिहकोलिया०** गाहा । गृ[7]हकोलिकाशरीरस्य छिन्नपुच्छस्य चान्तराले मृणालतन्तु[वत्] जीवप्रदेशा अविच्छिन्नसन्ताना एव सूत्रेऽभिहिताः । किं न गृह्यन्त इति चेत् ? सूक्ष्माऽमूर्त्तत्वादाकाशादिदेशवत् ॥२९४६॥

अथवा संसारिणः सर्वस्य कर्माङ्गाङ्गीभावसम्बन्धात् मूर्त्ता एव ते प्रदेशाः शरीराद् बहिर्न दृश्यन्ते, सूक्ष्मत्वात्, प्रदीपरश्मिवत् । मूर्त्तशरीरस्थास्तु गृह्यन्ते, मूर्त्तत्वात् मूर्त्तकुड्यादिस्थप्रदीपरश्मिवत् । एतदर्थदर्शनी गाथा—

**गज्झा मुत्तिगताओ णागासे जध पदीवरस्सीओ ।**
**तध जीवलक्खणाइं देहे ण तदंतरालम्मि ॥२९४७॥**

**गज्झा मुत्तिगताओ** । भावितार्था ॥२९४७॥

**देहरहितं ण [9]गेण्हति णिरतिसयो णातिसुहुमदेहं च[8] ।**
**ण य से होति विबाधा जीवस्स भवं[11]तराले व्व[10] ॥ २९४८ ॥**

**देहरहित**मित्यादि । आगम एवाभिहितम्—निरतिशयः पुरुषः सिद्धं देहरहितं न गृह्णाति, सदेहमपि सूक्ष्मशरीरं निगोदजीवं, सूक्ष्मपरिणामपृथिव्यादिकायं वा, वैक्रियाहारकशरीरं वा । तस्माद् गृहे[12]कोकिलाशरीर-पुच्छयोरन्तराले जीवप्रदेशदर्शनं नास्तीति । अथान्तराले तस्य जीवस्याऽग्नि-जल-शस्त्रादिभिर्दाह-क्लेदच्छेदा न भवन्ति, सूक्ष्मकार्मणशरीरस्थत्वात्, भवान्तरालवत् ॥२९४८॥

अथ ब्रूयात्—पुच्छच्छेदे तस्य जीवस्य खण्डं नष्टमेव, छिन्नत्वात्, पटदेशवत् । एतद्दूषणाय गाथाद्वयम्—

**दव्वामुत्तत्ताऽकतभा[13]वादविकारदरिसणातो य ।**
**अविणासकारणाहि य णभसो वं[14] ण खण्डसो णासो ॥२९४९॥**
**णासे य सव्वणासो जीवस्स[15] ण सो य[16] जिणमतच्चाओ ।**
**त[17]त्तो य अणि[18]म्मोक्खो दिक्खावेफल्लदोसो[19] य ॥ २९५० ॥**

---

१ °हलोलि° जे । २ °तिपुच्छे को हे त । ३ छिन्नम्मि तदं° हे । ४ व त । ५ °बंधो को हे । ६ °मामुत्त° त । ७ टीकायाः प्रतौ गृहलोलिका-इति, जे प्रतौ 'गिहलोलिया' । ८ जहा को हे । ९ गिण हे । १० व हे । ११ °वन्त° हे । १२ गृहलोलिका-इति प्रतौ । १३ °तसेवा° त । १४ व्व हे त । १५ जीवनासे य को । १६ जीवस्स नासो य हे । १७ ए त । १८ °णिमु° हे त । १९ °दोसा को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**दव्वामुत्तत्त०। णासे य सव्व०** इत्यादि। छिन्नत्वादित्यसिद्धो हेतुः, न जीवः छिद्यते दह्यते वा, अमूर्त्तद्रव्यत्वात्, अकृतकत्वात्, अविकारत्वात्, अभूतविनाशकारणत्वात् आकाशवत्। अनिष्टापादानमप्येवम्–सर्वनाशोऽपि जीवस्य स्यात खण्डशः भिद्यमानत्वात्, पटादिवत्। जीवश्च त्वया जिनमतप्रमाणकेनाभ्युपगत इत्यागमविरोधः। जिनमतत्यागाद्वा अनिर्मोक्षः, संसारिजीवाभावात्। ततश्च भवत्प्रपन्नदीक्षावैफल्यमिति ॥२९४९–२९५०॥

अथैवं कल्पेत–संघातभेदधर्मा जीवः, सावयवत्वात्, पुद्गलस्कन्धवत्। न। अत्रापि दोषा इति गाथा—

**अध खंधो इव संघातभेतधम्मा संतो वि सव्वेसिं।**
**अपरोप्परसंकरतो सुहातिगुणसंकरो पत्तो ॥ २९५१ ॥**

**अथ खंधो इव।** एवं तर्हि खंधवत् संघातभेदाभ्यां परस्परं जीवानां संहन्यमानत्वात् भिद्यमानत्वाच्च सावयवत्वादेव स्कन्धगुणसंकरवत् तत्सुखादिगुणसंकरोऽप्यवश्यभावीति धर्मविशेषविपर्ययसाधनादिष्टविघातकृद् विरुद्धः ॥२९५१॥

अथैतद्दोषभयात् स्कन्धवदवयवविच्छेदो नाभ्युपगम्यते। किं तर्हि? धर्माधर्मास्तिकायादिदेशवदविभागे तत्रस्व(स्थ) एव पुच्छजीवदेश[:] सकलजीवत्वाभावात् को(नो)जीव उच्यते?। एवमपि दोष एव ते—

**अध अविमुक्को वि तओ णोजीवो तो पतिप्पदेसं ते[1]।**
**जीवम्मि असंखेज्जा णोजीवा णत्थि जीवो ते ॥२९५२॥**

**अध अविमुक्को वि तओ।** अथाविमुक्तोऽपि [3]जीवदेशो नोजीवः, एकस्मिंस्तर्हि जीवे यावन्तः प्रदेशाः ते सर्वे नोजीवाः, जीवप्रदेशत्वात्, पुच्छदेशनोजीववत्। एवं च जीवो नास्ति कश्चित्, नोजीवसंघातमात्रत्वात्, गृहकोकिलै[4]जीववत् ॥२९५२॥

न केवलमेतावानेव दोषः किन्तु स्वसिद्धान्तप्ररूपितसर्वराश्यभाव एव प्राप्नोतीति गाथा—

**एवमजीवो[5] वि पदिप्पतेसभेदेण णोअजीव त्ति।**
**णत्थि अजीवो[6] केई[7] कतरे ते तिण्णि [१९४–द्वि०] रासि त्ति ॥२९५३॥**

**एवमजीवो वि।** एवं नास्ति(अस्त्य)जीवराशिरपि[8], नोअजीवसंघातत्वात्, एकजीववत्। एवं राशित्रयाभावादभ्युपगमविरोधः ॥२९५३॥

अथवा भवत्सिद्धान्ते अनिष्टापादनम्—

---

१ स तो हे। २ तो त। ३ जीवाजीवदे°–इति प्रतौ। ४ कोलिका–इति प्रतौ। ५ °जीवा को हे त। ६ °जीवा को हे त। ७ केई को, केइ हे। ८ °'पि नोनामजी'–इतिप्रतौ

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**छिण्णो व होतु जीवो किध[1] सो[2] तल्लक्खणो वि णोजीवो ।**
**अध एवमजीवस्स वि [3]देसो तो णोअजीवो[4] त्ति ॥२९५४॥**
**एवं पि रासयो तेण तिण्णि चत्तारि संपसज्जंति ।**
**जीवा तधा अजीवा णोजीवा णोअजीवे त्ति ॥२९५५॥**

**छिण्णो व होतु** । अथवा पुच्छदेशनोजीवः जीव एव भवतु, जीवलक्षणत्वात्, सकलजीववत् । एवमजीवदेशो नोअजीवोऽपि अजीव एव भवतु, अजीवलक्षणत्वात् सकल(ला)जीववत् । अथ चैकदेशत्वात् देशः सकलत्वं नार्हति—एको देशः नोजीवः, बहुतरा जीवदेशा जीव इति । एवमजीवेऽपि कल्पना प्राप्ता—अजीवैकदेश एकः नोअजीवः, बहुतरा देशाः अजीव इति युक्तम् । एवं च त्रयो राशय इति अनृतम् । किं तर्हि ? राशिचतुष्टयमापद्यते—जीवाः अजीवाः नोजीवाः नोअजीवा इति ॥२९५४–२९५५॥

अथ ब्रूयात् अजीवाः नोअजीवा इति सामान्यजातिलक्षणात् एक एव राशिः, जीवाः नोजीवाश्च राशिद्वयमेवेति राशित्रयोपपत्तिः । आचार्य आह—दुरुपपत्तिरेषा—

**अध ते अजीवदेसो अजीवसामण्णजातिलिंगो[5] त्ति ।**
**भिण्णो वि अजीवो च्चियँ[6] ण[7] जीवदेसो वि[8] किं जीवो ॥२९५६॥**

अध गाहा । समानोपपत्तिर्जीवेऽपि जीव-नोजीवराशी द्वावपि एक एव राशिः, समानजातिलक्षणत्वात्, अजीवराशिवत् ॥२९५६॥

विशेष्याऽपि प्रमाणम्—

**छिण्णगिहलोलिया वि हु जीवो तल्लक्खणाहि[9] सयलो व्व ।**
**अध देसो त्ति ण जीवो अजीवदेसो[10] वि णोजीवो[11] ॥२९५७॥**

**छिण्णगिह०** इत्यादि । छिन्नगृहलोलिकादेशो जीव एव, जीवलक्षणत्वात् सकलगृहचो(लो)लिकावत् । अथ देशत्वादेवासौ सकलजीवो न भवति । नन्वेवमजीवा(व)-देशोपि देशत्वादेव सकलो न भविष्यति, तदवस्थं राशिचतुष्टयम् ॥२९५७॥

यदपि चोक्तं भवता नोजीवः सत्पदार्थः, समभिरूढनयमतत्वात् घटादिवदिति । तदपि न, यतः—

---

१ कह हे त । २ °धत° त । ३ दोसो त । ४ जीव त । ५ °जीवा य हे त । ६ °लिङ्गो हे । ७ स्थि(च्छि)य त । ८ व त । ९ णेहिं को हे, णेहि त । १० त्ति हे त । ११ नोऽजी को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**णोजीवं ति ण जीवादण्णं देसमिह समभिरूढो त्ति।**
**इच्छति वेति समासं जेण समाणाधिकरणं सो ॥२९५८॥**
**जीवे य से पदेसे ये से पतेसे स एव णोजीवे[3]।**
**इच्छति ण य जीवदलं तुमं व गिहैलोलियापुच्छं २९५९॥**

**णोजीव०** गाहा। भवद्दर्शनादयमसिद्धो हेतुः। त्वद्दर्शनान्नोजीवोऽन्य एव जीवात्। समभिरूढस्तु समानाधिकरणसमासपरिग्रहा[त्] जीव-देशयोरभेदमेवेच्छति—जीवश्च सः प्रदेशश्च इति जीवप्रदेशः—प्रदेशो जीवविशेषणः, जीवश्च प्रदेशविशेषण इति एकमेवेदं वस्तु, गौरखरवत्। जीवबहुत्वभयात् सप्रदेशमनन्यमेव सन्तं नोजीव इति समभिरूढो ब्रवीति, न पुनर्भिन्नं जीवदलम्, यथा त्वमिच्छसि गृहलोलिकापुच्छमिति ॥२९५८-२९५९॥

**ण य रासिभेतमिच्छति तुमं व णोजीवमिच्छमाणो त्ति।**
**अण्णो वि णओ णेच्छति जीवाजीवाधियं किंचि[4] ॥२९६०॥**

**ण य रासिभेतमिच्छति।** न च समभिरूढस्य शतभेदत्वात् कश्चित् पर्यायनयविशुद्धः शुद्धभेदवादी पृथगपि जीवात् तद्देशं नोजीवमिच्छेत् ॥२९६०॥

तदाशङ्कया ब्रवीत्याचार्यः—

**इच्छतु व समभिरूढो देसं, णोजीवमे[१९५-प्र०]गणइयं तु।**
**मिच्छत्तं, सम्मत्तं सव्वणयमतावरोधेणं ॥२९६१॥**

इच्छतु वा नोजीवं समभिरूढः, तथापि त्वया जैनदर्शनावस्थितेन एकनयवक्तव्यं मिथ्यादर्शनमिति न युक्तं प्रतिपत्तुम्, सर्वनयमतसङ्ग्राही स्याद्वादः प्रमाणमिति ॥२९६१॥

**तं जति सव्वणयमतं जिणमतमिच्छसि पवज्ज दो रासी[8]।**
**पदविप्पडिवत्तीये वि मिच्छत्तं किंतु[10] रासीसु ॥२९६२॥**

**तं जति** गाहा। जिनमतप्रमाणकेन राशिद्वयं प्रतिपत्तव्यम्, न ततो न्यूनमधिकं वा, सम्यग्दृष्टित्वात्, गणधरादिवत्। यश्च ततो न्यूनमधिकं वा प्रपद्यते, स मिथ्यादृष्टिः, जिनमतविसंवादित्वात् बहुरतादिवत् ॥२९६२॥

**एवं पि भण्णमाणो ण पवेज्जति सो जतो ततो गुरुणा।**
**चिंतितमयं पणट्ठो णासेहिति मा बहुं लोगं ॥२९६३॥**

---

१ जीवप को हे। २ हे प्रत्यां नास्ति ३ जीवो को हे त। ४ °कोलि° जे। °हिकालि° को हे त। ५ °नादूइम° इति प्रतौ। ६ ६ पि हे त। हि °मयोव हे। ८ रासि को। ९ त्तीर हे त। १० किं नु को हे। ११ पव्व हे १२ नासिहिइ को, नासिहई हे त,।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तो णं रायसभाए णिग्गिण्हामि बहुलोगपच्चक्खं ।
बहुजणणातोऽवसितो होहिंति अग्गेज्झवक्को त्ति ॥२९६४॥

तो बलसिरिणिवपुरओ वादं णाओवणीतमग्गाणं ।
कुणमाणाणमतीता सीसायरियाण छम्मासा ॥२९६५॥

एक्को वि णावसिज्जति जाधे तो भणति णरवती णाहं ।
सत्तो सोतुं, सीतंति रज्जकज्जाणि मे भगवं! ॥२९६६॥

गुरुणाभिहितो भवतो सुणावणत्थमितमेत्तियं भणितं ।
जति सि ण सत्तो सोतुं तो [4]णिग्गिण्हामि णं कल्लं ॥२९६७॥

[7]बियियदिणे बेति गुरू णरिन्द ! जं मेतिणीयं संभूतं ।
तं कुत्तियावणे सव्वमत्थि सव्वप्पतीतमितं ॥२९६८॥

तं कुत्तियावणसुरो णोजीवं देहि[11] जति ण सो णत्थि ।
[१९५-द्वि०]अध भणति णत्थि तो णत्थि किं थं हेतुप्पवंचेण? ॥२९६९॥

तं मग्गिज्जतु मोल्लेणं सव्ववत्थूणि किं थं कालेणं[15] ।
इय होतु त्ति पवण्णे णरिन्दं-पतिवादि-परिसाहिं[19] ॥२९७०॥

सिरिगुत्तेणं वि[21] छलुओ छमास विक्कड्डिऊण वादि जितो ।
[26]आहरण कुत्तियावणा चोतालसतेण पुच्छाणं ॥२९७१॥[27]

**एवं पि भण्णमाणो** इत्यादिगाथाप्रपञ्च आख्यानकमात्रं यावत् **आह-रण कुत्तियावणा चोतालसतेण पुच्छाणं** ॥२९६३-७१॥

कथं चतुश्चत्वारिंशदधिकं शतं प्रश्नानाम् ? इति गाथाप्रपञ्चः—

भू-जल-जलणाऽणिल-गह-काल-दिसाऽऽया मणो य दव्वाइं ।
[30]भण्णंति णवेताइं सत्तरस गुणा इमे अण्णे ॥२९७२॥

---

१ होही को हे त । २ उज्झपवक्खो को, अगेज्झपक्खो हे । ३ °णीवम° को । ४ णिगि त । ७ वीयं त हे । ८ °रिं° को हे । ९ °णीएँ को, °णीइ त । १० संभू° को । ११ देहि हे । १२ त्थ को, व हे त । १३ °प्पवंचणं को हे त । १४ मगि° को । १५ मुल्ले° हे । १६ त्थ को हे, व त । १७ °लेग को हे । १८ °रिंद को हे । १९ °साहिं को हे । २० °त्तेणं हे त । २१ नास्ति को हे त प्रतीषु । २२ छलू° को । २३ धम्मा° को दी म, छम्मासा हे, छम्मासे हा । २४ विकड्डि को दी म कड्डि° हा, विकड्डिऊण हे । २५ वाएँ को, वाय दी हा म, वाए हे । २६ अह° त हे । २७ इतः प्रभृति २९७७ पर्यन्तं हेसम्मता निर्युक्तिगाथा । २८ णालिल° जे । २९ °साय त । ३०मण्णं° को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**रूवरसगंध[1]फासा संखा परिमाणमध[2] पुधत्तं[3] च ।**
**संजोगवि[4]भाग परापरत्त बुद्धी सुहं दुक्खं ॥२९७३॥**
**इच्छादेस[5]पयत्ता एत्तो कम्मं तयं च पंचविधं ।**
**उक्खेवण[6]ऽवक्खेवण पसारणाऽऽकुंचणं गमणं ॥२९७४॥**
**सत्ता सामण्णं पि य सामण्णविसेसता विसेसो य ।**
**समवायो य पत[7]त्थो छच्छ[8]त्तीसप्पभेदा य ॥२९७५॥**

**भू-जल-जलणाणिल० । रूवरस० । इच्छादेसपयत्ता । सत्ता सामण्णं ।** औलुक्याभिप्रायेण सर्वमेव जगत् षट्पदार्थसङ्ग्रहम् । ते च षडपि पदार्था मूलभेदतः षट्त्रिंशत्प्रभेदाः । तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः । द्रव्यं नवभेदं भूजलादि–पृथिव्यापः तेजो वायुराकाशं कालो दिगात्मा मन इति । तथा रूपरसगन्धस्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धिसुख-दुःखेच्छाद्वेषप्रयत्ना गुणाः सप्तदश । उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति पञ्च कर्माणि । एवं द्रव्यगुणकर्मत्रयं एकत्रिंशत्प्रभेदम् । सामान्यं द्विप्रकारम्–महासामान्यं सत्ता, अपान्तरालसामान्यं चानुप्रवृत्तिलक्षणं द्रव्यगुणकर्मत्वं द्रव्यगुणकर्मगतम् द्रव्यत्वं[9] गुणत्वं कर्मत्वम् सामान्यानि विशेषाश्चेति उभयरूपः सामान्यविशेषः । अन्त्यविशेषोऽन्त्यबुद्धिहेतुर्विशेष एव । इहबुद्धिहेतुश्च कार्यकारणभूतानां गुणगुणिरूपाणामाश्रयाश्रयिरूपसामान्यादीनां च समवाय इति । एतेऽपि पञ्च पदार्थाः एकत्रिंशता पूर्वैः सह षट्त्रिंशद् भवन्ति ॥२९७२–२९७५॥

एका(षा)मेकैकस्मिन् प्रश्नाश्चत्वारः—

**पयतीय[10] अकारेण[11] णोकारोभयणिसेधतो सव्वे ।**
**गुणिता [12]चोतालसतं पुच्छाणं पुच्छितो देवो ॥२९७६॥**

**पयतीय** इत्यादि । प्रकृतिर्निरुपपदं स्वरूपमेव, तया प्रकृत्या प्रथमः, आ(अ)कारेण नञा वा लुप्तनकारेण पर्युदासवृत्तिना द्वितीयः, नोकारेण तद्देशविशेषप्रतिषेधार्थेन तृतीयः, प्रतिषेधद्वयेन सहितेन चतुर्थः प्रश्नः । एवं षट्त्रिंशच्चतुर्गुणाश्चतुश्चत्वारिंशदधिकं शतं प्रश्नानां पृष्टो देवः प्रतिवचनं वाचा प्रयच्छति ॥२९७६॥

१ °गन्ध° दी । २ °महमह हे । ३ पुहुत्तं को हे दी । ४ °विजोग° त । ५ °दोस° को हे दी त । ६ °मणक्खे° जे । °णपक्खे° त । ७ पयत्था को हे त दी । ८ छछ° हे दी । ९ दिरूपं द्रव्यत्वं कर्मत्वं च । सा'–इति प्रतौ । १० पगईए को हे दी त । ११ °रेण को हे दी त । १२ ओयाल° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वस्तुतश्च शक्यनिदर्शनं दर्शयति । तत्र द्रव्यभेदः प्रथमः पृथिवी । तस्यां प्रश्नचतुष्टयान्निर्न(र्ण)यः—

**पुढवि त्ति देति लेलुं देसो वि समाणजा [१९६-प्र०]तिलिंगो[1] त्ति ।**
**पुढवि त्ति सो अपुढविं देहि[4] त्ति यं देति तोयादिं[6] ॥२९७७॥**

**पुढवि त्ति** गाथा । पृथिव्य(वीं) प्रयच्छेति याचितः रूपरसगन्धस्पर्शवती पृथिवीति-लक्षणान्वयाल्लोष्टोऽपि पृथिवीति लोकशास्त्रसंवादाल्लोष्टं दर्शयति । [अ]पृथिवीं [प्रयच्छेति] पृथिवीपर्युदासनात् तोयादिवर्गं दर्शयति ॥२९७७॥

अथ नोपृथिवीं प्रयच्छेति याचितः—

**देसपडिसेधपक्खे[8] णोपुढविं[9] देति [10]लेलुदेसं सो ।**
**लेलुंदव्वावेक्खो कीरति देसोवयारो से ॥२९७८॥**

देशप्रतिषेधपक्षे नोशब्दं कृत्वा पूर्वदर्शितायाः पृथिव्या लोष्टस्यैकदेशं नोपृथिवीमिति दर्शयति पृथिव्येकदेशोऽयमिति । ननु च लोष्टोऽपि पृथिव्येकदेशत्वा[त्] नोपृथिवीति भवतु । सत्यम्, प्रकृत्या(त्य)पेक्षमेतदेवं भवति—लोष्टद्रव्यस्य समानजातिलक्षणत्वेन सम्पूर्णं पृथिवीत्वमध्यारोप्य तदेकदेशस्य नोपृथिवीत्वमौ(मौ)पचारिकम् ॥२९७८॥

**इधरा पुढवि च्चिय सो लेलुं व्व समाणजातिलक्खणतो ।**
**लेलुंदलं ति व देसो जति तो [13]लेलू विभू देसो ॥२९७९॥**
**देहि भुवं तो भणिते सव्वाणेया ण यावि सा सव्वा ।**
**सक्का सक्केण वि ताणेतुं किमुतावसेसेणं ? ॥२९८०॥**

इतरथा परमार्थतः लोष्टदेशोऽपि पृथिवीसमानजातिलक्षणत्वात् लोष्टवत् । अथ लोष्टस्य खण्डमिति लोष्टदेशः नोपृथिवी । ननु लोष्टोऽपि भूमेरेकदेशत्वान्नोपृथिवी । एवं सर्वदेशानां नोपृथिवीत्वे जाते देहि भुवमिति प्रश्नप्रतिवचनं वाङ्मात्रमेव, प्रदर्शनमानयनं वा सर्वस्याः पृथिव्या न शक्यं शक्रेणापि, किमुतान्येन देवेन कुत्रिकापणव्यवहारिणा ? कुर्भूमिस्तासां कूनां तृ(त्रि)कं कुतृ(त्रि)कं तृ(त्रि)भूमिकगृहवत् जगत्त्रयमूर्ध्वाधस्तिर्यग्लोकाः। कुत्रिको(के) स्थिताः पदार्थाः कुत्रिकं "तात्स्थ्यात्ताच्छब्द्यम्" कुत्रिका(क)मापणयतीति कुत्रिकापणः[14] सर्वद्रव्यविक्रयी देवः पुण्यैराराधितो भाण्डागारिकवत् । अथवा धातु-जीव-मूलास्त्रयः, तेषु त्रिषु श(जा)तम् भूम्या(म्यां)—यावत् कि—

१ लेदठुं को दी हे, लिदठं त । २ °लिङ्गो दी । ३ °डवीं को, ऽपुडवीं हे दी । ४ °हित्ति को हे दी । ५ नास्ति हेप्रत्याम् । ६ °याइं को हे दी, °याइ त । ७ °थानवत्–इति प्रतौ । ८ °पक्खो त को हे । ९ °ढवीं हे । १० लेट्ठुदे°—को हे । ११ लेट्ठुदं° को हे । १२ लेलु १३ लेट्ठु को हे । १४ द्रष्टव्याः–बृ० का० गा० ४२१४–४२२३।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चित् त्रिजम्, तस्याऽऽपणः, त्रीन् वा धातु-मूल-जीवान् कायति त्रिकम्, कौ क्षितौ त्रिकं तस्याऽऽपणः कुत्रिकापणः–पृथिवीमानमपेत्य(क्ष्य)विशेषोपादानेऽपि तदेकदेशानयनाद्–कृती भवति, अर्थप्रकरणशक्त्यपेक्ष्यत्वात्, घट(टा)नयनचोदनायामेकघटानेतृवत् ॥२९७९–८०॥

एतत्प्रमाणदर्शनाय गाथाद्वयम्—

**जध घेडमाणय भणिते ण हि सव्वाणयणसंभवो किंतु ।**
**देसादिविसिट्ठं च्चिय तमत्थवसतो समप्पेति ॥२९८१॥**
**पुढवि त्ति तधा भणिते तदेगदेसे वि पगरणवसातो ।**
**लेल्लुम्मि जायति मती जधा तधा लेल्लुदेसे वि ॥२९८२॥**

**जध घडमाणय । पुढवि त्ति तधा ।** इत्यादिर्गतार्था ॥२९८१–८२॥

**लेल्लुदव्वावेक्खायं तध वि तद्देसभावतो तम्मि ।**
**उवयोगे णोपुढवी पुढवि च्चिय जातिलक्खणतो ॥२९८३॥**

**लेल्लुदव्वावेक्खाय** गाथा । लोष्टद्रव्यं यथोक्तप्रमाणेन सकला पृथिवीति लक्षणादवगम्य तदेकदेशो लोष्टावयवो लोष्टवद् 'नोपृथिवी'इति व्यपदेश उपचारात् सिद्धः पृथिव्या एव, तज्जातिलक्षणत्वाल्लोष्टावयवस्यापि । एवं 'पृथिवी' 'अपृथिवी' 'नोपृथिवी' इति प्रश्नत्रयं गतम् ॥२९८३॥

'नो[अ]पृथिवी'इति चतुर्थः प्रश्न उच्यते —

**पडिसेधदुगं पयैती गमेति जं तेण णोअपुढवि त्ति ।**
**भणिते पुढवि त्ति गती देसणिसेहे वें तद्देसो ॥२९८४॥**

**पडिसेधदुगं ।** द्वौ प्रतिषेधौ प्रकृतिं गमयत इति नोअपृथिवी पृथिव्येव अथवा देशप्रतिषेधवादी 'नो' शब्द इति अपृथिव्या जलादीनामेकदेश उपचाराद् 'नोअपृथिवी'इति ॥२९८४॥

एवं कुत्रिकापणदेवः पृथो(ष्टो) देशविशेषोपचारं प्राप्य–

**[१९६–द्वि०]उवयारातो तिविधं भुवमभुवं णोभुवं वें सो देति ।**
**णिच्छयतो भुवमभुवं तध सावयवाइं सव्वाइं ॥२९८५॥**

**उवयारातो तिविधं ।** भुवं पृथ्वीम्, अभुवमपृथिवीम्–जलादि, नोभुवं नोपृथिवीम्–लोष्टैकदेशं प्रयच्छति । नोअपृथिवीं पृष्टः पुनरपि पृथिवीमेव । अथवा जलादीना-

१ पड° को ।, २ लेलु° को हे । ३ नास्ति तप्रत्याम् । ४ लेट्टु° को हे । ५ लेट्टुद° हे लेट्टुद° हे । ६ °खाए को हे । ७ °वयारो को हे त । ८ °ढवि हे । ९ °न्वयवो लो० इति प्रतौ । १० पगइ को हे त । ११ वि को हे । १२ च को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मेकदेशमुपचारात्। परमार्थतस्तु लोष्टैकदेशस्य जलाद्येकदेशस्य वा पृथिवीत्वजलादिरूपत्वाच्च राशिद्वयमेव पृथिवीअ(व्या)दिषूपचारादेशकल्पनां कृत्वा प्रश्नचतुष्टयं भावनीयम् ॥२९८५॥

एवं चतुश्चत्वारिंशदधिकं प्रश्नशतं निदर्श्य दार्ष्टान्तिकमर्थं निगमयन्नाह—

**जीवमजीवं[1] दातुं णोजीवं जातितो[2] पुणरजीवं।**
**देति चरिमम्मि जीवं ण तु णोजीवं सजीवदलं ॥२९८६॥[3]**

**जीवमजीवं**। प्रकृति(त)प्रश्नेऽयं किञ्चिज्जीवं शुक-शारिकादि दत्त्वा कृती, अजीवमिति लोष्टमपि दत्त्वा कृती, णोजीवमिति याचितः पुनरजीवमेव लोष्टं दर्शयति। नोअजीवमिति याचितः प्रतिषेधद्वयं प्रकृतिगमनाज्जीवमेव शुकादिवत् दर्शयति, न पुनर्नोजीवं तृतीयप्रश्नजीवदलं जीवैकदेशं प्रदर्शयति, तस्याभावात्। नोअजीवमिति वच अजीवैकदेशं किं [न]? न, द्विर्विप्रतिषेधात् जीवमेवेति राशिद्वयं सर्वथा, न तृतीयोऽस्ति राशिरिति। एवं प्रत्यक्षानुमानागमलोकप्रसिद्धिनिः(भिः) परीक्ष्य राशिद्वयमवस्थापितमाचार्येण ॥२९८६॥

उद्धकस्य प्रत्यक्षानुमानागमप्रसिद्धिभिः प्रतिज्ञाया बाधितत्वादवसेयः—

**तो णिग्गहितो छलुओ गुरू वि सक्कारमुत्तमं पत्तो।**
**धिद्धिक्कारोवहतो छलुओ वि सभाउ[4] णिच्छूढो ॥२९८७॥**
**वाते पराजितो सो णिव्विसओ कारितो णरिन्देणं[5]।**
**घोसावितं च णगरे जयति जिणो वद्धमाणो[6] त्ति ॥२९८८॥[7]**
**तेणाभिणिवेसातो समतिविकप्पितपतत्थमाताय।**
**वइसेसियं पणीतं फातीकतमण्णमण्णेहिं ॥२९८९॥**
**णामेण रोहगुत्तो [8]गोत्तेणालप्पते स चो[9]लूओ।**
**दव्वातिछप्पतत्थोवदेसणातो छलू[10]ओ त्ति[11] ॥२९९०॥**

**तो णिग्गहितो** इत्यादि गाथाचतुष्टयं स्फुटार्थं त्रैराशिकदृष्टिनिषूदनम् ॥

॥२९८७-९०॥

**अथ अवद्धिके(क)दृष्टिप्ररूपणा—**

---

१ जीव दी। २ जायतो त। ३ एषा हेसम्मता निर्युक्तिगाथा। ४ स बाहिं को °भाहिं हे त। ५ °रिंदेण को हे, °रिंदे दी हा म। ६ माणु म। ७ एषा हे सम्मता निर्युक्तिगाथा। ८ गुत्तेण ल° हे। ९ चोलुओ त। १० छलूउ को हे। ११ त्ति ॥२८॥५०१॥ इति रोहगुप्तनामा षष्ठनिह्नवः समाप्तः ॥छ॥ त।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पंचसता चुलसीता तइता सिद्धिं गतस्स वीरस्स ।
तो [1]अब्वेद्धियदिट्ठी दसपुरणगरे समुप्पण्णा ॥२९९१॥
दसपुरे[2]णगरु[3]च्छुघरेऽज्जर[4]क्खिते पूसमित्ततियगं च[5] ।
[6]गोट्ठामाहिलणव[7]मट्ठमेसु पुच्छा य [१९७ प्र०]विंझस्स ॥२९९२॥
सोतूण कालधम्मं गुरुणो गच्छम्मि पूसमित्तं च ।
ठवियं[8] गुरुणा [9]इल गोट्ठमाहिलो मच्छ[10]रितभावो ॥२९९३॥
[11]वीसुं वसहीए[12] ठितो छिद्दण्णेसणपरो य स कतायि[13] ।
विंझस्स सुणति पासेऽणुभासमाणस्स वक्खाणं ॥२९९४॥

पंचसता चुलसीता इत्यादि गाथाचतुष्टयं स्फुटार्थम् ॥२९९१-९४॥

कम्मप्पवातपुव्वे बद्धं, पुट्ठं णिकायितं कम्मं ।
जीवपतेसेहिं समं [14]सूइकलावोवमाणातो ॥२९९५॥

कम्मप्पवातपुव्वे इत्यादि । कर्मप्रवादपूर्वे कर्मचिन्तायां जीवप्रदेशैः सह किञ्चित् कर्म बद्धमेव अकषायस्येर्यापथबन्धनवत् कालान्तरस्थितिमप्राप्यैव विघटते, शुष्ककुड्यपतितचूर्णमुष्टिवत् । किञ्चिद् बद्धं पुष्टं(स्पृष्टं)च आर्द्रलेपकुड्ये(ड्ये) सस्नेहचूर्णवत् । किञ्चिद् बद्धं पुष्टं(स्पृष्टं) निकाचितं च आर्द्रे कुडये श्लेषादिबद्धहस्तप्रतिलिप्तलेपनिकादिघट्टितकुडयात्मसाद्भूतकटकशर्करादिवत् । अथवा सूचीकलापोपमानात् उपमानम् सूचीकलापदृष्टान्ताद्वा त्रिविधं कर्म द्रष्टव्यम्-तद्यथा-परस्परं संयोगमात्रपुञ्जीकृतसूचीवत् बद्धं कर्म जीवप्रदेशसंयोगमात्रत्वात् । अथवा सुदृढलोहबन्धनकबद्धघनसूचीकलापवद् बद्धं पुष्टं(स्पृष्टं) च । अथवाऽग्निप्रभया दृढलोहबन्धनबद्धघनप्रबद्धानीतसूचीकलापवद् बद्धं पुष्टं(स्पृष्टं) निकाचितं चेति ॥२९९५॥

तत्राद्यस्यानिकाचितस्य बद्धपु(स्पृ)ष्टप्रकारस्य कर्मणः अमी व्यापारा भवन्ति-

[15]ओअट्टणमुक्केरो [16]संछोभो खवणमणुभवो वा वि ।
अणिकाइतम्मि कम्मे णिकाइते पायमणुभवणं ॥२९९६॥

ओअट्टणमुक्केरो इत्यादि । कर्मणो जीवपरिगृहीतस्याष्टौ करणानि—

---

१ अब्बर्द्ध को, अबद्धि हे, अबद्धियाणदि दी हा, अब्बद्धिगाण दि म, व्वट्ठिय त । एषा हेमता निर्युक्तिगाथा । २ पुरे नं हा । ३ रुच्छघ त । ४ ाउजरक्खिय को हे दी हा म, विखय त । ५ तिगयं हे । ६ गुट्ठा म । ७ वअट्ठ म, मद्धमे त । एषा हेसम्मता निर्युक्तिगाथा । ८ वियं को हे त । ९ किल को हे त । १० मच्छरि को हे त । ११ वीसु को, हे । १२ हीएँ को । १३ कयाई को, कयाए हे । १४ सूई हे त । १५ उव्वट्ट को हे त । १६ संथोभो हे ।

Jain Educationa International    For Personal and Private Use Only    www.jainelibrary.org

"बन्धणसंकमणोव(व्व)ट्टणा य उ(अव)वट्टणा उदीरणा य।
उवसामणा निधत्ती निकायणा चेति करणाइं ॥" [कर्मप्रकृति–२]

तत्रापवर्त्तनं स्थितिह्रासः। 'उक्केरो' उद्वर्त्तनं स्थितिवृद्धिः। 'संछोभो' संक्रमकरणम्। क्षपणमन्यानुभावेन सह निर्जरणम्। अनुभवः स्वेनैवानुभावेन वेदयित्वा निर्जरणम्-एतान्यनिकाचिते कर्मणि। निकाचितेऽन्त्यमनुभवनमेवेति ॥२९९६॥

**सोतुं भणति स [1]देसं वक्खाणमिणं ति पावति जतो भे।**
**मोक्खाभावो जीवप्पदेसकम्माविभागातो ॥२९९७॥**

**सोतुं भणति** गाहा। एवं श्रुत(त्वा) गोष्ठामाहिल आह–एवं हि भवतां मोक्षाभावः प्राप्तः। तत्र प्रमाणम्–जीवात् कर्म न वियुज्यते, अन्योन्याविभागबद्धत्वात् स्वप्रदेशवत् ॥२९९७॥

एतदनुवादिनी च गाथा—

**ण हि कम्मं [4]जीवातो अवेति अविभागतो पदेसो व्व।**
**तद[5]वगमाद[6]मोक्खो जुत्तमिणं तेण वक्खाणं ॥२९९८॥**[7]

**ण [8]हि कम्मं** भावितार्था ॥२९९८॥

न चेष्यते मोक्षाभावः। तत इदं व्याख्यानं युक्तम्—

**पुट्ठो जधा अबद्धो कंचुइणं कंचुओ समण्णेति।**
**एवं पुट्ठमबद्धं जीवं कम्मं समण्णेति ॥२९९९॥**[9]

**पुट्ठो** गाहा। जीवः कर्मणा स्पृष्टो न बध्यते, वियुज्यमानत्वात्, कञ्चुकेनेव कञ्चुकी ॥२९९९॥

तथान्योऽप्यसद्ग्राहः तस्य—

**सोतूण भण्णमाणं पच्चक्खाणं पुणो णवमपुव्वे।**
**सो जावज्जीवाए तिविधं तिविधेण साधूणं ॥३०००॥**
**(१९७–द्वि०) [10]जंपति पच्चक्खाणं अप्प[11]रिमाणा[12]य [13]होति सेयं ति[14]।**
**जेसिं [15]ति [16]संपरिमाणं तं दुट्ठं आससा होति ॥३००१॥**[17]

१ सदोसं को हे त। २ °म्मऽवि° को। ३ गोष्टा°–इति प्रतौ। ४ णहिजीवाओ इति प्रतौ। ५ भावातो जे। ६ दमुक्खो हे। ७ एषा हेसम्मता निर्युक्तिगाथा। ८ उज्जीवविहियं को हे, °ज्जीववहियं त। ९ पच्चक्खाणं दी हा म। १० सेयं दी हा म। ११ अपरि° जे हे दीहा म, अपरी त। १२ णाए को हे। णाइ त। माणेण दी हा म। १३ होइ कायव्वं। दी हा म। १४ तु को हे त। १५ तु को हे त दी हा म। १६ परिं हे, परीं ती द हा म। १७ एषा हेसम्मता निर्युक्तिगाथा।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आसंसा जा पुण्णे सेविस्सामि त्ति[1] दूसितं तीयं[2] ।
जेण सुतम्मि वि भणितं परिणामातो असुद्धं[3] ति ॥३००२॥

**सोतूण** गाहा । **जंपति** गाहा । **आसंसा** गाहा । यावज्जीवकृतावधिप्रत्याख्यानमाशंसादोषदुष्टम्, परिमाणपरिच्छिन्नावधित्वात्, श्वः सूर्योदयात्परतः पारयिष्यामीत्युपवासप्रत्याख्यानवत् । एवंविधमाशंसादुष्टमशुद्धमित्युभयसिद्धो दृष्टान्तः ॥३०००–२॥

विंझपरिपुच्छितगुरूवदेसकधितं पि सो[4] ण पडिवण्णो । एवंविधि
जाधे ताधे गुरुणा सयमुत्तो पूसमित्तेणं ॥३००३॥
किं कंचुओ व्व कम्मं पतिप्पतेसमध जीवपज्जंते ।
पतिदेसं सव्वगतं तदंतरालाणवत्थातो ॥३००४॥

**विंझ०** गाहा । **किं कंचुओ** गाहा । जीवः कर्मणा स्पृष्ट एव, न बद्ध इति प्रतिज्ञायां विचारः–स्पृष्टः किं प्रतिप्रदेशमाकाशेनेव, आहोस्वित् कञ्चुकेनेव जीवपर्यन्ते त्वङ्मात्रे एवेति ? प्रतिप्रदेशं[5] स्पृष्ट इति साध्यते सर्वगतमाकाशवत् कर्म, न कञ्चुकवत् । ततः साध्यधर्मशून्यो दृष्टान्तः[6] । सर्वगतत्वात् ॥३००३–३००४॥

अध जीवबहिं तो णाणुवत्तते तं भवंतरालम्मि ।
तदणुगमाभावातो बज्झंगमलो व्व मुव्वत्तं ॥३००५॥

**अध जीवबहिं** इत्यादि । अथ जीवाद् बहिः पर्यन्तमात्रे कर्म, एवं तर्हि भवान्तरालि(ले) तत्रा(न्वा)नुवर्तते, पर्यन्तमात्रवर्त्तित्वात, बाह्याङ्गमलवत् ॥३००५॥

एवं सव्वविमोक्खो[7] णिक्कारणतो[8] व्व सव्वसंसारो ।
भवमुक्काणं च पुणो संसरणमतो अणासासो ॥३००६॥

**एवं** गाहा । एवं च सर्वस्यैव मोक्षः कर्मानुगमविरहितत्वात्, उभयसिद्धमुक्तवत् । स च नेष्यते सर्वमोक्षः, संसारस्य प्रत्यक्षसिद्धत्वात् । ततश्चास्याः प्रतिज्ञायाः प्रत्यक्षानुमानागमलोकविरुद्धत्वाद् न सर्वमोक्षः । एवं तर्हि सर्वस्यैव निष्कारणः संसार इति मुक्तानामपि संसारः स्यात्, निष्कारणत्वात् । संसारिणामपि ततश्चानाश्वासः, क्रियावैफल्यं च ॥३००६॥

देहंतो जा वियणा कम्माभावम्मि[10] किण्णिमित्ता सा ? ।
णिक्कारणा व जति तो सिद्धो वि ण वेतणारहितो ॥३००७॥

१ ति को । २ तीए को हे । ३ सु को हे त । ४ ण पडिवण्णो सो को हे । ५ प्रति प्रति इति प्रतौ । ६ अत्र 'अतश्चान्तराळे कर्मणोनवस्थानं' इत्यधिकं प्रतौ । ७ विमु° हे । ८ णउ को हे । ९ °गमनलो इति प्रतौ । १० किनि° को हे ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**देहंतो जा** गाहा। जीवदेहस्यान्तः कर्मसम्बन्धितास्ति, कर्मकार्यवेदनायुक्तत्वात्, देहपर्यन्तवत्। अथ तस्या वेदनायाः कर्मकार्यत्वमसिद्धं मन्येथाः किं कारणैवासौ वेदना? ततः सिद्धस्यापि वेदनावश्यं भाविनी निष्कारणत्वात्, जीवदेहान्तर्वेदनावत् ॥३००७॥

**जति वा वज्झणिमित्ता सा तदभावे[1] ण होज्ज[2] तो अंतो।**
**दिट्ठा य सा सुबहुसो बाहिं [१९८-प्र०]णिव्वेतणस्सावि ॥३००८॥**

**जति वा** गाहा। यदि चैवं त्वया कल्पे(ल्प्ये)त बाह्यवेदनानिमित्तैवासावन्तर्वेदनाऽपि। एवं तर्हि अन्तर्वेदनाया बहिर्वेदन(ना) कारणम्। कर्म कारणं न भवति, तदभावेऽपि जायमानत्वात्, तन्तव इव घटस्य ॥३००८॥

**जति वा विभिण्णदेसं पि वेतणं कुणति कम्ममेवं[3] ते।**
**कधमण्णसरीरगतं ण वेतणं कुणति अण्णस्स ॥३००९॥**

**जति वा वि०** गाहा। यदि वा भिण्ण(न्न)देशमपि कर्म त्वक्पर्यन्ते वर्त्तमानमभ्यन्तरेऽपि वेदनां करोति, एवं भवतः प्राप्तम्-अन्यशरीरेऽन्यशरीरस्थं कर्म वेदनं(नां) करोति भिन्नदेशत्वात् बहिःस्थितकर्मवत् ॥३००९॥

**अध तं संचरति मती ण वहिं तो कंचुओ व्व णिच्चतत्थं।**
**जं च जुगवं पि विथणा सव्वम्मि वि दीसते[4] देहे ॥३०१०॥**

**अध तं संचरति** गाहा। अथैतदनिष्टं मा प्रापदिति बहिःस्थितमभ्यन्तःसञ्चारित्वाद् वेदनां करिष्यति कर्मेति। एवं कल्पनायामभ्युपगमविरोधस्ते-बहिः कञ्चुकवन्नित्यस्थं कर्मेति। अथवा न क्रमेण सञ्चरति कर्म, युगपद् बहिरन्तस्तत्कार्यवेदनासम्भवात्, हस्त-पादादिभिन्नदेशबहिर्वेदनाकारिकर्मवत् ॥३०१०॥

**ण भवंतरमण्णेति य सरीरसंचारतो तदणिलो व्व।**
**चलितं णिज्जरितं ति[5] य भणितमकम्मं च जं समए ॥३०११॥**

**ण भवंतरमण्णेति** गाहा। भवान्तरं नानुगच्छति कर्म शरीरसञ्चारित्वात्, वातादिवत्। ननु भवतोऽपि परलोकास्तित्ववादिनोऽभ्युपगमविरोध इति चेत्, तन्न, यत आह-आगमेऽस्माकमुक्तम्-'यच्चलितं कर्म तन्निर्जीर्णमकर्म च भवति' इति कुतस्तस्य भवान्तरानुगमनम्? 'अचलितमनुदीर्णं भवान्तरमनुगच्छति' इत्यागमात् ॥३०११॥

१ हेमि° नास्ति। २ वे सा ण हे त। ३ हुज्ज हे। ४ बाह्यकर्मनि° इति प्रतौ। ५ तो हे। ६ कर्मान्यत्र पर्य° इति प्रतौ। ७ वयगा जे। ८ सई हे त। ९ चि° हे। १० कर्म देहशरी° इति प्रतौ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अंतो वि अत्थि कम्मं वियणा सब्भावतो तयाए[1] व्व ।
मिच्छत्तादि[2]प्पच्चयसब्भावातो[3] य सव्वत्थ ॥३०१२॥

अन्तो वि अत्थि । अभ्यन्तरवेदना सकारणा सत्त्वात्, त्वग्वेदनावत् । सर्वशरीरानुगतमिथ्यात्वादिप्रत्यया अपि सकारणाः, सर्वशरीरे विद्यमानत्वात्, वेदनावत् ॥३०१२॥

एवं कर्मणा जीवप्रदेशैः सर्वैरविभागे प्रतिपादिते दोषमाशङ्केत परः–जीवकर्मणोरविमोचनं प्राप्नोति, अविभागस्थत्वात्, ज्ञानादिगुणैरिव । तदाशङ्कानिवारणार्थमनैकान्तिकमुद्भासयति—

अविभागत्थस्स वि से विमोयणं कंचणोवलाणं व्वं ।
णाणकिरियाहिं[4] कीरति मिच्छत्तादीहिं[5] वाऽऽदाणं ॥३०१३॥

अविभाग० इत्यादि । काञ्चनपाषाणकाञ्चनयोर्विमोचनमुपायतो दृष्टम(मे)व, अविभागस्थत्वं तयोरपि दृष्टमित्यनैकान्तिकः । स चोपायो ज्ञान-चारित्राभ्यां तद्वियोगः क्रियते, मिथ्यादर्शनाविरतिप्रमादकषाययोगैः कर्मादानमिति ॥३०१३॥

[6]किध वादाणे किरिया साफल्लं णेह तव्वियातम्मि ।
किं पुरिसकारसज्झं तस्सेवासज्झमेगंतो ॥३०१४॥

किध वा गाहा । जीवकर्मविभागकारिणी क्रिया सफला, क्रियात्वात्, मिथ्यादर्शनादिकर्मबन्धक्रियावत् । अथवा पुरुषकारसाध्यो मोक्षः, क्रियाफलत्वात् संसारवत् ॥३०१४॥

असुभो तिव्वातीओ जध परिणामो तदज्जणेऽभिमतो ।
तध तव्विओ च्चिय सुभो किं णेट्ठो तव्वियोगे वि? ॥३०१५॥

असुभो इत्यादि । शुभः परिणामः स्वानुरूपफलप्रसाधनः परिणामत्वात्, अशुभपरिणामवत् । अथवा कर्मवियोगः स्वानुरूपकारणैर्वान्, गुणत्वात्, कर्मसंयोगवत् ॥३०१५॥

अथ प्रत्याख्यानविचारः—

किमपरिमाणं सत्ती अणागतद्धा अधापरिच्छेतो ।
[१९८-द्वि०]जति जावदत्थि सत्ती तो णणु स च्चेयं[11] परिमाणं[12] ॥३०१६॥

१ °व्याओ त । २ °त्ताइप° को हे त । ३ भावओ हे । ४ °रंपि भा° इति प्रतौ । ५ व को हे । ६ °याहिं को हे । ७ °त्ताईहिं को ह । ८ चायःणं ह । ९ कह को ह त । १० °णत्वात्—इति प्रतौ । ११ च्चेव को । १२ °रिणामं जे ।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

**किमपरिमाणं** गाहा। यदुक्तम्—'अपरिमाणं प्रत्याख्यानं श्रेयः, आशंसारहितत्वात् तीरितादिविशुद्धोपवासादिवत्'। तत्र विचार्यते—अपरिमाणमिति कोऽर्थः ? किं यावच्छक्ति ? अथाऽनागताद्धा ? अथापरिच्छेद एव ? यावच्छक्तिरस्ति तावत् प्रत्याख्यामशक्तस्य सेवायामपि व्रतभङ्गाभाव इति। नन्वेवं सैव शक्तिः परिमाणम् ॥३०१६॥

यतः—

**सत्तिकिरियाणुमेयो कालो सूरकिरियाणुमेयो व्व।**
**णणु अपरिमाणहाणी आसंसा चेयं तदवत्था ॥३०१७॥**

**सत्तिकिरिया** गाहा। शकनक्रिया काल एव, क्रियात्वात्, सूर्ये गतिक्रियावत्। तथा चापरिमाणं प्रत्याख्यानमिति शक्तिक्रियापरिमाणपरिच्छिन्नत्वात् स्ववचनविरोधः, आशंसादोषश्च तदवस्थ एव 'शक्तेरुत्तरकालं सेविष्यामि' इति ॥३०१७॥

अथ ब्रूयास्त्वं जीवतः शक्त्युत्तरकालसेवायां न व्रतभङ्गः, अप्रतिषेधत्वात् मृतस्येव। तत इयं गाथा—

**जध ण वतभंगदोसो मतस्स तध जीवतो वि सेवाए।**
**वतभंगणिब्भयातो पच्चक्खाणाणवत्था य ॥३०१८॥**

**जध ण वत०** गाहा। एवं व्रतभङ्गाभाव एव प्रत्याख्यानानवस्था चेति ॥३०१८॥

तद्व्याचष्टे गाथया—

**एत्तियमेत्ती[1] सत्ति त्ति णातियारो ण यावि[3] पच्छित्तं।**
**ण य सव्वव्वतणियमो एगेण वि संजतत्तं[4] ति ॥३०१९॥**

**एत्तियमेत्ती** गाहा। एतावती शक्तिरिति ब्रुवतः नातिचारः, न तत्कृतप्रायश्चित्तम्, न च सर्वव्रतनियमाः, शक्त्यपेक्ष्यत्वात्, एकेनापि च व्रतेन संयतः स्यादित्येतत् प्राप्नोति ॥३०१९॥

तस्मात् यावच्छक्तिपरिमाणवादिनो दोषसम्भव इति अपरिमाण मे(ए)वानागतद्धा परिगृह्येत—

**अधवा सव्वाणागतकालग्गहणं मतं अपरिमाणं।**
**तेणापुण्णपतिण्णो[5] मतो वि भग्गव्वतो[6] णाम ॥३०२०॥**

**अधवा सव्वा०** गाहा। तस्य वादिनो भवान्तरेऽवश्यंभाविव्रतभङ्गादपूर्णप्रतिज्ञता मृतस्यापि, किमुत जीवतः ? **गोष्ठामाहिलसमये** भवान्तरेष्वपि भग्नव्रतो भवति स्व(अ)परिमाणादारात् प्रतिसेवित्वात्, यावज्जीवकृतप्रतिज्ञाजीव[7]प्रतिसेवितवत्। न केवलं

---

१ चेव **को** **हे** **त**। २ इत्तियमित्ती **हे**। ३ सत्ती ण याइयारो **को**। ४ °जयत्त त्ति **हे**, °तत्ति त्ति **त**। ५ °तिण्णा **जे**। ६ °ग्गवओ **हे**। ७ जीववत् प्रति इति **प्रतौ**।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भवान्तरेषु, भवाभावे मोक्षेऽपि संयतः प्राप्नोति, अनागताद्धाऽभ्यन्तरवर्त्तित्वात्, यावज्जीवाभ्यन्तरवर्त्तिसंयतवत् ॥३०२०॥

अत आह—

**सिद्धो वि[1] संजतो च्चिय सव्वाणागंतद्धसंवरधरो त्ति ।**
**उत्तरगुणसंवरणाभावो च्चिय सव्वधा [2]चेवं ॥३०२१॥**

**सिद्धो वि संजतो** गाहा । गतार्था ॥३०२१॥

अथायमपि पक्षो दोषवानिति तृतीयं व्याख्यानमपरिमाणत्वस्य अपरिच्छेद इति । अत्राप्येत एव दोषाः–व्रतभङ्गादयः । अत इयं गाथा—

**अपरिच्छेते वि समाण ए[स] दोसो जतो सुते तेणं ।**
**वतभंगभ[4]यातो [5]च्चिय जावज्जीवं ति णिद्दिट्ठं ॥३०२२॥**

**अपरिच्छेते** । तस्मात् पक्षत्रये दोषान् दृष्ट्वा श्रुतज्ञाने निर्दिष्टं यावज्जीवं प्रत्याख्यानम् । तत्र व्रतभङ्गाभाव इति ॥३०२२॥

यत् पुनरुच्यते आसं(शं)सादोषदुष्टत्वं भवतीति तत्परिहारः—

**णासंसा सेविस्सामि किंतु मा मे मतस्स वतभंगो ।**
**होहिति[6] सुरेसु को वा वतावकासो विमुक्कस्स ॥३०२३॥**

नैवं प्रत्याख्यानं क्रियते–'जीवनात् परतस्सेविष्यामि' इति । किं तर्हि ? 'यावज्जीवामि तावत् सेवां न करोमि' तावतोवधिः स्वायत्तत्वात्, परतो मृतस्य देवलोकेऽवश्यं भाविनी कर्मस्वाभाव्यादविरतिरिति अपरिमाणेन व्रतभङ्गो भवेत्, न यावज्जीवपरिच्छेदात् । एवं च कृत्वा सिद्धस्य व्रतावकाश(शा)भाव एवेति ॥३०२३॥

**जो पुणरव्वतभावं मुणमाणोवस्सभाविणं भणति ।**
**वतमपरिमाणमेतं[7] पच्चक्खं सो मुसावादी ॥३०२४॥**

**जो पुण** इत्यादि । भावितार्था ॥३०२४॥

यस्माच्च—

**भावो पच्चक्खाणं सो जति मरणपरतो वि तो भग्गं ।**
**अध णत्थि ण णिद्दिस्सति[8] जावज्जीवं ति तो कीस ॥३०२५॥**
**जति अण्णहेव भावो चेतं[9]यतो वयणमण्णधा माया ।**
**किं वाभिहिते दोसो भावातो किं वयो गुरुगं ॥३०२६॥**

---

१ व त । २ °णात° त । ३ चेव हे । ४ °याउ को हे । ५ एव को । ६ होही हे त । ७ °मेवं को हे, °मेव त । ८ °दिसति जे । ९ चेयं° हे, चयं° त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**भावो पच्चक्खाणं** गाहा । इह मनोगतो भावः प्रत्याख्यानम्, न वाग्व्यञ्जनमात्रम् । यद्यसौ भावो मरणात् परतोऽपि स्यात्, स्यात्तर्हि व्रतभङ्गः । अथासौ जीवकालपरिच्छिन्नपरिमाणस्ततः किमिति वाचा तथा न निर्दिश्यते ? निर्दिश्यतामेव भावानुवर्त्तित्वात्, उपवासादिवत् । यस्य पुनरन्यथा भावे अन्यथा वचनोपनिपातः, तस्य मायादोष एव । असावदुष्टस्य वाऽन्यथावचनेऽपि न दोषः, प्रतिपन्नभावत्वात् उपवासप्रत्याख्या[ने]ऽपि पौरुषीवचनवत् ॥३०२५-२६॥

एतदर्थानुवादिनी गाथा—

**अण्णत्थ णिव्वेतिते वंजणम्मि जो खलु मणोगतो भावो ।**
**तं खलु पच्चक्खाणं ण पमाणं वंजणं छलणा ॥३०२७॥**

**अण्णत्थ णिव्वतिते** गाहा । गतार्था ॥३०२७॥

**इय पण्णवितो वि ण सो जाधे सद्दहति पूसमित्तेणं ।**
**अण्णगणत्थेरेहि अ कातुं तो संघसमवायं ॥३०२८॥**
**आहूय देवतं [4]वेन्ति जाणमाणा वि पच्चयणिमित्तं ।**
**वच्च जिणिन्दं[6] पुच्छसु गतागता सा परिकधेति ॥३०२९॥**
**संघो सम्मावादी गुरू पुरोगो त्ति जिणवरो भणति ।**
**इतरो मिच्छावादी सत्तमयो णिण्हओ य त्ति ॥३०३०॥**
**[8]एतीसे सामत्थं कत्तो गंतुं [9]जिणिन्दमूलम्मि[10] ।**
**वेतिं[11] कैतपूतणाए संघेण ततो [१९९-द्वि०] कतो वज्झो[12][13] ॥३०३१॥**

**इय पण्णवितो** इत्यादि गाथाचतुष्टयं स्फुटार्थम् ॥३०२८-३१॥

**[14]छव्वाससताइं णवुत्तराइं तइया सिद्धिं गतस्स वीरस्स ।**
**तो बोडियाण दिट्ठी रधवीरपुरे समुप्पण्णा ॥३०३२॥**
**ऊहाए पण्णत्तं बोडियसिवभूतिउत्तरेहि[15] इमं ।**
**[16]मिच्छद्दंसणमिणमो रधवीरपुरे समुप्पण्णं ॥३०३३[17]॥**

---

१ वडिए को हे । २ °जण च्छल° त । ३ °त्तेग को हे । ४ वेइ को हे, चेइ त । ५ °माणो को हे त । ६ °णिंदं को हे । ७ °ण्हवोऽयं ति को, निह्नवोऽयं ति हे । ८ एईसं को हे । ९ °णिंद० को हे । १० °लम्मि को हे त । ११ बेई को हे । १२ कडु° को हे । १३ °ज्झो ॥४१॥५४२ इति **गोष्ठामाहिलनामो सप्तमो निह्नवः**—त । १४ एषा हेसम्मता निर्युक्तिगाथा तथा कोप्रत्यां नास्ति । १५ °त्तराहिं को म । °त्तराहि दी हा । १६ °च्छादं° को दी हा म । १७ एषा गाथा तहेप्रत्योर्नास्ति । दीहामप्रतिषु च ३०३४ गाथातोऽनन्तरं भाष्यत्वेन प्राप्यते ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रथवीरपुरं णगरं दीवगमुज्जाणमज्जकण्हे[1] य ।
सिवभूतिस्सुवहिम्मी[2] पुच्छा थेराण कधणा य ॥३०३४॥
बोडियसिवभूई[3]ओ बोडियलिंगस्स होति उप्पत्ती ।
कोण्डि[4]ण्णकोट्ट[5]वीरा परंपर[6]फासउप्पण्णा[7] ॥३०३५॥

छव्वाससताइं गाथाचतुष्टयं यावत् 'परंपरफासउप्पण्णा' ॥३०३२-३५॥

एतस्य भाष्यगाथा ।

उवधिविभागं सोतुं सिवभूती अज्जकण्हगुरुमूले ।
जिणकप्पियातियाणं भणति-गुरू[8] कीस णेताणि[9]-॥३०३६॥
जिणकप्पोऽणुचरिज्जति [10]वोच्छिण्णो त्ति भणिते पुणो भणति ।
तदसत्तस्सो[11]च्छिज्जतु [12]वोच्छिज्जति किं समत्थस्स ? ॥३०३७॥
[13]पुव्वमणापुच्छच्छि[14]ण्णकंबलकसायकलुसितो चे[15]अं ।
सोधेति[16] परिग्गहे[17]तो कसायमुच्छाभयातीया ॥३०३८॥
दोसा जतो सुबहुआ [२००-प्र०] सुते य भणितमपरिग्गहत्तं ति ।
जमचेला य [18]जिणिन्दा तदभिहितो जं च जिणकप्पो ॥३०३९॥
जं च [19]जिताऽचेलपरीस[20]हो मुणी जं च तीहिं[21] ठाणेहिं[22] ।
वत्थं [23]धरेज्ज णेगंततो ततोऽचेलता सेआ ॥३०४०॥

**उवधिविभागं** इत्यादिगाथाः पञ्च । जिनकल्प इदानीमपि [न] व्युच्छिन्न एव, पुरुषकारसामर्थ्यात्, स्थविरकल्पवत् । ततश्च श्रमणेन सर्वथा वस्त्रपात्रादि त्याज्यम्, परिग्रहत्वात्, ग्रन्थत्वात्, धनकनकादिवत् । अथास्य परिग्रहत्वं ग्रन्थत्वं चासिद्धमिति मन्येथाः, तत्प्रसाधनमपि क्रियते- परिग्रहो ग्रन्थो वा वस्त्रपात्रादि, कषायहेतुत्वात्, मूर्च्छाहेतुत्वात्, भयहेतुत्वात्, धनकनकादिवदेव । तस्मादपरिग्रहत्वं निर्ग्रन्थत्वं श्रेयः, सूत्राभिहितत्वात्, अहिंसावत् । अपरिग्रहाश्च श्रमणा निर्ग्रन्थाः मोक्षगामिनः अचेलत्वाज्जिनेन्द्रवत् । निर्ग्रन्थश्रमणाश्च सम्प्रत्यमी जिनकल्पिकाः, जिनोक्तानुष्ठायित्वात्,

१ °ज्जाण अज्ज° हा । २ वरिम्म जे । °वहिम्मि को हे, °वहिम्मि य दी °वहिंमि य हा । एषा हेसम्मता निर्युक्तिगाथा, अन्यत्र भाष्यत्वेन । ३ भुतिता जे । ४ कोडि° को हे त दी हा म । ५ °कुट्ट° म । ६ °पराफासमुप्प° को हे त म । ७ °प्पणा दी हा । एषापि हेसम्मता निर्युक्तिगाथा, अन्यत्र भाष्यत्वेन । ८ गुरुं को हे । ९ °णी को । १० नोच्छि° हे । ११ °सोछि° जे त । १२ वुच्छि° हे । १३ पुच्छस्स पुव्व° हे त । १४ °च्छछि° हे । १५ चेत्र को हे त । १६ वेइ को हे, चेति त । १७ °ग्गहिओ त । १८ °णिंदा को हे । १९ जियाचे° को हे, जिणा चे° त । जितो चे जे । २० परिस्स° त । २१ तीहिं को हे । २२ °णेहि कोहे । २३ °रिज्ज को हे । २४ वसुपा°-प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अव्युच्छित्तिकालजिनकल्पिकवत् । अचेलश्च सम्यग्मुनिः, तत्परीषहसहिष्णुत्वात्, क्षुत्-परीषहसहिष्णुषष्टाष्टमादिक्षमकवत् । सर्वथा चेलं न धारणीयमेव, स्थानत्रयातिरेकेण प्रतिषिद्धत्वात्, अलङ्कारवत् । तस्मादचेलता श्रेयसीति निगमनम् ॥३०३६-४०॥

अस्य पूर्वपक्षस्य क्रमेण दूषणानि—

**गुरुणाभिहितो जति जं कसायहेतू परिग्गहो सो ते ।**
**सो[1] तो देहो च्चिय ते सकसायुप्पत्तिहेतु[2] त्ति ॥३०४१॥**
**अत्थि व किं [3]किं चि जये जस्स व तस्स व कसायबीजं[4] जं ।**
**वत्थू[5] ण होज्ज एवं धम्मो वि तुमे ण [6]वेत्तव्वो ॥३०४२॥**

**गुरुणा** गाहा । यदि कषायहेतुर्ग्रन्थो भवति ननु भवतः स्वो देहः स्वकषायहेतुः सिद्धः । न चासौ ग्रन्थः परिग्रहो वा । तस्मात् 'परिग्रहो वस्त्रम्, कषायहेतुत्वात्' इत्यनैकान्तिकः । अथवा किमनेनातिस्तोकेन गदितेन ? न हि जगति किञ्चिद् वस्त्वस्ति यं(यत्) न कषायबीजमिति सर्वेणाप्यनैकान्तिकः । प्रवचनेन, यावताऽस्मदीयो धर्मोऽपि कषायहेतुरिति तेनैवानैकान्तिकः ॥३०४१-४२॥ अथवा—

**जेण कसायणिमित्तं जिणो वि गोसालसंगमादीणं ।**
**धम्मो[7] धम्मपरा त्ति य पडिणीयाणं जिणमतं च ॥३०४३॥**

**जेण कसाय०** गाहा । **गोस(शा)लसङ्गमा**दीनां जिनोऽपि कषायहेतुः । प्रत्यनीकानां च धर्मो धर्मपराश्च । न चासौ परिग्रह इत्यनैकान्तिकहेतुत्वम् ॥३०४३॥

**अध ते ण मोक्खसाधणमतीए गंथो कसायहेतू वि ।**
**वत्थादिमोक्खसाधणमतीये सुद्धं कधं गन्थो ? ॥३०४४॥**

अथ ब्रूयास्त्वं देहादि मोक्षसाधनबुद्ध्या परिगृहीतमप्यपरिग्रहः । एवं च वस्त्राद्यपि अपरिग्रह एव, मोक्षसाधनत्वात्, देहादिवत् ॥३०४४॥

एवं चाद्ये प्रमाणे य उक्तो हेतुः [9]परिग्रहत्वादिति सोऽसिद्धः, "मूर्च्छा परिग्रहः" [तत्त्वार्थ ७. १२] इति लक्षणत्वात् ? एवमेव मूर्छाहेतुत्वादिति तुल्यः प्रचर्चोऽनैकान्तिकादिः—

**मुच्छाहेतू गंथो जति तो देहातियो कधमगंथो ।**
**मुच्छावतो ? कधं वा गंथो[10] वत्थादसंगस्स ? ॥३०४५॥**

---

१ सो तो त । २ ते कसायउप्प° हे । ३ किंचि को हे । ४ °यबीयं को हे । ५ वत्थुं को हे, वत्थं त । ६ घेतव्वो हे । ७ धम्मा त । ८ गंथो हे को । ९ हेतुः प्रमाणपरि-इति प्रतौ । १० गन्थो को ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**मुच्छाहेतू** गाहा। नग्नश्रमणकानां शरीरादिः सर्वोऽपि ग्रन्थः, मूर्च्छाहेतुत्वात्, वस्त्रादिवत् ॥३०४५॥

**अध देहाहारादिसु ण मोक्खसाधणमतीये ते मुच्छा।**
**का मोक्खसाधणेसुं मुच्छा वत्थादिएसुं ते[2] ॥३०४६॥**

अथ ब्रूयात् परः—निःसङ्गस्य मूर्च्छामकुर्वतः शरीरं ग्रन्थो न भवति, मोक्षसाधनत्वात्, दर्शनादिवत्। एवं तर्हि निःसङ्गस्य वस्त्राद्यपि ग्रन्थो न भवति, मोक्षसाधनत्वात्, देहवत् ॥३०४६॥

**[२००-द्वि०] अह कुणसि थूल[3]वत्थातिएसु मुच्छं धुवं सरीरे वि।**
**अकेज्जदुल्लभतरे काहिसि मुच्छं विसेसेणं ॥३०४७॥**

**अह कुण०** गाहा। अथ स्थूलवस्त्रादिषु सुलभेष्वपि मूर्च्छाऽवश्यं भाविनीति, तन्न। शरीरेऽपि ते मूर्च्छाऽवश्यंभाविनी दुर्लभत्वात् कम्बलरत्नादिवत् ॥३०४७॥

**वत्थादिगन्थरहिता देहाहारातिमेत्त[4]मुच्छाए।**
**तिरियसबरा[5]दयो णणु हवंति णिरि[6]योवगा बहुआ[7] ॥३०४८॥**

अथ वस्त्रादिग्रन्थरहितो(ताः) देहाहारादिमात्रपरिग्रहाः मोक्षं साधयिष्यन्ति, अल्पपरिग्रहत्वात्, जिनकल्पिकादिवत्। एवं तर्हि को विपक्षः? ये मोक्षं न साधयन्ति तिर्यक्-शम्ब(ब)रादयस्तेषु चाल्पपरिग्रहत्वं दृष्टमित्यनैकान्तिकः ॥३०४८॥

अपि च अनिगृहीतात्मानो बोडिकाः कर्ममलमनन्तमर्जयन्ति, परकीयेष्वपि मूर्च्छाकषायदोषवत्त्वात्। एतदर्था—

**अपरिग्गहा वि पर[8]संतियेसु मुच्छा कसायदोसेहिं[9]।**
**अविणिग्गहितप्पाणो कम्ममलमणन्तमज्जेन्ति[10] ॥३०४९॥**

**अपरिग्गहा वि** इत्यादि गतार्था ॥३०४९॥

**देहत्थवत्थमल्लाणुलेवणाभरणधारेणा[11] केयि[12]।**
**उवसग्गातिसु मुणयो णिस्संगा केवलमुवेन्ति[13] ॥३०५०॥**

**देहत्थ०** गाहा। श्वेतपटास्तु केवलं साधयिष्यन्ति, निःसङ्गत्वे सति वस्त्रधारित्वात्, भरतचक्रवर्त्तिवत्, उपसर्गादिषु वा यथाऽऽह(भ)रणधारिणो मुनयः ॥३०५०॥

---

१ °मईए हे त। २ तो को हे। ३ थुल्ल° को हे। ४ °मित्त° हे। ५ °सपर° जे, °सचर° त। ६ तिरियो° त। ७ बहुसो हे त। ८ परि° त। ९ °दोसेहिं जे। १० °मज्जेंति को। ११ °धारिणो को हे त। १२ केइ हे त, केई को। १३ °विंति हे।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत् पुनरेतदुक्तं ग्रन्थो वस्त्रादिः, भयहेतुत्वात्, हिरण्यसुवर्णादिवत्, तद्व्यभिचारार्थमुच्यते—

जति भयहेतू गन्थो तो णाणातीण तदुवघातेहिं[1] ।
भयमिति[2] ताइं गन्थो देहस्स य सावतादीहिं ॥३०५१॥

जति भयहेतू गाहा । ज्ञानदर्शनचारित्राणि ग्रन्थो भवति, तेषु च तदुपघाते भयहेतुत्वं दृष्टमित्यनैकान्तिकः । यत्नतो हि दर्शनादीनि रक्षणीयानि । श्वापदचौरादिभ्यश्च देहस्य भयमिति भयहेतुत्वं देहेऽपि दृष्टमित्यनैकान्तिकः ॥३०५१॥

अध मोक्खसाधणमईए[3] ण भयहेतू वि ताणि ते गंथो ।
वत्थाति मोक्खसाधणमतीये सुद्धं कधं गंथो ? ॥३०५२॥

अध मोक्ख० गाहा । ज्ञानादीनि मोक्षसाधनबुद्ध्या परिगृहीतानि न ग्रन्थ इति विपक्षाभावादनैकान्तिकाभावः । एवं तर्हि वस्त्रादीन्यपि नैव ग्रन्थः, मोक्षसाधनबुद्ध्या परिगृहीतत्वात्, ज्ञानादिवत् ॥३०५२॥

सारक्खणाणुंबंधो[4] रोद्दज्झाणं ति ते मती होज्जा[5] ।
तुल्लमिणं[6] देहातिसु पसत्थमध तं तधेहावि[7] ॥३०५३॥

सारक्खणा० गाहा । "हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रं[8]ध्यानम्"[तत्त्वार्थ० ९–३६] इति वस्त्रादिपरिग्रहो ग्रन्थः, रौद्रध्यानविषयत्वात्, विषयसंरक्षणवत्[9] । देहादिष्वपि तुल्यमेतदित्यनैकान्तिकः । अथ देहादिषु प्रशस्तध्यानम्, मोक्षसाधकत्वात् । तद् वस्त्रादिषु तुल्यमिति विरुद्धाव्यभिचारि प्रतिप्रमाणम्—वस्त्रादि विशुद्धबुद्धिपरिगृहीतं प्रशस्तध्यानम्, मोक्षसाधनत्वाद्देहादिवत् ॥३०५३॥

अथवोभयसिद्ध आगमो ज्ञापकम्—

जे जत्तियप्पगारा[10] लोए भयहेतवो अविरताणं ।
त चेव य वि[२०१ प्र०]रताणं पसत्थभावाण मोक्खाय ॥३०५४॥

जे जत्तिय० गाहा । स्फुटार्था । अन्यत्राप्येवम्—यथाप्रकारा यावन्तः संसारावेशहेतवस्तावन्तस्तद्विपर्यासात् निर्वाणावेशहेतवः ॥३०५४॥

अथ ब्रूयात्—

---

१ °घाईहिं हे । २ °मिय त । ३ °वधादी° त । ४ °मती जे त । ५ °त्थाइ को । ६ °णाणुबं° त । ७ हुज्जा हे । ८ °मिणं को हे त । ९ °त्थमि° हे त । १० तत्त्वार्थे "रौद्रम्" इति पाठः । ११ विषयसंसारक्ष–इति प्रतौ । १२ °त्तिया प्पगा° को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आहारो व्व ण गंथो देहत्थेन्ति[1] विसघातणत्थाय ।
कणगं पि तधा जुवती धम्मंतेवासिणी मे त्ति ॥३०५५॥

आहारो गाहा । निर्ग्रन्थो देहः, उपकारित्वात् आहारवत् । एवमप्यनैकान्तिकस्तदवस्थः विषघातनार्थं कनकमपि देहस्योपकारीति ग्रन्थेऽप्युपकारित्वं वर्त्तत इति । तथा युवतिः धर्मान्तेवासिनी उपकारिणी, ग्रन्थश्चासौ ॥३०५५॥

तम्हा किमत्थि वत्थुं गंथोऽगंथो व्वै सव्वधा लोए ।
गंथोऽगंथो व्वै मतो मुच्छामुच्छाहि[2] णिच्छयतो ॥३०५६॥

तम्हा किमत्थि वत्थुं गाहा । तस्मात् "मूर्च्छा परिग्रहः" [तत्त्वार्थ० ७-१२] इति लक्षणात्-मूर्च्छामूर्च्छाभ्यां तस्यैवैकस्य वस्तुनो [ग्रन्थत्वम ]ग्रन्थत्वं च, न वस्तुस्वभावतः ॥३०५६॥

वत्थाति[3] तेण जं जं संजमसाधणमरागदोसस्स ।
[4]तं तमपरिग्गहो च्चिय परिग्गहो जं तदुवघाती ॥३०५७॥

वत्थाति गाहा । स्फुटार्था ॥३०५७॥

किं संजमोवकारं करेति वत्थेति जति मती सुणसु ।
सीतत्ताणं ताणं जलणतणगताण सत्ताणं ॥३०५८॥

किं संजमो० गाहा । शीतार्त्तानां मन्दसंघ(ह)ननानां स्वयं तत् प्रार्थितज्वलनतृणगतसत्त्वानां च वस्त्रमुपकारकमिति संयमोपकारि वस्त्रम्, शीतार्त्तज्वलनतृणगतसत्त्वत्राणसमर्थत्वात्, अहिंसाव्रतवत् ॥३०५८॥

तध णिसि चातुक्कालं सज्झायज्झाणसाधणमिसीणं ।
महिमहियावासोसारयातिरक्खाणिमित्तं च ॥३०५९॥

तध णि० गाहा । संयमोपकारि वस्त्रम्, चतुष्कालं स्वाध्यायध्यानसाधनत्वात्, उपाध्यायोपदेशवत् । अथवा संयमोपकारि वस्त्रम्, महिमहिकावर्षावस्य(श्या)यरजप्रभृतिसूक्ष्मजन्तुरक्षणसमर्थत्वात्, ईर्यासमितिवत् ॥३०५९॥

तथा—

मतसंवरुज्झणत्थं गिलाणपाणोवकारि चाभिमतं ।
मुहपुत्तियाति[14] चेवं परूवणिज्जं जधाजोगं[15] ॥३०६०॥

---

१ °त्थं हे । २ °णट्टाए को हे त । ३ व को हे । ४ व को हे । ५ °च्छमसु° हे त । ६ °हिं को हे । ७ °त्थाइ° हे । ८ तन्तम° जे त । ९ °धाइ° हे । १० कम्मं संजमो° जे, कं सं° को । ११ °त्थाइ हे । १२ °यन्ना° हे । १३ वाभि° हे । १४ °य.य त । १५ °जोग्गं त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**मतसंव०** गाहा । संयमोपकारि वस्त्रम्, मृतसंवरणोञ्झनविध्युपयोगित्वात्, सहायसाधुवत् । तथा संयमोपकारि वस्त्रम, ग्लानप्राणोपकारित्वात्, औषधवत् । मुखवस्त्रिकादि संयमोपकारि, भाषासमित्युपयोगित्वात्, मौनव्रतवत् । प्राणिरक्षात्मकत्वाद्वा अहिंसाव्रतवत् ॥३०६०॥

**संसत्तसत्तुगोरसपाणयपाणीयपाणरक्खत्थं ।**
**परिगलणपाणघातणपच्छाकम्मादियाणं च ॥३०६१॥**
**परिहारत्थं पत्तं गिलाणबालादुबग्गहत्थं च ।**
**दाणम[२०१-द्वि०]यधम्मसाधणसमता चेवं परप्परतो ॥३०६२॥**

**संसत्तसत्तु०** गाथाद्वयम् । संयमोपकारि पात्रम्, संसक्तसक्तुगोरसपानकपानीयप्राणरक्षार्थत्वात्, परिगलनप्राणघातपश्चात्कर्मादिपरिहारार्थत्वात्, पिण्डैषणाध्ययनवत् । अथवा संयमोपकारि पात्रम्, ग्लानबालदुर्बलवृद्धानुग्रहार्थत्वात्, विधिविशुद्धयथायोग्याहारवत् । अथवा दानमयधर्मसाधनत्वात्, ज्ञान(ना)भयाहारप्रदानवत् । अथवा लब्धिकशक्ताशक्तप्राघूर्णकसाधुसमताहेतुत्वात्, सामायिकवत् कषायजयवद्वा ॥३०६१-६२॥

**अपरिग्गहता सुत्ते त्ति जा य मुच्छा परिग्गहोऽभिमतो ।**
**सव्वदव्वेसु ण सा कातव्वा सुत्तसब्भावो ॥३०६३॥**

**अपरिग्गहता** गाहा । यच्चोक्तं साधुना वस्त्रपात्रादिपरिग्रहो न कार्यः, सूत्रे प्रतिषिद्धत्वात्, प्राणातिपातादिवदिति । तत्र प्रत्युच्यते—सत्यम्, अपरिग्रहता सूत्रेऽभिहिता । परिग्रहलक्षणं मूर्च्छा । सा न केवलं वस्त्रपात्रादौ प्रतिषिद्धा, किन्तु सर्वद्रव्येष्वपि शरीराहारशिष्यपिंछकादिष्वपीति सूत्रसद्भावः । ततश्च मूर्च्छापक्षे सिद्धसाधनम्–वस्त्रपात्रादिषु मूर्च्छा न कर्त्तव्यैव । किन्तु मूर्च्छाविरहितं वस्त्रपात्राद्युपादेयम्, संयमोपकारित्वात्, शिष्यादिवत् ॥३०६३॥

यच्चोक्तम्–'अचेलैः सर्वसाधुभिर्भवितव्यं जिनेन्द्रोपदेशवर्त्तित्वात् जिनेन्द्रवत्' । तत्र प्रतिविधीयते—

**णिरुवमधितिसंघतणा चतुणाणातिसयसत्तिसंपण्णा ।**
**अच्छिद्दपाणिपत्ता जिणा जितपरीसहा सव्वे ॥३०६४॥**

१ °सत्तगो° को । २ °णंस° हे । ३ परु° को हे त । ४ °हिता त । ५ °मओ को हे त । °मत्तो जे । ६ °सत्त° को हे त । ७ जत° त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जंम्हा जधुत्तदोसे पावन्ति ण वत्थपत्तरहिता वि ।
तदसाधणं ति तेसिं तो तग्गहणं ण कुव्वंति ॥३०६५॥
तध वि गहितेगवत्था [2]सवत्थतित्थोवदेसणत्थं ति ।
अभिणिक्खमंति सव्वे तम्मि चुतेऽ[3]चेलया [4]होन्ति ॥३०६६॥
जिणकप्पियादयो पुण सो[5]वधओ सव्वकालमेगंतो ।
उवकरणमाणमेसिं पुरिसावे[6]क्खाय वहुभेदं ॥३०६७॥
अरुहंतो[8] जमचेलो[9] तेणाचेलत्तणं जति मंती ते ।
तो तव्वयणातो[10] च्चिय णिरतिसयो होहि माऽचेलो ॥३०६८॥
रोगी जधोवदेसं करेति वेज्जस्स होतरोगो य ।
[२०२–प्र०]ण तु[11] वेसं चरितं वा करेति ण य पउणति केरेन्तो[12] ॥३०६९॥
तध जिणवेज्जादेसं कुणमाणोऽवेति कम्मरोगातो ।
ण तु तं[13] णेवच्छधरो तेसिं[14] आदेसम[15]केरेन्तो ॥३०७०॥
ण परोवदेसवसगा ण य छउमत्था परोवदेसं पि ।
[16]देन्ति त[17]ध सीसवग्गं [18]दिक्खेन्ति जिणा जधा[19] सव्वे ॥३०७१॥
तध सेसेहि वि[20] सव्वं कज्जं जति तेहिं[21] सव्वसाधम्मं ।
एवं च कतो तित्थं ण चेदचेलो त्ति को गाहो ? ॥३०७२॥
जध ण जिणिन्देहि समं सेसातिसएहि सव्वसाधम्मं ।
तध लिंगेणाभिमतं चरितेण वि किंचि साधम्मं ॥३०७३॥

**णिरुवमधितिसंघतणा** इत्यादिगाथासङ्घातः । अत्र दूषणमुच्यते–जिनेन्द्र-दृष्टान्ते जिनोपदेशवर्त्तित्वं हेतुर्नास्तीति साधनधर्मशून्यदृष्टान्तदोषः । जिनेन्द्रा भगवन्तः स्वयंबुद्धाः, न परोपदेशानुवर्त्तिनः ।

यद्यप्यनादिद्वादशाङ्गश्रुतोपदेशपूर्वकमतिशयज्ञानेन प्रव्रज्याकालमाभोगयित्वा पूर्वतीर्थ-कराऽऽचरितमेव जीतकल्पन्यायेन तीर्थकरकल्पं प्रतिपद्यन्त इति जिनोपदेशवर्त्तित्वं दृष्टा-

१ त° **को हे त** । २ मव° त । ३ अचे° **जे** । ४ हुंति **को** हे । ५ °वहिणो **को** । ६ °क्खाए **को** हे, ७ °क्खाइ त । ८ अरहंता **को** हे त । ९ °चेला **को** हे त **को** हे त । १० °णाउ **को** हे । ११ य **को** । १२ °रंतो १२ मयं हे । १३ तन्नेवत्थध° **को** हे । १४ °सिमाएस° **को** हे । १५ रंतो हे । १६ दिंति हे । १७ न य **को** हे त । १८ °क्खंति हे । १९ जिणा जहा **को** हे त । २० मि **जे** । २१ तेहिं **को** हे ।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

न्ते सिद्धम्, तथाऽप्य[त्र] दूषणमुच्यते–जिनोपदेशवर्तित्वं हि हेतुर्यथा जिनेन्द्रदृष्टान्ते निरुपमधृतिसंहननचतुर्ज्ञानातिशयसत्त्वसम्पन्नाच्छिद्रपाणिपात्रजितपरीषहप्रच्छन्नाहारनीहारपरानभिभवनीयरूपातिशयत्वधर्माऽविनाभूताऽचेलत्वेन व्याप्तो दृष्टस्तद्वत् पराभिमतसर्वसाधूनामचेलत्वसाध्यधर्मं यथोक्तविशेषणसहितं साधयतीति अनतिशयाऽचेलत्वविपर्ययेण धर्मविशेषविपरीतसाधनो नाम इष्टविघातकृद्विरुद्धः–परार्थाश्चक्षुरादयः संघातत्वाच्छयनासनाद्यङ्गवत्–इत्यत्र यथा ।

एवं च सातिशया जिनाः वस्त्रपात्रे न गृह्णन्ति, तद्विरहेऽपि तद्दोषासम्बन्धित्वात् तद्गुणसम्बन्धित्वाच्च दण्डके इव । तद् वस्त्रपात्रादि तेषां संयमसाधनं न भवति, तेन विनाऽपि तत्सिद्धेः, पुस्तकादिवत् । तथाऽपि च क(चाकि)ञ्चित्करमपि संयमं प्रति एकं वस्त्रं परिगृह्णन्ति प्रयोजनान्तरोपयोगित्वात्, कृतकृत्यप्रथमधर्मकथाप्रवर्त्तने तीर्थकरसंस्कारवत् । तच्च प्रयोजनान्तरं सवस्त्रतीर्थप्रदर्शनम् । तस्मिंश्च निष्क्रमणकालपरिगृहीतैकवस्त्रे च्युते पुनरन्यथाप्रयोजनाभावात् परिग्रहाभावे सातिशयाऽचेलका भवन्तीति तीर्थकराः, न पुनः पृथग्जनास्तत्कालमनुष्याः, किमङ्ग पुनरद्यकालसामान्यपुरुषाः सर्वदोषाकराः । तस्मादचेलको(का)ग्रहोऽनर्थकर इति त्यज्यताम् । यच्चोक्तम्–'अचेलकैर्जिनैर्जिनकल्पिका एवोपदिष्टाः' इति तदन्यथा, नैव सर्वे निरुपधयः, किन्तु सर्वेऽप्युत्सर्गतः सोपधयाः(यः) । उपधिपरिमाणं प्रति विशेषान्तरम्, स्तोकाल्पोपकरणत्वात् । पुरुषविशेषो(षा)नतिशयापेक्षमेतत्, तथापि सर्वैः सामान्यपुरुषकैः जिनकल्पो न प्रतिपत्तव्यः, तदयोग्यत्वात्, क्लीबादिभिरिव संयमः ।

यदपि चोक्तम्–'अचेला जिनास्तच्छिष्यैरपि सर्वैरचेलकैर्भवितव्यम्–
"जारिसयं गुरुलिङ्गं सीसेण वि तारिसेण होयव्वं ।
ण हि होइ बुद्धसीसो सेयपडो णग्गसमणो वा ॥"

अत्र प्रमाणम्–स्वतीर्थकरवेषचरितानुविधायिभिस्तच्छिष्यैर्भवितव्यम्, शिष्यत्वात् शाक्यबुद्धशिष्यभिक्षुवत्' । अस्योत्तरम्–स्वतीर्थकरवेषचरितानुविधायिनः को विपक्षः? यः स्वतीर्थकरवेषचरितानुविधायी न भवति । तद्यथार्हतो **गोसा(शा)लका(कः)**, **बुद्धस्य देवदत्तकः** । तत्र च शिष्यत्वं हेतुर्वर्तत इत्यनैकान्तिक उभ[या]सिद्धि(द्ध) इति दूषणम् ।

अथ ब्रूयात् परः–तदाऽऽदेशकारिविनीतत्वे सति शिष्यत्वादिति हेतुः सविशेषणः । तौ च **गोशाल-देवदत्तकौ** तदादेशकारिविनीतौ न भवत इति विपक्षाद् व्यावृत्त एव हेतुरित्यनैकान्तिकाभावः । एवमपि स्वतीर्थकरवेषचरितानुविधायिन्यः

१ दृष्टान्तस्तद्वत्–इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आर्यिका न भवन्तीति पक्षः, तत्र च तदादेशकारिविनीतत्वे सति शिष्यत्वं हेतुर्वर्त्तत इत्यनैकान्तिक एव । यदि च तदादेशकारित्वं प्रतिपद्यसे ततस्त्वया नग्न-श्रमणकेन निरुपधिधृतिसंहननाद्यतिशयरहितेन अचेलकेन न भवितव्यं तदादेशकारि-त्वात्, आर्यिक(का)वत् । अपि, कर्मरोगापनयनमिच्छता जिनेन्द्रवैद्योपदेशः स एव कर्त्तव्यो, न तद्वेषाचरिते, आतुरत्वात्, वैद्योपदेशकारिव्याधितातुरवत्, जिनवैद्यवे-षचरितानुकारी च तदुपदेशमकुर्वन्न मुच्यते कर्मरोगात्, अनधिगति(त)शास्त्रार्थक-र्मत्वे सति भिषग्वेषचरिताऽवलम्बित्वात्, अनधिगतायुर्वेदसद्भाववेषानुकार्यातुरवत् ।

अपि च, यत् प्रागुक्तं प्रमाणम्—'स्वतीर्थकरवेषचरितानुविधायिभिः तच्छिष्यैः भवितव्यम्' इति, तत् किं सर्वसाधर्म्येण तदनुविधानं साध्यते, आहोस्वित् किञ्चित् साधर्म्येणेति ? । यदि सर्वसाधर्म्येण, ततस्ते जिनाः न परोपदेशवशगाः, न चानु-त्पन्नकेवलज्ञानाः परोपदेशं कुर्वन्ति, न च शिष्यान् दीक्षयन्ति, तथा सर्वसाधर्म्या-द्भवद्भिरप्येवमनुष्ठेयं प्राप्नोति । न च तथानुतिष्ठते(नुष्ठीयते)इत्यभ्युपगमविरो-धिनी प्रतिज्ञा । एवमनुष्ठाने च तीर्थाभाव एव भवतामिति सर्वसाधर्म्यप्रतिज्ञाऽन-र्थिका अशक्या च कर्त्तुमिति । किञ्चित्साधर्म्यं प्रतिज्ञायते । तथा च सिद्धसाधनं प्रतिज्ञादोषः, अस्माकमपि किञ्चिल्लिङ्गेन साधर्म्यं लोचकरणादिना, किञ्चिच्चरितेन साधर्म्यम्–सावद्ययोगवर्जनं नवकोटीशुद्धभैक्ष्याहारत्वमनित्य(नियत)वसतित्वमित्यादि ॥ ३०६४-७३ ॥

यच्चोक्तम्–जिनाज्ञया सर्वेणापि जिनकल्पोऽनुष्ठेयः, जिनाभिहितत्वात्, सर्वसावद्ययोगवर्जनवत् । तत्र प्रतिविधीयते—

**उत्तमधितिसंघतणा पुव्वविदोऽतिसइणो पुरा काले ।**
**जिणकप्पिया वि कप्पं कतपडिकम्मा पवज्जन्ति ॥३०७४॥**

**उत्तमधितिसंघतणा इत्यादि ।** उत्तमधृतिसंहननैः पूर्वविद्भिरुत्पन्नातिशयैरेकत्वादि-भावनापरिकर्मकृतयोग्यैरेव जिनकल्पोऽनुष्ठेयः, जिनैस्तथाभिहितत्वात्, प्रव्रजनार्हेण सता महाव्रतारोपणवत् ॥३०७४॥

**तं जति जिणवयणातो पवज्जसि पवज्ज तो स छिण्णो तु ।**
**अत्थि त्ति किंध पमाणं किंध वोच्छिण्णो त्ति ण पमाणं ॥३०७५॥**

१ °तानुचरन् जि° इति प्रतौ । २ °विइति° त । ३ सया को हे त । ४ °परि° को हे त । ५ ल्पो नष्ठे यः –इति प्रतौ । ६ ति को, त्ति हे त । ७ कहं हे, कध त । ८ क° हे त । ९ वु° हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**तं जति जिणवयणातो** इत्यादि । यदि जिनवचनं प्रमाणं तेन सम्प्रति दुःषमाकाले व्युच्छिन्नो जिनकल्प इति सत्यमेतत् तदिति प्रतिपत्तव्यं जिनाभिहितत्वात्, जंबूनाम(म्नि) काले जिनकल्पास्तित्ववत् ॥३०७५॥ एतदर्थज्ञापनायात्र गाथा—

**मण-परमोधि-पुलाए आहारग-खवग उवसमे कप्पे ।**
**संजमतिय-के[1]वलि-सिज्झणा य जंबुम्मि [2]वोच्छिण्णा ॥३०७६॥**

**म[3]ण**ग्रहणादे(द्वा)क्यैकदेशानुकरणान्मनःपर्यायज्ञानम्, परमावधिरुत्कृष्टमवधिज्ञानम्, पुलाकलब्धिः आहारकशारीरकलब्धिः, क्षयोपशमश्रेणिद्वयम् कल्पग्रहणाज्जिनकल्पः, संयमत्रिकम्—परिहारविशुद्धि-सूक्ष्मसंपराय-अथाख्यातानि, केवलज्ञानम्, सिद्धगमनं च । एतेऽर्था जम्बुनाम्नि सुधर्मगणधरशिष्ये व्यवच्छिन्ना—तस्मिन् सति अनुवृत्ताः, तस्मिन् परिनिर्वाणे व्यवच्छिन्ना इति ॥३०७६॥

यदपि चोक्तम् 'जिताचेलपरीषहो मुनिर्भवति, चेलग्रहणादजितपरीषहः' इति । तत्रोच्यते—

**जति चेलभोगमेत्तादजि[4]ताचेलयपरीसहो तेणं[5] ।**
**अजि[6]तदिगिंछादिपरीसहो वि भत्तातिभोगातो ॥३०७७॥**

**जति चेलभोगमेत्ता०** इत्यादि । चेलग्रहणेऽपि विशुद्धबुद्धिर्जिताऽचेलपरीषह एव मुनिः आगमविशुद्धपरिग्रहणात् विशुद्धाहारपरिग्राहिजितजिघांसापरीषहमुनिवत् । अथवा विशुद्धपिण्डभोक्ताऽपि अजितजिघांसापरीषह इति प्राप्तं परिभोगित्वात् चेलभोगिमुनिवत् ॥३०७७॥

एतच्चानिष्टम्—जिनानामप्यजितपरीषहत्वप्राप्तेरनिष्टापादनात्—

**एवं तुह ण जितपरीसहा जिणिंन्दा वि सव्वधा[8]त्तणं ।**
**अधवा जो भत्तातिसु स विधी चेले वि [9]किण्णेट्टो ॥३०७८॥**

**एवं तु ह**जितपरीसहादित्यादि गतार्था ॥३०७८॥

**जध भत्तातिविसुद्धं रागद्दोसरहितो णिसेवेन्तो[10] ।**
**विजितदिगि[11]च्छादिपरीसहो मुणी सपडिगारो वि ॥३०७९॥**

**जध भत्तातिविसुद्धं** इत्यादि गतार्था ॥३०७९॥

**तध चेलं परिसुद्धं रागद्दोसरहितो सुतविही[12]यें ।**
**होइ [13]जिताचेलपरीसहो मुणी सेवमाणो वि ॥३०८०॥**

---

१ °वल° हे । २ वुच्छि° हे । ३ वृत्तिकारः सर्वत्र टीकायां मूलगाथाप्रतीकमेव निर्दिशति परन्तु अस्य ३०७६ गाथाया वृत्तौ केवलं तत्प्रतीकमनिर्दिश्य समग्रामेव गाथां निर्दिष्टवान् परन्तु पुनर्मुद्रणं गाथाया न स्याद् इति सा गाथा वृत्तौ न पुनरुद्धृता । ४ °जिओऽचे° त । ५ तेण को हे । ६ °दिगं° त । ७ °गिंद्रा को हे । ८ °धावत्तं त । ९ किं नेट्ठो को हे, °ण्णट्टो त । १० °वेंतो को °वंतो हे । ११ °गिंछा° को °गिंच्छा° त । १२ °हीए को हे त । १३ जहाचे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथ चेलं परिसुद्धमित्यादिर्गतार्था ॥३०८०॥

अथवा द्विविधमचेलत्वं लोकप्रसिद्धम्—मुख्यमुपचरितं च। तत्र वर्त्तमानकाले विशिष्टधृति[संहनना]सम्भवे मुख्यमचेलत्वं संयमोपकारि न भवतीति उपचरिताऽचेलत्वेन अचेलपरीषहजयः कर्तव्यः, अनशनाशक्ते(क्तैः) एकद्वित्रिकेवलावमीभूतप्राप्ता[1]वमौदा(द)र्याशनादपि जिघांसा(घत्सा)परीषहजयवत् ॥३०८०॥

अत आह—

सतसंतचेलओऽचेलओ य जं लोगसमयसंसिद्धो ।
तेणाचेला मुणयो संतेहि[2], जिणा असंतेहि ॥३०८१॥
परिसुद्धजुण्णकुच्छितथोवाणियतं[3]ऽण्णभोगभोगेहि[4] ।
मुणयो मुच्छारहिता संतेंहि अचेलया होंति ॥३०८२॥
जध जलमवगाहंतो बहुचेलो वि सिरवेढितकडिल्लो ।
भण्णति णरो अचेलो तध मुणयो संतचेला वि ॥३०८३॥
[२०३-प्र०] तध थोवजुण्णकुच्छितचेलेहि वि भण्णते अचेलो त्ति ।
जध तूर सालिय ! लहुं दो[8] पोत्तिं[9] णग्गिया[10]मि त्ति ॥३०८४॥

सतसंत० गाहाचतुष्टयम् ४ । सदसती चेले ययोस्तौ सदसच्चेलौ द्वावप्यचेलकौ लोकप्रसिद्धचा परिशुद्धजीर्णकुत्सितस्तोकाऽनियताऽन्यैर्भोगभुक्तैः सद्भिश्चेलैरचेलका मुनयः । लोकप्रसिद्धवस्तुकार्याविनि(कौपीन)योजित्वा(त)निरावरणगुह्यबहुचेलावेष्टितशिरोमनुष्यवत्, परिजीर्णबहुच्छिद्रशाटीवेष्टितकरी(र)स्त्रीवत् । एवं च वस्त्रेऽपि नाग्न्यशब्दप्रवृत्तेर्नागमविरोधः ॥३०८१–८४॥

यच्चोक्तं स्थानत्रये वस्त्रधारणानुज्ञया शेषकालमवस्त्रेण भवितव्यमिति आगमोक्तत्वाद् नाग्न्यमेव श्रेय इति । तत्र प्रतिविधीयते–स्थानत्रयधरणकालादारादपि निरतिशयेनावश्यं वस्त्रपरिग्रहः कार्य एव, तत्कालपरिशुद्धाऽलाभे सति पौरुष्यादिगृहीतप्रत्याख्यानवेलाया आरादपि गृहीततत्कालभो(भ)क्ष्यमाणविशुद्धाहारवत् । एतदर्थं चेयं गाथा—

विहितं सुते च्चिय जतो धरेज्ज तिहिं कारणेहिं वत्थं ति ।
तेणं चिय तदवस्सं णिरतिसएणं धरेतव्वं ॥३०८५॥

विहितं गाहा । भावितार्था ॥३०८५॥

---

१ °कवराधूतप्राप्ता°–इति प्रतौ । २ °तेंहि को हे । ३ °यतंण्णभो० जे । ४ °भोग्गे० जे । ५ °तेंहिं को, हे । °ते वि त । ६ °वेढ्टि° हे । ७ जह त्तर हे । ८ दे को, त । मूलपाठगतं 'दो' इति तथा पाठान्तरगतं 'दे' इति ('ददस्व' म० वृ० गा० २६०१ पृ१०३७) इत्येवं संस्कृतक्रियापदस्य प्रतिरूपकं रूपं दानक्रियासूचकं क्रियापदम् । अधुनाऽपि हिन्दीभाषायाम् दानक्रियासूचकम् 'दे' अथवा 'दो' रूपं व्याप्रियते एव । ९ पोत्तिं को हे त । १० मो को हे त । ११–" 'अन्नभोगभोगेहिं' ति एवमपि योज्यते–ततश्च लोकरूढप्रकारान्यप्रकारेण भोगः आसेवनम्.....अन्यभोगः तेन अन्यभोगेन भोगः परिभोगो येषां तानि तथा तैः" म० हे० वृ० गा० २५९९ पृ० १०३७ ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथा——

**जिणकप्पाजोग्गाणं [1]हि-कुच्छपरीसहा जतोऽवस्सं ।**
**ही[2] लज्ज[3]ति एसो संजमो तद[4]त्थे विसेसेणं ॥३०८६॥**

**जिणकप्पा०** गाहा। जिनकल्पायोग्यैरैदंयुगीनपुरुषैः वस्त्रधारणं कार्यम्, ह्री-कुत्सा-परीषहदोषनिवारणत्वात्, अनित्याऽशरणादिद्वादशानुप्रेक्षाधार[ण]वत, [5]**रतिवाक्यचूलिका**-ध्ययनवद्वा । अथवा गाथापश्चार्धम्–'ह्री लज्जा' इति संयमस्याख्या, तदर्थत्वात् –संयमार्थत्वाद् **आचाराध्ययनवत्** ॥३०८६॥

**जति जिणमतं पमाणं तुह तो मा मुयसु वत्थ-पत्ताइं ।**
**पुव्वुत्तदोसजालं [7]लब्भिसि मा समितिघातं च ॥३०८७॥**

**जति जिण०** गाहा । जिनमतप्रमाणकेन भवता वस्त्र-पात्रे न मोक्तव्ये पूर्वोक्त-दोषजालपरिहारसमर्थत्वात्, समितिभङ्गनिवारणशक्तत्वाच्च, जिनमतवत् ॥३०८७॥

कदाचिद् वस्त्र-पात्रयोः समितिभङ्गनिवारणशक्तत्वं नास्तीत्यसिद्धहेतुत्वं मन्येत परः, तत्प्रसाधनार्थमियं गाथा——

**अणुपालेतुमपत्तो सत्तो[8] ण समत्तमेसणासमितिं ।**
**वत्थरहितो ण समितो णिक्खेवादाणवोसग्गे[10] ॥३०८८॥**

**अणुपाले०** गाहा । पात्रविरहितः पाणिपुटभोजी एषणासमितिभङ्ग-मवश्यं लभते संसक्तसक्तुगो[र]सग्रहणेऽवश्यंभाविसप्राणातिपातत्वात्, खाडहिला-मूषिकावत् । पात्रं तु संसक्तगोरसादिग्रहणेऽपि समितिभङ्गं निवारयति, प्राणातिपा-तरक्षणोपायत्वात् एषणासमितिज्ञानक्रियावत् । वस्त्ररहितश्च निक्षेपाऽऽदानव्युत्सर्गसमि-तिष्वसमितः, अनुत्पन्नातिशयज्ञानत्वे सति निक्षेप्याऽऽदेयव्यवसृस्व(०यव्युत्सृज्य)-द्रव्यरहितत्वात् ॥३०८८॥

**इय पण्णवितो वि बहुं सो मिच्छत्तोदयाकुलितभावो ।**
**जिणमतमसद्दहंतो छड्डितवत्थो समुज्जातो ॥३०८९॥**
**तस्स भगिणी समुज्झितवत्था तध चेव[12] तदणुरागेणं ।**
**संपत्थिता णियत्था तो गणियाए पुणो मुयति ॥३०९०॥**
**तीए [13]पुणो वि वद्धोरसेगवत्था[14] तयं[15] पि छड्डेन्ती[16] ।**
**अच्छतु ते तेणं चिय समणु[२०३-द्वि०]ण्णाता घरेसी य ॥३०९१॥**

---

१-२ ह्री को हे त । ३ °त्ति व सो त । ४ °त्थं को हे त । ५ दशवैकालिकसूत्रे दशमाध्ययनसमाप्त्यनन्तरं 'रतिवाक्यचूडा'नामकमध्ययनं प्रथमचूलिकारूपं विद्यते । ६ अत्र प्रथमाङ्गरूपम् आचारनामकं सूत्रं ग्राह्यम् । ७ लज्जिहसि जे । ८ °मसत्तो को ९ पत्तो हे । १० °सग्गो त, °सग्गा हे । ११ °ग्रासमतिष्टपनितिः । अनु° इति प्रतौ । १२ चेव को हे त । १३ वि पुणो त । १४ °त्था पुणो विछ° को हे । १५ तया त । १६ छड्डिंती को हे, छन्नन्ती त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कोडिण्ण[1] को[2]ट्टवीरे प[3]रंपरफासतोऽवसेसा समुप्पण्णा ॥३०९२॥
तत्तो परं[5]परफासतोऽवसेसा समुप्पण्णा ॥३०९२॥

एवं एते भणिता ओसप्पिणिए[8] तु णिण्हया सत्त ।
वीरवरस्स पवयणे सेसाणं [10]पवयणे णत्थि ॥५६७॥३०९३॥

इय पण्णविता गाहा । इत्यादि सर्वं स्फुटार्थमेव ॥३०८९–९३॥

[11]मोत्तूणं[12] अउ एक्कं सेसाणं जावजीविया दिट्ठी ।
ए[13]क्केक्कस्स य ए[14]त्तो दो दो दोसा मुणेतव्वा ॥५६८॥३०९४॥

मोत्तूण गोट्ठमाहिलमण्णेसिं जावजीवसंवरणं ।
कम्मं च बद्धपुट्ठं [15]खीरोतं वऽत्तणा समयं ॥३०९५॥

**मोत्तूण अउ एक्कं** । अतोऽस्मात् सप्तकादेकं मुक्त्वा गोष्ठामाहिलं शेषाणां षण्णां निह्नवानां प्रत्याख्यानं प्रति यावज्जीविका दृष्टिः—यावज्जीवं प्रत्याख्यानमित्यर्थः । गोष्ठामाहिलस्याऽपरिमाणम् । एकैकस्य परस्परविवादे द्वौ द्वौ दोषौ ॥३०९४–९५॥

कथमिति ? तद् दर्श्यते—

मोत्तुं जमालिमण्णे बेन्ति कडं कज्जमाणमेवं तु ।
एक्केक्को एक्केक्कं णेच्छति य अ[16]बद्धिओ दोण्णि ॥३०९६॥

अपरोप्परं[17] समेता दो दोसे देन्ति एक्कमेक्कस्स ।
परमतसंपडिवत्ती[18] वि[19]प्पडिवत्ति च समतम्मि ॥३०९७॥

अ[20]बद्धियस्स दोसे देन्ति तओ सो वि तिण्णि अण्णस्स ।
तिप्पभितिं[21] तु समेता दोसे तिप्पभि[22]तिओ देन्ति ॥३०९८॥

**मोत्तुं जमालिमण्णे बेन्ति । अपरोप्परं समेता** इत्यादि । जमालिनः क्रियमाणं न कृतमिति सिद्धान्तः, शेषाणां क्रियमाणं कृतमिति । यदा जमाली तिष्यगुप्तमन्यं

---

१ कोण्डि° जे । २ °कुट्ट° त । ३ पज्जावे° हे । ४ सो को हे त । ५ °पराफा° को त हे । ६ °ण्णा ॥६०।६०२ इति बोटिकनामा अष्टमनिह्नववादः समाप्तः ॥ छ॥ गणधरवादपर्यन्तं गाथा २०२६ । उभय २६२८॥ त । ७ कहिया दी हा म । ८ उस° हे । ९ °णीए को हे दी हा । १० पव्व° हा । ११ मोत्तणमेसिमिक्कं दी हा, मुत्तूणमेसिमिक्कं म, मोत्तूगमेसिमिक्कं त । मोत्तूणओ जे । १२ °णत्तो को हे । १३ इक्कि° म । १४ इत्तो म । १५ खीरोदवदत्त° को हे । १६ अबु° जे, अब्ब° को, अब्बद्धिओ त । १७ °रसंमे° त । १८ °वत्ति को हे । १९ विपडि° हे । २० अब° को हे, अब्बद्धिय° त । २१ °भिई हे, °भियं° त । २२ °भइए को हे, °भिइओ त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चोपालभत्(त) तदैवं ब्रवीति—भवतो द्वौ दोषौ—यद् मदीयं सिद्धान्तं निर्दोषमपि नाभ्युपगच्छतीत्येष दोषः स्वमतिविप्रतिपत्तिः, यच्चात्मीयं सदोषमपि प्रतिपद्यसे एष द्वितीयो दोषः परमतसम्प्रतिपत्तिरिति । गोष्ठामाहिलस्य तु त्रीन् दोषानुद्भावयति एकैकः । सोऽपि चैषां त्रीनेव दोषान् ब्रवीति । यस्मात् गोष्ठामाहिलस्याबद्धं जीवेन कर्म कञ्चुकवत्, शेषाणां बद्धपुष्टम्(स्पृष्टम्)जीवेन सहैक्यापत्तेः क्षीरोदकवत्। अतः पूर्वोक्तौ च द्वौ दोषौ, तृतीयोऽयम्—अबद्धं कर्मेति । सोऽप्याह—भवतामपि पूर्वोक्तौ दोषौ, अयं तु तृतीयः—कर्म बद्धपुष्ट(स्पृष्ट)मात्मना सहेति एवं द्वयोर्विसंवादे । अथ त्रिप्रभृतीनां विसंवादे वस्तुतस्त्रिप्रभृतय एव दोषाः । गोष्ठामाहिलस्यैकवृद्धास्त एवेति ॥३०९६–९८॥

**सच्चेता दिट्ठीओ जातिजरामरणगब्भवसधीणं ।**
**मूलं [२०४-प्र०] संसारस्स तु हवंति[1] णिग्गंथरूवेणं[2] ॥५६९॥३०९९॥**
**पवयणणीहूताणं[3] जं तेसिं कारितं जहिं जत्थ ।**
**भज्जं परिहरणाए मूले तध उत्तरगुणे य ॥५७०॥३१००॥**
**जत्थ विसेसं जाणइ लोगो तेसिं च कुणइ भत्ताइं ।**
**तं कप्पइ साहूणं सामण्णकयं पुणेरकप्पं ॥३१०१॥**
**मिच्छद्दिट्ठीया णं जं तेसिं कारियं जहिं जत्थ ।**
**सव्वं पि तयं सुद्धं मूले तह उत्तरगुणे य ॥५७१॥३१०२ ॥**
**भिण्णमतलिंगचरिता मिच्छद्दिट्ठि त्ति बोडियाभिमता ।**
**जं त कतमुद्दिसितुं तं कप्पति जं च जतिजोग्गं ॥३१०३॥**

**सच्चेता दिट्ठीओ** इत्यादिगाथाः पञ्च स्फुटार्थाः ॥३०९९–३१०३॥

एवं समवतारप्रसङ्गागतनिह्नवः समाप्तः ।

॥ समवतारद्वारं समाप्तमिति ॥

अथैतदनन्तरमनुमतद्वारविचारः । दर्शन-ज्ञान-चारित्रसामायिकत्रये कस्य किं सामायिकं मोक्षमार्गः ? इत्यनुमतम् । अत्र सूत्रगाथा—

**तवसंजमो[11] अणुमतो[12] णिग्गंथं पवयणं च ववहारो ।**
**सद्दुज्जुसुताणं पुण णेव्वाणं संजमो चेव ॥५७२॥३१०४॥**
**कस्स णयस्साणुमतं किं सामइयमिह ? मोक्खमग्गो त्ति ।**
**भण्णाति णेगम-संगह-ववहाराणं तु सव्वाइं ॥३१०५॥**

---

१ °वन्ति को, भवं° हा दी । २ °ग्गन्थ° को । ३ °वेण हे । ४ °निहू° हे । ५ पुण अक° को । ६ °च्छाद्दिट्ठि° हे । °च्छादिट्ठि° दी म हा । ७ जया म । ८ अत्र ३१०१ तथा ३१०२ इति गाथाद्वयं प्रत्यां नास्ति । ९ जोगं को । १० °न्तरंऽनुम°—इति प्रतौ । ११ °मोऽणुम° १२ नेग्गं° हे । १३ निव्वा° हे दी म हा । १४ सामा° हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तवसंजमो[1] चरित्तं[2] णिग्गंथं[3] पवयणं ति सुतणाणं ।
तग्गहणे सम्मत्तं [4]चग्गहणातो य[5] बोद्धव्वं ॥३१०६॥
तिण्णि वि सामइयाइं इच्छन्ता[6] [२०४–द्वि०] मोक्खमग्गमाइल्ला ।
किं मिच्छद्दिट्ठीया वदंति जमसमुदिताइं पि ॥३१०७॥
उज्जुसुतादिमतं पुण [7]णेव्वाणपधो चरित्तमेवेगं ।
ण हि णाणदंसणाइं भावे वि ण तेसिं[8] जं मोक्खो ॥३१०८॥
जं सव्वणाणदंसणलंभे[9] वि ण तक्खणं चिय विमोक्खो ।
मोक्खो य सव्वसंवरलंभे[10] मग्गो स एवातो ॥३१०९॥

**तवसंजमो अणुमतो** इत्यादि । अस्य भाष्यगाथाः पञ्च–**कस्स णयस्साणुमतं** इत्यादि । तपश्च संयमश्च तपःसंयमौ प्राकृते द्विवचनाभावादेकत्वेन वा निर्देशो बहुत्वेन वा । तपःप्रधानो वा संयम इति तपः चारित्रसामायिकमेवं निर्दिष्टं भवति । नि(नै)र्ग्रन्थं वचनमिति श्रुतसामायिकं परिगृह्यते । एषां च पूर्वस्य लाभे भजनीयमुत्तरम् उत्तरलाभे तु नियतं पूर्वलाभ इति । एतद्द्वितयपरिग्रहात् सम्यग्दर्शनावश्यंभाव इति सम्यक्त्वसामायिकमिति(मपि) परिगृहीतमेवम् । अथवा 'च'शब्दः-अधिकवचने द्वितयादधिकं–सम्यक्त्वसामायिकं परिगृह्णाति । व्यवहारग्रहणेन द्रव्यार्थविषयं नैगम-संग्रह-व्यवहारनयत्रिकं परिगृह्यते विस्तरग्रन्थानुसारात् । अतः सर्वाणि सामायिकानि नैगम-संग्रह व्यवहाराणां मोक्षमार्ग इत्यनुमतानि ॥

अत्राह कश्चित्–**तिण्णि वि** गाहा । नैगम-संग्रह-व्यवहाराः त्रयोऽपि सम्यग्दृष्टयः प्राप्ताः, त्रिविधमोक्षमार्गाभिधायित्वात् , नयसमूहवचनवत् । एवं चानिष्टापादनमार्हतस्य क्रियते अभ्युपगमविरोध इति कृत्वा ।

अत्र प्रतिविधीयते–त्रिविधमोक्षमार्गाभिधायित्वादिति को हेत्वर्थः ? किं समुदितानि परस्परसापेक्षाणि त्रिफलावत् त्रीणि सामायिकानि मोक्षमार्गमित्यभिदधति एते नयाः ? आहोस्विद्यथा कथञ्चित् त्रीणि समुदितानि वा ? पूर्वस्मिन् पक्षे असिद्धे(द्ध)हेतुत्वमपक्षधर्मत्वात् । द्वितीयपक्षे साधनधर्मशून्यो दृष्टान्तः, सर्वनयसमूहस्य परस्परसापेक्षाण्येव त्रीण्यपि सामायिकानि मोक्षमार्ग इति । तस्मात् मिथ्यादृष्टयो नैगमादयस्त्रयः, असमुदितत्रितयमोक्षमार्गाभिधायित्वात्, वैशेषिकादिवत् ।

अथ सूत्रगाथापश्चार्द्धस्य भाष्यगाथा–**°उज्जुसुतादि०** । ऋजुसूत्रादीनां शेषनयानामुत्तरोत्तरविशुद्ध्या चारित्रसामायिकमेवैकं मोक्षकारणम्, तद्भावे भावात्, ज्ञानदर्शनभावेऽप्यभावात् , घटनिर्वृत्तौ कुम्भकार(र)यत्नवत् । एतदन्वयप्रदर्शनाय वैधर्म्यप्र-

१ °जमा जे, °जमो त्ति को हे । २ °रितं को हे । ३ °गन्थं को । ४ तग्ग° त । ५ व जे । ६ °च्छंता को हे । ७ निव्वा° हे । ८ तास हे । ९ °लम्भे को, °लंभे हे त । १० °लाभो जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दर्शनाय च गाथा–**जं सव्वणाण०** गाहा । क्षायिकसम्यग्दर्शन-सर्वज्ञाने न मोक्षकारणे, तत्सन्निधानेऽपि अभूततत्कार्यत्वात्, यत्नरहितदण्डचक्रादिवत् । चारित्रमेव सर्वसंवरक्रियारूपं मोक्षकारणम्, तत्सन्निधानानन्तरमेव भूतकार्यत्वात्, कुम्भनिर्वर्त्तककुम्भकारप्रयत्नवत् । तस्मात् सर्वः (स) एव सर्वसंवर एको मोक्षमार्गः ॥३१०४–९॥

अत्राह पूर्वनयवादी—

**आह णणु णाणदंसणरहितस्सं[1] ण सव्वसंवरो दिट्ठो ।**
**तस्स[3] पि तस्सेवं[4] तओ तम्हा तितयं पि मोक्खपधो ॥३११०॥**

**आह णणु** गाहा । ज्ञान-दर्शने संवरकारणे, तत्सद्भावे जायमानत्वात्, घटस्य मृदादिवत् । तस्मात् सर्वज्ञान-दर्शन-संवराणां कार्यो मोक्षः, तद्भावभावित्वात् मृद्दण्डचक्रप्रयत्नकार्यघटवत् ॥३११०॥

अत्रोच्यते—

**जति [5]तेहि विणा णत्थि त्ति संवरो तेण ताइं तस्सेव[6] ।**
**जुत्तं कारणमिह ण तु संवरसज्झस्स मोक्खस्स ॥३१११॥**

**जति तेहि विणा णत्थि त्ति** । यदि ज्ञान-दर्शनाभ्यां विना सर्वसंवरो न भवति तयोश्च सतोर्भवति ततः किमायातं मोक्षस्य ? स एव सर्वसंवरस्तयोः कार्यमिति संवरस्यैव ते कारणे भवेताम्, न तु संवरसाध्यस्य मोक्षस्य, व्यवहितत्वात्, घटकारणमृदुपकारिजलवद् घटस्य ॥३१११॥

**अध कारणोवकारि त्ति कारणं तेण कारणं सव्वं ।**
**भुवणं णाणादीणं जतिणो णेयातिभावेणं ॥३११२॥**

**अध कारणोवकारि त्ति** ज्ञान-दर्शने मोक्षकारणे तत्कारि(र)णोपकारित्वात् घटकारि(र)णोपकारिजलवत् । एवं तर्ह्यनिष्टमतिप्रसङ्गात्–सर्वमपि जगत् मोक्षकारणं प्राप्तं भवन्मते कारि(र)णोपकारित्वात्, ज्ञान-दर्शनवत् । कथं जगत् मोक्षकारणोपकारि ? इति चेत्, उच्यते–ज्ञेयभावेन यतेर्ज्ञान-दर्शनोपकारि वर्तत इति ॥३११२॥

**तध साधणभावेण वि देहातिपरंपराए[7] बहुभेतं ।**
**[8]णेव्वाणकारणं ते णाणातितियम्मि को णियमो ? ॥३११३॥**

**तध** गाहा । साधनभावेनापि ज्ञान-दर्शनयोश्च देहः उपकारे (वर्तते), देहस्याहारः, आहारस्य शाल्यादिः, शाल्यादेः पृथिव्यादिमहाभूतगण-बलीवर्द-कर्षकादिः, कालश्चेति

१ °धानेवंतर°—इति प्रतौ । २ °स्सेव सव्व° हे । ३ °स्सहियस्से° को हे । ४ °स्सेय जे । ५ तेहिं को हे । ६ °स्सेय जे । ७ °राइ को हे । ८ नि° हे । ९ °भावे विज्ञा°–इति प्रतौ । १० °ल्यादिमुपकारादिशा° इति प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

किमिति ज्ञान-दर्शन-चारित्रत्रयं मोक्षकारणमिति नियम्यते ? सर्वमपि जगत् मोक्षकारण-मित्यतिप्रसङ्गः ॥३११३॥

**अध पच्चासण्णतरं हेतू[1] णेतरमिहोवकारिं पि ।**
**तो सव्वसंवरमयं [२०५-प्र०] चारित्तं चेयं[2] मोक्खपधो ॥३११४॥**

**अध पच्चासण्णतरं ।** अथैनद्दोषभयात् प्रत्यासन्नतरं कारणमिष्यते-नेतरदु-पकारपरंपरात्मकं तस्माद् दूरम्-सर्वसंवर एव मोक्षकारणं प्रतिपत्तुम् प्रत्यासन्नतरत्वात्, घटपर्यायानन्तरनिर्वर्त्तकावस्थावत् । तस्मान्निश्चयनयवक्तव्यं सर्वसंवरमयचारित्रमेव मोक्षपथः ॥३११४॥

अपि च —

**इट्ठत्थसाधयाइं[3] सद्दहणादिगुणतो समेताइं ।**
**सम्मकिरियाऽऽतुरस्स व इह पुण णे[4]व्वाणमि[5]ट्ठत्थो ॥३११५॥**

**इट्ठत्थ०** गाहा । इष्टार्थसाधकानि ज्ञान-दर्शन-चारित्राणि समेतानि; ज्ञानादेस्संवरस्वभावत्वात्[6] आतुरस्येष्टार्थसाधनसम्यक्चिकित्सावत्[7] । इहेष्टार्थः परिनिर्वाणम् ॥३११५॥

॥ अनुमतद्वारं गतम् ॥

अथ द्वितीया द्वारगाथा—

**किं कइविहं ?** गाहा [१४८३] । तस्यामनुक्रमेण किमिति प्रश्नद्वारम्—

**किं सामइयं जीवो अज्जीवो[8] दव्वमध गुणो होज्जे[9] ।**
**किं [10]जीवमजीवमयं होज्ज तदत्थंतरं व त्ति ॥३११६॥**

**किं सामइयं जीवो अज्जीवो ।** किं सामायिकम् ? इति सामायिक-पदार्थस्वरूपपरिप्रश्नः । सत्पदार्थत्वे निर्ज्ञाते द्वयोः सन्देहः जीवाजीवद्वैविध्यात् । जीवत्वे अजीवत्वे वा निर्द्धारिते द्वितयमुपप्लवते-द्रव्यं गुणो वा अथवा द्वाभ्यामपि जीवाजीवाभ्यां निर्वृत्तं जीवाजीवमयं भवेच्छरीरवत् अथवा जीवाऽ-जीवव्यतिरेकादर्थान्तरमेवाभाव एव सामायिकम्, वन्ध्यापुत्रादिवत् स्यात्॥३११६॥

एवं भावाभावविषयप्रश्नप्रतिवचनगाथा —

**आता खलु सामइयं पच्चक्खायंतओ हवति आता ।**
**तं खलु पच्चक्खाणं [11]आवाते सव्वदव्वाणं ॥५७३॥३११७॥**
**सद्दहति जाणति जतो पच्चक्खायंतओ यें[12] जं जीवो ।**
**णो[13]जीवो णाभावो सो च्चिय सामाइयं [14]तेणं ॥३११८॥**

१ हेउ हे । २ चेव को हे त । ३ °णाइं जे को । ४ नि° हे । ५ °मित्थट्ठो को । ६ ज्ञानविसंवर-इति प्रतौ । ७ आतुरारस्यष्टा-इति प्रतौ । ८ अजो हे । ९ °ज्जा हे । १० जीवाजी° को हे त । ११ आयाए हे । १२ जओ जी° हे त । १३ णोऽजी° त । १४ तेण को हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**आता खलु सामइयं। सद्दहति जाणतीत्यादि।** आत्मा जीवः—'खलु' शब्दोऽवधारणे—जीव एव सामायिकम्, न अजीवः, न वा जीवाऽजीवौ, न वा तदर्थान्तरमभाव इति। सोऽपि न सर्व एव जीवः सामायिकम् किन्तु विशिष्टगुण एव—प्रत्याचक्षाणः- प्रत्याख्यानं [१]कुर्वन्, क्रियमाणं कृतमिति वर्त्तमानस्यैवातीतभावापत्तेः कृतप्रत्याख्यानोऽपि जीवः परिगृह्यते। स एव च परमार्थतः आत्मा स्वस्वभावाऽऽ[२]पैत्त्यभिमुखत्वात्, शेषः संसारी आत्मैव न भवति घातिकर्मभिः स्वाभाविकगुणतिरस्करणात्। एतदर्थप्रतिपादनाय द्वितीयः 'आत्म'शब्द इति। ते च स्वाभाविका गुणाः श्रद्धानम् ज्ञानम् सावद्ययोगविरतिश्चेति। तस्माच्छ्रद्धान-ज्ञान-प्रत्याख्यानधर्मत्वाज्जीव एव सामायिकम्। **तं खलु पच्चक्खाणं** 'खलु'शब्दो वाक्यालङ्कारेऽपि प्रयुक्तस्तद्भावपरिणत्यनन्यत्वज्ञापनार्थः, शब्दाधिक्यादर्थाधिक्यं गम्यत इति ॥३११७-१८॥

तस्य भाष्यगाथा—

**सामा[३]इयभावपरिणतिभावातो जीव एव सामइयं।**
**सद्दे[४]यणेयकिरियोवयोगतो सव्वदव्वाइं ॥३११९॥**

**सामाइय०** गाहा। तत् प्रत्याख्यानं जीवादनन्यभावपरिणतेर्विषयरूपेण सर्वद्रव्याणामापाते आभिमुख्येन समवाये संघाते निष्पद्यते, श्रद्धेय-ज्ञेय-क्रियोपयोगित्वात् सर्वद्रव्याणाम् ॥३११९॥

तदेव विभागेनाख्यायते—

**पढम[५]म्मि सव्वजीवा [६]बितिये चरिमे य सव्वदव्वाइं।**
**सेसा महव्वता खलु तदे[७]क्कदेसेणं [८]दव्वाणं ॥५७४॥३१२०॥**
**जं सव्वजीवपालणविसयं पाणातिवा[९]तवेरमणं।**
**मिच्छा-मुच्छोवरमा स[१०]व्वदव्वेसु विणियुत्ता ॥३१२१॥**

**पढमम्मि सव्वजीवा। जं सव्वजीवपालणविसयं।** यस्मात् त्रसस्थावरसूक्ष्मस्थूलसर्वजीवपालनविषयं प्राणातिपातविरतिव्रतं तस्मात् प्रथमे व्रते सर्वजीवा विषयत्वेन संगृहीताः। मिथ्या अनृतं मृषेति पर्यायाः। मूर्छा गृद्धिः परिग्रह इति पर्यायाः। मिथ्या च मूर्च्छा च मिथ्यामूर्छे ताभ्यामुपरमो विरतिः मिथ्या-मूर्छोपरमो द्वितीये चरमे च व्रते। तयोः सर्वद्रव्यपरिग्रहः, सर्वद्रव्यापलापात् अन्यथाप्ररूपणाद्वा मृषावादविषयः, सर्वं ममेदं भुवनत्रयमिति लोभाविष्करणात् परिग्रहविषयः ॥३१२०-२१॥

---

१ कुवन्त-इति प्रतौ। २ 'आपत्त्यभिमुखत्वात्' अत्र आपत्तिः-आपादनम्-प्राप्तिः। ३ सामतिय° जे। ४ °यमेय° त। ५ °मंमि हा। ६ बीए त हे म। ७ °देगदे° हे, °दिक्के° म। ८ °देसाण त। ९ °वाइवे° त। १० °व्वदव्वे° जे।

रूवेसु सहगतेसु य बंभवतं गहण[२०५-द्वि०]धारणिज्जेसु ।
ततियं छट्ठवतं पुण भोयणविणिवित्तिवावारं ॥३१२२॥
एवं चरित्तमेअं सव्वदव्वविसयं तध सुतं पि ।
देसे देसोवरती सम्मत्तं सव्वभावेसु ॥३१२३॥

**रूवेसु** गाहा । ब्रह्मव्रतमब्रह्मचर्यविरतिश्चतुर्थं व्रतम् । तद् रूपविषयम्, रूपम्-मूर्तिरित्यर्थः—न वर्णमात्रम्, मूर्तं च स्त्री-पशु-पण्डकादि । तत्सहगतं तदेकदेशस्तन-नयनादि [तस्य] प्रशंसा तदभिधानम् पूर्वरतानुकीर्त्तनं वा । ग्रहणधारणयोग्यं ग्रहण(णीय)धारणीयं मूर्तद्रव्यमेव । तस्यापहारविरतिस्तृतीयव्रतं ग्रहण(णीय)धारणीयद्रव्यविषयम् । षष्ठव्रतं रात्रिभोजनविरतिर्भोजननिर्वृ(वृ)त्तिव्यापारात्मकम् । एवं सर्वचारित्रं विनिवृत्त्या सर्वद्रव्यविषयमिति । चारित्रसामायिकस्य विषय उक्तः । श्रुतसामायिकमपि श्रुतज्ञानात्मकत्वात् सर्वद्रव्यविषयमेव । सर्वद्रव्याणां एकदेशे देशोपरतिः चारित्राचारित्रसामायिकम् । सम्यक्त्वसामायिकं पुनः सर्वभावेषु भावग्रहणात् सर्वद्रव्याणि सगुण-पर्यायाणि अभिलाप्याऽनभिलाप्यपर्यायसहितानि श्रद्धेयानीति सम्यक्त्वविषयः । मृषावादविरतिस्तु अभिलाप्यपर्यायविषयैव, वाग्गोचरत्वात् । अत इह सर्वभावग्रहणं युक्तम् ॥३१२२-२३॥

किं तं ति पत्थुते किं थं विसयचिंताए भण्णति तओ वि ।
सामाइयंगभावं जाति जतो तेण तग्गहणं ॥३१२४॥

**किं तं ति पत्थुते** किं सामायिकम् ? इति प्रस्तुतेऽन्यदेवाऽप्रस्तुतं विषयनिरूपणमन्याय्यम्, अप्रस्तुतत्वात्, बाह्यशास्त्रवत् । भण्यते आचार्येण—अप्रस्तुतत्वादित्यसिद्धो हेतुः । तथा चानुमानम्-सामायिकस्य विषयनिरूपणमपि प्रस्तुतमेव, सामायिकाङ्गभूतत्वात्, सामायिकात्मवत् । 'तओ वि' सोऽपि विषयः प्रस्तुत एवेत्युक्तं भवति । एवं तावत् सामायिकम्—अजीवादिभ्युदासेन एव—जीवः इत्युक्तम् ॥३१२४॥

दव्वं गुणो त्ति भइतं सामाइय सव्वणयमताधारं ।
तं दव्वपज्जवट्ठियणयमतमंगीकरेतूणं ॥३१२५॥

तच्च सामायिकं नयमतभेदाद् द्रव्यमपि गुणोऽपीति भजनाप्रापितं सर्वनयमताधार इति द्रव्यार्थिक-पर्यायार्थिकनयमङ्गीकृत्य विभज्यते ॥३१२५॥

जीवो गुणपडिवण्णो णयस्स दव्वट्ठियस्स सामइयं ।
सो चेव पज्जवणयट्ठियस्स जीवस्स एस गुणो ॥५७५॥३१२६॥

१ °सुं बं° को, °सु वं° हे । २ चारित्तमिअं त, चारित्तमअं को हे । ३ °व्वद° हे । ४ °सोविर° त । ५ °यैवेवा°-इति प्रतौ । ६ च त । ७ °ताइ त । ८ सामइयं को हे । ९ °ट्ठियनयस्स को हे म दो ।



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इच्छति जं दव्वणयो दव्वं तच्चमुवयारतो य गुणं ।
सामइयगुणविसिट्ठो तो जीवो तस्स सामइयं ॥३१२७॥
पज्जायो च्चिय वत्थुं तच्चं दव्वं ति¹ तदुवयारातो ।
पज्जयणयस्स जम्हा सामइयं तेण पज्जायो ॥३१२८॥

जीवो गुण० गाहा । यस्माद्द्रव्यनयो द्रव्यार्थिको द्रव्यमेव तत्त्वं परमार्थमितीच्छति, गुणस्तस्य नयस्योपचारमात्रम् संव्यवहारमात्रमित्यर्थः, तस्मात् सामायिकगुणविशिष्टः-सामायिकगुणं प्रतिपन्नः तद्भावपरिणामाज्जीवद्रव्यमेव सामायिकमिति । द्वितीयस्य तु पर्यायार्थिकनयस्य पर्याय एव सामायिकादिर्गुणः परमार्थः-वस्तुस्वरूपमित्यर्थः, गुणानां समुदायमात्रं द्रव्यमित्युपचारतः, तस्मात् सामायिकं गुणः, न द्रव्यं नाम किञ्चित् ॥३१२६-२८॥

पज्जायणयमतमिणं पज्जायत्थंन्तरं कतो दव्वं ।
उवलंभव्ववहाराभावा[२०६-प्र०]तो खरविसाणं व ॥३१२९॥

पज्जायण० गाहा । द्रव्यं परपरिकल्पितं नास्त्येव, पर्यायार्थान्तरत्वात्, खरविषाणवत् । अथवा पर्यायव्यतिरेकेणानुपलभ्यमानत्वात्, अव्यवहार्यत्वाद्वा, खरविषाणवत् ॥३१२९॥

जध रूवातिविसिट्ठो ण घडो सव्वप्पमाणविरहातो ।
तध णाणातिविसिट्ठो को जीवो णामऽणक्खेयो ॥३१३०॥

जध रूवाति० गाहा । ज्ञानादिगुणेभ्योऽर्थान्तरभूतो जीवो नास्त्येव, प्रमाणानुपलभ्यमानत्वात्, अनुपाख्यत्वात्, रूपाद्यर्थान्तरभूतघटवत् । एवं च को जीवो नाम अनाख्येयः ? अभाव एवेत्यर्थः ॥३१३०॥

उप्पज्जंति वियंति य परिणम्मन्ति य गुणा ण दव्वाइं ।
दव्वप्पभवा य गुणा ण गुणप्पभवाइं दव्वाइं ॥५७६॥३१३१॥
उप्पात-विगमपरिणामतो गुणा पत्त-णीलतादि व्व ।
संति ण तु दव्वमिह तव्विरहातो खपुप्फं व ॥३१३२॥

उप्पज्जंति वियंति य । उत्पाद-विगमपरिणामतो गुणा एव च केवलाः सन्ति, उत्पाद-विगमपरिणामत्वात् पत्र-नीलतादिवत् । न नाम तत्र पत्रादि किञ्चिद् द्रव्यमस्ति, नीलादिगुणव्यतिरिक्तत्वात्, खपुष्पवत् । द्रव्यं प्रभवो येषां ते द्रव्य-

१ °णे हे त । २ च हे त । ३ °या जे । ४ °त्थंत° को हे । ५ वयं° को हा म द्री । चयं° त । ६ °णमं° को हे द्री । णम्मं° हा, °णामं° म ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रभवा न भवन्ति गुणाः, किन्तु गुणसमुदये द्रव्योपचारात् गुणप्रभवाण्येव द्रव्याणीति ॥३१३१-३२॥

ते जप्पभवा जं वा तप्पभवं होज्ज होज्ज तो दव्वं ।
ण य तं ते चेयं जतो परोप्परं पच्चयप्पभवा ॥३१३३॥

**ते जप्पभवा०** गाहा । ते गुणास्त्वदभिप्रायेण यत्प्रभवाः यद्वा द्रव्यं गुणप्रभवम्—गुणसद्भावो द्रव्यमिति । यद्येवं भवेत्, ततो द्रव्यमस्तीति सम्भाव्येत । न च तत् तथा, उभयथाऽपि—परमार्थतः, उपचारतो वा द्रव्यं पर्यायनयमते । किं तर्हि ? यतस्त एव परस्परं प्रतीत्यसमुत्पादात् प्रत्ययप्रभवा गुणा इति ॥३१३३॥

अत्राह परः—

आहाऽवक्खाणमिदं इच्छति दव्वमिह पज्जयणयो वि ।
किंतेऽच्चन्तविभिण्णे भणति सो दव्व-पज्जाए ॥३१३४॥

**आहाऽवक्खाणमिदं ।** आह—अव्याख्यानमिदम्—गुणमात्रं सर्वमिति । त(य)स्मात् पर्यायनयोऽपि द्रव्यमिच्छत्येव-गुणसन्तानं गुणप्रभवमिच्छन्नपि चात्यन्तभिन्नजातीयमिच्छति द्रव्यं गुणेभ्यः, परस्परं भिन्नस्वभावत्वात्, गजाश्वादिवत् ॥३१३४॥

भिन्नस्वभावत्वहेतुव्याख्यानगाथा—

उप्पातातिसभावा पज्जाया जं च सासतं दव्वं ।
ते तप्पभवा णं य तं तप्पभवं तेण ते भिण्णा ॥३१३५॥

**उप्पातातिसभावा ।** उत्पाद-विगमपरिणामस्वभावाः पर्यायाः, शाश्वतं ध्रुवस्वभावं द्रव्यमिति भिन्नस्वभावता । तस्मात्ते गुणाः ध्रुवद्रव्यात्प्रभवन्ति, न पुनर्द्रव्यं चलस्वभावेभ्यो गुणेभ्यः प्रभवति । तेन ते द्रव्याद् गुणा भिन्नाः ॥३१३५॥

जीवस्स य सामइयं पज्जायो तेण तं तओ भिण्णं ।
इच्छति पज्जायणयो वक्खाणमिदं जधत्थन्ति ॥३१३६॥

**जीवस्स य सामइयं पज्जायो ।** जीवस्य च द्रव्यस्य शाश्वतभावस्य सामायिकमशाश्वतं पर्यायः, तेन भिन्नस्वभावत्वाद् भेदप्रधानः पर्याय[नय इ]च्छति—भिन्नमेतद्र(द् द्व)यम्—जीवस्यैष गुण इति यथार्थं व्याख्यानम् ॥३१३६॥

---

१ चेव को । २ °रप्पच्च° को, °रपच्च° हे । ३ °हारव° त । ४ °ज्जवण° को हे त । ५ °तव्वन्त° जे । ६ ण तयं व° को हे । ७ ध्रुवाः द्रव्याः त्प्र°-इति प्रतौ । ८ °व इति-इति प्रतौ । ९ यो जं च सासयं दव्वं को । १० °मिणं त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**जति पज्जायणयो च्चिय संमण्णति दो वि दव्व-पज्जाए ।**
**दव्वट्ठिओ[२०६-द्वि०]किमत्थं जति वै मती दो वि जमभिण्णे ॥३१३७॥**
**इच्छति सो तेणोभयमुभयग्गाहे वि सैंति पिधब्भूतं ।**
**मिच्छत्तमिहेगंतादेगत्तण्णत्तगाहाओ ॥३१३८॥**

**जति पज्जायणयो च्चिय ।** यद्यस्मिन्ना(न् व्या)ख्याने पर्यायनय एव संमन्यते द्रव्यं पर्यायांश्च, ततः किमिति द्रव्यार्थिकनयः परिकल्प्यते ? यदि चैषा बुद्धिः—द्रव्यार्थिकनयस्तान् द्रव्य-पर्यायानभिन्नामि(नि)च्छति, पर्यायनयस्तु भिन्नानिति विशेषार्थमुभयं द्रव्य-पर्यायनयौ(याभ्यां) परिगृह्यते । उभयग्राहेऽपि सति न वस्तुपरिपूर्णता, यतो मिथ्यात्वमेकान्तेन द्रव्य-पर्यायैकत्वान्यत्वग्राहौ ॥३१३७-३८॥

**एगत्ते णणु दव्वं गुणो त्ति परियायवयणमेत्तमितं ।**
**तम्हा तं दव्वं वा गुणो व्वे दव्वट्ठियग्गाहो ॥३१३९॥**

**एगत्ते णणु** गाहा । एकत्वग्राहे 'द्रव्यम्' 'गुणः' इति च शब्दभेदमात्रं पर्यायवचनमेव अभिन्नत्वात्, घट-कुटवत् । एव द्रव्यार्थिकग्राह(हो) मिथ्यादर्शनम् ॥३१३९॥

**जति भिण्णोभयगाही पज्जायणयो तदेगपक्खम्मि ।**
**अविरुद्धं चेयं तयं किमतो दव्वट्ठियणएण ॥३१४०॥**

**जति भिण्णोभयगाही ।** यदि भिन्नद्रव्य-पर्यायग्राही पर्याय[नय] एवास्ति, ततो द्रव्यार्थिकनयोऽनर्थक एव, द्रव्यस्य पर्यायमतेनैव प्रतिपादितत्वात्, पुनरुक्तवचनवत् ॥३१४०॥

**तम्हा किं सामइयं हवेज्ज दव्वं गुणो त्ति चिंतेयं ।**
**दव्वट्ठियस्स दव्वं गुणो तेयं पज्जवणयस्स ॥३१४१॥**

**तम्हा किं सामइयं** गाहा । सामायिकं द्रव्यं भवेद् गुणो दि(वे)ति चिन्तायां द्रव्यार्थिक उपयुज्यते । तस्य द्रव्यं सामायिकमिति निर्वचनात् । पर्याय[नय]स्य गुणः सामायिकमिति । किमिति प्रश्नो निरुक्तो भवति ॥३१४१॥

**इधरा जीवाणण्णं दव्वणयस्सेतरस्स भिण्णं ति ।**
**उभयणयोभयगाहे घडेज्ज णेक्केक्कगाहम्मि ॥३१४२॥**

**इधरा जीवाणण्णं ।** इतरथा सामान्यतः सामायिकचिन्तायां जीवादनन्यद् द्रव्यार्थिकस्य, जीवादर्थान्तरं पर्यायनयस्येति एकमपि न घटते उभयनयस(सा)माना-

१ °नउ को हे । २ संम° को हे । ३ वि त ४ । सयं को हे । ५ ततो द्रव्यार्थं किं- इति प्रतौ । ६ °गन्ते जे । ७ पज्जाय° का हे । ८ °मित्त° को हे । ९ व को हे । १० अव° जे । ११ चेव को हे त । १२ य तं को हे त ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धिकरण्ये उभयात्मकत्वात् सामायिकमनन्य(न्यद्) जीवात् स्यादन्यदिति घटेत, नैकैकग्राहे ॥३१४२॥

ननु चैतत् प्रश्ननिर्वचनमेकेनैव पर्यायनयेन पूर्यते । यस्मात्—

**णणु भणितं पज्जायट्ठियस्स दव्वस्स एस हि गुणो त्ति ।**
**छट्ठीये ततो दव्वं सो तं च गुणो ततो भिण्णो ॥३१४३॥**

**णणु भणितं पज्जायट्ठियस्स** । ननूक्तं पर्यायनयस्य जीवस्यैष गुण इति षष्ठ्या निर्देशात् भिन्नो गुणः सामायिकम्, गुणीव द्रव्यं भिन्नमिति किं द्रव्यार्थिकचिन्तायां द्रव्यप्रतिपादनायाम् ? ॥३१४३॥

यदुच्यते—

**उप्पातभंगुराणं पतिक्खणं जो गुणाण संताणो ।**
**दव्वोवयारमेत्तिं जति कीरति तम्मि तं णाम ॥३१४४॥**

**उप्पातभंगुराणं** । उत्पादानन्तरविनश्वराणां गुणानां प्रतिक्षणमपि समानबुद्धिहेतुः सभागसन्ततिर्नाम सन्तानो यस्तस्मिन् यदि द्रव्योपचारमात्रं क्रियते ततस्तथा नाम किं नश्छिद्यते, द्रव्यं तावत् सिद्धम् ॥३१४४॥

**तब्भेतकप्पणातो तं तस्स गुणो त्ति होतु सामइयं ।**
**[२०७-प्र०] पेण्णस्स णीलता जध तस्संताणोदितऽत्थमिता ॥३१४५॥**

**तब्भेतकप्पणातो** । तस्य सन्तानिभ्योऽन्यस्य, म(य)तः स कल्पनातः, तस्य सामायिकं गुण इति कल्प्यताम्, पर्णस्य नीलता वर्णसन्तान एवोदिताऽस्तमिता—पर्णे नीलमित्युदिता, तस्मिन्नेव च पर्णे क्षणभङ्गुरेऽपि पर्णसन्ताने पीततायामुपजातायां नीलता अस्तमिता—विनष्टा भवति, गुणस्वभावत्वात् ॥३१४५॥

**उप्पातभंगुरा जं गुणा य ण य सो त्ति ते य तप्पभवा ।**
**ण य सो तप्पभवो त्ति य जुज्जति तं तदुवयारातो ॥३१४६॥**

**उप्पातभंगुरा जं** । उत्पादभङ्गुरा गुणाः । न च सः सन्तान उत्पादभङ्गुरः । तस्य प्रवाहनित्यतया स्थितत्वात् । तेन तत्प्रभवा गुणाः सन्तानप्रभवाः । एवं च द्रव्यप्रभवा गुणा इति व्याख्यातं भवति । न चासौ सन्तानो द्रव्यमिति कल्पितः तत्प्रभवः, गुणप्रभवो न भवति । अनेनैतदुक्तं भवति—न गुणप्रभवाणि द्रव्याणीति तदुपचाराद्युज्यते व्याख्यानम् ॥३१४६॥

---

१ जीवस्स को हे त । २ °एँ को, °ए हे, °इ त । ३ °मेत्तं को हे, °मित्तं त । ४ तन्नाम को हे । ५ पत्त° को हे त । ६ °ओवित जे । ७ अनयेतदु°-प्रतौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अधवोदासीणमतं दव्वणयं पति ण जीवतो भिण्णं ।**
**भिण्णमितरं पति जतो णत्थि तदत्थंतरं जीवो ॥३१४७॥**

**अधवोदासीणमतं** । अथवोदासीनद्रव्यार्थमतम् । उदासीनो मध्यस्थ उच्यते । आदिद्रव्यार्थो निर्विकल्पं सत्तामात्रम्, अन्त्यद्रव्यार्थः कल्पितः सामान्यसन्तानः, मध्यद्रव्यार्थो व्यवहारोऽनुपचरितोभयः सामान्यप्रधानः इतरोपसर्जनः । तस्य मतम्—जीवादनन्यं(न्यत्) तत् सामायिकम्, भिन्नमितरस्य पर्यायनयस्य गुणप्रधानस्य, तस्माद् गुणादर्थान्तरं जीवो नास्त्येवेति ॥३१४७॥

**बितियस्स दव्वमेत्तं णत्थि तदत्थंतरं गुणो णाम ।**
**सामण्णावत्थाणाभावातो खरविसाणं व ॥३१४८॥**

**बितियस्स दव्वमेत्तं** । उदासीनद्रव्यार्थादन्यस्य द्वितीयस्य द्रव्यार्थिकस्य आदि-सङ्ग्रहात्मकस्य द्रव्यमात्रमेव सर्वम्, न गुणो नाम कश्चित्, सामान्यावस्थानरूपा-दन्यत्वात्, खरविषाणवत् ॥३१४८॥

**आविब्भाव-तिरोभावमेत्तपरिणामिदव्वमेवेतं ।**
**णिच्चं बहुरूवं पि य णडो व्व वेसंतरावण्णो ॥३१४९॥**

आविर्भाव-तिरोभावं[वरूपम्] तासु तासु अवस्थासु भिन्नास्वपि तदेवैकं द्रव्यं नित्यम्, आविर्भाव-तिरोभावमात्रबहुरूपत्वात्, नानावेषान्तरापन्ननटवत् ॥३१४९॥

अतश्चागमः—

**जं जं जे जे भावे परिणमति पयोगवीससादव्वं ।**
**तं तध जाणाति जिणो अपज्जवे जाणणा णत्थि ॥५७७॥३१५०॥**

**जं जं जे जे भावे** । यद्यद् यान् यान् प्रयोगविस्रसात्मकान् पर्यायान् परिणमति बहुतत्त्वम्, तदेव तत्स्वभावकम्, प्रकाश्यत्वात्, परिणामित्वात्, केव-लज्ञानस्वात्मवत् ॥३१५०॥

**जं जाधे जं भावं परिणमति त यं तदा ततोऽणण्णं ।**
**परिणतिमेत्तविसिट्ठं दव्वं चिय जाणति जिणिंदो ॥३१५१॥**

**जं जाधे जं भावं परिणमति** । यद् द्रव्यं यदा यं भावं परिणमति तत्तदा तस्मात् परिणामादनन्यत्, सत्त्वात्, वस्तुत्वात्, विचित्रैवंविधकेवलपरिणामाज्जि-नेन्द्रवत् ॥३१५१॥

---

१ वोय° हे त । २ °त्थन्त° को । ३ °रूवं को हे । ४ जाणेइ दी म । ५ जे प्रत्यां नास्ति । ६ यद्यद्द्रव्यं नान्यान्प्र°-इति प्रतौ । ७ तया तयं त° त । ८ सव्वं जे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ण सुवण्णादण्णं कुण्डलोति तं चेअ तं तमागारं ।
पत्तं तव्ववदेसं[२०७-द्वि०] लभति सरूवादभिण्णं[१] पि ॥३१५२॥

ण सुवण्णादण्णं । न सुवर्णादन्यः कुण्डलाद्याकारः, तदाकारत्वात्, कुण्डलाद्याकारस्वात्मवत् । अभिन्नमपि च तद्व्यपदेशं लभते सुवर्णस्याधा(का)र इति व्यपदेशत्वात्, कुण्डलस्याकार इति यथा ॥३१५२॥

जति वा दव्वादण्णे गुणाततो णूण सप्पतेसत्तं ।
होज्ज व रूवादीणं विभिण्णदेसोवलंभो वि ॥३१५३॥

जति वा दव्वादण्णे । नान्यद् द्रव्यं गुणेभ्यः, गुणदेशत्वात्, गुणस्वरूपवत् । गुणदेशं द्रव्यं पृथग्भूतस्वदेशत्वात्, गुणस्वरूपवत् । नान्यद् द्रव्यं गुणेभ्यः, गुणदेशादन्यत्रानुपलभ्यमानत्वाद्, गुणस्वरूपवत् ॥३१५३॥

जति पज्जवोवयारो लयप्पयासपरिणाममेत्तस्स ।
कीरति तं[२] णाम ण सो दव्वादत्थंतरब्भूतो ॥३१५४॥

जति पज्जवोवयारो । विचित्राः पर्यायाः, द्रव्यमेवैकम्, तत्प्रलयप्रकाशपरिणाममात्रत्वात्, बुद्बुदजलस्वरूपवत् । उपचारमात्रमेव द्रव्यपर्यायाः, प्रलयप्रकाशमात्रत्वात्, बुद्बुदजलवत् ॥३१५४॥

दव्वपरिणाममेत्तं पज्जाओ सो य ण खरसिंगस्स ।
तदपज्जवं ण णज्जति जं णाणं णेयविसयं ति ॥३१५५॥ दारं ॥

दव्वपरिणाममेत्तं । द्रव्यपरिणाममात्रं पर्यायः, ज्ञेयत्वाद् बुद्बुदवत् । अपर्यायं न ज्ञायते, अपरिणामत्वात्, खरशृङ्गवत् ॥ ॥३१५५॥

॥ किमिति द्वारं समाप्तम् ॥

कतिविधम् ? इति प्रस्तूयते—

सामाइयं च तिविधं सम्मत्त सुतं तधा चरित्तं च ।
दुविधं चेव चरित्तं [६]आकारमणेकारियं चेव ॥५७८॥३१५६[१०]॥
अज्झयणं पि य तिविधं सुत्ते अत्थे य तदुभए चेव ।
सेसेसु वि अज्झयणेसु होति एसेव णिज्जुत्ती ॥५७९॥३१५७[१०]॥

सामाइयं च गाहा । अज्झयणं पि य गाहा । सूत्रगाथाद्वयम् ॥३१५६-५७॥

१ °लाइं को । २ °णम्मि को, °न्नं ति हे । ३ °णादओ को हे । ४ नाना इं-प्रतौ । ५ °प्पसाय° को । ६ तन्ना° को हे । ७ पि को हे । ८ अगार° को हे दी म हा, अका° जे । ९ °णगारि° को हे दी म । १० दी प्रतौ इयं गाथा मूलभाष्यगता । निर्युक्तिगाथा इति हे प्रतौ ।

Jain Educationa International　　For Personal and Private Use Only　　www.jainelibrary.org

अस्य भाष्यम् —

**सम्मं णिसग्गतोऽधिगमतो य दसधा चे तप्पभेतातो ।**
**कारक रोचक दीवकमधवा खतिआतियं तिविधं ॥३१५८॥**

**सम्मं णिसग्गतो** गाहा । सम्मं सम्यग्दर्शनं द्विविधम्—निसर्गतश्चाधिगमतश्च अथवा तत्प्रभेदात्- अथवा निसर्गजमधिगमजं वा एकैकमौपशमिकम् सास्वादनम् क्षायोपशमिकम् वेदि(द)कम् क्षायिकमिति पञ्चधेति कृत्वा । अथवा त्रिविधं सम्यग्दर्शनं कारकम् रोचकम् दीपकमिति । अथवा क्षायिकम् क्षायोपशमिकम् औपशमिकमिति कारणत्रयात् त्रिविधम् ॥३१५८॥

**सुत्तत्थतदुभयाइं बहुधा वा सुत्तमक्खरमुताति ।**
**खइयाति तिधा सामाइयादि वा पंचधा चरणं ॥३१५९॥**

श्रुतसामायिकमध्ययनं तत् त्रिधा, सूत्रार्थतदुभयात्मकत्वात् । बहुधा वा सूत्रम् अक्षरादिभेदात् । चारित्रसामायिकं त्रिधा—क्षायिकम् क्षायोपशमिकम् औपशमिकम् चेति । पञ्चधा वा सामायिकम् छेदोपस्थाप्यम् परिहारविशुद्धिकम् सूक्ष्मसम्परायम् अथाख्यातमिति ॥३१५९॥

**दुविधतिविधादिणाऽणु[२०८-प्र०]व्वेदाति बहुहेगदेसचारित्तं ।**
**बीसुं सव्वाइं पुणो पज्जयतोऽणंतभेताइं ॥३१६०॥**

चारित्रद्वैविध्ये सर्वचारित्रमुक्तम् । देशचारित्रमनेकभेदं द्विविध—त्रिविधादिना प्रत्याख्यानभेदेन सप्तचत्वारिंशशतभेदम् । एतानि पुनः सम्यक्त्वादीनि सर्वाण्यपि विष्वक् स्वपर्यायगणनया अनन्तभेदानि ॥३१६०॥

**चतुवीसयत्थयादिसु सव्वज्झयणेसु चाणुयोगम्मि ।**
**एस च्चिय णिज्जुत्ती उद्देसादी णिरुत्तंन्ता ॥३१६१॥**

**चतुवीसयत्थयादिसु** । शेषेष्वध्ययनेष्विति- सूत्रगाथा(३१५७)- शेषाणि चतुर्विंशतिस्तवादीनि आवश्यकं प्रति । अथवा अनुयोगविषयेषु सर्वेष्वध्ययनेषु एषैव निर्युक्तिर्व्याख्याता उद्देशनिर्देशकानि(दि)निरुक्तपर्यवसाना ॥३१६१॥

॥ कतिविधमिति भेदाख्यानं गतम् ॥

१ व को, वि त, नास्ति हे प्रत्याम् । २ °सुयाइं को, °सुयाइ हे त । ३ °याइ हे । ४ °धा य सा० को हे । ५ °याइं को हे । ६ °व्वयाइं को हे । ७ °हुएग° हे । ८ उण को, पुण हे । ९ °उजा° हे । १० वाणु° को, °याणु° हे त । ११ °त्तंता हे ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

For Personal and Private Use Only